1655

अथ श्रीमदाचार्यदण्डिनः कृतौ काव्यादर्शे

प्रथमः परिच्छेदः

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां दीर्घं सर्वशुक्ला सरस्वती ॥ १ ॥

कदम्बतरुमण्डिते विहगवृन्दसंसेविते
कलिन्दतनयाश्रिते मुरलिकारवान्दोलिते ।
कदम्बितगवादृते बुधमनोज्ञवृन्दावने
लसन्तमतुलद्युतिं सुरवरं मुकुन्दं नुमः ॥ १ ॥

श्रुतिगम्यं स्वसंवेद्यं निरवद्यं रसात्मकम् ।
सदानन्दं परं ज्योतिस्तमोविच्छित्तयेस्तु नः ॥ २ ॥

विश्वस्मिन् प्रतिभा प्रभा विहरतः सूरेश्च सूर्यस्य च
लब्ध्वा ये सकलो जनः प्रतिदिनं मोदं परं गाहते ।
तत्तामुं प्रतिभावशाद्रचितवानाचार्यदण्डी वरं
काव्यादर्शमतस्तदुज्ज्वलकरी व्याख्या प्रभा तन्यते ॥ ३ ॥

इह खलु विविधशास्त्रप्रवीणः सहृदयधुरीणः कविप्रवर आचार्यो १२दण्डी काव्यलक्षणात्मकमिमं प्रबन्धमारभमाणो मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च मङ्गलयुक्ता यथा स्युः [म० भा० i. 1. 3] १५इति शिष्टानुशिष्टं सदाचारमनुसंदधानो ग्रन्थारम्भे समुचितेष्टदेवतां सरस्वतीं प्रार्थयते—चतुर्मुखेति । सरस्वती सरः सर्वविषयेषु प्रसरणं गतिरस्या अस्तीति व्युत्पत्त्या सरस्वती वागधिष्ठात्री देवता । मम मान-

i. 1—नित्यं for दीर्घं D, P, M, Rn, Ch, Cb;—शुभ्रा for शुक्ला Rn;—शुक्लरूपा for सर्वशुक्ला M.

O:S
Es-

15655 : પ્રથમઃ પરિચ્છેદઃ।

15656 : દ્વિતીયઃ પરિચ્છેદઃ।

पूर्वशास्त्राणि संहृत्य प्रयोगानुपलक्ष्य च ।
यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणम् ॥ २ ॥

१८से अन्तःकरणे सरोविशेषे च । दीर्घं चिरम् । रमतां विहरताम् । सर्वदा मम चेतसि स्मरणविषयीभूय विलसत्वित्यर्थः । सरस्वत्या माहात्म्योद्भावनाय तां विशिनष्टि—चतुर्मुखेति । चत्वारि मुखानि यस्य स २१चतुर्मुखो ब्रह्मा तस्य मुखान्येवाम्भोजानि तेषां वनं समूहः तत्र हंसवधूर्हंसीव । हंसी यथा कमलवने विहरति तथा चतुर्मुखमुखाम्भोजेषु सानन्दं विहरणशीला । अनेन सरस्वत्या वेदस्वरूपत्वं तेन च २४पाविज्यं सर्वार्थज्ञातृत्वं च सूचितम् । तस्याः स्वरूपावगमायाह—सर्वेति । सर्वतः स्वरूपतोऽर्थतश्च शुक्ला श्वेतवर्णा निर्दोषा च पदपदांशवाक्यार्थरसगतदोषरहितेत्यर्थः । तथा चास्याः श्वेतस्वरूपवर्णनं ब्रह्मवैवर्ते—

आविर्बभूव तत्पश्चान्मुखतः परमात्मनः ।
एका देवी शुक्लवर्णा वीणापुस्तकधारिणी ॥
कोटिपूर्णेन्दुशोभाढ्या शरत्पङ्कजलोचना । इति ।

३०केचित्तु सरस्वती मानसे रमतामित्यस्य वाक्यस्य मम सरस्वती शिष्याणां मानसे रमतामित्यध्याहारपूर्वकमर्थं निराहुः परं तादृशाध्याहारस्यानुचितत्वात् तन्न रुचिरम् । सर्वशुक्लेत्यत्र सति बाधके संको-३३चस्यादरणीयत्वेन सर्वशब्दस्य करचरणतलाधरनयनादिभिन्नाङ्गत्वपरत्वमुन्नेयमिति प्रेमचन्द्रतर्कवागीशाः । हंसी मानससरसि कमलवने च रमत इति तु प्रथितमेव । काव्यलक्षणप्रपञ्चात्मकेऽस्मिन् ग्रन्थ आदावेव ३६काव्यजीवातुभूतायाः सरस्वत्या आवाहनमतीव समुचितं मनोहरं च वर्तते ॥ १ ॥

प्रतिपाद्यविषयं विवक्षुराह—पूर्वशास्त्राणीति । पूर्वेषां शिलालिभरतप्रभृतीनां शास्त्राणि नाट्यसूत्रादीनि । संहृत्य समुच्चित्य संक्षिप्येति ३यावत् तानि सर्वाणि संगृह्येति भावः । तथा प्रयोगान् व्यासवाल्मीकि-

i. 2—सर्वं for पूर्वं Ch;—संगृह्य for संहृत्य M;—उपलभ्य for उपलक्ष्य D, P, Rn.

इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा ।
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते ॥ ३ ॥

प्रभृतिमहाकविप्रबन्धेषु स्थितान् उपलक्ष्य सूक्ष्मेक्षिकया निरूप्य । अनेन न केवलोयं प्रबन्धः शास्त्रनियमानुसारी अपि तु तत्प्रयोजनी-
६भूतकविप्रयोगानुसारीति सूचितम् । यथासामर्थ्यं स्वसामर्थ्यानुरूपम् विनयोक्तिरेषा । अस्माभिर्मया दण्डिना । काव्यलक्षणम् लक्ष्यते ज्ञायते स्वरूपमनेनेति लक्षणम् इतरव्यवच्छेदकः काव्यपर्यायवृत्तिरसामान्यो
९धर्मविशेष इत्यर्थः । क्रियते इष्टार्थव्यवच्छिन्ना पदावलिः [i. 10] इत्यादिना प्रतिपाद्यते । अनेनास्य ग्रन्थस्य प्रतिपाद्यं दर्शितम् । प्रयो-जनं चाग्रे [i. 3–9] एव स्फुटीभविष्यति । संबन्धस्तु ज्ञाप्यज्ञापक-
१२भावः । अधिकारी व्युत्पन्नः सहृदयः । एतेषां हि विषयादिचतुर्णां ग्रन्थारम्भे कथनमवश्यमपेक्ष्यते । यतः—

ज्ञातार्थं ज्ञातसंबन्धं श्रोतुं श्रोता प्रवर्तते ।
ग्रन्थादौ तेन वक्तव्यः संबन्धः सप्रयोजनः ॥ इति ।

१६अग्रे निरूप्यमाणानां गुणदोषादीनां तु प्रसङ्गानुरोधेनाङ्गतया संग्रहान्न तदर्थं प्रतिज्ञापेक्ष्यते ॥ २ ॥

ग्रन्थस्य प्रतिपाद्यमुक्त्वा संप्रति व्यवहारसिद्धिरूपं तत्प्रयोजनमन्व-यव्यतिरेकाभ्यां दर्शयति—इह शिष्टेति । इह विचित्रमनोहरेस्मिन् सं-
३सारे । शिष्टाः शब्दशास्त्रप्रवीणाः तैः पाणिनिवररुचिपतञ्जलिप्रभृतिभि-रनुशिष्टाः प्रकृतिप्रत्ययविभागादिभिर्व्युत्पादिताः साध्वसाधुज्ञापनेन शा-सिता वा तासां संस्कृतप्राकृतानाम् । तथा शिष्टानाम् एतद्व्यावशिष्टानां
६प्राकृतजनव्यवहारास्पदानां देशीनामित्यर्थः । इत्थं संस्कृतप्राकृतदेशी-भेदेन त्रिविधानां वाचामेव प्रसादेनानुग्रहेण । सर्वथा सर्वप्रकारेण । लोकयात्रा लोकानां देवादिपामरान्तानां प्राणिनां यात्रा व्यवहारः ।
९प्रवर्तते प्रकर्षेण चलति । तत्रोत्तमानां संस्कृतभाषया मध्यमानां प्राकृतभाषया अवराणां च देशीभाषयेति ज्ञेयम् ॥ ३ ॥

इदमन्धंतमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारान्न दीप्यते ॥ ४ ॥

आदिराजयशोबिम्बमादर्शं प्राप्य वाङ्मयम् ।
तेषामसंनिधानेपि न स्वयं पश्य नश्यति ॥ ५ ॥

वाग्व्यवहारस्यान्वयमुखेन लोकयात्रासाधनतामुपपाद्येदानीं व्यतिरेकमुखेन तामेव द्रढयति—इदमन्धमिति । शब्द आह्वयोभिधानं यस्य तच्छब्दाख्यं ज्योतिः अर्थप्रकाशकत्वाज्ज्योतीरूपम् । आसंसारात् संसरत्यनेनेति संसारः सृष्टिः सृष्टिकालमारभ्येत्यर्थः । यदि न दीप्यते न प्रकाशेत । तर्हि इदं भुवनत्रयं स्वर्गमृत्युपातालरूपं विश्वं लक्षणया तदन्तर्गतं प्राणिजातम् । कृत्स्नं निरवशेषम् । अन्धंतमो गाढान्धकारव्याप्तमिव जायेत । ध्वान्ते गाढेन्धतमसम् इत्यमरः । यथा हि सूर्यादिज्योतिषामभावे तमसावस्कन्दिताः पदार्था विलुप्ता इव भवन्ति तथा वाचामभावे सर्वेप्यैहिकपारलौकिका व्यवहारा विलुप्ता भवेयुरित्यर्थः ॥ ४ ॥

इत्थं वाचां सामान्यतो व्यवहारोपयोगित्वं प्रदर्श्य तद्विशेषीभूतस्य गुणालंकारादिपरिष्कृतस्य काव्यसंज्ञकस्य वाङ्मयस्य माहात्म्यमिदानीं दर्शयति—आदिराजेति । आदिभूता ये राजानो मनुपृथुप्रभृतयः अथवा आदिराजाः प्रथमकालीना राजान इक्ष्वाकुमान्धातृदिलीपप्रभृतयः तेषां यशोरूपं बिम्बं कर्तृ । वाङ्मयं सत्कविप्रतिभाप्रसूतं काव्यम् तद्रूपमादर्शं दर्पणं प्राप्य तत्र प्रतिबिम्बितं भूत्वा । तेषामादिनृपाणाम् । असंनिधानेपि असंनिहितेष्वपि तेषु राजसु । स्वयं न नश्यति न विच्छिद्यते । पश्य आलोकयेति शिष्यं प्रति साश्चर्योक्तिः । अयं भावः । राज्ञां यशस्तेषां स्थितिकाले वक्तृश्रोत्रादिपरंपरया तत्प्रजासु बहुलीभवदपि तच्छासनकालादूर्ध्वं न केनापि गीयते । अत एव च यथा ते राजानस्तथा तद्यशोपि विस्मृतिपथं प्रयाति । यदि पुनस्तदेव यशः कविप्रतिभोपगृहीतं सत् काव्यविशेषे प्रतिबिम्बितं भवति तदा दिवं यातेष्वपि तेषु राजसु तत्प्रजास्वप्रचारतां गतमपि बिम्बस्थानीयं तद्य-

i. 4—संसारं for संसारात् P, Rn.

i. 5—स्वयं पश्य न for न स्वयं पश्य D,

गौर्गौः कामदुघा सम्यक् प्रयुक्ता स्मर्यते बुधैः ।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति ॥ ६ ॥

शः वाङ्मयादर्शे प्रतिबिम्बरूपेण चिरस्थायि भवति । लौकि-
१५कादर्शे बिम्बाभावे प्रतिबिम्बस्य स्थितिर्न दृश्यते । अत्र तु दृश्यत इति वाङ्मयादर्शस्य ततो विस्मापको विशेषः । एतेनातीतनृपाणां यशः-ख्यापनं काव्यस्य प्रयोजनमित्युक्तं भवति । तेन चात्मनश्छात्राणां च
१८तच्चरितज्ञानमित्यपि फलान्तरं ज्ञेयम् । इदमुपलक्षणम् । काव्यनिर्मा-तुरन्यान्यपि फलानि सन्ति । यथोक्तं प्रकाशकृता (i. 2)—

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे ॥

२२किं बहुना—

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
प्रीतिं करोति कीर्तिं च साधुकाव्यनिबन्धनम् ॥

२५इतिभामहोक्त(i. 2)दिशा सर्वेपि पुरुषार्थाः सत्काव्यस्य निषेवणात् संभवन्ति ॥ ९ ॥

एवं काव्यस्य प्रयोजनमुक्त्वेदानीं तस्य निर्दोषतायां यतनीयमिति कथयति—गौर्गौरिति । गौर्वाणी । स्वर्गेपुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले ।
३लक्ष्यदृष्ट्या स्त्रियां पुंसि गौरित्यमरः (iii. 25) । सम्यक् प्रयुक्ता दोषशून्यतया गुणालंकारपरिपूर्णतया चोपयुक्ता । बुधैः सूरिभिः । कामदुघा कामान् दुग्धे सा कामदुघा । इगुपधज्ञाप्रीकिरः कः (पा. iii.1. 135)
६इति कः पश्चाट्टाप् । कामपूरिकेत्यर्थः । एतादृशी गौः स्मर्यते कविभिर्ज्ञायते । तथा च श्रुतिः—एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति (कैय्यटप्रदीप 9to I. 10, वार्तिक 6) इति । दुष्प्रयोगे दोषमाह । सैव गौः दुष्प्रयुक्ता स्वरवर्णमात्रासंनिधिसंदर्भसंकेतादिकमविगणय्योच्चारिता । प्र-योक्तुर्दुष्प्रयोगशीलस्य कवेर्वक्तुर्वा । गोत्वं बलीवर्दत्वं मौर्ख्यमिति भावः ।
१२शंसति प्रथयति । उक्तं च पातञ्जलमहाभाष्ये—वाग्योगविद्दुष्यति चाप-शब्दैः (I. 2) इति । अनेन दोषाः परिहरणीया गुणालंकाराश्च समावर्जनीया इति स्पष्टं भवति ॥ ६ ॥

तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथंचन ।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् ॥ ७ ॥
गुणदोषानशास्त्रज्ञः कथं विभजते नरः ।
किमन्धस्याधिकारोस्ति रूपभेदोपलब्धिषु ॥ ८ ॥

इदानीं काव्ये स्वल्पोपि दोषः परिहरणीय इति दृष्टान्तपूर्वकं निवेदयति—तदल्पमिति । तत् तस्माद्दोषस्योपहासजनकत्वान्निषिद्धत्वाच्च । ३काव्येल्पमपि पदपदांशगतमपि । दुष्टं दोषं भावे क्तः । कथंचन कथमपि नोपेक्ष्यं न सोढव्यम् सर्वथा तत्परिहरणे यतितव्यमिति भावः । ननु स्वल्पो दोषो गुणसंनिपाते निमज्जतीति न तत्परिहरणमत्यावश्य- ६कमिति चेन्न । सुन्दरमपि निसर्गरमणीयं तथा महार्घाभरणवस्त्रादिना परिष्कृतमपि वपुः शरीरम् । एकेन केवलेन अथवा एकावयवस्थितेन । श्वित्रेण श्वेतकुष्टेन । दुर्भगं सौभाग्यहीनं स्यात् । यथा हि सौन्दर्यसमृद्धेपि ९वपुषि श्वित्रं नेत्रोद्वेगजनकं तथा गुणपरिपूर्णमपि दोषलवयुतं काव्यं सहृदयाशिरःसंतापकरमेवेत्यर्थः ॥ ७ ॥

दोषपरित्यागेन गुणस्वीकारः सूचितो भवति । गुणदोषाणां च हेयोपादेयताज्ञापनार्थं शास्त्रप्रवृत्तिरित्याह—गुणदोषानिति । अशास्त्रज्ञः ३शास्त्रं जानातीति शास्त्रज्ञस्तद्विपरीतः साहित्यशास्त्रपरिचयशून्य इत्यर्थः । नरो व्युत्पित्सुः पुरुषः । गुणा उपादेयधर्माः श्लेषः प्रसादः समता [i. 41] इत्यादिनाग्रे प्रोक्ताः । अनुप्रासोपमादयोलं- ६कारा अपि काव्यशोभाजनकत्वादुपादेया एव । अतो गुणशब्देन तेषामपि संग्रहः । दोषाः पुनर्हेयधर्माः अपार्थं व्यर्थमेकार्थं [iii. 125] इत्यादिनाग्रे प्रपञ्चिताः । तान् गुणदोषान् अशास्त्रज्ञः कथं विभजते इमे गुणा ९इमे दोषा इति कथं जानीयादिति भावः । काव्यतत्त्वानभिज्ञः काव्यस्य शब्दार्थमात्रं कदाचिज्जानीयान्न तु काव्यमीमांसाकुशलवत् तद्रहस्यमवगच्छेदित्यर्थः । अमुमेवार्थं दृष्टान्तेन विशदयति किमिति । अन्धस्य १२चक्षुर्विकलस्य । रूपभेदोपलब्धिषु रूपं द्रव्यवर्तिगुणविशेषस्तस्य भेदाः

i. 8—गुणदोषौ for गुणदोषान् D, M, Ch;—अशास्त्रज्ञाः for अशास्त्रज्ञः M.

अतः प्रजानां व्युत्पत्तिमभिसंधाय सूरयः ।
वाचां विचित्रमार्गाणां निबबन्धुः क्रियाविधिम् ॥ ९ ॥

तैः शरीरं च

श्वेतरक्तनीलादयस्तेषामुपलब्धयो ज्ञानानि तेषु । किमधिकारोस्ति योग्यता वर्तते नैवेत्यर्थः । एवमेव साहित्यशास्त्रानभिज्ञस्य गुणदोषविभजनेधिकारो नास्तीति भावः । अतस्तदधिकारसिद्धये साहित्यशास्त्रमवश्यमारम्भणीयमिति सिद्धम् ॥ ८ ॥

साहित्यशास्त्रारम्भविचारमुपसंहरति—अत इति । अतः गुणदोषाकलनपूर्वककाव्यरसास्वादस्य साहित्यशास्त्राधीनत्वात् । सूरयो भरतादयो विपश्चितः । प्रजानां काव्यरसिकानाम् । व्युत्पत्तिं काव्यरचनाकौशल्यम् । अथवा प्रजानां व्युत्पित्सूनां व्युत्पत्तिं वाग्व्यवहारनैपुण्यं च । अभिसंधायोद्दिश्य । एते वाग्व्यवहारनिपुणा भवेयुरिति तद्व्युत्पत्तिमभिसंधायेत्यर्थः । विचित्रमार्गाणां विचित्रा मनोहरा विविधा वा मार्गाः शब्दार्थालंकारभेदरूपा वैदर्भीगौडीयादिरीतिरूपा वा रचनाप्रकारा यासां तासाम् । वाचां काव्यवाणीनाम् । क्रियाविधिं क्रियायै काव्यरचनार्थं विधिं विधानं धर्मिधर्मादिविभागेन निरूपणम् लक्ष्यलक्षणादिना कथनमित्यर्थः । निबबन्धुः शास्त्रपरिभाषया विरचयामासुः । कीदृशं काव्यनिर्माणं कथं च तत्र यतितव्यमिति सर्वं सम्यक् शास्त्रपरिभाषया निरूपयांमासुरित्यर्थः । एतेन पूर्वसूरिणामनुसरणशीलस्य मम प्रजाव्युत्पत्त्यर्थमेवायं प्रयत्न इति सूचितं भवति । तथा च ग्रन्थस्यास्येदमेव प्रयोजनम् । काव्यज्ञानस्य प्रयोजनं तु कविबोद्धृगतं यशःप्रभृति पूर्ववर्णितमवगंतव्यम् ॥ ९ ॥

धर्मिणि ज्ञाते धर्माणां युक्तायुक्तताया आकलनं सुकरं भवतीति प्रथमं धर्मिस्वरूपं निर्णयति—तैः शरीरं च काव्यानामिति । अत्र चकारो भिन्नक्रमः । तैश्च पूर्वसूरिभिः काव्यानाम् इष्टार्थवाक्यानाम् । शरीरम् आत्मभूतेष्टार्थाश्रयो देहः । अलंकाराः शरीरशोभावहाः अनुप्रासोपमादयः शब्दार्थालंकाराश्च । दर्शिताः विवेचिताः । चकारोनुक्तसमु-

i. 9—पदानां for प्रजानां D.

काव्यानामलंकाराश्च

६च्चयार्थः । तेन दोषाणामपि संग्रहः । तेषामपि ग्रन्थान्ते निरूपितत्वात् । वैदर्भरीतेः प्राणत्वेनाग्रे [i.41] ग्रन्थकृतोक्तानां श्लेषप्रसादादीनां गुणानां तु शरीरशब्देनैव संग्रहः । यतः वैदर्भरीतिर्नाम पदावलीसंस्थान-
९विशेषः सैव पदावली शरीरम् अतो गुणा न शरीरतो भिन्ना इति नोद्देशवाक्ये पृथक्त्वेन गणिताः । अत एव गुणदोषयोरग्रे निरूपणात् तेषामुद्देशवाक्ये परिगणनाभावान्न्यूनतेति शङ्का निरस्ता । काव्यशरीरं लक्षयति
१२शरीरं तावदिति । तावदिति वाक्यालंकारे । इष्टार्थव्यवच्छिन्ना इष्टाः सरसमनोहरतया वर्णयितुमभिलषिताः ये अर्थाः कविप्रतिभोल्लासविषयीभूताः सुन्दराः पदार्थाः तैर्व्यवच्छिन्ना विशेषेण अवच्छिन्ना परि-
१५पूर्णा चमत्कृतिबहुलेत्यर्थः । पदावली पदसमूहः । शरीरं काव्यशरीरमितिभावः । अत्र पदावली साकाङ्क्षा एव ग्राह्या । तस्या एव इष्टार्थव्यवच्छिन्नतार्हत्वात् । इष्टत्वं च साहित्यशास्त्रे चमत्कारपूर्वकवर्ण-
१८नाभिलाषः । चमत्कारश्च लोकोत्तराह्लादः । आह्लादगतलोकोत्तरत्वं च कविप्रतिभया अलौकिकसामग्रीविशेषेण संपादितः सुखत्वव्याप्यः अनुभवसाक्षिको जातिविशेषः । तेन पुत्रस्ते जातः शत्रवस्ते पराभूता इति
२१वाक्यार्थजन्यज्ञानस्य न काव्यत्वम् । तस्य लोकोत्तराह्लादजनकत्वाभावात् । तादृशाह्लादं प्रति शब्दार्थानां कारणता च व्यङ्ग्यविशेषेण दोषाभावविशिष्टगुणालंकारसमुद्भूतेन सौन्दर्येण च संभवति । अत एव
२४च काव्यस्य भेदत्रयं भवति । यत्र वाच्यचमत्कृतेः व्यङ्ग्यचमत्कृतिः प्रधानतया प्रस्फुरति तत्र ध्वनिकाव्यव्यवहारः । यत्र व्यङ्ग्यचमत्कृतिरङ्गीभूता वाच्यचमत्कृतिकुक्षिनिलीना इव भासते तत्र गुणीभूत-
२७व्यङ्ग्यकाव्यमितिव्यवहारः । यत्र च व्यङ्ग्यशून्या केवलं वाच्यचमत्कृतिर्भवति तत्र चित्रकाव्यमिति व्यपदेशः । एवं सामान्यतः काव्यस्य त्रयो भेदा अवगंतव्याः ॥ केचित्तु (भामह i.14)—

सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छत्यलंकृतिम् ।
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी ॥

३२इति व्यङ्ग्यचमत्कृतिनिरपेक्षं गुणालंकारोपस्कृतं शब्दमेव काव्यं वदन्ति ।

i. 10—अलंकारश्च for अलंकाराश्च N, M, D, Rn.

दर्शिताः ।

३३तन्मतपरिग्रहाय लक्षणे इष्टेति पदं विभज्य अर्थव्यवच्छिन्ना इति विशेषणविशिष्टेन पदावलीपदेन तद्विशेषणतया योजनीयम् । एवं सति रूपी घटोनित्यः इत्यत्र उभयो रूपघटयोरनित्यत्वसंबन्धवदत्र अर्थे पदे च इष्टेति विशेषणस्य
३६संबन्धो भवति । तेन इष्टार्थं तथा इष्टशब्दं च काव्यमिति उभयोरपि संग्रहः॥
चित्रकाव्यं पुनः शब्दचित्रमर्थचित्रमिति द्विविधम् । शब्दचित्रमनुप्रासयमकश्लेषादिकम् । अर्थचित्रं च उपमारूपकादिकम् । तत्र अर्थः वाच्यलक्ष्य-
३९व्यङ्ग्यभेदेन त्रिविधः । तत्र अभिधाशक्त्या प्रतीतो वाच्यः । लक्षणयोपस्थाप्यो लक्ष्यः । व्यञ्जनया प्रतीतिपदवीमारूढो व्यङ्ग्यः । व्यङ्ग्यार्थोपि वस्त्वलंकाररत्यादिभेदात् त्रिविधः । वस्त्वलंकाररूपो व्यङ्ग्यः संलक्ष्यक्रमः।
४२रत्यादिव्यङ्ग्यस्तु असंलक्ष्यक्रमः । विस्तरस्तु ध्वन्यालोकलोचने काव्यप्रकाशचतुर्थोल्लासादौ च द्रष्टव्यः । एवं च आचार्यदण्डिनो मते रमणीयार्थोपस्कृतं सुन्दरं वाक्यमेव काव्यमिति निष्पन्नम् । तत्र वाक्यं पदकदम्बः
४५पदानि च समासाङ्गसंबन्धशून्यानि सुप्तिङन्तानि ॥
अवेदमवधेयम् । काव्यशब्दस्य वाच्यं शब्दार्थयुगलं रमणीयार्थप्रतिपादकः केवलः शब्दो वा इति पक्षद्वयम् । तत्राद्यः पक्षः शब्दार्थौ
४८सहितं काव्यं गद्यं पद्यं च तद्द्विधा इति भामहेन (i. 16) काव्यशब्दोयं गुणालंकारसंस्कृतयोः शब्दार्थयोर्वर्तते इति वामनेन (वृ० i. 1) शब्दार्थौ काव्यम् इति रुद्रटेन (ii. 1) तददोषौ शब्दार्थौ सगुणावनलंकृ-
५१ती पुनः क्वापि इति मम्मटेन (i. 4) अदोषौ सगुणौ सालंकारौ च शब्दार्थौ काव्यम् इति हेमचन्द्रेण (P.16) शब्दार्थौ निर्दोषौ सगुणौ प्रायः सालंकारौ च काव्यम् इति वाग्भटेन (P.14) गुणालंकारसहितौ शब्दार्थौ दोष-
५४वर्जितौ इति प्रतापरुद्रे विद्यानाथेन (P. 42) शब्दार्थौ वपुरस्य तत्त्व विबुधैरात्माम्यधायि ध्वनिः इति एकावल्यां विद्याधरेण (i.13) इत्येवमादिभिः साहित्यकोविदैरङ्गीकृतो वर्तते । एतेषामयमाशयः । काव्ये
५७ह्यार्था रमणीयशब्दाश्चापेक्ष्यन्ते । तैरेव शास्त्रविमुखानां मृदुमतीनां राजपुत्रादीनां सन्मार्गोन्मुखीकरणं संभवति । अतः काव्यफलनिष्पत्तावुभयोः शब्दार्थयोः समप्राधान्याच्छब्दार्थयुगलमेव काव्यपदवाच्यं भवितुमर्हति

---

i. 10—दर्शितः for दर्शिताः N, M, D, Rn.

शरीरं

६०इति । परमेतत् काव्येतिपदस्य वाच्यार्थे शब्दस्य प्राधान्यं वदन्तो न स-
हन्ते । ते इमं पक्षमेवं दूषयन्ति । तथाहि काव्यमुच्चैः पठ्यते काव्यादर्थोवग-
म्यते काव्यं श्रुतमर्थो न ज्ञातः इत्यादिविश्वजनीनव्यवहाराच्छब्दार्थयुगलं
६३काव्यशब्दवाच्यं भवितुं नार्हति प्रत्युत वाग्व्यवहारे शब्दस्यैव प्राधान्या-
दर्थोपस्कृतः शब्द एव काव्यशब्दाभिधेयो भवितुमर्हति । काव्यमुच्चैः
पठ्यते इत्यादिवाक्येषु लक्षणयोपपत्तिस्तु न युक्ता । शब्दार्थयुगले
६६भवदभिप्रेतायाः काव्यपदशक्तेः स्वीकारे मानाभावात् । अर्थनिश्चयं
विना लक्षणाया अप्रवृत्तेः । यतः मुख्यार्थहतिर्लक्षणाबीजम् । सा
च वाच्यार्थनिश्चयं विना नोद्भवति । अतः काव्यशब्दे परामिमत-
६९वाच्यार्थस्यानिश्चयान्नात्र लक्षणा संभवति । किंच वेदपुराणादिसंज्ञा
शब्देषु शब्दस्यैव प्राधान्यं दृश्यते । सैव सरणिरत्रापि अङ्गीकर्तव्या ।
अन्यच्च काव्यपदप्रवृत्तिनिमित्तं शब्दार्थयोर्व्यासक्तं प्रत्येकपर्यासं वा ।
७२नाद्यः । एको न द्वाविति व्यवहारस्येव श्लोकवाक्यं न काव्यमिति व्यवहा-
रस्यापत्तेः । नापि द्वितीयः । एकस्मिन्नेव पद्ये काव्यद्वयव्यवहारापत्तेः ।
तस्मात् काव्यपदवाच्यं न शब्दार्थयुगलं तर्हि रमणीयार्थप्रतिपादकः
७५शब्द एवेति ॥ अत्र प्रकाशानुसारिभिरेवं समाधायि । काव्यं पठितं
श्रुतं काव्यं बुद्धं काव्यमिति उभयविधव्यवहारदर्शनात् काव्यपदप्रवृत्ति-
निमित्तं व्यासज्यवृत्ति (शब्दार्थोभयपर्यासवृत्ति) स्वीक्रियते [काव्य-
७८शब्दवाच्यं शब्दार्थयुगलमिति भावः]। तत्र प्रयोगानुरोधेन क्वचिच्छब्द-
विशिष्टोर्थः काव्यं क्वचिदर्थविशिष्टः शब्दः काव्यमिति विवेकः ।
तथा च रसार्थालंकारप्रधानप्रबन्धस्य प्रथमपक्षेण काव्यत्वसिद्धिः ।
८१शब्दालंकारप्रधानप्रबन्धस्य च द्वितीयपक्षेण तत्त्वसिद्धिः । काव्यमुच्चैः
पठ्यते इत्यादिप्रयोगेषु लक्षणया शब्दमात्रे काव्यपदप्रवृत्तिः ।
काव्यं बुद्धम् इत्यादिषु लक्षणया अर्थमात्रे काव्यशब्दप्रवृत्तिः । एवं
८४लक्षणयान्यतरस्मिन्नपि तत्त्वादेको न द्वौ इतिवत् श्लोकवाक्यं न काव्य-
मिति व्यवहारस्य नापत्तिरिति ॥ इदमत्र विमर्शनीयम् । वाग्व्यवहारे
सामान्यतः शब्दस्य अर्थापेक्षया अधिकदेशवृत्तित्वादुत्सर्गतः शब्द-
८७प्राधान्य एव काव्यशब्दप्रवृत्तिर्युक्ता । तत्र समकक्षतया अर्थनिवेशनं

तावदिष्टार्थ—

शब्दविषयसंकोचकरं न युक्तम् । निवेशे तु वेदपुराणादिसंज्ञास्वपि विनिगमनाभावादर्थनिवेशोपरिहार्यः स्यात् । तेन च विनार्थज्ञानं वेदः
९०पठितः इत्यादिसार्वजनीनव्यवहारस्यानुपपत्तिः । यथा च वेदशब्दवाच्यं न शब्दार्थयुगलं किंतु शब्दविशेष एव तद्वदत्रापि काव्यशब्दवाच्यः अर्थोपस्कृतशब्दविशेष एव । काव्यं बुद्धम् इत्येवमादयः
९३प्रयोगास्तु मधुरवर्णानुप्रासजन्यश्रुतिचमत्कारानुभवेन सुस्था भवेयुः । को हि नाम रसिकः—

शिञ्जानमञ्जुमञ्जीराश्चारुकाञ्चनकाञ्चयः ।
कङ्कणाङ्कभुजा भान्ति जितानङ्ग तवाङ्गनाः ॥

९७अथवा—

मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ॥

इत्येवमादिषु केवलकोमलानुप्राससमहिम्नैव साधारणीभूतमर्थमविगणय्य इदं काव्यमिति न बुध्येत । अन्यच्च स्त्री ब्रूते शुष्को वृक्षस्तिष्ठत्यग्रे इत्ये-
१०२वमादि न काव्यम् । कामिनी व्याहरति नीरसतरुरिह विलसति पुरतः इत्येवमादीनि तदर्थकान्येव वाक्यानि तु काव्यम् इति सर्वसहृदयानुभवसिद्धम् । तेन च काव्येतिपदस्याभिधेये शब्दस्यैव प्राधान्यमिति
१०५निष्पद्यते । नार्थशब्दयुगलस्य न वा केवलार्थस्य । अत एव रमणीयार्थप्रतिपादकः शब्द एव काव्यपदवाच्यम् । एतदेव च आचार्यदण्डिनोभिप्रेतं काव्यलक्षणमिति प्रागुलक्षणविचारे दर्शितमेव ॥
१०८एतावत्पर्यन्तं प्राचीनार्वाचीनानां काव्यलक्षणस्योद्देश्यविषये विचारः प्रदर्शितः । अतः परं पूर्वोक्तलक्षणस्योद्देश्यविशेषणविषये किंचिद्विमृशामः । तत्र तावदुद्देश्यविशेषणानि निर्दोषौ सगुणौ सालंकारौ
१११चेति त्रीणि सन्ति । तत्र निर्दोषौ इत्यनेन दोषशून्यशब्दार्थयोः काव्यत्वस्वीकारे न्यक्कारो ह्ययमेव इत्यस्य विधेयाविमर्शदोषदुष्टतया काव्यत्वं न स्यात् । परमयं श्लोकः लक्षणे निर्दोषौ इति विशेषणं
११४निवेशयद्भिः प्रकाशकारादिभिः ध्वनित्वेनोत्तमकाव्यतयाङ्गीकृतो वर्तते । अतः निर्दोषौ इति विशेषणनिवेशे अव्याप्तिदोषः । अन्यच्च अदोषौ

व्यवच्छिन्ना

इति विशेषणत्वे काव्यशब्दो विरलविषयो निर्विषयो वा स्यात्। सर्वथा
११७निर्दोषस्य काव्यस्यात्यन्तासंभवात्। दुष्टं काव्यम् इति व्यवहारस्य
चानुपपत्तिः स्यात् ॥ सगुणौ इत्यपि विशेषणमयुक्तमेव। यतः तद-
दोषौ शब्दार्थौ इति लक्षणं कुर्वद्भिः प्रकाशकारादिभिर्गुणानामात्म-
१२०भूतरसैकधर्मत्वस्याङ्गीकारात्। शब्दार्थयोस्तत्संबन्धस्य वक्तुमशक्य-
त्वात्। नहि शौर्यादिवदात्मधर्माणां गुणानां शरीरघटकत्वमुपपद्यते।
ननु सगुणौ इति विशेषणं गुणत्वान्यथानुपपत्त्या सरसौ इत्यर्थ-
१२३तात्पर्यकमिति चेत् तन्न समञ्जसम्। नहि प्राणिमन्तो देशा इति वक्तव्ये
शौर्यादिमन्तो देशा इति कोपि ब्रूयात्। तथैव सरसौ इति वक्तव्ये
सगुणौ इत्युक्तिरसमञ्जसैव। अपरं च उदितं मण्डलं विधोः इति-
१२६काव्ये गतोस्तमर्कः इत्यादौ च गुणशून्यत्वेनाव्याप्तिः स्यात्। काव्य-
जीवितचमत्कारस्य तु अत्र विद्यमानत्वान्नेदं काव्यमिति वक्तुं न शक्यते।
अतः सगुणौ इति विशेषणे अव्याप्तिदोषस्य प्रादुर्भावात् तन्न युक्तम् ॥
१२९सालंकारौ इतीदमपि विशेषणमनुपपन्नं यतो हारादिवच्छरीरोपस्कारा-
णामलंकाराणां तद्घटकत्वस्यायुक्तत्वात्। तथा च शब्दार्थौ इत्यस्य
त्रीण्यपि विशेषणान्यनुपपन्नान्ययुक्तानि चेति ज्ञेयम् ॥ आनन्दवर्धनेन
१३२काव्यस्यात्मा ध्वनिः इति ध्वनियुक्तौ शब्दार्थौ काव्यस्वरूपेण वर्णितौ।
तत्र ध्वनिशब्देन वस्त्वलंकाररसादिरूपेण त्रिविधो ध्वनिरपेक्ष्यते अथवा
केवलं रसस्वरूपः अपेक्ष्यते। प्रथमार्थस्वीकारे प्रहेलिकादावतिव्याप्तिः।
१३५तत्र ध्वनिनैव वस्तुनोवगमः। केवलरसस्वीकारेप्यापतन्तीमनुपपत्तिमग्रे
दर्शयामः ॥

एतावत्पर्यन्तं शब्दार्थौ काव्यम् इति लक्षणे शब्दार्थौ इत्यस्य विशे-
१३८प्यस्य विशेषणविषये विचारः प्रदर्शितः। इदानीं विशिष्टः शब्दः काव्यम्
इति पक्षे स्वीकृते शब्दस्य विशेषणविषये विचारं कुर्मः। तत्र काव्यं रसा-
दिमद्वाक्यं श्रुतं सुखविशेषकृत् इति अलंकारशेखरे माणिक्यचन्द्रेण
१४१(p.2) वाक्यं रसादिमत् काव्यम् इति साहित्यदर्पणे विश्वनाथेन (i. 3) च
वाक्यस्य रसादिमत् इति विशेषणं काव्यरूपावगमाय निवेशितम् परं तन्न
विचारक्षमम्। यतो रसादिमद्वाक्यस्यैव काव्यत्वे वस्त्वलंकारप्रधानानां

पदावली ॥ १० ॥

पद्यं गद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम् ।

१४४काव्यानामकाव्यत्वापत्तिः । महाकविभिस्तेषां काव्यत्वेन स्वीकारान्न तानि काव्यानीत्यापादनं नोचितम् । तथा च जलप्रवाहवेगनिपतनोत्पतनभ्रमणानि कविभिर्वर्णितानि कपिबालादिविलसितानि च काव्यरूपाण्येव ।
१४७तत्र रसात्मकं वाक्यं काव्यम् इति लक्षणे काव्यशब्दस्याप्रवृत्त्याव्याप्तिदोषो दुर्वारः स्यात् । शब्दार्थयोः ध्वनिकारोक्तदिशा ध्वनिसहितौ इति विशेषणे इयमेवाव्याप्तिर्बोद्धव्या । ननु वस्त्वलंकारप्रधानेपि तत्तत्प्रबन्धे यथा कथंचि-
१५०दस्त्येव रसस्पर्श इति चेन्न । तादृशरसस्पर्शस्य गौश्चलति मृगो धावति इत्यादौ अतिप्रसक्तत्वेनाप्रयोजकत्वं स्फुटमेव । यतः अर्थमात्रस्य विभावानुभावव्यभिचार्यन्यतमत्वाद्रसस्पर्शो वर्तत एव । तस्माद्
१५३रसात्मकमिति विशेषणं न युक्तम् । केवलं रमणीयार्थप्रतिपादकः शब्दः काव्यम् इत्येव लक्षणं निर्दोषं काव्यशब्दवाच्यसकलविषयसंग्राहकं चेति ज्ञेयम् । इदमेव च मतं दण्ड्यनुकूलं स्मृत्यनुगृहीतं च । तदुक्तमाद्ये—

संक्षेपाद्वाक्यमिष्टार्थव्यवच्छिन्ना पदावली ।
काव्यं स्फुरदलंकारं गुणवद्दोषवर्जितम् ॥ इति (337.6–7) ।

अत्र इष्टार्थव्यवच्छिन्ना पदावली काव्यम् इत्येव लक्षणम् । स्फुरद्-
१५९लंकारं गुणवद्दोषवर्जितम् इत्यादि प्राशस्त्यबोधकमिति ज्ञेयम् । विशेषविचारस्तु विश्वनाथजगन्नाथादिभिः स्वस्वग्रन्थे प्रदर्शितस्तत एवावगन्तव्य इत्यलं पल्लवितेन ॥ १० ॥

इदानीं पद्यगद्यमिश्रप्रकारेण शरीरस्य त्रैविध्यं दर्शयति—पद्यमिति । तत् काव्यशरीरम् । पदं चरणमर्हतीति पद्यं श्लोकबन्धः । छन्दोबद्धपदं
३पद्यमिति साहित्यदर्पणे (vi. 314) । तच्च मालिनीहरिणीस्रग्धरादिविविधरूपम् । गद्यते छन्दसा विना केवलशब्दप्रबन्धैरेव विरच्यते तद्गद्यम् । तच्चतुर्विधं यथोक्तं दर्पणे (vi. 330f.)—

वृत्तगन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च ।
भवेदुत्कलिकाप्रायं चूर्णकं च चतुर्विधम् ॥

पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ॥ ११ ॥

छन्दोविचित्यां सकलस्तत्प्रबन्धो निदर्शितः ।

एतेषां लक्षणानि च—

आद्यं समासरहितं वृत्तभागयुतं परम् ।
अन्यद्दीर्घसमासाढ्यं तुर्यं चाल्पसमासकम् ॥ इति ।

मिश्रम् गद्यपद्योभयमयं चम्पूपञ्चतन्त्रादिकम् । एवं त्रिविधप्रकारकमेव व्यवस्थितम् प्राचीनसूरिभिर्निरूपितम् । एवकारो भेदान्तरव्यवच्छेदार्थः । तेषु पद्यं निर्वक्ति—पद्यं चतुष्पदीति । चतुर्णां पदानां समाहारश्चतुष्पदी । पादचतुष्टयात्मकं पद्यमित्यर्थः । द्वित्रिपादपरिमितानां छन्दसां वेदेष्वेव दर्शनाच्चतुष्पदीति कथनं लौकिकवृत्तानुरोधेनेति केचित् । अन्ये तु चतुष्पदीत्युपलक्षणमेतत् । तेन पञ्चषट्पादानां वृत्तानामपि संग्रहः । तच्च पद्यं वृत्तं जातिरिति द्विधा द्विप्रकारकम् । तत्र अक्षरसंख्यातं वृत्तं मात्रासंख्याता जातिः । तदुक्तं छन्दोमञ्जर्याम्

पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत् ॥ इति ।

तत्र समार्धसमविषमाणि वृत्तानि क्रमेण स्रग्धरापुष्पिताग्रावैतालीयादीनि । आर्यागीतीत्यादयो जातयश्च ॥ ११ ॥

वृत्तभेदानां बाहुल्यान्नेह तन्निरूपणं क्रियते छन्दःशास्त्रादेव तदवगन्तव्यमित्याह—छन्दोविचित्यामिति । छन्दांसि विचीयन्ते निरूप्यन्ते यत्र सा छन्दोविचितिः पिङ्गलमुनिकृतं छन्दःशास्त्रम् । छन्दोविचितिर्नाम दण्ड्याचार्यकृतश्छन्दोग्रन्थविशेष इति केचित् । तस्यां सकलस्तयोर्वृत्तजात्योः प्रबन्धः रचनाप्रकारः । निदर्शितः उक्था अत्युक्था इत्यादिप्रकारेण समार्धसमविषमभेदेन च विविधानि वृत्तानि तथा आर्यागी-

i. 11—छन्दो for वृत्तं interlinear variant in M.

i. 12—विचित्या for विचित्यां M;—छन्दःशास्त्रेण for छन्दोविचित्यां interlinear variant in M;—प्रपञ्चो for प्रबन्धो D, P, R, Ch, Ca.

सा विद्या नौर्विविक्षूणां गम्भीरं काव्यसागरम् ॥ १२ ॥

मुक्तकं कुलकं कोशः संघात इति तादृशः ।

त्यादयो जातयश्च निरूपिता इत्यर्थः। अतश्छन्दोज्ञानार्थं स एव ग्रन्थः परिशीलनीय इति भावः। काव्यानुशीलनवतां छन्दोज्ञानस्यावश्यकतां विशेषेषु
९दर्शयति—सा विद्येति । सा विद्या छन्दोविचित्र्यादिभ्यः संपादितं छन्दोविज्ञानम्। गम्भीरम् दुरवगाह्यं तत्तत्प्रसङ्गविशेषेषु तत्तच्छन्दांस्येव रसपरिपोषकानि नान्यानीति सहृदयैकज्ञेयत्वाद्दुरधिगममितिभावः । काव्यसागरम्
१२काव्यरूपमहोदधिम्। विविक्षूणां प्रवेष्टुमिच्छूनाम्। नौः नौकास्थानीया भवति । यथा नानासाधनपरिपूर्णा नौः रत्नसमाहरणाय सागरं प्रविविक्षूणां पुरुषाणामिष्टार्थसंपादनाय साधनं भवति तथा शब्दार्थरत्नाहर-
१५णाय काव्योदधिं प्रविविक्षूणां छन्दोज्ञानं तल्लाभसौकर्याय भवतीत्यर्थः । साहित्यशास्त्रे धृतरुचीनां छन्दोज्ञानं तन्निर्माणे प्रधानं साधनमित्यर्थः । प्रविविक्षूणामिति विशतेः सन्प्रत्ययः। तितीर्षूणामिति पाठे तरितु-
१८मिच्छूनां विवक्षूणामिति पाठे वोढुमिच्छूनामिति चार्थः कल्प्यः ॥ १२ ॥

एवं त्रिविधकाव्येषु पद्यमयकाव्यस्य मुक्तकादयोवान्तरभेदाः प्राचीनैर्वर्णिताः सन्ति । तेषां तु महाकाव्याङ्गरूपत्वान्न पृथक्तया वर्णन-
३मवश्यम् अतस्तदुपेक्ष्य प्रधानकाव्यमेवास्माभिर्निरूप्यत इति स्वाभिप्रायं प्रकटयन्नाह—मुक्तकमिति । इतिशब्द एवमर्थे । मुक्तकं कुलकं कोशः संघातः तथा तादृशः तत्सजातीयोन्यश्च पद्यविस्तरः पद्यात्मककाव्यस-
६मूहः । सर्गबन्धांशरूपत्वात् सर्गबन्धो महाकाव्यमित्याद्यनन्तरश्लोकलक्ष्यमाणमहाकाव्यावयवस्वरूपत्वात्। अनुक्तः तस्यानुपयुक्तत्वाद्ग्रन्थविस्तर-
भयाच्च न प्रदर्शितो ग्रन्थान्तरेभ्योवगन्तव्य इत्यर्थः । तत्र मुक्तक-
९लक्षणमग्निपुराणे [337–36] यथा—मुक्तकं श्लोक एवैकश्चमत्कारक्षमः सताम्। कुलकलक्षणं साहित्यदर्पणे [vi. 314f.] यथा—

द्वाभ्यां तु युग्मकं संदानितकं त्रिभिरिष्यते ।
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम् ॥

---

i. 12—विवक्षूणां for विविक्षूणां R, Ca; तितीर्षूणां D, P, Rn.

i. 13—कोषः for कोशः D, P;—बन्धाङ्ग for बन्धांश D, P, R.

सर्गबन्धांशरूपत्वादनुक्तः पद्यविस्तरः ॥ १३ ॥

सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम् ।

१३कोशस्तु कोशः श्लोकसमूहस्तु स्यादन्योन्यानपेक्षकः इति लक्षणलक्षितः। संघातलक्षणं च यथा—

यत्र कविरेकमर्थं वृत्तेनैकेन वर्णयति काव्ये ।

संघातः स निगदितो वृन्दावनमेघदूतादिः ॥ इति ।

टीकान्तरे हरिनाथेन प्रदर्शितानि लक्षणानि यथा—अन्यानपेक्ष
१८एकश्लोकनिबन्धो मुक्तकम् । अनेकपद्यैनैककक्रियान्वितैनैकवाक्यार्थकथनं कुलकम् । असंहतार्थानामेककवेरनेककवीनां वा निबन्धः कोशः यथार्या-सप्तशत्यादिः । कल्पितवस्तुक एकच्छन्दोनिर्व्यूढः संघातः मेघदूतादिः ।
२१एवंविधलक्षणा एते पद्यप्रभेदा महाकाव्यांशभूता एव । तत्राद्यौ साक्षादंशभूतावन्त्यौ तु तत्समावतस्तल्लक्षणेनैवोन्नेयस्वरूपावित्यर्थः । इति ॥१३॥

मुक्तकादीनां सर्गबन्धांशरूपत्वं कथितम् तत्र सर्गबन्धः कीदृशः इत्याकाङ्क्षायामाह—सर्गबन्ध इति । महाकाव्यं सर्गबन्धः सर्गै-
३रवान्तरार्थवर्णनप्रबन्धैर्बन्धो रचना यस्य तत् काव्यं सर्गबन्धः । तस्य सर्गबन्धस्येदानीं स्वरूपमुच्यते मया निरूप्यते जायते सदलंकृतीत्यन्तेन [i. 19] ग्रन्थेन । तन्मुखम् तस्य सर्गबन्धस्य मुखम् प्रारम्भः । आशीः
६इष्टजनस्य शुभाशंसनम् । तथा च शब्दकल्पद्रुमे—

वात्सल्याद्यत्र मान्येन कनिष्ठस्याभिधीयते ।

इष्टावधारकं वाक्यमाशीः सा परिकीर्तिता ॥ इति ।

९नमस्क्रिया मत्तस्त्वमधिकस्त्वत्तोहं न्यून इति परोत्कर्षसूचनपूर्वक-स्वापकर्षबोधनानुकूलो व्यापारविशेषः । स च कायिकवाचिकमानसिक-भेदेन त्रिविधोप्यत्र वाचिक एव ग्राह्यः । वस्तुनिर्देशः वसति प्रस्तुत-
१२वृत्तान्तोसिन्निति वस्तु कथानायकः लक्षणयापरोपि तत्संबन्धी प्रधानपुरुषः तस्य निर्देशः नामोच्चारणपूर्वक उपन्यासः । अथवा वस्तु वर्ण्यकथाभागस्तस्य निर्देशः साक्षाद्व्यञ्जनया वा सूचनम् । एतत्त्रयाणां
१५मध्ये केनाप्येकेन सर्गबन्धस्य प्रारम्भो विधीयत इत्यर्थः । तत्राशीर्यथा

आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् ॥ १४ ॥

इतिहासकथोद्भूतमितरद्वा सदाश्रयम् ।

१६चन्द्रप्रभाकाव्ये—

श्रियं क्रियाद्यस्य सुरागमे नट[?म]—
त्सुरेन्द्रनेत्रप्रतिबिम्बलाञ्छिता ।
सभा बभौ रत्नमयैर्महोत्पलैः
कृतोपहारेव स वोऽग्रजो जिनः ॥

२१नमस्कारो यथा रघुवंशे—

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

२४वस्तुनिर्देशो यथा शिशुपालवधे—

श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि ।
वसन् ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः ॥

२७एवं सर्गबन्धान्तरेष्वपि द्रष्टव्यम् ॥ १४ ॥

इतिहासेति । इतिहासो भारतम् उपलक्षणमेतत् । तेन रामायणादिकाव्यानां पुराणानां च संग्रहः । तत्रत्या याः कथास्ताभ्य उद्भूतं निष्पन्नं तदाधारतया निबद्धमित्यर्थः । इतरद्वा इतिहासादिष्वविद्यमानं कथानकमुपजीव्य निबद्धम् । किंतु सदाश्रयम् सत् सत्यभूतो वृत्तान्त आश्रय आधारो यस्य तत् । अनेन कल्पितस्य वस्तुनो महाकाव्ये वर्णनीयतया स्वीकारनिषेधः सूचितः । अथवा सत् सत्पुरुष आश्रयो यस्य । तेन बुद्धचरितादीनामश्वघोषादिभिः प्रणीतानां संग्रह इति केचित् । चतुर्वर्गफलायत्तम् चतुर्णां धर्मार्थकाममोक्षाणां वर्गः समूहश्चतुर्वर्गः तद्रूपस्य फलस्य आयत्तं स्वाधीनं तत्फलोत्पत्तिमुद्दिश्य प्रणीतम् । तथा चतुरो व्यवहारकुशलो वत्सराजादिवत् उदात्तो धीरोदात्तो रामचन्द्रधर्मराजादिवत् एतादृशो नायकः कथाप्रधानपुरुषो यत्र तत् । नायकलक्षणं १२च साहित्यदर्पणे [iii. 30] यथा—

त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही ।
दक्षोनुरक्तलोकस्तेजोवैदग्ध्यशीलवान् नेता ॥

चतुर्वर्गफलायत्तं चतुरोदात्तनायकम् ॥ १५ ॥
नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः ।

१५तथैव च दशरूपके [ii. 1–2]—

नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः ।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा ॥
बुध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः ।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः ॥ इति ।

अयं च नायको धीरोदात्तधीरोद्धतधीरललितधीरप्रशान्तादिभेदेन २१चतुर्विधः । तल्लक्षणप्रविभागादिकं साहित्यग्रन्थेभ्य एवावगन्तव्यम् । प्रकृते तु उदात्तपदेन सर्वेषामप्येतेषां ग्रहणम् । नायकश्च क्वचिदेको देवः क्वचिदेकः सद्वंशजः क्षत्रियः क्वचिदेकवंशजा बहवः क्षत्रियाः । २४तत्र प्रथमप्रकारः शिशुपालवधे द्वितीयो नैषधे तृतीयो रघुवंशादिष्ववगन्तव्यः ॥ १५ ॥

न केवलमितिहासादिवद्यथावृत्तवर्णनेनैव काव्यं भवति किंतु तत्रान्तरान्तरा प्रसङ्गानुरोधेन प्ररोचनार्थं तत्तत्पदार्थानामुच्चावचवर्णनमप्यव३श्यमपेक्ष्यत इति वर्ण्यविषयान् कांश्चिद्दर्शयति*—नगरार्णवेति । नगरं पुरम् । तद्वर्णनं यथा शिशुपालवधे तृतीयसर्गे [33–64] । अर्णवः समुद्रः ।

i. 15—फलोपेतं for फलायत्तं P, D, B, M.

*वर्णनीयानां विशिष्यवर्णनप्रकाराः कविसमयसिद्धाः केचन निरूप्यन्ते—**नृपे** विद्या नयः शक्तिर्बलं तस्करताक्षमः । प्रजाशास्तिः प्रजारागो धर्मकामा3र्थतुल्यता ॥ प्रयाणरणखड्गादिशस्त्राण्यरिपराजयः । अरिनाशोरिशैलादिवासोरिपुरशून्यता ॥ महःश्रीदानकीर्त्याद्या गुणौघा रूपवर्णनम् । **महामात्ये** नयः शास्त्रं धैर्यं बुद्धिर्गभीरता ॥ शक्तिः शस्त्रमलोभत्वं जनरागो विवेकिता । **पुरोहिते** 6स्मृतिर्वेदा निमित्तापत्प्रतिक्रिया ॥ दण्डनीतिज्ञता शुद्धिर्धर्मशीलकुलक्रमाः । **देव्यां** विज्ञानचातुर्यं त्रपाशीलव्रतादयः ॥ रूपलावण्यसौभाग्यप्रेमशृङ्गारमन्मथाः । वेणीघम्मिल्लसीमन्तभालश्रवणनासिकाः ॥ कपोलाधरनेत्रभ्रूकटाक्षदशनोक्तयः । 9कण्ठबाहुकरोरोजनाभ्यो मध्यं वलित्रयम् ॥ रोमालिश्रोणिजङ्घोरुगतिक्रमनखाः क्रमात् । **कुमारे** शस्त्रशास्त्रश्रीकलाबलगुणोच्छ्रयाः ॥ बाह्यालीखुरली राजभक्तिः शुभगतादयः । **सेनापतौ** महोत्साहः स्वामिभक्तिरभीरुता ॥ अभ्यासो 12वाहने शास्त्रे शस्त्रे च विजयो रणे । **देशे** बहुखनिद्रव्यपण्यधान्याकरोद्भवाः ॥

उद्यानसलिलक्रीडामधुपानरतोत्सवैः ॥ १६ ॥

तद्वर्णनं यथा रघुवंशस्य त्रयोदशसर्गे [2–16] माघस्य तृतीये [70–82] ६च । शैलः पर्वतः । तद्वर्णनं यथा कुमारप्रथमसर्गे [1–16] माघचतुर्थे [2–68] किरातस्य पञ्चमे [1–15] च । ऋतवो वसन्तादयः । तद्वर्णनं यथा शिशुपालवधे षष्ठसर्गे किरातार्जुनीयस्य चतुर्थदशमसर्गयोः ९कुमारसंभवस्य तृतीयसर्गे रघुवंशस्य चतुर्थनवमषोडशसर्गेषु । चन्द्रार्कौ चन्द्रसूर्यौ तयोरुदयः इदमस्तस्याप्युपलक्षणम् । एतयोर्वर्णनं किराते नवमसर्गे माघे नवमैकादशसर्गयोस्तथान्यत्रापि द्रष्टव्यम् । उद्यानमुपवनम् १२सलिलं सलिलाधारः सरित्सरोवरादिः तत्र क्रीडा । तद्वर्णनं माघकिरातयोरष्टमसर्गादिषु । मधुपानं मदिरासेवनम् । तद्वर्णनं किरातार्जुनीये नवमसर्गे शिशुपालवधे च दशमसर्गे तथान्यत्रापि । रतं संभोगशृङ्गारः तस्योत्स-

---

दुर्गग्रामजनाधिक्यनदीमातृकतादयः । **ग्रामे** धान्यलतावृक्षसरसीपशुपुष्टयः ॥ क्षेत्रारघट्टकेदारग्रामेयीमुग्धविभ्रमाः । **पुरेट्ट**परिखावप्रप्रतोलीतोरणादयः ॥ प्रासा-15दाध्वप्रपारामवाप्यो वेश्या सतीत्वरी । **सरस्यम्भो**लहर्यम्भोगजाद्यम्बुजषट्पदाः ॥ हंसचक्रादयस्तीरोद्यानस्त्रीपान्थकेलयः। अब्धौ द्वीपाद्रिरत्नोर्मिपोतयादोजगत्प्लवाः॥ विष्णुकुल्यागमश्चन्द्राद्बुद्धिरौर्वोब्दपूरणम् । **सरित्यम्बु**धियायित्वं वीच्यो जल-18गजादयः ॥ पद्मानि षट्पदा हंसचक्राद्याः कूलशाखिनः । **उद्याने** सरणिः सर्वफलपुष्पलताद्रुमाः ॥ पिकालिकेकिहंसाद्याः क्रीडावाप्यध्वगस्थितिः । **शैले** मेघौषधीधातुवंशकिंनरनिर्झराः ॥ शृङ्गपादगुहारत्नवनजीवाद्युपत्यकाः । **अरण्ये**-21हिवराहेभयूथसिंहादयो द्रुमाः ॥ काकोलूककपोताद्या भिल्लभल्लदवादयः । **आश्रमे**तिथिपूजैणविश्वासो हिंस्रशान्तता ॥ यज्ञधूमो मुनिसुता द्रुसेको वल्कलद्रुमाः। **मन्त्रे** पञ्चाङ्गताशक्तिषाड्गुण्योपायसिद्धयः ॥ उदयाश्चिन्तनीयाश्च स्थैर्यो-24न्नत्यादिसूक्तयः । **दूते** स्वस्वामितेजःश्रीविक्रमौन्नत्यकृद्वचः ॥ शत्रुक्षोभकरी चेष्टा धार्ष्टर्यं दाक्ष्यमभीरुता ॥ **युद्धे** तु वर्मबलवीररजांसि तुर्यविश्वासनादशरमण्डपरक्तनद्यः । छिन्नातपत्ररथचामरकेतुकुम्भिमुक्तासुरीवृतभटामरपुष्पवर्षाः॥ **प्रयाणे** 27भेरिनिस्वानभूकम्पबलधूलयः । करमोक्षध्वजच्छत्रवाणिक्कटवेशराः ॥ **मृगयायां** श्वसंचारो वागुरा नीलवेषता । भटढक्कामृगत्रासः सिंहयुद्धं त्वरागतिः ॥ **अश्वे** खरखुरोत्खातरजःसल्लक्षणास्थितिः । तेजो वेगित्वमौन्नत्यं जातिर्धाराप्रप-30द्मनम् ॥ **गजे** सहस्रयोधित्वमुचत्वं कर्णचापलम् । अरिव्यूहविभेदित्वं कुम्भमुक्तामदालिनः ॥ **सुरभौ** दोलाकोकिलमारुतसूर्यगतितरुदलोद्भेदाः । जातीतरपुष्पचयाम्रमञ्जरीभ्रमरक्षङ्काराः ॥ **ग्रीष्मे** पाटलमल्लीतापसरःपथिकशोषवाता-33ल्यः । सक्तुप्रपाप्रपात्रीमृगतृष्णाम्रादिफलपाकाः ॥ **वर्षासु** घनशिखिस्मयहंस-

विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः ।

१५वो विलासः । तद्वर्णनं रघुमाघकिरातादिसर्वकाव्येषु । अयं संभोगशृङ्गारो विप्रलम्भशृङ्गारानन्तरमेव वर्णितः शोभातिशयं पुष्णाति । तदुक्तं सरस्वती-कण्ठाभरणे [v. 52]—न विना विप्रलम्भेन संभोगः पुष्टिमश्नुते इति । १८तृतीयान्तपदानामष्टादशश्लोकगतेन अलंकृतम् इतिपदेन संबन्धः ॥ १६ ॥

विप्रलम्भैरिति । विप्रलम्भो विप्रलम्भशृङ्गारः । तल्लक्षणं सरस्वती-२कण्ठाभरणे [v. 45] यथा—

भावो यदा रतिर्नाम प्रकर्षमधिगच्छति ।
नाधिगच्छति चाभीष्टं विप्रलम्भस्तदोच्यते ॥ इति ।

५बहुवचनेन तस्य सरस्वतीकण्ठाभरणादिषूक्तं [v. 46] पूर्वानुरागो

---

i. 17—विवादैः for विवाहैः N.

गमाः पङ्ककन्दलोद्भेदौ । जातीकदम्बकेतकझञ्झानिलनिम्नगा हलिप्रीतिः ॥ **शरदी**न्दुरविपटुत्वं जलाच्छतागस्त्यहंसवृषदर्पाः । सप्तच्छदपद्मसिताभ्रधान्यशि-36खिपक्षमदपाताः ॥ **हेमन्ते** दिनलघुता शीतयवस्तम्बमरुबकहिमानि । **शिशिरे** करीषधूमः कुमुदाम्बुजदाहशिखिरतोत्कर्षाः ॥ **सूर्ये**रुणता रविमणिचक्राम्बुजप-थिकलोचनप्रीतिः । तारेन्दुदीपकौषधिधूकतमश्चौरकुमुदकुलटार्तिः ॥ **चन्द्रे** 39कुलटाचक्राम्बुरुहविरहितमोहानिरौज्ज्वल्यम् । जलधिजनिनेत्रकैरवचकोरचन्द्रा-श्मदम्पतिप्रीतिः ॥ **विवाहे** स्नानशुभ्राङ्गभूषालूलुत्रयीरवा । वेदीसीमन्ततारेक्षा लाजामङ्गलवर्तनम् ॥ **विरहे** तापनिःश्वासचिन्ता मौनं कृशाङ्गता । अब्जशय्या 42निशादैर्घ्यं जागरः शिशिरोष्मता ॥ **स्वयंवरे** शचीरक्षामञ्चमण्डपसज्जता । राज-पुत्री नृपाकारान्वयचेष्टाप्रकाशनम् ॥ **सुरापाने** विकलता स्खलनं वचने गतौ । लज्जा मानच्युतिः प्रेमाधिक्यं रक्तेक्षणभ्रमाः ॥ **पुष्पावचये** घुष्पावचयः घुष्पार्प-45णेर्यिता दयिते । मानाद्यं गोत्रस्खलनेर्ष्यावक्रोक्तिसंभ्रमाश्लेषाः ॥ **जलकेलौ** सरःक्षोभचक्रहंसापसर्पणम् । पद्मग्लानिः पयःक्षेपो दृग्रागो भूषणच्युतिः ॥ **सुरते** सात्त्विका भावाः सीत्कारः कुङ्मलाक्षता । काञ्चीकङ्कणमञ्जीररवोधरन-48क्षते ॥ **प्रातः** कोकाम्बुजोत्कर्षो **मध्याह्ने** तापसंप्लवः । **सायं** सूर्यातिलौहित्यं चक्रपद्मादिविप्लवः ॥ **अधन्कारे**तिसान्द्रत्वं विश्वलोपसमर्थता । आकस्मिकस-मारम्भो निःशङ्कमभिसारिकाः ॥ वर्ण्येषु वर्ण्यभावानां दिङ्मात्रमिह दर्शितम् । 51सुधीभिश्चिन्त्यमानानां भवत्येषामनन्तता । इति कविकल्पलतालंकारशेखरादिभ्यो-वगन्तव्याः ॥

मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि ॥ १७ ॥

अलंकृतमसंक्षिप्तं रसभावनिरन्तरम् ।

६मानः प्रवासः करुणश्चेति चातुर्विध्यं स्वीकार्यम् । तत्रान्तिमप्रभेदोदाहरणं रघुवंशेजविलापः । विवाहः पाणिग्रहणसंस्कारः । तद्वर्णनं रघुवंशस्य षष्ठसप्तमयोः कुमारसंभवस्य सप्तमे तथान्यत्र द्रष्टव्यम् । ९विवादैरिति पाठे विवादो मिथः संभाषणम् यथा रघुवंशे सिंहदिलीपयोः [ii. 34–58]। कुमारोदयः सुतोत्पत्तिः । तद्वर्णनं यथा रघुवंशे तृतीयसर्गे । मन्त्रः प्रधानपुरुषैः सह रिपुजयार्थं गुप्तसंभाषा कार्याकार्यविचा-
१२रश्च । स पञ्चाङ्गः । तदुक्तं—

सहायाः साधनोपाया विभागो देशकालयोः ।
विपत्तेश्च प्रतीकारः सिद्धिः पञ्चाङ्गमिष्यते ॥ इति ।

१५स च किरातप्रथमसर्गे माघद्वितीयसर्गे च द्रष्टव्यः । दूतः प्रेष्यः स च निसृष्टार्थमितार्थसंदेशहारकभेदेन त्रिविधः । तत्र निसृष्टार्थ उद्योगपर्वणि वासुदेवः । मितार्थो रामायणेङ्गदः । संदेशहारकः कादम्बर्यां
१८केयूरकः । प्रयाणं समराय नगराद्बहिर्यानम् । तद्वर्णनं यथा शिशुपालवधे सप्तदशसर्गे रघुवंशे चतुर्थसर्गे च । आजिः समरम् । यथा किरातार्जुनीये (xv–xviii) शिशुपालवधे (xix–xx) रघुवंशादिषु च ।
२१नायकाभ्युदयः तस्य युद्धे विजयप्राप्तिर्यथा शिशुपालवधे श्रीकृष्णस्य । इदं मन्त्रादिपञ्चकं क्रमेणैव वर्णनीयम् । तथाहि । आदौ मन्त्रः अनन्तरं दूतप्रेषणम् ततो युद्धाय गमनम् ततः समरः पश्चाद्विजयलाभ इति ।
२४अपिना अनुक्तानामपि यज्ञमृगयातपोवनादीनां संग्रहः ॥ १७ ॥

अलंकृतमिति । नगरेत्यारभ्याभ्युदयैरित्यन्तानां सर्वेषां तृतीयान्तानामलंकृतमित्यनेन संबन्धः । असंक्षिप्तम् अतिसंक्षिप्तवर्णनं न रुचिं जन-
३यतीत्यतः असंक्षिप्तम् संक्षेपरहितम् । संक्षिप्तं तु यथा—

रामो दशरथाज्जातः प्राप्तविद्यश्च कौशिकात् ।
मिथिलायां धनुर्भङ्क्त्वा मैथिलीं परिणीतवान् ॥ इत्यादि ।

सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः

६रसाः—

शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः ।
बीभत्साद्भुतसंज्ञाश्च·····॥

९इत्यष्टविधत्वेन नाट्यशास्त्रे [vi. 15] वर्णिताः । क्वचित्त्व शान्तोपि नवमः स्मृतः इति रसानां नवविधत्वं प्रोक्तम् । भावाः प्राधान्येनाभिव्यक्ता रसबीजभूता विभावादिभिरपरिपुष्टतया रसस्वरूपतामनापद्यमानाः १२स्थायिनः । यदुक्तम् साहित्यदर्पणटीकायां [iii. 261]—

न भावहीनोस्ति रसो न रसो भाववर्जितः ।
परस्परकृता सिद्धिरनयो रसभावयोः ॥ इति ।

१५देवमुनिगुरुनृपपुत्रादिविषया रतिर्भावः कान्तादिविषया व्यक्ता रतिः शृङ्गारः इति रसभावयोः स्वरूपविवेकः । विस्तरस्तु द्वितीयपरिच्छेदे रसवदलंकारविवेचने द्रष्टव्यः । रसैश्च भावैश्च निरन्तरं परिपूर्णम् । सर्गः १८प्रधानवृत्तान्ताङ्गभूतोवान्तरवृत्तान्तनिवेदकः प्रबन्धविशेषः । बहुवचनेन अष्टान्यूनत्रिंशदनधिकत्वं सूचितं भवति । तदुक्तमीशानसंहितायाम्—

अष्टसर्गान्न तु न्यूनं त्रिंशत्सर्गाच्च नाधिकम् ।
महाकाव्यं प्रयोक्तव्यं महापुरुषकीर्तियुक् ॥ इति ।

२२अनतिविस्तीर्णैः त्रिंशदन्यूनद्विशत्यनधिकपद्यात्मकैरित्यर्थः । वस्तुतस्त्वेतत् सर्वं प्रायिकमेव । वैपरीत्येनापि महाकविसंप्रदायदर्शनात् । श्रव्यवृत्तैः यतिभङ्गहतवृत्तादिदोषराहित्येन सुवृत्ततिलकोक्तरचनाविशेषेण* २५वा माधुर्यादिगुणसद्भावेन वा श्रुतिसुखदैर्वृत्तैरुपेतम् । तदुक्तम्—

यस्मिन् श्रुते च चित्तस्य वैरस्यं न च ह्रद्यता ।
तानि वर्ज्यानि पद्यानि प्रसिद्धिप्रच्युतानि च ॥ इति ।

२८सुसंधिभिः सुश्लिष्टसंधानैः पूर्वसर्गान्तेन उत्तरसर्गोपक्षेपकैरित्यर्थः ।

i. 18—श्राव्य for श्रव्य R.

*सुवृत्ततिलके द्वितीयविन्यासे वृत्तस्य श्रव्यत्वाश्रव्यत्वविषये कतिचन नियमाः प्रदर्शितास्ते यथा—समासैर्लघुवृत्तानामसमासैर्महीयसाम् । शोभा भवति भव्यानामुपयोगवशेन वा ॥ उपजातिविकल्पानां सिद्धो यद्यपि संकरः । तथापि प्रथमं कुर्यात् पूर्वपादाक्षरं लघु ॥ गुर्वक्षरेण संवृद्धं ग्रन्थियुक्तमिवाग्रतः । करोति प्रथमं

सुसंधिभिः ॥ १८ ॥

सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जनम् ।

यथोक्तं साहित्यदर्पणे(vi. 321)—सर्गान्ते भाविसर्गस्य कथायाः
३०सूचनं भवेदिति । अथवा संधिपदेनात्र नाट्यशास्त्रोक्तानां [xix. 35]
मुखप्रतिमुखगर्भविमर्शनिर्वहणानां ग्रहणम् । तेषां यथा नाटके तथा
काव्येपि विधेयत्वात् । तेषां सुश्लिष्टत्वं च साङ्गानां तेषां यथाक्रमं वि-
३३निवेशः । केचित् तु संधिपदमज्झल्संधिपरं व्याख्यान्ति । तेन च—

उर्व्यसावत्र तर्वाली मर्वन्ते चार्ववस्थितिः ।
नात्रर्जु युज्यते गन्तुं शिरो नमय तन्मनाक् ॥

३६इत्यादिश्रुतिकटुसंधिपरिहारः क्रियते । सर्गैरित्यादितृतीयान्तानामग्रिम-
श्लोकस्थितेनोपेतमितिपदेन संबन्धः ॥ १८ ॥

सर्वत्रेति । तथा च सर्वत्र अव्यभिचारेण । भिन्नवृत्तान्तैः भिन्नानि पूर्व-
क्रमतः पृथग्भूतानि यानि वृत्तानि च्छन्दांसि तैरन्तः समाप्तिर्येषां तैस्ता-

---

i. 19—सर्गान्तैः for वृत्तान्तैः N, D, Rn, M, Cb;—रञ्जकम् for रञ्जनम् P, B, Rn.

स्थूलं किंचित् कर्णकदर्थनाम् ॥ व्यक्षरैस्त्र्यक्षरैरेव च्छेदैराभाति **दोधकम्** ।
6अतोल्पैरधिकैर्वापि यतिं तालमिवोज्झति ॥ शत्रन्ताक्षरसंयोगैः किंचित्कार्क-
श्यकारिभिः । अन्ते विसर्जनीयैश्च **शालिनी** याति दीप्तताम् ॥ विसर्गयुक्तैः
पादान्तैर्विराजति **रथोद्धता** । कलापरिचयैर्याता लटभेव प्रगल्भताम् ॥ साकाराद्यै-
9र्विसर्गान्तैः सर्वपादैः सविश्रमा । स्वागता **स्वागता** भाति कविकर्मविलासिनी ॥
द्रुततालललयैरेव व्यक्तं रूक्षाक्षरैः परैः । प्रणर्तयति यच्चित्तं तत् **तोटकमभीप्सितम्**॥
असमस्तपदैः पादसंधिविच्छेदसुन्दरम् । सर्वपादैर्विसर्गान्तैर्वैशद्यं यात्यनर्घ-
12ताम् ॥ प्रारम्भे द्रुतविन्यासं पर्यन्तेषु विलम्बितम् । विच्छित्त्या सर्वपादानां
भाति **द्रुतविलम्बितम्** ॥ आकारमन्थरैः प्रायः पादे पादेक्षरैस्त्रिभिः । शेषाक्षरै-
र्द्रुततरैः प्रहर्षाय **प्रहर्षिणी** ॥ वसन्ततिलकस्याग्रे साकारे प्रथमाक्षरे । ओज-
15सा जायते कान्तिः सविकासविलासिनी ॥ आकारेपि कृते पूर्वे बन्धेल्पपदपेशले ।
वसन्ततिलकं धत्ते निर्ग्रन्थिरमणीयताम् ॥ विसर्गहीनपर्यन्ता **मालिनी** न विरा-
जते । चमरी छिन्नपुच्छेव वल्लीवालूनपल्लवा ॥ द्वितीयार्धे समस्ताभ्यां पादाभ्यां
18मालिन्नी वरा । प्रथमार्धे समस्ताभ्यां पादाभ्यामवरा मता ॥ प्रथमं द्व्यक्षरैश्छे-

काव्यं कल्पोत्तरस्थायि जायते सदलंकृति ॥ १९ ॥

३दृशैः सर्गैरुपेतम् । भिन्नसर्गान्तैरिति पाठे भिन्नः भिन्नवृत्तग्रथितः सर्गान्तो येषां तैरिति विग्रहेणायमेवार्थः । यथोक्तं दर्पणे [vi. 320]—एकवृत्तमयैः पद्यैरवसानेन्यवृत्तकैः इति । एकवृत्तमयत्वं चात्र प्रायिकम् । ६नानावृत्तमयत्वमपि सर्गस्य दृश्यते यथा शिशुपालवधे चतुर्थः सर्गः किरातार्जुनीये च पञ्चमः । सदलंकृति सत्यः शब्दार्थरामणीयकत्वेन रसोल्लासिका अलंकृतयः शब्दार्थालंकारा यस्मिंस्तत् । इत्थं महाकाव्यलक्षण-९मुक्त्वा लोकरञ्जनं कल्पोत्तरस्थायि इति विशेषणद्वयेन तत् प्रशंसति । एवंगुणविशिष्टं काव्यं लोकरञ्जनम् सदस्यानां मनोविनोदास्पदं सत् कल्पोत्तरस्थायि कल्पादप्यधिककालपर्यन्तं स्थितिमत् चिरस्थायीत्यर्थः । १२जायते भवति । अनेन चिरंतनकीर्तिप्रत्याशया कविभिरत्र प्रयतनीयमिति ध्वनितम् ॥ १९ ॥

---

i. 19—कल्पान्तर for कल्पोत्तर all except D;—जायेत for जायते all except D;—सदलंकृतिः for सदलंकृति N.

दैस्ततस्त्रिचतुरक्षरैः । पञ्चाक्षरैश्च पर्यन्ते नर्कुटं याति चारुताम् ॥ असमाभैः पदैर्भाति पृथ्वी पृथ्वी पृथक्स्थितैः । समासग्रन्थिभिः सैव याति शंकोचखर्वताम् ॥
21पृथ्वी साकारगम्भीरैरोजःसर्जिभिरक्षरैः । समासग्रन्थियुक्तापि याति प्रत्युत दीर्घताम् ॥ त्वरातरलविच्छेदैर्विभाति हरिणी पदैः । मन्थरैर्ग्रन्थिबद्धैव याति निष्पन्दसंगताम् ॥ त्रिषु पादेषु विश्रान्तिविलासैर्ललिता पदैः । अन्ते तरङ्गितगति-
24र्हरिणी हारिणीतराम् ॥ शिखरिण्याः समारोहात् सहजैवोजसः स्थितिः । सैव लुप्तविसर्गान्तैः प्रयात्यत्यन्तमुन्नतिम् ॥ शिखरिण्याः पदैश्छिन्नैः स्वरूपं परिहीयते । मुक्तालताया निःसूत्रमुक्तैर्मुक्ताफलैरिव ॥ मन्थराक्रान्तविश्रब्धैश्चतुर्भिः प्रथ-
27माक्षरैः । मध्यषट्केतिचतुरे मदाक्रान्ता विराजते ॥ साकाराद्यक्षरैः पादपर्यन्तैः सविसर्गकैः । शार्दूलक्रीडितं धत्ते तेजोजीवितमूर्जितम् ॥ विसर्जनीयस्योत्वेन पदैर्निम्नोन्नतैरिव । शार्दूलक्रीडितं याति पाठे सायासतामिव ॥ विच्छिन्नपादं
30पूर्वार्धे द्वितीयार्धे समासवत् । शार्दूलक्रीडितं भाति विपरीतमतोधमम् ॥ आद्यन्तयोर्गुणोत्कर्षकान्त्या सर्वातिशायिनोः । शार्दूलक्रीडितं धत्ते मध्ये सद्गौरवोन्नतिम् ॥ आद्यन्ताकारविरहात् पर्यन्ते चाविसर्गतः । शार्दूलक्रीडितं स्वस्य रूपं नैवोपलभ्यते ॥
33आकारगुरुयुक्तादिपर्यन्तान्तविसर्गिणी । असंस्यूतविरामा च राजते स्रग्धरा तराम् ॥ आद्यन्ताकारविरहाद्बन्धदोषः स्फुटोपि यः । अविलुप्तैर्विसर्गान्तैः स्रग्धरायां समीहते ॥ इति । एतेषां उदाहरणप्रत्युदाहरणानि मूल एव द्रष्टव्यानि । विस्तर-
36भयान्नात्र निर्दिश्यन्ते ।

न्यूनमप्यत्र यैः कैश्चिदङ्गैः काव्यं न दुष्यति ।
यद्युपात्तेषु संपत्तिराराधयति तद्विदः ॥ २० ॥
गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम् ।

महाकाव्यस्य लक्षणतयोक्तानां केषांचिद्धर्माणां खण्डकाव्येपि सत्त्वात् तदतिव्याप्तिवारणाय सर्वेषामपि तेषां समुदितरूपावस्थानत्वेन महाकाव्य-
३लक्षणे निवेशः कृतश्चेत् कुत्राचित् तेषां न्यूनत्व आपतन्तीमव्याप्तिं परि-हरन्नाह—न्यूनमिति। अथ पूर्वोक्तेष्वङ्गेषु कैश्चिदङ्गैर्न्यूनमपि विकलमपि काव्यम् महाकाव्यम् न दुष्यति अङ्गहीनत्वेन दूष्यं न भवति। यदि उपा-
६त्तेषु यथासामर्थ्यं वर्णितेषु अङ्गेषु। संपत्तिः शब्दार्थालंकारगुणगरिमा रस-परिपोषो वा। तद्विदः साहित्यशास्त्रकोविदान्। आराधयति प्रमोदयति।
८यथोक्तं भोजराजेन [v. 135]—

नावर्णनं नगर्यादेर्दोषाय विदुषां मतम् ।
यदि शैलर्तुराज्यादेर्वर्णनेनैव तुष्यति ॥ इति ।

अयं भावः नगर्यादिवर्णनं रसपरिपोषाय। स चेत् परिपोषः शैलवर्णनेनैव
१२स्यात् तर्हि नगर्यादिवर्णनमकिंचित्करमिति। एतेन वर्णनचमत्कृतिविशेषे रसपरिपोष एव काव्यलक्षणमिति फलितम्। नगरादिवर्णनं तु केवलं तत्परिचायकम्। खण्डकाव्यमहाकाव्ययोश्चमत्कारो भिन्न इति
१५पूर्वोक्ता नाव्याप्त्यतिव्याप्तिशङ्कापीति ज्ञेयम् ॥ २० ॥

काव्यं चतुरोदात्तनायकमिति [i. 15] कथितम्। नायकशब्देन तदुच्छेद्यः प्रतिनायकोप्युपलक्षितः। नायकप्रतिनायकयोरुत्कर्षापकर्षौ
३काव्ये वर्णनीयौ। तत्र वर्णनप्रकारद्वयं निर्दिशति—गुणत इति। प्राक् प्रथमम् गुणतः नेता विनीत इत्यादिपूर्वोक्त[i. 15]गुणैः। नायकम् कथाप्रधानपुरुषम्। उपन्यस्य वर्णयित्वा। तेन नायकेन। विद्विषाम् तच्छत्रु-
६भूतोद्धतप्रतिनायकानाम् बहुवचनं तदनुसारिपुरुषानुरोधेन। निराक-

---

i. 20—ऊनम् for न्यूनम् D;—यद्युपात्तार्थसंपत्तिः for यद्युपात्तेषु संपत्तिः D, Pn, B.

i. 21—तद्द्विषां for विद्विषां M.

निराकरणमित्येष मार्गः प्रकृतिसुन्दरः ॥ २१ ॥
वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि ।
तज्जयान्नायकोत्कर्षकथनं च धिनोति नः ॥ २२ ॥

रणम् समुच्छेदः । इत्येष मार्गः इयं पद्धतिः । प्रकृतिसुन्दरः स्वभाव-
मनोहरा । तथाहि । काव्यस्य प्रधानोद्देश्यं सदुपदेशः । स च सत्पुरु-
९षाभ्युदयासत्पुरुषविनिपातवर्णनेन भवति । तदर्थं तावुभौ यथाक्रमं
वर्णनीयौ । यथा रामायणे श्रीरामभद्रगुणवर्णनपुरःसरं दशाननदुर्विनय-
वर्णनम् । एतादृशं काव्यं सकललोकानां शुश्रूषणीयम् । श्रुतं च तच्छ्रो-
१२तॄन् सन्मार्गप्रवणान् करोति । अतः प्रकृतिसुन्दरोयं मार्ग इति
भावः ॥ २१ ॥

वर्णनस्य प्रकारान्तरं दर्शयति—वंशवीर्येति । रिपोः शत्रोः प्रति-
नायकस्य । वंशः सत्कुलं वीर्यं पराक्रमः श्रुतं विद्या एते आदयो येषां
३ते दाननीत्युत्साहादयः तान् । वर्णयित्वा काव्ये सम्यक्तया निबध्य तान्
समीचीनतया प्रतिपाद्येत्यर्थः । तज्जयात् तादृशोत्कर्षशालिनः प्रतिनायकस्य
तत्कर्मकाज्जयात् । नायकस्योत्कर्षकथनम् विजयवर्णनम् । नः अस्मान् ।
६धिनोति प्रीणाति । यथा किरातार्जुनीये दुर्योधनजीतिवर्णनपुरःसरं पाण्डवा-
नामुत्कर्षकथनम् । ननु लुब्धो धीरोद्धतः स्तब्धः पापकृद्व्यसनी
रिपुः [द. रू. ii. 9] धीरोद्धतः पापकारी व्यसनी प्रतिनायकः
९[सा. द. iii. 130] अन्यायवांस्तदुच्छेद्य उद्धतः प्रतिनायकः इत्या-
दिना कथितस्य प्रतिनायकलक्षणस्य विरुद्धमेतदिति चेन्न । यद्यपि
सद्गुणवतो धार्मिकस्य प्रतिनायकस्य पराजयेन नायकोत्कर्षासंभवः प्र-
१२त्युत तस्य निन्दनीयत्वापत्तिस्तथापि परपीडादिदोषसामान्याधिकरण्येन
केषांचित् कुलीनत्वादिदैवागतगुणानां प्रतिनायके वर्णनं तन्निन्दाद्वार्थ-
मेवेति मन्तव्यम् । धिनोति नः इत्यनेनात्र स्वरुचिः प्रदर्शिता । तद्बीजं
१५त्वस्मिन् मार्गे वास्तवस्यानपलापो भवति तथा प्रतिनायकवर्णनपूर्वकं-
नायकोत्कर्षवर्णनेन कविप्रतिभाचमत्कारः सविशेषं परिस्फुटो भवतीति
च ज्ञेयम् ॥ २२ ॥

---

i. 22—वर्णनं for कथनं P, R, B.

अपादः पदसन्तानो गद्यमाख्यायिकाकथे ।
इति तस्य प्रभेदौ द्वौ तयोराख्यायिका किल ॥ २३ ॥

उद्देशक्रमप्राप्तं गद्यं निरूपयति—अपाद इति । पादो गणमात्रा-
निबद्धो गद्यतुरीयांशः तच्छून्यः अपादः गणमात्रानिर्बन्धशून्य इत्यर्थः ।
३एतादृशः पदसंतानः सुप्तिङन्तपदचयो गद्यम् । अस्य च मुक्तकं वृत्त-
गन्धि चूर्णकमुत्कलिकाप्रायं चेति चत्वारः प्रभेदाः सन्ति । परं तेषां
कथाख्यायिकादावन्तर्भावो भवतीति न तेत्र पृथक्तया दर्शिताः । तेषां
६लक्षणान्युदाहरणानि च साहित्यदर्पणादौ [vi. 331f.] द्रष्टव्यानि ।
तस्य गद्यप्रबन्धस्य आख्यायिकाकथे आख्यायिका कथा चेति द्वौ
प्रभेदौ । तत्र प्राचीनमतानुसारेणानयोर्लक्षणमनूद्य तत्र स्वारुचिं प्रकटयति
९किं हि न स्यात् कृतात्मनाम् [i. 30] इत्यन्तेन ग्रन्थसंदर्भेण ।
किलेति पूर्वाचार्याणां मतभेदप्रदर्शनार्थं स्वासंमतिप्रकटनार्थं वा । तत्र
प्राचीनमतानुसारिणा भामहेनानयोर्लक्षणमुक्तं यथा [i. 25–30]—

१२ प्रकृतानाकुलश्रव्यशब्दार्थपदवृत्तिना ।
गद्येन युक्तोदात्तार्था सोच्छ्वासाख्यायिका मता ॥
वृत्तमाख्यायते तस्यां नायकेन स्वचेष्टितम् ।
१५ वक्त्रं चापरवक्त्रं च काले भाव्यर्थशंसि च ॥
कवेरभिप्रायकृतैरङ्कनैः कैश्चिदङ्किता ।
कन्याहरणसंग्रामविप्रलम्भोदयान्विता ॥
१८ न वक्त्रापरवक्त्राभ्यां युक्ता नोच्छ्वासवत्यपि ।
संस्कृतं संस्कृता चेष्टा कथापभ्रंशभाक् तथा ॥
अन्यैः स्वचरितं तस्यां नायकेन तु नोच्यते ।
२१ स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः ॥
अनिबन्धं पुनर्गाथाश्लोकमात्रादि तत् पुनः ।
युक्तं वक्त्रस्वभावोक्त्या सर्वमेवैतदिष्यते ॥ इति ।
२४इत्थमेव चानयोर्लक्षणं साहित्यदर्पणकारादिभिः [vi.330 ff.] स्वस्व-
ग्रन्थेषु संगृहीतम् ॥ २३ ॥

---

i. 23—आख्यायिका कथा for आख्यायिकाकथे all except N.

नायकेनैव वाच्यान्या नायकेनेतरेण वा ।
स्वगुणाविष्क्रियादोषो नात्र भूतार्थशंसिनः ॥ २४ ॥
अपि त्वनियमो दृष्टस्तत्राप्यन्यैरुदीरणात् ।
अन्यो वक्ता स्वयं वेति कीदृग्वा भेदकारणम् ॥ २५ ॥

तत्र प्राचीनाचार्यैः कृतं कथाख्यायिकयोर्भेदमादौ दर्शयति—नायकेनैवेति । तयोः कथाख्यायिकयोर्मध्ये आख्यायिका नायकेनैव स्वमुखेन वाच्या । एवकारोन्ययोगव्यवच्छेदार्थः । अन्या कथा नायकेन इतरेण वा अन्येन केनापि पुरुषेण च वाच्या । अत्र वाशब्दः समुच्चयार्थो न विकल्पार्थः । तथा च कथायां कश्चिदंशो नायकेन स्वमुखेन वाच्यः कश्चिच्चान्येनेति गम्यते । विकल्पार्थकवाशब्दस्वीकारे तु आख्यायिकायामपि कथालक्षणमतिव्याप्तं स्यात् । एतत् कथाया उभयवाच्यत्वम् नायकेन तु नोच्यत इत्यादिभामहमतविरुद्धम् । स च स्वयमेव नायकेन निजवृत्तशंसन आत्मविकत्थनादोषः स्यादिति स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः इत्यादिप्रबन्धेन निर्दिशति । तद्दोषमगणयन्नाह स्वगुणेति । भूतार्थशंसिनः यथार्थवादिनः नायकस्य स्वगुणाविष्क्रिया निजगुणप्रथनं दोषो न न दोषाय भवतीत्यर्थः । अयं भावः । असति प्रसङ्गेतिशयोक्तिपूर्वकं स्वगुणख्यापनं दोषाय न तु सति प्रसङ्गे वास्तवगुणवर्णनम् ॥ २४ ॥

अत्रार्थे किलशब्दोद्भावितां स्वासंमतिं दर्शयति—अपि त्वनियम इति । अपि तु किंतु तत्र आख्यायिकात्वेन प्रसिद्धेषु प्रबन्धेष्वन्यैरुदीरणं नायकभिन्नैरपि वृत्तकथनं क्वचिद्दृश्यते । तस्मान्नायकेनैव वाच्येति नियमस्य व्यभिचरितत्वान्नेदं लक्षणं युक्तमिति भावः । ननु नायकभिन्नेनोदीरणात् तत्र कथात्वमेवास्तु मा भूदाख्यायिकात्वमिति चेत् । अन्यो वक्ता स्वयं वेति एतावदेव भेदकारणम् कथाख्यायिकाभेदकारणम् कीदृक् सर्वथाकिंचित्करं तत् । स्वरूपगतवैलक्षण्येनैव काव्यस्य भेदो युक्तो न तु वक्तृगतभेदेन । एवंविधाचमत्कृतभेदघटितकाव्यभेदस्वीकारे काव्यप्रभेदानामानन्त्यापत्तेः । तस्माद्वक्तृभेदेन भेदकरणं प्राचां न युक्तमिति भावः ॥ २५ ॥

i. 25—चेति for वेति D;—लक्षणम् for कारणम् P, B, Rn.

वक्त्रं चापरवक्त्रं च सोच्छ्वासत्वं च भेदकम् ।
चिह्नमाख्यायिकायाश्चेत् प्रसङ्गेन कथास्वपि ॥ २६ ॥
आर्यादिवत् प्रवेशः किं न वक्त्रापरवक्त्रयोः ।

इत्थं वक्तृवैलक्षण्येन काव्यभेदकरणं निरस्येदानीमपरमपि कथाख्यायिकयोर्भेदकद्वयं निराकरोति—वक्त्रं चेति । वक्त्रलक्षणं वृत्तरत्नाकरे ३[ii. 43] यथा—वक्त्रं नाद्यान्तसौ स्यातामब्धेर्योनुष्टुभि ख्यातम् । इति । तदुदाहरणं च—

नवधाराम्बुसंसिक्तवसुधागन्धिनिःश्वासम् ।
किंचिदुन्नतघोणाग्रं मही कामयते वक्त्रम् ॥ इति ।

७अपरवक्त्रलक्षणं प्राकृतपिङ्गले [ii. 317] यथा—अयुजि ननरला गुरुः समे तदपरवक्त्रमिदं नजौ जरौ । तदुदाहरणं तु—

स्फुटसुमधुरवेणुगीतिभिस्तमपरवक्त्रमिवैत्य माधवम् ।
मृगयुवतिगणैः समं स्थिता व्रजवनिता धृतचित्तविभ्रमा ॥ इति ।

एवं वक्त्रापरवक्त्रे वृत्तविशेषौ तथा सोच्छ्वासत्वम् उच्छ्वासः प्रबन्धांश्यवच्छेदस्येयं संज्ञा तत्सहितत्वं च । भेदकं चिह्नम् आख्यायिकायाः कथातो भेदसाधकम् । वक्त्रापरवक्त्रे आख्यायिकास्वेव न कथासु युज्येते तथोच्छ्वासादिपरिगणनमाख्यायिकापरिच्छेदानामेव न पुनः १५कथापरिच्छेदानां क्रियत इति चेत् तन्न विचारक्षमम् । तत्र तावद्वक्त्रापरवक्त्रकृतं भेदं दूषयति प्रसङ्गेनेत्यादिना श्लोकतुरीयांशेन उत्तरश्लोकस्य पूर्वार्धान्वयिना ॥ २६ ॥

आर्यादिवदिति । कथास्वपि प्रसङ्गेन आर्यादिवत् वक्त्रापरवक्त्रयोः प्रवेशः किं न स्यात् । अयं भावः । स्मृतस्य अनुपेक्षणं प्रसङ्गः । तेन ३कदाचिदार्यानिबन्धने प्रसक्तः कविर्वक्त्रापरवक्त्रस्मरणेन तन्निबन्धनं कुर्याच्चेत् तत् किं दोषास्पदं भवेत् तेन च कथायाः कथात्वं किं विघटेत । वक्त्रापरवक्त्रशून्यैव कथा भवतीत्येतद्विषये नार्ष ६प्रमाणं क्वापि विद्यते न च तथा कविपरिपाटिरपि दृश्यते । अत

i. 26—साश्वासत्वं for सोच्छ्वासत्वं Cb.;—आख्यायिकायाश्च for आख्यायिकायाश्चेत् D.

भेदश्च दृष्टो लम्भादिरुच्छ्वासो वास्तु किं ततः ॥ २७ ॥
तत् कथाख्यायिकेत्येका जातिः संज्ञाद्वयाङ्किता ।

एव साहित्यदर्पणे प्रोक्तम् [vi. 335]—आर्यावक्त्रापवक्त्राणां छन्दसा येन केनचित् । इति । इदानीं सोच्छ्वासत्वस्य भेदकत्वं दूषयति भेदश्चेति । [९]लम्भः कथापरिच्छेदस्येयं संज्ञा । आदिपदेन लम्बकोच्छ्वासतरङ्गादीनां ग्रहणम् । वाशब्दः समुच्चयार्थे । लम्भादिः उच्छ्वासश्च कथाख्यायिकयोर्भेदः व्यावर्तको विशेषः दृष्टः इति चेत् । अस्तु किं ततः । परिच्छे-[१२]दसंज्ञामात्रभेदो न काव्यभेदसाधको भवति । अयं भावः । कथायां परिच्छेदस्य लम्भ इति संज्ञा विहिता आख्यायिकायामुच्छ्वास इति निश्चितेति चेत् भवतु नाम परिच्छेदानां लम्भोच्छ्वासादिसंज्ञाभेदः । नहि ता-[१५]वता पदार्थभेदो भवति । नहि घटकलशेति संज्ञाद्वयेन पदार्थभेदो भवति । स्वरूपवैलक्षण्येनैव पदार्थभेदो घटते यथा घटपटयोः । एवं कथाख्यायिकयोरवयवीभूतानां परिच्छेदानां नहि संज्ञामात्रभेदेन स्वरूप-[१८]भेदः प्रतीयते । तेन च अवयविनोः कथाख्यायिकयोरपि न तावता स्वरूपभेदः वक्तुं पार्यते । केचित्तु श्लोकस्य उत्तरार्धमेवं विवृण्वन्ति कथायां लम्भादिः लम्भादिसंज्ञकः भेदः कथांशविभागः दृष्टः । स विभागः [२१]उच्छ्वाससंज्ञकः वा विकल्पेन कथायामस्तु भवतु नाम । किं ततः तेन का क्षतिः । नहि तावता कथाख्यायिकयोर्भेदो भवितुमर्हति । पदार्थस्याभिन्नत्वादिति । अस्यापि विवरणस्य तात्पर्यं पूर्वोक्तमेव ॥ २७ ॥

एवं प्राचीनकृतं कथाख्यायिकालक्षणं दूषयित्वा स्वमतं निवेदयति—तदिति । तत् तस्मात् स्वरूपवैलक्षण्याभावात् कथा आख्यायिका इति [३]च एका जातिः गद्यरूपैकधर्मत्वेन एक एव प्रकारः । कथा च आख्यायिका चेति नामद्वयेन घटकलशौ इति वत् अङ्किता चिह्निता वर्तते इति भावः । एवं कथाख्यायिकयोः प्रधानं भेदं निरस्य अन्यैरुक्तानन्यानपि [६]भेदान् भेदप्रयोजकधर्ममपश्यन् दूषयति अत्रैवेति । अत्रैव कथाख्यायिकयोरन्यतमायामेव शेषाः उक्तादन्याः आख्यानजातयः पुंप्रधानवर्णनमाख्यानं

i. 27—लम्बादिः for लम्भादिः B's emendation;—आश्वासो for उच्छ्वासो Rn, Cb, Pn.

i. 28—जातिसंज्ञाद्वयाङ्किताः for जातिः संज्ञाद्वयाङ्किता N.

अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः ॥ २८ ॥
कन्याहरणसंग्रामविप्रलम्भोदयादयः ।

तज्जातयः प्रकाराः अग्निपुराणादिषु (337. 12) वर्णिताः खण्डकथा-
५दयः । अन्तर्भविष्यन्ति अत्रैव तेषां समावेशः स्यादिति न ते पृथङ्-
निर्देशमर्हन्ति ॥ २८ ॥

प्राचीनैः कन्याहरणादीनि आख्यायिकायां वर्णनीयत्वेन निर्दिष्टानि न तु कथायामिति वर्णनीयभेदेन आख्यायिकायाः कथातो भेद इति
३चेत् तदपि न समञ्जसमिति दर्शयति—कन्याहरणेति । कन्यायाः अजात-
विवाहसंस्कारायाः पुरुषविशेषे प्रतिपादनाय कृतनिश्चयाया हरणं युद्धा-
दिना हठाद्ग्रहणं राक्षसविवाह इत्यर्थः । तदुक्तं भगवता मनुना(iii.33)—

हत्त्वा छित्वा च भित्वा च क्रोशन्तीं रुदतीं हठात् ।
प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ॥ इति ।

संग्रामः समरकर्म । स त्रिधा समः विषमः समविषम इति । तत्र
९समः द्वन्द्वयुद्धे चतुरङ्गयुद्धे च । द्वन्द्वयुद्धं यथा रामरावणयोः । चतुर-
ङ्गयुद्धं कुरुपाण्डवानाम् । विषमो यथा रामस्य खरदूषणत्रिशिरोभिः
सह । समविषमो यथा महेश्वरार्जुनयोः किरातार्जुनीये । रघुमघोनोर्वा
१२रघुवंशे । विप्रलम्भः—

पूर्वानुरागमानात्मप्रवासकरुणात्मकः ।
विप्रलम्भश्चतुर्धा स्यात् पूर्वपूर्वो ह्ययं गुरुः ॥ इति

१५वाग्भटालंकारोक्तः (v. 17) चतुर्विधः । अयं च संभोगस्याप्युपलक्ष-
कः । तदनन्तरं संभोगवर्णनस्यावश्यकत्वात् । उदयः शशिदिवाकरयो-
रुदयः अथवा नायकस्योत्कर्षः । आदिना पुरपर्वतकाननादिवर्णनं ग्राह्यम् ।
१८एते गुणाः सर्गबन्धसमा एव महाकाव्यसदृशा एव । अयं भावः । एते
गुणाः पद्यप्रबन्धविशेषमहाकाव्यसमानाः किमुत तर्हि गद्यप्रबन्धान्तर्गत-

i. 28—आख्यात for आख्यान N.

i. 29—विप्रलम्भोदयोदयाः for विप्रलम्भोदयादयः D.

सर्गबन्धसमा एव नैते वैशेषिका गुणाः ॥ २९ ॥
कविभावकृतं चिह्नमन्यत्रापि न दुष्यति ।
मुखमिष्टार्थसंसिद्धौ किं हि न स्यात् कृतात्मनाम् ॥३०॥
मिश्राणि नाटकादीनि तेषामन्यत्र विस्तरः ।

कथाममाना इति । अत एते गुणाः कथातः आख्यायिकायाः अवच्छेदकाः २१न भवन्तीत्यर्थः ॥ २९॥

इदानीं कवेरभिप्रायकृतेन केनचिद्विशेषेण अङ्कनचिह्नेन कथा आख्यायिकातो भिन्ना स्यादिति प्राचां मतमप्यसमञ्जसमित्याह—कविभावेति । ३कविभावकृतम् कवेर्भावोऽभिप्रायः तेन कृतं चिह्नं यथा शिशुपालवधे सर्गान्तश्लोकेषु श्रीशब्दनिवेशात् तच्छ्रयङ्कम् किरातार्जुनीये तथैव लक्ष्मीशब्दनिवेशात् तल्लक्ष्म्यङ्कम् । एवमेव विष्णुजयो विष्णवङ्कः सेतुबन्धः ६अनुरागाङ्कः इत्याद्यूहनीयम् । एतदेव अङ्कनं कथायाः आख्यायिकातो भेदकारणं भवेत् इति चेन्न । तदेतच्चिह्नम् अन्यत्रापि आख्यायिकादौ कृतं चेन्न दुष्यति दुष्टं न भवति । तस्य कवेरभिप्रायाधीनत्वात् । कृता९त्मनाम् सूरिणाम् । इष्टार्थसंसिद्धौ मङ्गलाद्यभिप्रेतार्थसंपादने । मुखम् उपाय आरम्भो वा । किं न स्यात् स्वेच्छया किमपि स्यादिति भावः । मुखमितिपाठे सुखदम् अनायासकरमिति भावः । कवीनां निरङ्कुशत्वेन ते स्वे१२च्छया अभिलषितं संपादयेयुरिति रहस्यम् ॥ ३० ॥

अथेदानीं क्रमप्राप्तं मिश्रकाव्यं निरूपयति—मिश्राणीति । नाटकादीनि दृश्यकाव्यानि मिश्राणि मिश्रसंज्ञकानि । आदिशब्देन प्रकरणादीनां ३संग्रहः । तदुक्तं दशरूपके (i.8)—

नाटकं सप्रकरणं भाणः प्रहसनं डिमः ।
व्यायोगसमवकारौ वीथ्यङ्केहामृगाः ॥ इति* ।

---

i. 29—एते for एव M;—न ते for नैते Rn, M.

i. 30—अन्यद्वापि for अन्यत्रापि M;—सुखम् for मुखम् D, Pn;—संसिद्धै for संसिद्धौ P, D.

---

* एतेषां लक्षणानि नाट्यशास्त्रे (xviii. 106) यथा—प्रख्यातवस्तुविषयं

गद्यपद्यमयी काचिच्-

६तेषां दृश्यकाव्यानां अन्यत्र नाट्यशास्त्रादौ विस्तरः प्रपञ्चोस्ति । अतस्तत एव तेवगन्तव्या इति भावः । श्रव्यमिश्राणि कथयति गद्यपद्येति । काचिद्गद्यपद्यमयी गद्यपद्यप्रचुरा मिश्ररचना चम्पूरिति ९विद्यते वर्तते । अत्र पद्यप्राचुर्यं गद्यसमकक्षतया अपेक्ष्यते । अन्यथा आख्यायिकादावपि किञ्चित्पद्यसद्भावेन तस्या अपि मिश्रसंज्ञात्वं प्रसज्येत । काचिदित्युक्त्या सर्वो गद्यपद्यमयः प्रबन्धः चम्पूर्भवितुं १२नार्हति तादृशप्रबन्धस्य राजस्तुतौ बिरुदसंज्ञात्वात् । तदुक्तं—गद्य-

---

i. 31—पद्यगद्यमयी for गद्यपद्यमयी M, Rn;—वाणी for काचित् Rn; कापि M.

प्रख्यातोदात्तनायकं चैव । राजर्षिवंशचरितं तथा च दिव्याश्रयोपेतम् ॥ नाना-
3विभूतिसंयुतमृद्धिविलासादिभिर्गुणैश्चापि । अङ्कप्रवेशकाढ्यं भवति हि तन्नाटकं नाम ॥ प्रकरणम्—यत्र कविरात्मबुध्या वस्तु शरीरं च नायकं चैव । औत्पत्तिकं प्रकुरुते प्रकरणमिति तद् बुधैर्ज्ञेयम् ॥ यदनर्थमपाहार्यं कार्यं कुरुते प्रभूत-
6गुणयुक्तम् । उत्पन्नबीजवस्तु प्रकरणमिति तदपि विज्ञेयम् ॥ यन्नाटके मयोक्तं वस्तु शरीरं च वृत्तिभेदाश्च । तत् प्रकरणेपि योज्यं सलक्षणं सर्वसंधिषु तु ॥ विप्रवणिक्सचिवानां पुरोहितामात्यसार्थवाहानाम् । चरितं यत्रैकविधं ज्ञेयं तत्
9प्रकरणं नाम् ॥ नोदात्तनायककृतं न दिव्यचरितं न राजसंभोगः । बाह्यजनसंप्रयुक्तं ज्ञेयं तत् प्रकरणं नाम ॥ दासविटश्रेष्ठियुतं वेषस्त्र्युपचारकारणोपेतम् । मन्दस्त्रीकुलचरितं काव्यं कार्यं प्रकरणे तु ॥ भाणः—आत्मानुभूतशंसी पर-
12संश्रयवर्णनाविशेषेषु । द्विविधाश्रयो हि भागो विज्ञेयस्त्वेकहार्यश्च ॥ परवचनमात्मसंस्थं प्रतिवचनैरुत्तरोत्तरग्रथितैः । आकाशपुरुषकथितैरङ्गविकारैरभिनयैश्चापि ॥ धूर्तविटसंप्रयोज्यो नानावस्थान्तरात्मकश्चैव । एकाङ्को बहुचेष्टः
15सततं कार्यो बुधैर्भाणः ॥ प्रहसनम्—प्रहसनमपि विज्ञेयं विविधं शुद्धं तथा च संकीर्णम् । वक्ष्यामि तयोर्युक्त्या पृथक् पृथग्लक्षणविशेषम् ॥ भगवत्तापसविप्रैरन्यैरपि हासवादसंबद्धम् । कापुरुषसंप्रयुक्तं परिहासाभाषणप्रायम् ॥ अविकृत-
18भाषाचारं विशेषभावोपपन्नरुचितपदम् । नियतगतिवस्तुविषयं शुद्धं ज्ञेयं प्रहसनं तु ॥ वेश्या चेटनपुंसकविटधूर्ता बन्धकी च यत्र स्युः । अनिभृतवेषपरिच्छदचेष्टितकरणैस्तु संकीर्णम् ॥ डिमः—प्रख्यातवस्तुविषयः प्रख्यातोदात्तनायकश्चैव ।
21षट्त्रिंशल्लक्षणयुक् चतुरङ्को वै डिमः कार्यः ॥ शृङ्गारहास्यवर्जं शेषैरन्यै रसैः समायुक्तः । दीप्तरसकाव्ययोनिर्नानाभावोपसंपन्नः ॥ निर्घातोल्कापातैरुपरागेणेन्दुसूर्ययोर्युक्तः । युद्धनियुद्धाघर्षणसंफेटकृतश्च कर्तव्यः ॥ मायेन्द्रजालबहुलो

चम्पूरित्यपि विद्यते ॥ ३१ ॥

तदेतद्वाङ्मयं भूयः संस्कृतं प्राकृतं तथा ।

पद्यमयी राजस्तुतिर्विरुदमुच्यते । इति । अत्र मिश्राणीत्येतत् पदं संस्कृतप्राकृतभाषामिश्राणि नाटकादीनि गद्यपद्यमिश्राणि चम्प्वादीनि च
१५मिश्रसंज्ञकानि इति केचिद्योजयन्ति । परं पद्यं गद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम् (i. 11) इति उद्देशवाक्यानुरोधात् तथा प्राकृतविवेचनस्य पूर्वमकृतत्वाच्च एतद्विवेचनं न ग्रन्थकृदभिप्रायानुकूलम् । तदभिप्रायस्तु
१८प्रथमवर्णित एवेति सुधीभिर्विचार्यम् ॥ ३१ ॥

एवं गद्यपद्यमिश्रत्वेन सारस्वतस्य त्रैविध्यमभिधाय पुनरपि भाषाभेदेन तस्य चातुर्विध्यं कथयति—तदेतदिति । तदेतत् प्रक्रान्तं वाङ्मयम्

---

i. 31—अभिधीयते for आपि विद्यते P, D, M, R.

24बहुपुरुषोत्थानयुक्तश्च । देवभुजगेन्द्रराक्षसयक्षपिशाचावकीर्णश्च ॥ षोडशनायकबहुलः सात्वत्यारभटिवृत्तिसंपन्नः । कार्यो डिमः प्रयत्नान्नानाश्रयभावसंपन्नः ॥ व्यायोगः—व्यायोगस्तुविधिज्ञैः कार्यः प्रख्यातनायकशरीरः । अल्पस्त्रीजनयुक्त-
27स्त्वेकाहकृतस्तथा चैव ॥ बहवश्च तत्र पुरुषा व्यायच्छन्ते यथा समवकारे । न तु तत्प्रमाणयुक्तः कार्यस्त्वेकाङ्क एवायम् ॥ न च दिव्यनायककृतः कार्यो राजर्षिनायकनिबद्धः । युद्धनियुद्धाधर्षणसंफेटकृतश्च कर्तव्यः । एवंविधस्तु कार्यो
30व्यायोगो दीप्तकाव्यरसयोनिः ॥ समवकारः—देवासुरबीजकृतः प्रख्यातोदात्तनायकश्चैव । अङ्कस्तथा त्रिकपटस्त्रिविद्रवः स्यात् त्रिशृङ्गारः ॥ द्वादशनायकबहुलो ह्यष्टादशनाडिकाप्रमाणश्च ॥ वीथी—सर्वरसलक्षणाढ्या युक्ता ह्यङ्-
33गैस्तथा त्रयोदशभिः । वीथी स्यादेकाङ्का तथैकहार्या द्विहार्या वा ॥ अङ्कः—वक्ष्याम्यतः परमहं लक्षणमुत्सृष्टिकाङ्कस्य । प्रख्यातवस्तुविषयस्त्वप्रख्यातः कदाचिदेव स्यात् ॥ दिव्यपुरुषैर्वियुक्तः शेषैरन्यैर्भवेत् पुम्भिः।करुणरसप्रायकृतो
36निवृत्तयुद्धोद्धतप्रहारश्च ॥ स्त्रीपरिदेवितबहुलो निर्वेदितभाषितश्चैव । नानाव्याकुलचेष्टः सात्वत्यारभटिकैशिकीहीनः ॥ कार्यः काव्यविधिज्ञैः सततं ह्युत्सृष्टिकाङ्कस्तु ॥ ईहामृगः—दिव्यपुरुषाश्रयकृतो दिव्यस्त्रीकारणोपगतयुद्धः । सुवि-
39हितवस्तुनिबद्धो विप्रत्ययकारकश्चैव ॥ उद्धतपुरुषप्रायः स्त्रीरोषग्रथितकाव्यबन्धश्च । संक्षोभविद्रवकृतः संफेटकृतस्तथा चैव ॥ स्त्रीभेदनापहरणावमर्दनप्रासवस्तुशृङ्गारः । ईहामृगस्तु कार्यश्चतुरङ्कविभूषितश्चैव ॥ यद्व्यायोगे कार्ये
42ये पुरुषा वृत्तयो रसाश्चैव । ईहामृगेपि तत् स्यात् केवलमत्र स्त्रिया योगः ॥ एतेषामुदाहरणानि नाट्यशास्त्रादिभ्योवगन्तव्यानि ॥

अपभ्रंशश्च मिश्रं चेत्याहुरार्याश्चतुर्विधम् ॥ ३२ ॥
संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः ।

[3]काव्यसारस्वतम् भूयः पुनरपि संस्कृतम् संस्कृतभाषामयं तथा प्राकृतम् अपभ्रंशः मिश्रम् संस्कृतादिविविधभाषासनाथं च । इति चतुर्विधम् चतुष्प्रकारम् । आर्याः काव्यशास्त्रनदीष्णाः आहुः । यथाह भोजराजः [6]सरस्वतीकण्ठाभरणे (ii. 10–11)—

संस्कृतेनैव कोप्यर्थः प्राकृतेनैव चापरः ।
शक्यो योजयितुं कश्चिदपभ्रंशेन वा पुनः ॥
पैशाच्या शौरसेन्या च मागध्यान्यो निबध्यते ।
द्वित्राभिः कोपि भाषाभिः सर्वाभिरपि कश्चन ॥

[11]इत्यादि ॥ ३२ ॥

भाषायाः संस्कृतादिविभागान् विशिनष्टि—संस्कृतमिति । दैवी देवव्यवहार्या । महर्षिभिः यास्कपाणिन्यादिभिः अन्वाख्याता प्रकृतिप्रत्ययादिभि-[3]र्व्याख्याता । संस्कृतं नाम संस्कृतनाम्ना व्यवहृता अस्तीति भावः । नामेति प्रसिद्धौ । व्याख्यातेत्यत्र उद्देश्यानुरोधेन स्त्रीत्वम् । प्राकृतं कथयति तद्भव इति । प्राकृताः ग्राम्याः तैर्व्यवहृतम् तत्संबन्धात् प्राकृतम् । अवयवार्थबला-[6]देव लक्षणलाभः । प्रकृतेः संस्कृतादुत्पन्नं प्राकृतमिति केचित् । तस्य क्रमः अभ्यर्हितत्वानुरूपेणानुक्रमः विस्तारो वा । तद्भवः तत्समः देशी इति अनेकः बहुविधः । तद्भवो नाम संस्कृतोद्भवः यथा हत्त कण्ण इत्यादिः । तत्समः [9]संस्कृतसमो यथा कीरः गौः इत्यादिः । देशी तत्तद्देशरूढः चस्सिस्सी (काञ्चनं) दोग्घट (गजः) इत्यादिः । अन्ये तु संस्कृतोद्भवा महाराष्ट्रीभाषा तत्समा शौरसेन्यादयो भाषाः अपराश्च तत्तद्देशेषु विलसिताः देशीपदा-[12]भिधेयाः इति व्याख्यानं कुर्वन्ति । केचित् पुनः सर्वासामपि प्राकृतभाषाणां संस्कृतोद्भवत्वेन तद्भवत्वम् क्रियाकारकादिविभागत्वेन संस्कृतसादृश्यात् तत्समत्वम् महाराष्ट्रादितत्तद्देशव्यवहृतत्वाच्च देशीत्वमपि [15]वर्तते इति कथयन्ति । परं नैतदाचार्यदण्डिनो मतम् । तेन तु तद्भव-

i. 32—आर्याः for आर्याः P, D, R.
i. 33—मनीषिभिः for महर्षिभिः M, Rn.

तद्भवस्तत्समो देशीत्यनेकः प्राकृतक्रमः ॥ ३३ ॥
महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः ।
सागरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम् ॥ ३४ ॥
शौरसेनी च गौडी च लाटी चान्यापि तादृशी ।

१६तत्समदेशीतिविभागेन एकस्यामेव महाराष्ट्र्यादिभाषायां त्रैविध्यं दर्शितम् । अत एव अनेकः प्राकृतक्रम इत्युपपन्नं भवति ॥ ३३ ॥

प्राकृतभाषासु उत्कृष्टापकृष्टत्वं वर्णयति—महाराष्ट्रेति । महाराष्ट्रं नाम दक्षिणापथवर्ती देशविशेषः लक्षणया तद्वर्तिनो जना ग्राह्याः ते आश्र-३या आधारा यस्याः तां तैः प्रथमं व्यवहृतामित्यर्थः । भाषाम् महाराष्ट्री-भाषाम् प्रकृष्टम् उत्तमम् प्राकृतं विदुः विद्वांसो जानन्ति । सूक्तयः चमत्कार-परिपूर्णानि वचांसि तान्येव रत्नानि अनर्घमणयः तेषां सागरः सागर-६स्वरूपः । सेतुबन्धः तन्नामकः प्रवरसेनकवेर्ग्रन्थविशेषः स आदिर्यस्मिन् तत् मत्तमई-इत्यादिकं काव्यमिति शेषः । यन्मयम् महाराष्ट्रीभाषामयम् । महाराष्ट्रीभाषया कविप्रवरा मनोहरान् प्रबन्धान् रचयामासुरिति भावः । ९तथा च मनोरमग्रन्थसंपत्त्या अस्याः प्रकृष्टत्वं ज्ञेयम् ॥ ३४ ॥

अन्या अपि प्राकृतभाषा दर्शयति—शौरसेनीति । शूरसेनो मथुरा-२संनिहितो देशः । तदुक्तं भागवते (x. i. 27)—

शूरसेनो यदुपतिर्मथुरामावसन् पुरीम् ।
माथुराञ्शूरसेनांश्च विषयान् बुभुजे पुरा ॥ इति ।

५गौडीम् गौडो वङ्गदेशसमीपवर्ती देशविशेषः । तदुक्तं शब्दकल्पद्रुमे—

वङ्गदेशं समारभ्य भुवनेशान्तकं शिवे ।
गौडदेशः समाख्यातः सर्वविद्याविशारदः ॥ इति ।

८लाटः कर्णाटकसमीपस्थो देशविशेषः । तथा च कथासरित्सागरे शशा-

---

i. 33—तद्भवं for तद्भवः N;—तत्समं for तत्समः N;—प्राकृतः for प्राकृत N, M.

i. 34—महाराष्ट्रोद्भवां for महाराष्ट्राश्रयां D;—सूक्त for सूक्ति N.

i. 35—लाटी च गौडी for गौडी च लाटी M, Rn;—चान्या च for चान्यापि M, P, R.

याति प्राकृतमित्येवं व्यवहारेषु संनिधिम् ॥ ३५ ॥
आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृताः ।
शास्त्रे तु संस्कृतादन्यदपभ्रंशतयोदितम् ॥ ३६ ॥
संस्कृतं सर्गबन्धादि

९ङ्कवतीलम्बके (xi. 119)—

ददौ तस्मै सपुत्राय प्रीत्या वीरवराय च ।
लाटदेशे ततो राज्यं स कर्णाटयुतो नृपः ॥ इति ।

१२एतद्देशत्रयव्यवहृतपूर्वा भाषाः तथा तादृशी तद्वत् तत्तद्देशनाम्नोपलक्षिता अन्या मागधी अवन्तिजा प्राच्या वा । तदुक्तं नाट्यशास्त्रे (xvii.48)—

मागध्यवन्तिजा प्राच्या शूरसेनार्धमागधी ।
बाह्लीका दाक्षिणात्या च सप्त भाषाः प्रकीर्तिताः ॥ इति ।

१६एताः सर्वा अपि भाषाः प्राकृतमित्येव प्राकृतमिति नाम्नैव व्यवहारेषु नाट्यशास्त्रसाहित्यशास्त्रव्यवहारेषु संनिधिं याति सांनिध्यं प्राप्नुवन्ति । १८कविभिः प्राकृतमित्येव व्यवह्रियन्ते । देशनामोपलक्षिताः सर्वा भाषाः सामान्यतः प्राकृतसंज्ञयोच्यन्ते इति भावः ॥ ३५ ॥

देशनाम्नोपलक्षितानां प्राकृतत्वमभिधायेदानीं जातिनामोपलक्षितानामपभ्रंशत्वेन व्यवहारः इति निर्दिशति—आभीरेति । आभीराः ३गोपाः ते आदयो येषु ते शबरशकचाण्डालाः तेषां गिरः भाषाः आभीरीशाबरीचाण्डालीप्रभृतयः । काव्येषु काव्यनाटकादिषु अपभ्रंश इति स्मृताः अपभ्रंशशब्देन ता व्यवहृताः सन्तीति भावः । काव्यस्येत्यस्य व्यावर्त्य ६दर्शयति शास्त्रे तु इति । शास्त्रे तु शब्दशास्त्रे तु । संस्कृतादन्यत् भिन्नम् सर्वो भाषाप्रपञ्चः । अपभ्रंशतया अपभ्रंशत्वेन उदितम् उक्तः । शास्त्रे संस्कृतापभ्रंशौ इत्येव द्वौ प्रभेदौ । सर्वं संस्कृतभिन्नमपभ्रंशशब्देनैव ९तत्र निर्दिष्टमिति भावः ॥ ३६ ॥

एवं भाषाविभागं दर्शयित्वा तत्तद्भाषानियमेन पद्यप्रबन्धानां लक्षणानि निरूपयति—संस्कृतमिति । सर्गबन्धादि महाकाव्यादिकम् । आदि- ३शब्देन खण्डकाव्यानां संग्रहः । संस्कृतम् संस्कृतभाषामयमेव भवतीति

i. 35—इत्येव for इत्येवं R.
i. 36—शास्त्रेषु for शास्त्रे तु all except N.

प्राकृतं स्कन्धकादि यत् ।
ओसरादिरपभ्रंशो नाटकादि तु

४भावः । तथा चोक्तमग्निपुराणे (337. 24)—

सर्गबन्धो महाकाव्यमारब्धं संस्कृतेन यत् ।
तद्भवं न विशेत् तत्र तत्समं नापि किंचन ॥ इति ।

५यथा रामायणादि । स्कन्धकादिकम् स्कन्धकः छन्दोविशेषः तेन रचितं काव्यमपि स्कन्धकम्। तत्तु प्राकृतम् प्राकृतेनैव प्रणेतव्यमित्यर्थः । अत्र ६आदिशब्देन गलितकादिच्छन्दसां संग्रहः । तदुक्तं टीकान्तरे—छन्दसा स्कन्धकेनैतत् क्वचिद्गलितकैरपि । इति । अस्योदाहरणं सेतुबन्धादि । एतदुपरूपकान्तर्गतमट्टकस्यापि उपलक्षणम् तस्य प्राकृतमयत्वात् । ११तदुक्तं दर्पणे (vi. 276)—सट्टकं प्राकृताशेषपाठ्यं स्यादप्रवेशकमिति । ओसरः छन्दोविशेष एव । तद्ग्रथितं काव्यं अपभ्रंशमयमेव कर्तव्यम् । अस्मिन् काव्ये परिच्छेदस्य कडवकसंज्ञा । तदुक्तं टीकान्तरे—

अपभ्रंशनिबन्धेस्मिन् सर्गाः कडवकाभिधाः ।
तथापभ्रंशयोग्यानि च्छन्दांसि विविधानि च ॥ इति ।

एतदुदाहरणम् कर्णपराक्रमादि इति प्रेमचन्द्रशर्माणः । नाटकादि तु मिश्र-१८कम् नानाभाषाभिर्मिश्रितं भवति । अत्र तुशब्दः एवार्थे । तेन संस्कृतभाषया विविधप्राकृतभाषामिश्रया नाटकं विधेयमिति भावः । अत्र आदिशब्देन प्रकरणादिदशरूपकाणां नाटिकाद्यष्टादशोपरूपकाणां च २१संग्रहः । तत्र नाटकादिरूपकाणां लक्षणानि पूर्वमुक्तानि। इदानीमुपरूपकप्रभेदान् दर्शयामः । तथा हि दर्पणे (vi. 4 ff.)—

नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् ।
२४प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥
संलापकं श्रीगदितं शिल्पिकं च विलासिका ।
दुर्मल्लिका प्रकरणी हल्लीशो भणिकेति च ॥
२७अष्टादश प्राहुरुपरूपकाणि मनीषिणः । इति ।

---

i. 37—स्कन्धकादिकम् for स्कन्धकादि यत् P, B;—आसारादीनि for ओसरादिः P, B; ओसरादीनि Rn; ओसरादीति (?) D;—नाटकादिषु for नाटकादि तु N, D.

मिश्रकम् ॥ ३७ ॥

कथा हि सर्वभाषाभिः संस्कृतेन च बध्यते ।
भूतभाषामयीं प्राहुरद्भुतार्थां बृहत्कथाम् ॥ ३८ ॥
लास्यच्छलितशम्पादि

एषां लक्षणानि उदाहरणानि च दशरूपकसाहित्यदर्पणादिभ्योवगन्तव्यानि । विस्तरभयात् तानि नात्र कथ्यन्ते । नाटकादिरूपकेषु पात्रविशे-
३०षेण भाषानियमः दर्पणे यथा (vi. 158 ff.)—

पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम् ।
शौरसेनी च प्रोक्तव्या तादृशीनां च योषिताम् ॥
३३आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत् ।
अत्रोक्ता मागधी भाषा राजान्तःपुरचारिणाम् ॥
चेटानां राजपुत्राणां श्रेष्ठिनां चार्धमागधी ।
३६प्राच्या विदूषकादीनां धूर्तानां स्यादवन्तिका ॥
योधनागरिकादीनां दाक्षिणात्या हि दीव्यताम् ।
शबराणां शकादीनां शाबरीं संप्रयोजयेत् ॥
३९इत्यादिः ॥ ३७ ॥

कथाख्ये गद्यप्रबन्धे भाषाविचारं निर्दिशति—कथा हीति । कथा पूर्वोक्तलक्षणा सर्वभाषाभिः निखिलप्राकृतभाषाभिः निबध्यते । हिशब्द-
३स्त्वर्थे । चशब्दः समुच्चायकः । तथैव च संस्कृतेन संस्कृतभाषयापि निबध्यते । तेन कथायाः प्रकारद्वयम् यया कयापि प्राकृतभाषया रचिता संस्कृतभाषया वा निबद्धा । संस्कृतभाषानिबद्धायाः कथाया उदाहरणं
६कादम्बर्यादि । प्राकृतभाषया रचितां कथां दर्शयति भूतभाषेति । भूतभाषामयीम् पैशाचीभाषानिबद्धाम् बृहत्कथां प्राहुः कथयन्ति । तां प्रशंसति अद्भुतार्थामिति । बृहत्कथाया अनुवादाः कथामञ्जरीकथासरित्सागरादयः
९सन्तीति प्रथितमेव ॥ ३८ ॥

दृश्यश्रव्यभेदेन प्रबन्धद्वैविध्यमाह—लास्येति । स्त्रीजनकृतं शृङ्गार-

i. 38—कथापि for कथा हि Pn, B; कथादि N;—त्वाहुः for प्राहुः D.

i. 39—शम्यादि for शम्पादि N, R, Ch; सम्पादि N, (?) D; शल्यादि P, B; साम्यादि Pn.

प्रेक्षार्थमितरत् पुनः ।

श्रव्यमेवेति सैषापि

२रूपप्रधानं नृत्यं लास्यम् । तदाह स्वटीकायां प्रेमचन्द्रः—

लासः स्त्रीपुंसयोर्भावः तदर्हं तत्र साधु वा ।
लास्यं मनसिजोल्लासकरं मृद्वङ्गहाववत् ॥
देव्यै देवोपदिष्टत्वात् प्रायः स्त्रीभिः प्रयुज्यते । इति ।

६अन्यत्रापि—

कोमलं मधुरं लास्यं शृङ्गाररससंयुतम् ।
गौरीतोषकरं चापि स्त्रीनृत्यं तु तदुच्यते ॥ इति ।

९हृदयंगमाख्यटीकायामपि—लास्यं शृङ्गारभूयिष्ठं नृत्यमीश्वरभाषितम् । इति । तथैव नारदसंहितायाम्—पुंनृत्यं ताण्डवं प्राहुः स्त्रीनृत्यं लास्यमुच्यते । इति । छलितं पुंनृत्यं तदाह प्रेमचन्द्रः—पुंनृत्यं छलितं १२प्राहुरिति । केचित्तु छलिकमितिपाठमनुसृत्य—छलिकं छद्मना वृत्तं सूरयस्तद्विदो विदुः (हृ० टीका) इति तल्लक्षणं निवेदयन्ति । शम्पा पूर्वरङ्गान्तर्गतः वाद्यप्रयोगविशेषः । तदुक्तं नाट्यशास्त्रे (v. 62)—

शम्पा तु द्विकला कार्या तालो द्विकल एव च ।
पुनश्चैककला शम्पा संनिपातः कलात्रयम् ॥ इति ।

१०शल्येतिपाठे शल्या—भाले हस्तं समावेश्य नृत्यं शल्येति कीर्तितम् । इति टीकान्तरे कृतलक्षणा । शम्येतिपाठे—

शम्येति सव्ययोः पातः सतालकरपादयोः ।
उभयोः करयोः पातः संनिपात इति स्मृतः ॥ इति टीकान्तरे ।

२१माम्येतिपाठे माम्यं गीतवाद्यसमयनृत्यम् अन्यै रासकनाम्ना पठितम् । आदिशब्देन ताण्डवहल्लीसकरासानां ग्रहणम् । उक्तं च (स०कण्ठा०ii.155)—

तल्लास्यं ताण्डवं चेति च्छलितं सम्यया सह ।
हल्लीसकं च रासं च षट्प्रकारं प्रचक्षते ॥ इति ।

---

i. 39—प्रेक्ष्यार्थं for प्रेक्षार्थं P;—सैवैषा for सैषापि M, N, D, R.

द्वयी गतिरुदाहृता ॥ ३९ ॥

२५ताण्डवं उद्धतपुंनृत्यम् । यदुक्तं प्रेमचन्द्रेण—

वीररौद्ररसाधारं अद्भुतं शंकरप्रियम् ।
पुरुषेण समारब्धं नृत्यं ताण्डवमुच्यते ।

२८अन्यच्च—

उद्धतं तु महेशस्य शासनात् तण्डुनोदितम् ।
भरताय ततः ख्यातं लोके ताण्डवसंज्ञया ॥ इति ।

३१हल्लीशं मण्डलाकारेण स्त्रीसमूहनृत्यम् । यथा (म०कण्ठा० ii. 156)—

मण्डलेन तु यत् स्त्रीणां नृत्यं हल्लीसकं तु तत् ।
तत्र नेता भवेदेको गोपस्त्रीणां यथा हरिः ॥ इति ।

३४हल्लीशमेव तालबन्धविशेषयुक्तं रासकमिति प्रेमचन्द्रशर्माणः । प्रेक्षार्थम् प्रेक्षणमेव प्रयोजनं यस्य तथाविधम् । प्रेक्ष्यमित्यर्थः । प्रेक्ष्यार्थमितिपाठे स्वी-
३६कृत्य प्रेक्ष्यः सामाजिकैर्दृश्यः अर्थः नटैः रामाद्यवस्थानुकरणेन प्रकाश्यमानः काव्यप्रतिपाद्यं यस्य तत् इति केचिद् विवृण्वन्ति परं अग्रेस्थितश्रव्य-
३९पदानुरोधात् प्रेक्षार्थमित्येव पाठः समीचीनः । श्रव्यं कथयति इतर-दिति । सर्गबन्धादिकं श्रव्यम् श्रवणमात्रलक्षणम् । उक्तं च भोजराजेन सरस्वतीकण्ठाभरणे (ii. 152)—

श्रव्यं तत् काव्यमाहुर्यत्रेक्ष्यते नाभिनीयते ।
श्रोत्रयोरेवसुखदं भवेत् तदपि पद्धतिधम् ॥ इति ।

४३नेक्ष्यते नाभिनीयते इत्यनेन नाटकादीनां न श्रव्यत्वप्रसक्तिः । इति एवम् एषापि द्वयी गतिः द्विप्रकारका पद्धतिः प्राचीनैः कथिता । अपि-
४५शब्दः पूर्वभेदसमुच्चयार्थः । केचित्तु श्लोकमिमं नाटकाख्यस्य मिश्रप्रबन्धस्यैव दृश्यश्रव्येति द्विप्रकारताख्यापनपरत्वेन योजयन्ति । यद्यपि मिश्रप्रबन्धस्य वर्णनमत्रावसरप्राप्तमेव वर्तते तथापि व्याख्यानेऽस्मिन्
४८निखिलवाङ्मयस्य दृश्यश्रव्यात्मकत्वेन प्राचीनैरूपवर्णितस्य द्वैविध्यस्य परित्यागः संकोचो वा स्वीकार्यो भवतीति सुधीभिर्विमर्शनीयम् ॥ ३९ ॥

अस्त्यनेको गिरां मार्गः

इत्थं सप्रपञ्चं सप्रभेदं च काव्यशरीरं विवृत्य ततस्तत्संपादकगुणविशेषान् निरूपयंस्तदाश्रयभूतां वाचां विचित्रमार्गाणाम् (i. 9) इत्युल्लिखितां रीतिं निरूपयति—अस्तीति । गिराम् वाचाम् । परस्परं सूक्ष्मभेदः प्रणिधानगम्यो भेदः यस्य एवं मार्गः रचनाप्रकारः । अनेकः बहुविधः अस्ति । तथा च वामनः (i. 2. 6 f.)—रीतिरात्माकाव्यस्य । विशिष्टपदरचना रीतिः । सा च त्रिधा । वैदर्भी गौडी पाञ्चाली चेति। विश्वनाथः [ix. 1–5] रीतीनां चातुर्विध्यमाह । तथा हि—

पदसंघटना रीतिः अङ्गसंस्थाविशेषवत् ।
उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्विधा ॥
वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा ।
माधुर्यव्यञ्जकैर्वर्णै रचना ललितात्मिका ॥
अल्पवृत्तिरवृत्तिर्वा वैदर्भीरीतिरिष्यते ।
ओजः प्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः ॥
समासबहुला गौडी वर्णैः श्लेषैः पुनर्द्वयैः ।
समस्तपञ्चषपदो बन्धः पाञ्चालिका मता ॥
लाटी तु रीतिर्वैदर्भीपाञ्चाल्योरन्तरे स्थिता । इति ।

भरतस्वामिकण्ठाभरणे [ii. 29] रीतीनां षोढात्वं कथितम् । यथा—

वैदर्भी चाथ पाञ्चाली गौडीयावन्तिका तथा ।
लाटीया मागधी चेति षोढा रीतिर्निगद्यते ॥ इति ।

तत्र आवन्तिकामागध्योर्लक्षणम् (ii. 32)—

अन्तरालं तु पाञ्चालीवैदर्भ्योर्यावतिष्ठते ।
सावन्तिका समस्तैः स्यादृद्धित्रैस्त्रिचतुरैः पदैः ॥
पूर्वरीतेरनिर्वाहे खण्डरीतिस्तु मागधी । इति ।

आसामुदाहरणानि तत्रैव प्रदर्शितानि । तत्र वैदर्भ्या उदाहरणम्—

मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ॥

15655

सूक्ष्मभेदः परस्परम् ।

तत्र वैदर्भगौडीयौ वर्ण्येते

२७पाञ्चाली यथा—

गात्राविघातदलिताङ्गदजर्जराणां
गण्डस्थलीलुलितकुण्डलताडितानाम् ।
क्षोभस्फुटन्मुकुटकोटिविघट्टितानां
नादो भवज्झणझणामुखरो मणीनाम् ॥

३२गौडीया यथा—

यस्यावस्कन्दलीलावलितबलपरिस्पन्दखर्वीकृतोर्वी-
संरम्भोत्तम्भनायोन्नमितभरनमत्कन्धरासंधिरासीत् ।
शेषो विस्फारफुल्लस्फुटपृथुलफणाफूत्कृताग्निस्फुलिङ्ग-
स्फूर्जत्संदोहसंदेहितविकटशिखामण्डलीरत्नखण्डः ॥

३७आवन्तिका यथा—

एतानि निःसहतनोरसमञ्जसानि
शून्यं मनः पिशुनयन्ति पदानि तस्याः ।
एते च वर्त्मतरवः प्रथयन्ति ताप-
मालम्बितोज्झितपरिग्लपितैः प्रवालैः ॥

४२लाटीया यथा—

अयमुदयति मुद्राभञ्जनः पद्मिनीना-
मुदयगिरिवनालीबालमन्दारपुष्पम् ।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन्
कुपितकपिकपोलक्रोडताम्रस्तमांसि ॥

४७मागधी यथा—

करिकवलनाशिष्टैः शाखिशाखाग्रपत्त्रै-
ररुणसरणयोमी सर्वतो भीषयन्ते ।
चलितशबरसेनादत्तगोशृङ्गचण्ड-
ध्वनिचकितवराहव्याकुला विन्ध्यपादाः ॥

५२एतासु वैदर्भीगौडीये एव प्रस्फुटान्तरे । अन्यास्तु मिश्रिताः । तत्र पाञ्चाली वैदर्भीगौड्योः अन्तरालवर्तिनी । लाटी समस्तरीतिव्यामिश्रा ।

प्रस्फुटान्तरौ ॥ ४० ॥

श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥ ४१ ॥
इति वैदर्भमार्गस्य

५४मागधी तु खण्डरीतिरेव । अतः किंचिद्भेदवतीनां तासां निर्वचनं न विशेषोपयुक्तमिति तद्विहाय प्रकृष्टभेदेन वैदर्भीगौडीये रीती एव विशिनष्टि इत्याह तत्रेति । तत्र विविधमार्गेषु वैदर्भगौडीयौ मार्गौ ५५प्रस्फुटान्तरौ सुकुमारविकटात्मकत्वेन अत्यन्तविसदृशौ । वर्ण्येते लक्षणादिना विविच्येते । भेदभूयस्त्वात् तेषां विवेचनं युक्तमिति भावः ॥४०॥

वैदर्भगौडीयौ वर्ण्येते इति स्वप्रतिज्ञानुरोधेन क्रमेण तल्लक्षणं विधत्ते—श्लेष इति । श्लेषः अस्मिन्नेव परिच्छेदे ४३ श्लोकेन लक्षितः । प्रसादः ३अत्रैव ४९ श्लोकेन वर्णितः । समता ४७ श्लोकेन विवेचिता । माधुर्यम् ९१ श्लोकेन निरूपितम् । सुकुमारता ६९ श्लोकेन विशदीकृता । अर्थव्यक्तिः ७३ श्लोकेन व्यक्तीकृता । उदारत्वम् ७६ श्लोकेन स्पष्टी-६कृतम् । ओजः ८० श्लोकेन विवरितम् । कान्तिः ८९ श्लोकेन अभिहिता । समाधिः ९३ श्लोकेन प्रदर्शिता । एवं दशगुणा उद्दिष्टा इति ज्ञेयम् ॥ ४१ ॥

इतीति । इति पूर्वं निर्दिष्टाः श्लेषादिसमाध्यन्ताः दश गुणा वैदर्भमार्गस्य प्राणा प्राणवत् स्थितिहेतवः । स्मृताः भरतादिभिः कथिताः ३इत्यर्थः । तथा च भरतः (ii. 92)—

श्लेषः प्रसादः समता समाधिर्माधुर्यमोजः पदसौकुमार्यम् ।
अर्थस्य च व्यक्तिरुदारता च कान्तिश्च काव्यार्थगुणा दशैते ॥ इति ।

६अनेन दशसंख्याकगुणस्वीकारे नाट्यसूत्रकारस्य आनुकूल्यं प्रदर्शितम् । तेन च माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश इति अर्वाचीनानां (का०प्र० viii. 68) उद्घोषः प्रमाणविरुद्ध इति ज्ञेयम् । इत्थं च ९श्लेषादिगुणवती पदरचना वैदर्भी रीतिः इति लक्षणं निष्पन्नम् ।

प्राणा दश गुणाः स्मृताः ।
एषां विपर्ययः प्रायो लक्ष्यते

१०भोजराज आह (ii. 29)—

तत्रासमासा निःशेषश्लेषादिगुणगुम्फिता ।
विपञ्चीस्वरसौभाग्या वैदर्भीरीतिरिष्यते ॥ इति ।

१३नव्यास्तु रसधर्मानेवगुणान् मन्वानास्ते गुणाश्च माधुर्यौजःप्रसादाख्याः त्रय एव सन्तीति मन्यन्ते । शब्दार्थमात्रवृत्तीनां श्लेषादीनां च पृथग्गुणत्वं नाङ्गी-
१५कुर्वन्ति । तांश्च उक्तगुणत्रयेन्तर्भावयन्ति । तदुक्तं प्रकाशे (viii. 66)—

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितिहेतवः ॥
माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश । इति ।

परमेतत् सर्वं भरतवचनविरुद्धत्वाच्चिन्त्यम् । एते गुणाः उपरिनिर्दिष्टेषु कस्मिन् गुणे तैरन्तर्भावितास्तत् तत्तद्गुणनिरूपणप्रस्तावे दर्शयामः । एवं वैदर्भी
२१निरूप्य गौडीं दर्शयति—एषामिति । गौडवर्त्मनि गौडमार्गे एषां गुणानां विपर्ययः व्यत्यासः स च कुत्रचिदत्यन्ताभावरूपः कुत्रचिदंशतः संबन्धरूपश्च प्रायः दृश्यते । प्रायः इत्यनेन क्वचिदुभयोः साम्यमपि
२४अस्तीति सूच्यते। यथा ग्राम्यत्वानेयत्वादिविषये उभयोरैकमत्यम्—एवमादि न शंसन्ति मार्गयोरुभयोरपि (i. 67) नेदृशं बहु मन्यन्ते मार्गयोरुभयोरपि (i. 75) इत्यादिनोपवर्णितम् । अत एव असमस्त-
२७गुणा गौडी इति कैश्चित् प्रतिपादितम् । इत्थं च प्रायः वैदर्भीविरुद्धगुणवती पदरचना गौडी इति लक्षणं निष्पन्नम् । तादृशविरुद्धधर्मत्वं च दीर्घसमासपरुषाक्षरप्राचुर्यौद्धत्यरचनाविशेषशालित्वम् । तथा च भोज-
३०राजः (ii. 31)—

समस्तात्युद्भटपदामोजःकान्तिगुणान्विताम् ।
गौडीयेति विजानन्ति रीतिं रीतिविचक्षणाः ॥ इति ।

३३पुरुषोत्तमोपि—

बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौडीया ।
रीतिरनुप्रासमहिमपरतन्त्रा स्तोभवाक्या च ॥ इति ।

---

i. 42—दृश्यते for लक्ष्यते P, B, R.

गौडवर्त्मनि ॥ ४२ ॥

श्लिष्टमस्पृष्टशैथिल्यमल्पप्राणाक्षरोत्तरम् ।
शिथिलं मालतीमाला लोलालिकलिला यथा ॥ ४३ ॥
अनुप्रासधिया गौडै-

३६एषु गुणेषु श्लेषः समता सुकुमारता ओजः इति चत्वारः शब्दगुणाः । प्रसादः अर्थव्यक्तिः उदारता कान्तिः समाधिः एते पञ्च अर्थगुणाः । माधुर्यं तु शब्दगुणः अर्थगुणश्चेति ग्रन्थकर्तुर्मतम् । वामनादयस्तु शब्द-
३९गुणा अर्थगुणाश्च प्रत्येकं दशसंख्याकाः सन्तीति स्वीकुर्वन्ति । तत्तल्लक्षणानि विधाय च उदाहरणान्यपि दर्शयन्ति । विस्तारभयान्नात्र सर्वो विषयः संग्रहीतुं शक्यते । स तु वामनादिग्रन्थेषु द्रष्टव्यः ॥ ४२ ॥

तत्रोद्देशक्रमानुरोधेन प्रथमं श्लेषं लक्षयति—श्लिष्टमिति । अस्पृष्ट-
शैथिल्यम् अस्पृष्टं असंबद्धं शैथिल्यं असंयुक्तालपप्राणाक्षरबाहुल्येन
३शिथिलमिव भासमानत्वं यस्मिंस्तत् । तच्च अन्तरान्तरा निवेशितैः महा-
प्राणाक्षरैः संयुक्तवर्णैश्च भवति । शैथिल्यार्थविबोधाय तल्लक्षयति अल्प-
प्राणाक्षरोत्तरमिति । अल्पः प्राणः उच्चारणप्रयत्नो येषामिति अल्पप्राणाः
६असंयुक्ताक्षराणि वर्गाणां प्रथमतृतीयपञ्चमाः यरलवाश्च ते उत्तरा प्रधाना बहुला वा यत्र तत् शिथिलम् । एतदेव उदाहरणेन विशदयति—मालती-
ति । लोलाः सौरभाहरणाय लोलुपाः अलयः भ्रमराः तैः कलिला व्याप्ता
९मालतीमाला मालतीस्रक् । विलसतीति शेषः । अत्र असंयुक्ताल्पप्राण-
वर्णबाहुल्यमस्ति इति शिथिलम् ॥ ४३ ॥

एवंविशिष्टं शैथिल्यं वैदर्भैर्नाद्रियते चेत् केषां तत्स्वीकरणेभिनिवेशो-
स्तीति कथयति—अनुप्रासेति । गौडैः पौरस्त्यैः । अनुप्रासः वर्णावृत्तिर-
नुप्रासः इत्यचिरादेव लक्षिष्यमाणो वर्णानुप्रासः तस्मिन् या धीः अनुराग-
बुद्धिस्तया । अथवा अनुप्रासस्य या धीः रचनाबुद्धिः तया । तत् शि-
थिलम् मालतीमालेतिवत् शिथिलं काव्यम् । दिष्टम् आदिष्टम् कथित-
६मित्यर्थः । सर्वथा अनुप्रासप्रिया गौडा इति भावः । अस्पृष्टशैथिल्यात्मकं

i. 43—अस्पष्ट for अस्पृष्ट, reading of Jagannātha in the रसगङ्गाधर, P. 56.

स्तद्दिष्टं बन्धगौरवात् ।

प्रकृतं श्लेषोदाहरणं दर्शयति मालतीदामेति । भ्रमरैः मालतीदाम लङ्घितम् व्याप्तम् इति ईदृशमेव श्लेषोदाहरणम् वैदर्भैः बन्धगौरवात् बन्धस्य
९रच्यमानकाव्यस्य गौरवं निबिडत्वम् तस्मात् । अनुमतमिति भावः । अत्र संयुक्तमहाप्राणवर्णसद्भावात् शैथिल्यं नास्ति । ततश्चास्पृष्टशैथिल्यत्वादिदं श्लेषोदाहरणं ज्ञेयम् । अपरमिदमुदाहरणम्—

१२प्रेक्षामृदङ्गनिनदानुपकर्ण्य तूर्ण-
मम्भोदनादरभसा ननृते मयूरैः ।
यन्मन्दिरे सरलकण्ठमकुण्ठकूज-
मुन्मण्डलीकृतशिखण्डमकाण्ड एव ॥ इति ।

अत्र कैश्चित् शिथिलशब्दस्य पुरतः अपिशब्दमध्याहृत्य अल्पप्राणाक्षरोत्तरं अतः शिथिलमपि अस्पृष्टशैथिल्यं रचनाविशेषेणास्फुटशैथिल्यं
१८यत् तत् श्लिष्टम् । उदाहरणं च मालतीमालेति एवं व्याख्याय अयं श्लेषगुणः अनुप्रासधिया गौडानामपीष्ट इत्युपपाद्य अनन्तरं अनुप्रासरहितोपि वैदर्भसंमतः श्लेषो भवति तस्योदाहरणं मालतीदामेति एवं व्याख्यायि ।
२१ततश्च वैदर्भगौडानामत्र ऐकमत्यमेवेति प्रत्यपादि । परं तत्र रुचिरम् । अपिशब्दस्याध्याहारस्तथा अस्पृष्टशब्दस्याप्रकाशितेत्यर्थकरणं च क्लिष्टं भवति । अतस्तद्व्याख्यानं न ग्रन्थकृदभिप्रेतमिति सुधीभिर्विचार्यम् ॥
२४अस्य गुणस्य निरूपणे साहित्यशास्त्रविदुषां विविधाः प्रकाराः सन्ति तांश्चेशतो दर्शयामः । तत्र तावत् स्वभावस्पष्टं विचारगहनं वचः श्लेषः इति भरतः । उक्तं च तेन षोडशेऽध्याये (xvi. 94)—

विचारगहनं यत् स्यात् स्फुटं चैव स्वभावतः ।
स्वतः सुप्रतिबद्धं च श्लिष्टं तत् परिकीर्तितम् ॥ इति ।

२९अस्योदाहरणम्—

क्षणं स्थिताः पक्ष्मसुताडिताधराः पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे चिरेण नाभिं प्रथमोदबिन्दवः ॥ इति ।

---

i. 44—तदिष्टं for तद्दिष्टं all except N, D; तन्नेष्टं marginalia in D, which begins with i. 44*a* and has an extra श्लोकार्ध somewhere before, as its numbering is henceforth in advance by a श्लोकार्ध.

वैदर्भैर्मालतीदाम लङ्घितं भ्रमरैरिति ॥ ४४ ॥

३२अयं अभिधानाभिधेयपद्धतिविशेषो नायं संदर्भरचनाविशेषः इति असंतुष्टाः रचनाविशेषमेव श्लेषगुणं मन्वते वामनीयाः । तदाह वामनः (iii. 1. 10)—ममृणत्वं श्लेषः । मसृणत्वं नाम यस्मिन् सति बहूनि ३५पदानि एकवद्भासन्ते । एतदेवोपसंहारकारिकायां स विशदयति—

यत्रैकपदवद्भावः पदानां भूयसामपि ।
अनालक्षितसंधीनां स श्लेषः परमो गुणः ॥ इति ।

एतदुदाहरणम् अस्त्युत्तरस्यां दिशि देवतात्मा इत्यादिकम् । गुणः ३९मुश्लिष्टपदता श्लेष इत्यभिधीयते इति भोजः (i.66) । उदाहरति च—

उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगङ्गापयसः पतेताम् ।
तदोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः ॥ इति ।

अत्र भिन्नानामपि पदानामेकपदताप्रतिभासहेतुत्वेन संदर्भस्य सुश्लिष्ट-४३त्वात् श्लेषो नाम गुण इति । प्रकाशकृदाह (viii. 72 वृत्ति)—बहूनामपि पदानामेकपदवत् भासनात्मा श्लेष इति । गौडास्तु शिथिलमेव श्लेषत्वेनाद्रियन्ते यथा (भोजः i. 31)—

लीलाविलासवनितालुलितालकलासकाः ।
वेलूनमालतीमाला जलकालानिला ववुः ॥ इति ।

कश्चिन्मात्रार्थो ब्रूते (P. 56) शब्दानां भिन्नानामपि एकत्वप्रतिभान-४७प्रयोजक साहित्यैकजातीयवर्णविन्यासविशेषो गाढत्वापरपर्यायः श्लेषः । यथा—अनवरतविद्वद्द्रुमद्रोहिदारिद्र्यमाद्यद्द्विपोद्दामदर्पौर्विविद्रावणप्रौढपञ्चाननः इति । अयं श्लेषः ओजस्येवान्तर्भवतीति प्रकाशकारादयः ५२अर्वाचीनाः मन्वते । तदुक्तं दर्पणे (viii. 9f.)—

श्लेषः समाधिरौदार्यं प्रसाद इति ये पुनः ।
गुणाश्चित्रंतनैरुक्ता ओजस्यन्तर्भवन्ति ते ॥ इति ।

५५परमेतन्मतं पूर्वोक्तभरतवचनविरुद्धत्वादुपेक्ष्यमेव । इमं श्लेषं संविधाने सुमूत्रता (i. 78) इति लक्षणं विधाय भोजः अर्थगुणत्वेनापि स्वीकरोति । किन्तु न स तथा वैशिष्ट्यावह इत्युपेक्षितोस्माभिः ॥ ४४ ॥

प्रसादवत् प्रसिद्धार्थमिन्दोरिन्दीवरद्युति ।

इदानीं क्रमप्राप्तं प्रसादं लक्षयति—प्रसादवदिति। प्रसिद्धार्थम् झटिति अर्थावबोधकम् अत एव प्रतीतिसुभगम् प्रतीतिरर्थावगमः तत्र सुभगम् अनायासकरम्। वचः वाक्यम्। प्रसादवत् प्रसादगुणयुक्तम्। एवं च प्रसिद्धार्थपदप्रयोगेणार्थप्रतीतौ चेतःसंतोषापादको गुणः प्रसादः इति लक्षणं निष्पन्नम्। उदाहरणमाह इन्दोरिति। इन्दोश्चन्द्रस्य इन्दीवरं कमलं तद्वद्द्युतिर्यस्य तत् श्यामलम्। लक्ष्म कलङ्कः। लक्ष्मीम् शोभाम् तनोति विस्तारयति। अत्र इन्द्विन्दीवरलक्ष्मादयः शब्दाः चन्द्रकमलचिह्नादिप्रसिद्धार्थेषु प्रयुक्ताः श्रुतिमात्रेणैव अर्थावबोधकाः सन्तीति एतद्वाक्यं प्रसादगुणवदिति बोध्यम्। अयं च प्रसादः अर्थवैमल्यरूपोर्थगुणः ओजोमिश्रितशैथिल्यरूपः शब्दगुणोपि वर्तते। स तु अग्रे स्फुटीभविष्यति॥ अत्रान्ये साहित्यनदीष्णा एवं वदन्ति। तथा च भरतः (xvi. 95)—

अथानुक्तो बुधैर्यत्र शब्दादर्थः प्रतीयते।
सुखशब्दार्थसंयोगात् प्रसादः परिकीर्त्यते॥ इति।

एतदुदाहरणम्—

यस्याहुरतिगम्भीरजलदप्रतिमं गलम्।
स वः करोतु निःसङ्गमुदयं प्रतिमङ्गलम्॥ इति।

वामनस्तु शैथिल्यं प्रसादः इत्याह। इदं शैथिल्यं च ओजसा संमिश्रं तेन प्रसादगुणत्वेन स्वीकृतम्—श्लथत्वमोजसा मिश्रं प्रसादं च प्रचक्षते (iii.1.6ff) इति। ननु विरुद्धधर्मयोः श्लथौजसोः कथमेकत्रावस्थानमिति चेत्—

करुणप्रेक्षणीयेषु संभ्रवः सुखदुःखयोः।
यथानुभवतः सिद्धस्तथैवौजःप्रसादयोः॥ इति।

बहुविस्तारेण च तेन निरूपितं श्लथौजसोर्मिश्रत्वम्। तत् तद्ग्रन्थतोवबोद्धव्यम्। स तु प्रसादोदाहरणं वदति यथा (iii. 1.9)—

कुसुमशयनं न प्रत्यग्रं न चन्द्रमरीचयो
न च मलयजं सर्वाङ्गीणं न वा मणियष्टयः॥ इत्यादि।

लक्ष्म लक्ष्मीं तनोतीति प्रतीतिसुभगं वचः ॥ ४५ ॥

२७भोजराज आह (i. 66)—प्रसिद्धार्थपदत्वं यत् स प्रसादो निगद्यते । इति । उदाहरणं च गाहन्तां महिषा इत्यादि । काव्यप्रकाशकारोपि (viii. 76)—

श्रुतिमात्रेण शब्दात् तु येनार्थप्रत्ययो भवेत् ।
साधारणः समग्राणां स प्रसादो गुणो मतः ॥ इति ।

३२उदाहरति च—

परिम्लानं पीनस्तनजघनसङ्गादुभयत-
स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम् ।
इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः
कृशाङ्ग्याः संतापं वदति बिसनीपत्रशयनम् ॥ इति ।

३७वाग्भटोपि (iii. 9)—झटित्यर्थापकत्वं यत् प्रसक्तिः सोच्यते बुधैः । इति लक्षणं कृत्वा कल्पद्रुम इवाभाति वाञ्छितार्थप्रदो जिनः इति उदाजहार । काव्यानुशासनकारो वाग्भटोपि (p. 31)—झगित्यर्थार्पणेन चेतो-
४०विकासजनकः सर्वरसरचनात्मकः प्रसाद इति लक्षणं विधाय उदाहरति—

पर्याप्तपुष्पस्तबकस्तनीभ्यः
स्फुरत्प्रवालोष्ठमनोहराभ्यः ।
लतावधूभ्यस्तरवोप्यवापु-
र्विनम्रशाखाभुजबन्धनानि ॥ इति ।

४५दर्पणकारः (viii.7-8)—

चित्तं व्याप्नोति यत् क्षिप्रं शुष्केन्धनमिवानलः ।
स प्रसादः समस्तेषु रसेषु रचनासु च ॥

४८इति व्याख्यायोदाहरति—

सूचीमुखेन सकृदेव कृतव्रणस्त्वं
मुक्ताकलाप लुठसि स्तनयोः प्रियायाः ।
बाणैः स्मरस्य शतशो विनिकृत्तवर्मा
स्वप्नेपि तां कथमहं न विलोकयामि ॥ इति ।

व्युत्पन्नमिति गौडीयैर्नातिरूढमपीष्यते ।
यथानत्यर्जुनाब्जन्मसदृक्षाङ्को

जगन्नाथस्तु गाढत्वशैथिल्याभ्यां व्युत्क्रमेण मिश्रणं बन्धस्य प्रसादः
५४इति प्रसादं लक्षयित्वोदाहरति (p. 56)—

किं ब्रूमस्तव वीरतां वयममी यस्मिन् धराखण्डल-
क्रीडाकुण्डलितभ्रुपोणनयने दोर्मण्डलं पश्यति ।
माणिक्यावलिकान्तिदन्तुरतरैर्भूपासहस्रोत्करै-
र्विन्ध्यारण्यगुहागृहावनिरुहास्तत्कालमुल्लासिताः ॥ इति ।

प्रागुपवर्णितः प्रसादाख्यो गुणः शब्दगुणः । अर्थगुणोप्ययम् अर्थवैमल्य-
६०लक्षणः कैश्चिदभ्युपगतः । यथाह भोजः (i. 79)—यत् तु प्राक-
ट्यमर्थस्य प्रसादः सोभिधीयते । उदाहरति च—

अयमुदयति मुद्राभञ्जनः पद्मिनीना-
मुदयगिरिवनालीबालमन्दारपुष्पम् ।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन्
कुपितकपिकपोलक्रोडताम्रस्तमांसि ॥

६६अत्र पद्मिनीविकाशकरणे उदयशैलावतरणे कोकशोकहरणे तमोविदारणे
चानुक्तोपि सूर्यलक्षणोर्थः प्रकटमुपलक्ष्यते । इति ॥ ४९ ॥

गौडास्तु अस्मिन् प्रसादे नात्यादरं दर्शयन्तीति सोदाहरणं दर्शय-
ति—व्युत्पन्नमिति । गौडीयैः गौडदेशनिवासिभिः । नातिरूढमपि अनति-
३प्रसिद्धमपि निहतार्थादिदोषयुतमपीति भावः । व्युत्पन्नम् व्युत्पत्तियुक्तम्
योगार्थघटितमिति हेतोः । इष्यते एतत् प्रसादशून्यमतो न काव्यमिति
तैर्न मन्यते अपि तु काव्यत्वेनाङ्गीक्रियते । तेषां प्रबन्धे गाढबन्धवैचि-
६त्र्यस्यैव प्राधान्यत्वादिति भावः । उदाहरति यथेति । अर्जुनं धवलं अत्यर्जु-
नम् अतिधवलम् अनत्यर्जुनं नातिधवलम् एतादृशं यदब्जन्म अद्भ्यो जन्म
यस्य तत् कमलं तस्य सदृक्षः सदृशः अङ्कः कलङ्कः यस्य सः । वलक्षगुः
९वलक्षाः धवलाः गावः किरणानि यस्य सः चन्द्रः । अत्र अर्जुनशब्दः कार्त-
वीर्यपाण्डवयोः विशेषप्रसिद्धः श्वेतवर्णे न तादृशः इति स निहतार्थदोषदुष्टः ।
अब्जन्मशब्दश्च कमले अप्रसिद्ध एव । सदृक्षशब्दश्च उपमागर्भबहु-

i. 46—अनभ्यर्जुन for अनत्यर्जुन N, R, M, Cb.

वलक्षगुः ॥ ४६ ॥

समं बन्धेषु विषमं ते मृदुस्फुटमध्यमाः ।

१२ व्रीहिणैव तदर्थबोधनाद् अधिकः इति अधिकपदतादोषदुष्टस्तथा श्रुतिकटु-
रपि । वलक्षगुशब्दश्च अप्रयुक्तदोषकलङ्कितः । एवंविधबहुदोषकलु-
षितापि एषा रचना व्युत्पन्नेयमवयवार्थादिना अर्थावबोधिकेयमिति अनु-
१५प्रासप्रियाः गौडास्ताम् काव्यत्वेन स्वीकुर्वन्ति ॥ ४६ ॥

क्रमप्राप्तं समं लक्षयति—समं बन्धेष्विति । बन्धेषु रचनासु विष-
मम् विशेषेण समम् यावत्प्रबन्धमेकरूपमिति भावः । एतादृशी संघटना
३समम् समताख्यगुणवत् । एवं च येन प्रकारेण कश्चिदर्थो वर्णयितुमुप-
क्रम्यते तेनैवोपसंहारः समता इति लक्षणं सिध्यति । एते बन्धाः कति-
विधाः सन्तीत्याकाङ्क्षायामाह ते मृद्विति । ते बन्धाः मृदुः कोमलः
६स्फुटः विकटः मध्यमः अनुभयात्मकः एवंरूपास्त्रिविधाः सन्ति ।
बन्धानां मृदुत्वादिकस्य किं प्रयोजकमित्याह बन्धा इति । मृदुवर्णाः
टवर्गरहिताः शिरसि निजपञ्चमाक्रान्ता वर्ग्याः ह्रस्वान्तरितौ रणौ च ।
९तदुक्तमग्निपुराणे (343. 3)—

मधुरायाश्च वर्गान्तादधो वर्ग्यौ रणौ स्वनौ ।
ह्रस्वस्वरेणान्तरितौ संयुक्तत्वं नकारयोः ॥ इति ।

१२प्रकाशकारोपि(viii.73)—मूर्ध्नि वर्गान्त्यगाः स्पर्शाः अटवर्गा रणौ लघू
इति । स्फुटाः विकटवर्णाः टवर्गीयाः प्रथमतृतीयसंयुक्तौ द्वितीयचतुर्थौ येन-
केनापि रेफसंयोगश्च । उक्तं चाग्निपुराणे (341.7–8)—

अकारवर्ज्यमावृत्तिः स्वराणामतिभूयसी ।
अनुस्वारविसर्गौ च पारुष्याय निरन्तरौ ॥
शषसा रेफसंयुक्ताश्चाकारश्चापि भूयसा ।
अन्तस्था भिन्नमाभ्यां च हः पारुष्याय संयुतः ॥ इति ।

१९प्रकाशेपि(viii.75)—योग आद्यतृतीयाभ्यामन्त्ययो रेण तुल्ययोः। टादिः
शसौ इत्यादि । उन्मिश्राः उभयजातीयवर्णमिश्राः । एतेषां विन्यासो

---

i. 47—अविषमं for विषमं all except V; also noticed in Ch, and in Cb.

बन्धाः मृदुस्फुटोन्मिश्र-

[1]निवेशो योनिः कारणं येषां ते तथा । एतादृशाः बन्धाः मृदुस्फुट-मध्यमाः भवन्ति । अत्र हि वर्णशब्दः असमासमध्यमसमासदीर्घसमा-सादीनामुपलक्षकः । तदुक्तम्—अवृत्तिर्मध्यवृत्तिर्वावृत्तिर्दैर्घ्यम् इति ।
[2]अन्यत्रापि—

असमस्तैकसमस्ता युक्ता दशभिर्गुणैश्च वैदर्भी ।
वर्गाद्वितीयबहुला स्वल्पप्राणाक्षरा च सुविधेया ॥
बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौडीया ।
रीतिरनुप्रासमहिमपरतन्त्रा स्तोभवाक्या च ॥

[3]प्रतापरुद्रटीकायामपि (P. 63.)—

टवर्गवर्जिताः स्पर्श्याः स्वस्ववर्ग्यान्तशेखराः ।
लघुरेफणकारौ च कोमलाः परिकीर्तिताः ॥
रेफेण यस्य कस्यापि योग आद्यतृतीययोः ।
स्वोत्तराभ्यां तुल्ययोर्वा परुषाक्षरकौ शषौ ॥ इति ।

[4]तत्र मृदुप्रबन्धकोदाहरणम्—

शिञ्जानमञ्जुमञ्जीरचारुकाञ्चनकाञ्चयः ।
कङ्कणाङ्कभुजा भान्ति जितानङ्ग तवाङ्गनाः ॥ इति ।

दारुणरणे रणन्तं करिदारणकारणं कृपाणं ते ।
रमणकृते रणरणकी पश्यति तरुणीजनो दिव्यः ॥ इति च ।

[5]एतद्विरुद्धं यथा—

अकुण्ठोत्कण्ठया पूर्णमाकण्ठं कलकण्ठि माम् ।
कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर ॥ इति ।

[6]स्फुटप्रबन्धोदाहरणं यथा—

क्षुद्रः कोयं तपस्वी क्षणवदनवनच्छेदनिष्ठ्यूतमज्ज-
व्याजाज्यस्फारधाराहुतिहुतहुतभुक्पच्यमानः कपालैः ।
जातास्थिस्फोटभीतिप्रविघटितवलद्वामपार्श्वप्रवेश-
क्राम्यत्सव्येतरार्धाकुलितहरहठाकृष्टखड्गो दशास्यः ॥ इति ।

वर्णविन्यासयोनयः ॥ ४७ ॥

कोकिलालापवाचालो मामैति मलयानिलः ।
उच्छलच्छीकराच्छाच्छ-

४७अन्यच्च——

दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत-
ष्टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः ।
द्राक्पर्यस्तकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदर-
भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति ॥ इति ।

५२इयमेव गौडीरीतिः । मिश्रवर्णयुता पाञ्चाली । तदुक्तं दर्पणे (ix. 4)——
वर्णैः शेषैः पुनर्द्वयोः । समस्तपञ्चषपदो बन्धः पाञ्चालिका मता । इति ।
उदाहरति च——

मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ॥ इति ।

५७अन्यत्रापि——

ललितमङ्गमपाङ्गविलोकितं स्मितसुधालवपल्लविताधरः ।
इति मनो जयतः प्रमदाजनं मनसिजस्य जयन्ति शिलीमुखाः ॥ इति ।

६०इत्थं च वर्णसमासत्रैविध्येन प्रबन्धत्रैविध्यं मृदुस्फुटमध्यमाभिधम् । तत्र येन केनापि यत् काव्यमारब्धम् तेनैव परिसमाप्तिः समम् । सोयं समताख्यो गुणः ग्रन्थकृता शब्दगुणत्वेन वर्णितः । अन्यैस्तु अर्थगुणत्वे-
६३नापि स्वीक्रियते लक्ष्यते च——प्रक्रान्तप्रत्ययाविपर्यासेन अर्थस्य विसंवादितावि रहः इति । तदुदाहरणं च——उदेति सविता ताम्रस्ताम्र एवास्तमेति च । इति प्रेमचन्द्रशर्माणः । किन्तु स प्रक्रमभङ्गाख्यदोषाभाव-
६६रूपः एवेति ज्ञेयम् । वामनस्तु (iii. 2. 5) प्रक्रमाभेदरूपमवैषम्यं समता इति अर्थसमतां लक्षयति । तथैव च भोजः (i. 70)——अवैषम्यं क्रमवतां समत्वमिति कीर्तितम् । इति ॥ ४७ ॥

त्रिविधसमताया उदाहरणत्रयं दर्शयति सार्धश्लोकेन——कोकिलेति । कोकिलाया आलापो मञ्जुलध्वनिस्तेन वाचालः सशब्दो मलयानिलो ३मलयवायुः मामैति मामागच्छति शीतलयतीत्यर्थः । अत्र मृदुबन्धेन

i. 48—प्रोच्छलत् for उच्छलत् M, marginalia in D; उच्चलत् R; उचरत् Rn.

निर्झराम्भःकणोक्षितः ॥ ४८ ॥

चन्दनप्रणयोद्वन्धिर्मन्दो मलयमारुतः ।
स्पर्धते रुद्धमद्धैर्यो वररामाननानिलैः ॥ ४९ ॥

प्रारब्धस्य संदर्भस्य तेनैव समापनान्मृदुबन्धयुता समता । स्फुटबन्धमुदाहरति—उच्छलदिति । उच्छलन्तो उत्सर्पन्तः शीकरास्तुषारा यत्र तथा अच्छाच्छमतिनिर्मलं यन्निर्झराम्भः निर्झरोदकं तस्य कणास्तैरुक्षितः सिक्तः अतिशीतल इत्यर्थः । अत्रापि मलयानिलो मामैति इत्यनुषज्यते । अत्र स्फुटबन्धेनैव उपक्रमोपसंहारौ इति स्फुटबन्धगता समता । अन्यत्रापि (हेमचन्द्र p. 197)—

आहतं कुचतटेन तरुण्याः साधु सोढममुनेति पपात ।
त्रुट्यतः प्रियतमोरसिहारात् पुष्पवृष्टिरिव मौक्तिकवृष्टिः ॥

इति उदाहृतम् ॥ ४८ ॥

मध्यमसमतां दर्शयति—चन्दनेति । चन्दनस्य चन्दनवनस्य प्रणयः संसर्गस्तेनोद्वन्धिः उत्कृष्टगन्धवान् । मन्दः मृदुः मलयमारुतः मामैति इति योजनीयम् । उदाहरणान्तरं यथा (हेम० p. 197)—

ईदृशस्य भवतः कथमेतल्लाघवं मुहुरतीव रतेषु ।
क्षिप्तमायतमदर्शयदुर्व्यां काञ्चिदाम जघनस्य महत्त्वम् ॥ इति ।

एषु बन्धेषु मृदुस्फुटौ न वैदर्भाभिमतौ । तौ हि अनुप्रासप्रियानां गौडानामेव इष्टौ । केवलस्फुटप्रबन्धे सौकुमार्यं नास्ति मृदुप्रबन्धे च शैथिल्यदोषो भवति । तदुक्तमग्रे (i. 69)—बन्धशैथिल्यदोषो हि दर्शितः सर्व कोमले इति । अतो नैवैतौ वैदर्भाभिमतौ । मध्यमस्तु मृदुस्फुटमिश्रतया वैदर्भप्रियो भवति ॥ केचित्तु कोकिलालापेति समतायाः प्रत्युदाहरणं मन्यन्ते परं तन्न विचारास्पदम् । उदाहरणमन्तरा प्रत्युदाहरणस्यैव केवलस्य कथनं ग्रन्थकृद्रीतिविरुद्धम् । उदाहरणप्रदर्शनाभावेन च न्यूनतापत्तिः । एवं समतां प्रदर्श्य गौडानामत्रानादरः इति सोदाहरणं कथयति—स्पर्धत इति । रुद्धमद्धैर्यः रुद्धं स्तम्भितं मम धैर्यं धृतिर्येन सः एतादृशो मलयमारुतः रामाणां पद्मिनीलक्षणयुतानां कामिनीनामाननानां मुखानामनिलैर्निःश्वासैः साकं स्पर्धते तत्तुल्यो मृदुसुरभिश्च वर्तते इति भावः ॥ ४९ ॥

---

i. 49—रामामुखानिलैः for रामाननानिलैः P, B, Rn.

इत्यनालोच्य वैषम्य-

इतीति। इति पूर्वोदाहरणदर्शितं वैषम्यमनालोच्य। तत्र हि स्पर्धते रुद्ध-
मद्धैर्यः इत्यत्र स्फुटः वररामाननानिलैः इत्यत्र च मृदुः इति उभयोः स्फु-
३टमृदुनोः वैषम्यं विषमतामनालोच्य अवगणय्य। केवलमर्थाः अत्युक्तिरू-
पाः अलंकाराः वर्णानुप्रासप्रधानाः तेषां डम्बरौ उत्कर्षौ। प्रतियोगिद्वित्वात्
द्विवचनम्। अवेक्षमाणा तत्र बद्धादरा इति भावः। पौरस्त्या गौडीया
६काव्यपद्धतिः पद्यरचनासरणिः ववृधे वितस्तार। अयमाशयः। गौडाः
केवलमनुप्रासाकुलधियः पूर्वोदाहृतपद्ये यथा मृदुस्फुटरचना विषमगुणा
दृश्यते तथाविधरचनायां बद्धादराः सन्तः समतामनालोच्य तं विषम-
९प्रबन्धं काव्यत्वेन स्वीकुर्वन्ति। वैदर्भास्तु वर्णानुप्रासं काव्यस्यासा-
धारणं लक्षणं मन्वानास्तदर्थं व्याकुलीभवन्तमर्थं नापेक्षन्ते। अर्थानुरोधेन
रचनाक्रमानुरोधेन च युक्तमनुप्राससमङ्गीकुर्वन्ति। न केवलं शैथिल्ये न
१२वा विकटे न वा विषमे प्रबन्धे ते रुचिं बध्नन्ति। तेषां परुषकोमलवर्ण-
मिश्रः प्रबन्धः मनोहरो भवति। इति गौडवैदर्भयोः काव्यप्रबन्धे विशे-
षोस्ति॥ अत्र प्रेमचन्द्रशर्माभिरेवं व्याख्यायि। गौडानामयमाशयः। अर्था-
१५नुसारिणो हि बन्धाः। अर्थाश्च मृदुविकटमध्यमात्मकाः। तत्र यदि प्रथमं
मृदुरर्थः अवसाने च विकटः तदा मृदुबन्धेनोपक्रान्तमपि विकटबन्धेन
समापनीयम् बन्धानामर्थानुगतत्वनियमात्। अतः एवंविधस्थले समता-
१८परित्यागो गुण एव। यथा (का०प्र० vii. 59)—

मातङ्गाः किमु वल्गितैः किमफलैराडम्बरैर्जम्बुकाः
सारङ्गाः महिषा मदं व्रजत किं शून्येषु शूरा न के।
कोपाटोपसमुद्भटोत्कटशटाकोटेरिभारेः शनैः
सिन्धुध्वानिनि हुंकृते स्फुरति यत् तद्गर्जितं गर्जितम्॥

इत्यादौ उत्तरार्धे कुपितसिंहरूपार्थस्य उद्धतत्वात् सुकुमारतात्यागो गुण
२४एव इति। परं नैतद्ग्रन्थकर्तुराशयानुकूलम्। स्पर्धते रुद्धमद्धैर्यो वररामा-
ननानिलैः इत्यत्र एकस्मिन्नेव वाक्यार्थे समतायाः परित्यागस्य कवे-
रभिप्रेतत्वात्। अथ तत्रापि अवान्तरार्थभेदप्रकल्पनेन स्पर्धते रुद्धमद्धैर्यः
२७इत्यत्र शृङ्गारिणोपि वक्तुः धैर्यरोधेन वायुं प्रति कुपितत्वात् कुपितवाक्य-

मर्थालंकारडम्बरौ ।

स्य च औद्धत्योचितत्वाद्युज्यते विकटबन्धः वररामाननानिलैः इत्यत्र तु कोपाभावात् शृङ्गाराङ्गस्य वररामापदवाच्यनायिकार्थस्य मृदुत्वाच्च युक्तो मृदुबन्धः इति समतात्यागो गुण एवेति चेत् तदपि न क्षोदक्षमम् । यतः एवं कल्पितेपि वररामाननानिलैः स्पर्धते इत्यस्मिन् मधुरार्थबोधके वाक्ये स्पर्धते इति विकटप्रयोगस्यानुचितत्वात् । तस्मान्नायं कवेरभिप्रायः । केवलं गौडानां दण्ड्याचार्यकटाक्षितदोषप्रमार्जनप्रयत्न एव। अर्थानुरोधेन समतात्यागस्य वैदर्भाणामपि इष्टत्वात् । तदर्थं च अर्थालंकारडम्बरौ इत्यत्र अर्थशब्दः वक्त्राद्युपलक्षकः । तेन वक्त्राद्यौचित्यवशादपि बन्धवैषम्यं युज्यते । यथा—

चञ्चद्भुजभ्रमितचण्डगदाभिघात-
संचूर्णितोरुयुगलस्य सुयोधनस्य ।
स्त्यानावनद्धघनशोणितशोणपाणि-
रुत्तंसयिष्यति कचांस्तव देवि भीमः ॥ इति ।

अत्र प्रथमचरणत्रये विकटप्रबन्धः। चतुर्थे तु द्रौपदीनायिकारूपसुकुमारार्थमुद्दिश्य तत्र शब्दाडम्बरत्यागः वैदर्भानुमत एव । अपरं च वैदर्भाणामस्पृष्टशैथिल्यस्यापेक्षितत्वात् तेन च मधुरविकटप्रबन्धस्यैव तेषामिष्टत्वान्नैवंविधमिश्रप्रबन्धे तेषामसूयावसरः । अनुप्रासप्रवणानामगणितान्यसमतादिगुणानां गौडानामेवानुप्रासशून्ये काव्ये असूयायाः संभवात् । एवं स्थिते यत् प्रेमचन्द्रशर्माभिः प्रतिपादितं वैदर्भास्तु गुणपक्षपातितया विसदृशार्थकेपि संदर्भे उपक्रान्तबन्धत्यागो दोष एवेति मन्यन्ते इति तत् तेषां गौडपक्षपातनिवेशेनैव कथनमिति सुधीभिर्विचार्यम् । केचित्तु अर्थालंकारा उपमादयः डम्बरो विकटवर्णता च तौ अपेक्षमाणा इति विवृण्वते । परमर्थालंकारविषये गौडवैदर्भयोः समानरागत्वान्न तदेव विशिष्य गौडानां काव्यस्य लक्षणं भवेत् ॥ इदानीं समताविषये साहित्यकोविदानामन्येषां लक्षणोदाहरणानि दर्शयामः । परस्परविभूषणो गुणालंकारग्रामः समम् इति भरतः । तदुक्तम् (xvi. 96)—

नातिचूर्णपदैर्युक्ता न च व्यर्थाभिधायिभिः ।
न दुर्बोधा तैश्च कृता समत्वात् समता मता ॥ इति ।

अवेक्षमाणा ववृधे

५६अस्योदाहरणम्—

स्मरनवनदीपूरेणोढा मुहुर्गुरुसेतुभि-
र्यदपि विधृता दुःखं तिष्ठन्त्यपूर्णमनोरथाः ।
तदपि लिखितप्रख्यैरङ्गैः परस्परमुन्मुखा
नयननलिनीनालानीतं पिबन्ति रसं प्रियाः ॥ इति ।

६१मार्गाभेदः समता इति वामनः (iii. 1. 91) । उदाहरति च अस्त्युत्तरस्याम् इति ।

यन्मृदुप्रस्फुटोन्मिश्रवर्णबन्धविधिं प्रति ।
अवैषम्येन भणनं समता साभिधीयते ॥

६५इति भोजराजः (i. 67) । अस्योदाहरणं च—

यच्चन्द्रकोटिकरकोरकभारभाजि
बभ्राम बभ्रुणि जटापटले हरस्य ।
तद्वः पुनातु हिमशैलशिलानिकुञ्ज-
झङ्कारडम्बरविरावि सुरापगाम्भः ॥ इति ।

७०अविषमबन्धत्वम् समता इति वाग्भटः (काव्यानुशासन, p. 30) । तदुदाहरणं च—

मसृणचरणपातं गम्यतां भूः सदर्भा
विरचय सिचयान्तं मूर्ध्नि घर्मः कठोरः ।
तदिति जनकपुत्री लोचनैरश्रुपूर्णैः
पथि पथिकवधूभिः शिक्षिता वीक्षिता च ॥ इति ।

७६जगन्नाथस्तु (p. 59) प्रक्रमभङ्गेन अर्थघटनात्मकमवैषम्यं समता इति समतां संलक्ष्य—

हरिः पिता हरिर्माता हरिर्भ्राता हरिः सुहृत् ।
हरिं सर्वत्र पश्यामि हरेरन्यन्न भाति मे ॥

८०इत्युदाजहार । मम्मटस्तु समतां क्वचिद्दोषरूपां मन्यते । यथा मात-

---

i. 50—अपेक्षमाणा for अवेक्षमाणा P, B, Rn;—ववृते for ववृधे R, M, Cb, Cv;—बध्नन्ति....काव्यपद्धतिम् for ववृधे.... काव्यपद्धतिः D.

पौरस्त्या काव्यपद्धतिः ॥ ५० ॥

मधुरं रसवद्वाचि

८१ङ्गा इत्यादौ (ante p. 56) । क्वचिच्च गुणस्वरूपाम् । गुणस्वरूपायाः अस्याः प्रबन्धानुरूपेण माधुर्यौजःप्रसादेषु यथायथमन्तर्भावः । दर्पणकारोपि प्रकाशकारमेवानुसरति । तेनोक्तं यथा (viii. 13)—

क्वचिद्दोषस्तु समता मार्गभेदस्वरूपिणी ।
अन्यथोक्तगुणेष्वस्या अन्तःपातो यथायथम् ॥ इति ।

हेमचन्द्राचार्योपि समता न सर्वत्र गुणरूपा इति कविसंप्रदायानुमत्या
८७निवेद्य समतोज्झितं काव्यमुदाहरति । यथा (p. 197)—

अज्ञानाद्यदि वाधिपत्यरभसादस्मत्परोक्षे हृता
सीतेयं प्रतिमुच्यतामिति वचो गत्वा दशास्यं वद ।
नोचेल्लक्ष्मणमुक्तमार्गणगणाच्छादोच्छलच्छोणित-
च्छत्रच्छन्नदिगन्तमन्तकपुरं पुत्रैर्वृतो यास्यसि ॥ इति ।

९२एवमन्यत्रापीति ज्ञेयम् ॥ ९० ॥

माधुर्यं लक्षयति—मधुरमिति। रसवत् सरसं वाक्यं मधुरम् माधुर्यगुणवत् । ननु अनेन लक्षणेन माधुर्यमेव रसः इति पर्यायेण प्रतिपादितं
३भवति। माधुर्यं च गुणः। गुणानां हि साक्षादथवा शब्दार्थनिष्ठतया परंपरया रसोपकारकत्वं सर्वैः प्राचीनार्वाचीनैः साहित्यशास्त्रप्रवीणैरङ्गीकृतं वर्तते। न केनापि तस्य रसात्मकत्वमङ्गीकृतमत आह—वाचि इति। वाचि वाक्य-
९घटकतत्तद्वर्णसमासनिबद्धरीत्यादिषु। तथा वस्तुनि प्रतिपाद्यतत्तदर्थविशिष्टवृत्त्यादिषु च । अर्थाश्चात्र तत्तद्रसीयविभावानुभावादयो ग्राह्याः । एषां रसव्यञ्जकत्वमुक्तं प्रकाशे (iv. 28)—व्यक्तः स तैर्विभावाद्यैः स्थायि-
९भावो रसः स्मृतः। इति । रसः—

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्साद्भुतसंज्ञाश्च शान्तोपि नवमो रसः ॥

१२इत्यादिष्वन्यतमः। तथा रसनधर्मसंबन्धित्वात् भावतदाभासादयश्च रसशब्देन ग्राह्याः। रसो भावस्तदाभासो वा स्थितः व्यञ्जकतया संबद्धः । तेन च वाक्यस्य रसव्यञ्जकवर्णविशिष्टरचनात्वं रसव्यञ्जकार्थविशिष्ट-

वस्तुन्यपि रसः स्थितः ।
येन माद्यन्ति धीमन्तो

१५वृत्तिमत्त्वं वा माधुर्यम् इति लक्षणं सिद्धम् । तत्र शृङ्गारकरुण-
शान्तानामसमासा अल्पसमासा वा मृदुवर्णा वैदर्भीरीतिर्व्यञ्जिका । वीर-
बीभत्सरौद्राणां दीर्घसमासा विकटवर्णबहुला च गौडीया रीतिः प्रका-
१८शिका । हास्याद्भुतभयानकानां च मध्यमवर्णा मध्यमसमासा च पा-
ञ्चाली रीतिः उद्बोधिका । तदुक्तं प्रकाशटीकायाम् (P. 587)—

वैदर्भीपाञ्चाल्यौ प्रेयसि करुणे भयानकाद्भुतयोः ।
लाटीं गौडीं रौद्रे कुर्याद्यथायथैवोचितं सुकविः ॥ इति ।

सोयं रसः किंस्वरूपः तत् कथयति—येनेति । धीमन्तः सहृदयाः
कुशलबुद्धयो वा येन वस्तुना माद्यन्ति आनन्दातिशयेन हृष्टा भवन्ति
२४स रसः । अस्य हर्षातिशयस्य हेतुस्तावत् काव्यार्थानुशीलनोद्बुद्ध-
चमत्कारापरपर्यायः लोकोत्तराह्लादः । स एव च रसः । आह्लादस्य
स्वरूपमुपमया विशदयति मधुनेति । मधुव्रताः भ्रमराः मधुना यथा
२७माद्यन्ति तथेत्यर्थः ॥ माधुर्यविषये अन्येषां लक्षणोदाहरणानि । तत्र प्रथमं
तावद्भरतः (xvi. 98)—

बहुशो यच्छ्रुतं काव्यमुक्तं वापि पुनः पुनः ।
नोद्वेजयति तस्माद्धि तन्माधुर्यमुदाहृतम् ॥ इति ।

श्रव्यं नातिसमस्तार्थकाव्यं मधुरमिष्यते । इति भामहः (ii. 3) ।
ओजःप्रसादयोरपि श्रव्यत्वान्नैतल्लक्षणं निर्दोषमिति प्रकाशकारादयः ।
३३वामनस्तु (iii. 1. 20)पृथक्पदत्वं माधुर्यमिति लक्षणं कृत्वा अस्त्युत्त-
रस्यामिति उदाहरत् । भोजोपि (i. 68)—या पृथक्पदता वाक्ये
तन्माधुर्यमिति स्मृतम् । इति शब्दगतमाधुर्यलक्षणं कृत्वा—स्थिताः
३६क्षणं पक्ष्मसु ताडिताधराः । इत्युदाजहार । परं नैतत् क्षोदक्षमम् ।
समासेपि माधुर्यदर्शनात् । यथा (हेमचन्द्र p. 198)—

अनवरतनयनजललवनिपतनपरिमुषितपत्रलेखान्तम् ।
करतलनिषण्णमबले वदनमिदं किं न तापयति ॥ इति ।

---

i. 51—रसस्थितिः for रसः स्थितः all except N, also Bhoja, i. 39.

मधुनेव मधुव्रताः ॥ ५१ ॥

[०]वाग्भटस्तु (काव्यानुशासन, p. 30) यत्र आनन्दमन्दं मनो द्रवति तन्माधुर्यम् तच्च रसभेदेन विविधम् । तत्र शृङ्गारे यथा—

प्रियतमावदनेन्दुविलोकितैरसुहितः कलकण्ठयुवा नवः ।
प्रतिमुहुः प्रतिगत्य नभस्तलाद्वलति याति चलत्यथ यात्यथ ॥

[४]शान्ते यथा—

यैः शान्तरागरुचिभिः परमाणुभिस्त्वं
निर्मापितस्त्रिभुवनैकललामभूतः ।
तावन्त एव खलु तेप्यणवः पृथिव्यां
यत् ते समानमपरं न हि रूपमस्ति ॥

[९]करुणे यथा—

गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ॥ इति ।

[२]प्रकाशकार आह (viii. 58)—

आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम् ।
करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम् ॥ इति ।

[५]जगन्नाथस्तु (P. 59) एकस्या एवोक्तेर्भङ्ग्यन्तरेण पुनःकथनात्मकयुक्तिवैचित्र्यं माधुर्यमिति अर्थगतमाधुर्यस्य लक्षणं विधाय उदाहरति—

विधत्तां निःशङ्कं निरवधिसमाधिं विधिरहो
सुखं शेषे शेतां हरिरविरतं नृत्यतु हरः ।
कृतं प्रायश्चित्तैरलमथ तपोदानयजनैः
सवित्री कामानां यदि जगति जागर्ति भवती ॥ इति ।

[१]दर्पणकारस्तु (viii. 2)—चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते । इति लक्षणं विधाय—

अनङ्गमङ्गलभुवस्तदपाङ्गस्य भङ्ग्यः ।
जनयन्ति मुहुर्यूनामन्तःसंतापसंततिम् ॥

[९]इत्युदाहरत् । एवमेवान्येपि विद्यानाथादयः ॥ ५१ ॥

यया कयाचिच्छ्रुत्या यत् समानमनुभूयते ।
तद्रूपा हि पदासत्तिः सानुप्रासा रसावहा ॥ ५२ ॥

वाचि रसः स्थितः इत्यनेनोक्तायाः वाक्यरसस्थितेर्व्यञ्जकं विशिष्टवर्णविन्यासरूपं श्रुत्यनुप्रासं वैदर्भानुमतं वर्णयति—ययेति । यया कयापि [३]कण्ठतालव्याद्यन्यतरया श्रुत्या श्रूयतेनेनेति श्रुतिरुच्चारणम् । करणे क्तिन् । अथवा श्रुतिः श्रवणम् । भावे क्तिन् । तयाश्रुत्या समानम् पूर्वोच्चरितसदृशम् अथवा पूर्वश्रुतवर्णसदृशम् अर्थादेकस्थानत्वेन । यत् अनुभूयते तद्रूपा [६]तादृशसादृश्यानुभवोत्पादिका । पदासत्तिः अव्यवहितपदप्रयोगः । सानुप्रासा अनु समीपे प्रकृष्टः रसानुकूलो न्यासः अनुप्रासः तया युक्ता । श्रुत्यनुप्रासवतीति बोद्धव्यम् । सा च रसावहा रसपोषिका अस्तीति शेषः । [९]अयमाशयः । कण्ठतालव्याद्यनेकस्थानोच्चार्यत्वेन व्यञ्जनानां सादृश्यं श्रुत्यनुप्रासः । अयं वैदर्भप्रियः । तदुक्तं भोजराजेन (ii. 70-72)—

आवृत्तिर्या तु वर्णानां नातिदूरान्तरस्थिता ।
[१२]अलंकारः स विद्वद्भिरनुप्रासः प्रदर्श्यते ॥
श्रुतिभिर्वृत्तिभिर्वर्णैः पदैर्नामद्भिरुक्तिभिः ।
लाटानामुक्तिभिश्चायं षट्प्रकारः प्रकाशते ॥
[१५]प्रायेण श्रुत्यनुप्रासः तेष्वनुप्रासनायकः ।
सनाथेन हि वैदर्भी भाति तेन विचित्रिता ॥ इति ।

[१७]दर्पणकारोपि (x. 5)—

उच्चार्यत्वाद्यदेकत्र स्थाने तालुरदादिके ।
सादृश्यं व्यञ्जनस्यैष श्रुत्यनुप्रास उच्यते ॥ इति ।

[२०]अस्यानुप्रासस्य सौन्दर्यं वर्णितं भोजराजेन (ii. 76)—

यथा ज्योत्स्ना शरच्चन्द्रं यथा लावण्यमङ्गनाम् ।
अनुप्रासस्तथा काव्यमलंकर्तुमिह क्षमः ॥ इति ।

[२४]अलंकारस्यास्य अलंकारनिरूपणप्रकरणे निरूपणीयत्वेपि अत्र वैदर्भमार्गभेदकथनप्रसङ्गतः निरूपणं कृतमिति बोद्धव्यम् । अतोग्रे वक्ष्यति—काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलंक्रियाः (ii.3) इति ॥ ५२ ॥

---

i. 52—तद्रूपादि for तद्रूपा हि M, R, D, N;—पदासक्तिः for पदासत्तिः R; पदावृत्तिः Cv.

एष राजा यदा लक्ष्मीं प्राप्तवान् ब्राह्मणप्रियः ।
तदा प्रभृति धर्मस्य लोकेस्मिन्नुत्सवोभवत् ॥ ५३ ॥
इतीदं नाद्दतं गौडैरनुप्रासस्तु तत्प्रियः ।

श्रुत्यनुप्रासमुदाहरति—एष इति । ब्राह्मणप्रियः ब्राह्मणाः प्रिया यस्य सः अथवा ब्राह्मणानां प्रियः धर्मशीलत्वात् । एतादृशः एष राजा यदा
३लक्ष्मीं संपदं राज्यश्रियं वा प्राप्तवान् लब्धवान् । तदा प्रभृति तत्कालमारभ्य अस्मिल्लोके धर्मस्य सदाचरणस्य उत्सवः उत्कर्षः अभवत् । दानादिभिः धर्मकृत्यं विस्तारयामास अथवा धर्मेण प्रजाः शशासेत्यर्थः । अत्र
६षकाररेफौ मूर्धन्यौ । जकारयकारौ तालव्यौ । दकारलकारौ दन्त्यौ । इति प्रथमपादे । तकारदकारौ दन्त्यौ । पकारभकारावोष्ठ्यौ । तकार-धकारौ दन्त्यौ । इति तृतीयपादे च निरन्तरौ । द्वितीयपादे रेफ-
९णकारौ मूर्धन्यौ । चतुर्थे च लकारसकारौ दन्त्यौ सान्तरौ । इति स्थान-साम्याच्छ्रुत्यनुप्रासः । स च धार्मिकराजर्षिविषयकरतिभावस्य पोषकः इति अस्ति माधुर्यम् ॥ ५३ ॥

गौडवैदर्भयोरन्तरं स्फुटं वर्णयति—इतीदमिति । इति एवं पूर्वदर्शित-रचनाप्रकारकमिदं श्रुत्यनुप्रासघटितं काव्यं गौडैः पौरस्त्यैः नाद्दतम् माधु-
३र्यगुणत्वेन नाङ्गीकृतम् । समानश्रुतिवर्णानां रसोपकारकचमत्कृतिशून्य-त्वान्नायमलंकार इति तेषामभिप्रायः । अनुप्रासः वर्णावृत्तिरनुप्रासः इत्यग्रे(i.55)वर्णितो वर्णानुप्रासः तेषां गौडानां प्रियः । सदृशवर्णोच्चारणेन
६आविर्भूता चमत्कृतिः रसावहा इति तेषां हृदयम् । वैदर्भीयैस्तु अनुप्रा-सादपि वर्णानुप्रासादपि वर्णानुप्रासमपेक्ष्येत्यर्थः । ल्यब्लोपे पञ्चमी । इ-दम् श्रुत्यनुप्राससनाथं काव्यमिति शेषः । इष्यते रसोपकारकत्वेम स्वी-
९क्रियते । प्रायःपदेन शैथिल्यपारुष्यदोषवर्जिते वृत्यनुप्रासेपि तेषामादरो-

---

i. 53—राज्यं for लक्ष्मीं M, Rn;—ततः for तदा P, B;—उद्भवः for उत्सवः Rn.

i. 54—हि for इ V, Cb (?).

अनुप्रासादपि प्रायो वैदर्भैरिदमीप्सितम् ॥ ५४ ॥

वर्णावृत्तिरनुप्रासः पादेषु च पदेषु च ।

१०स्तीति ध्वन्यते । तदुक्तं प्रकाशे (ix. 80)—

माधुर्यव्यञ्जकैर्वर्णैरूपनागरिकोच्यते ।
ओजःप्रकाशकैस्तैश्च परुषा कोमलापरैः ॥ इति ।

उपनागरिका वैदर्भी परुषा गौडी कोमला पाञ्चाली इति संज्ञान्तरं ज्ञेयम् । श्रुत्यनुप्रासवृत्यनुप्रासयोः चमत्काराचमत्कारसाक्षात्कारे वैदर्भ-
१५गौडा एव प्रमाणम् । न तत्र काचन युक्तिरित्यलं पल्लवितेन ॥ ५४ ॥

गौडप्रियमनुप्रासं लक्षयति—वर्ण इति । पादेषु श्लोकतुरीयभागेषु पदेषु सुपतिङन्तरूपेषु । चद्वयमुभयप्राधान्यं सूचयति । तथा च पादगता
३पदगता वा वर्णावृत्तिः वर्णस्य वर्णयोर्वर्णानां वा आवृत्तिः पुनः पुनरुच्चारणम् अनुप्रासः । पुनः पुनरुच्चारणेन साम्यप्रतीतिरनुप्रास इत्यर्थः । तदुक्तं प्रकाशे (ix. 72)—वर्णसाम्यमनुप्रासः इति । अत्र वर्णशब्देन
६व्यञ्जनं ग्राह्यम् । केवलस्वराणामावृत्तौ चमत्काराभावात् । पादेषु च पदेषु च इति बहुवचनेन नैकपादगतो नैकपदगतो वा अनुप्रासः वैचित्र्यावहः इति सूचितम् । अत एव च पतत्प्रकर्षताया दोषत्वं समताया गुणत्वं च संग-
९च्छते । सादृश्यं भिन्नयोरेव भवति इति उच्चारणकालभेदेन एकस्यापि वर्णस्य भेदोवगन्तव्यः । अथवा वर्णावृत्तिरित्यस्य वर्णानामावृत्तिः आवृत्तिजन्या प्रत्यभिज्ञा इत्यर्थः स्वीकर्तव्यः । पुनः पुनः श्रवणजन्यायाः
१२प्रत्यभिज्ञाया अपि चमत्कारजनकत्वं सुकरम् । आवृत्तिश्च स्वरसहितस्येति नाग्रहः । स्वरवैषम्येपि चमत्कारदर्शनात् । उक्तं हि दर्पणे (x. 3)—
अनुप्रासः शब्दसाम्यं वैषम्येपि स्वरस्य यत् । इति । सा वर्णावृत्तिः
१५कीदृशी अपेक्ष्यते इति विशदयति पूर्वेति । पूर्वोच्चारितवर्णस्य यः अनुभवः श्रावणप्रत्यक्षं तज्जनितो यः संस्कारः भावनाविशेषस्तस्य बोधिनी उद्बोधकर्त्री एतादृशी यदि अदूरता द्वितीयवर्णादीनां निकटस्थितिः
१८स्यात् तदैवानुप्रास इति शेषः । अस्यायमाशयः । सादृश्यप्रतीतेः प्रत्यभिज्ञाया वा चमत्कृतिजनिकायाः असंभवे नालंकारः स्यात् वैचित्र्यस्यैव

---

i. 54—इष्यते for ईप्सितम् P, B; आदृतम् Rn.

पूर्वानुभवसंस्कारबोधिनी यद्यदूरता ॥ ५५ ॥
चन्द्रे शरन्निशोत्तंसे कुन्दस्तबकविभ्रमे।

अलंकारत्वेन शिष्टैः स्वीकृतत्वात्। तथा च सादृश्योद्बोधिका वर्णावृत्तिः [1]अनुप्रासालंकार इत्यर्थः। तच्च सादृश्योद्बोधनम् आवृत्तौ द्वित्रवर्णव्यवधानं कथंचित् सहते न तु बहुवर्णव्यवधानम्। एतदग्रे प्रत्युदाहरणे स्फुटीभविष्यति। अस्यानुप्रासस्य भोजराजप्रभृतिभिर्बहवः प्रकारा दर्शिताः। तान् सर्वान् विस्तारभिया वयमत्र प्रतिपादयितुं नेहामहे। जिज्ञासुभिस्ते सर्वे तत एव ज्ञातव्याः। कांश्चिदतिप्रसिद्धान् वयमत्र विवेचयामः। तथा च सोयमनुप्रासः छेकवृत्तिलाटभेदेन त्रिविधः। तदुक्तं प्रकाशे [2](ix. 79)—वर्णसाम्यमनुप्रासः छेकवृत्तिगतो द्विधा इति। तथैव (ix. 81)—शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः इति। एतेषां क्रमेणोदाहरणानि—

ततो रणपरिस्पन्दमन्दीकृतवपुः शशी।
दधे कामपरिक्षामकामिनीगण्डपाण्डुताम् ॥ इति।

अत्र नकारदकारात्मकस्य तथा णकारडकारात्मकस्य अनेकव्यञ्जनस्य सकृत् साम्यमिति छेकानुप्रासः।

अपसारय घनसारं कुरु हारं दूर एव किं कमलैः।
अलमलमालि मृणालैरिति वदति दिवानिशं बाला ॥

अत्र रेफस्य लकारस्य च असकृदावृत्त्या वृत्त्यनुप्रासः।

यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य।
यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ॥

अत्र तात्पर्यभेदेनार्थभेदः इति लाटानुप्रासः ॥ ९९ ॥

उद्देशानुरोधेन पादगतं वर्णानुप्रासमुदाहरति—चन्द्रे इति। कुन्दानां कुन्दकुसुमानां स्तबकः गुच्छः तद्वत् विभ्रमः शोभा यस्य तस्मिन् शरन्निशोत्तंसे शारदरात्रिभूषणायमाने चन्द्रे। इन्द्रनीलमणेः निभं सदृशं लक्ष्म कलङ्कः अलिनः भ्रमरस्य श्रियं शोभां संदधाति बिभर्ति। अत्र

[1] 55—V reads the second line thus—पूर्वानुभूतसंस्कारः क्रियते पूर्वसूरिभिः।

[2] i. 56—संनिभे for विभ्रमे Rn.

इन्द्रनीलनिभं लक्ष्म संदधात्यलिनः श्रियम् ॥ ५६ ॥
चारु चान्द्रमसं भीरु बिम्बं पश्यैतदम्बरे ।

चतुर्षु पादेषु चन्द्र कुन्द इन्द्र संद इति क्रमेण नकारदकारौ अनुसृतौ भवतः । अथवा चन्द्र इन्द्र कुन्द संद इति नकारदकाररेफाणां नकारदकारयोश्च आवृत्तिः इति वृत्त्यनुप्रासः । एवंविधैः अलंकारैः उपस्कृतोयं श्लोकः स्ववर्ण्यशृङ्गारोद्दीपकविभावभूतं रजनीकरमलंकुरुते तेन च शृङ्गाररसः परिपुष्टो भवतीति शब्दनिष्ठमाधुर्यं रसपरिपोषकं ज्ञेयम् । तथैव च रूपकोपमाद्यर्थालंकारैरुपस्कृतो वाच्यार्थोपि तमेव रसं परिपोषयति इत्यर्थनिष्ठमपि माधुर्यं ज्ञेयम् । केचित्तु अत्र प्रथमपादे शकारयोः द्वितीये ववयोरभेदात् ककारवकारयोस्तृतीये लकारनकारयोरनतिदूरस्थितयोरावृत्त्या वृत्त्यनुप्रासः । चतुर्थे तु संदधात्यलिनः इत्यत्र यकारवर्जिताः सर्वे दन्त्या इति श्रुत्यनुप्रासः इति योजयन्ति । परं मूले लक्षणश्लोके पादेषु च पदेषु च इति स्थानद्वयस्य निर्देशः कृतः । तदनुरोधेनैव उदाहरणोपपत्तिः कर्तव्या इति चिन्त्यमेतद् व्याख्यानमिति भाति ॥ ९६ ॥

इत्थं पादगतमनुप्रासं प्रदर्श्य संप्रति पदगतमनुप्रासं दर्शयति—चार्विति । हे भीरु संशयसंत्रस्ते कोमलाशये । चारु त्वच्चिन्तनेन मनोहरं मन्मथाक्रान्तं मदनाभिभूतं मन्मनः मच्चित्तम् । निर्दयं यथा तथा हन्तुं प्रहर्तुं उद्यतं उद्युक्तं एतत् चान्द्रमसं इन्दुसंबन्धि बिम्बं मण्डलं अम्बरे वियति पश्य । कामुकस्य कुपितां नायिकां प्रत्युक्तिरियम् । अत्र प्रथमपादे चाकाररुकारयोरावृत्तेर्वृत्त्यनुप्रासः द्वितीये मकारबकारयोः संयुक्तयोः सकृदावृत्तेः छेकानुप्रासः । अत्र पादद्वये भिन्नाः अनुप्रासाः केवलं पदेषु वर्तमानाः सन्तीति पदगता ज्ञेयाः । पूर्वत्र तु पादे पादे तेषामावृत्तिरिति पादगतता बोद्धव्या । केचित्तु अनुप्रासे स्वरावृत्तेः प्रयोजनं नास्ति तथापि स्वरसहितव्यञ्जनावृत्तिः सविशेषां शोभां धत्ते इति प्रदर्शनाय एतदुदाहरणमिति मन्यन्ते । चाकाररुकारयोरावृत्त्या च तत्

---

i. 56—अमल for अंलिनः V.

i. 57—पश्येदम् for पश्यैतद् N.

मन्मनो मन्मथाक्रान्तं निर्दयं हन्तुमुद्यतम् ॥ ५७ ॥
इत्यनुप्रासमिच्छन्ति नातिदूरान्तरश्रुतिम् ।
न तु रामामुखाम्भोजसदृशश्चन्द्रमा इति ॥ ५८ ॥

१२समर्थयन्ते। परं तत्रारुचिबीजं पूर्वश्लोकव्याख्याने दर्शितमेव । अत्र पूर्ववदेव अनुप्रासालंकारस्य पर्यायोक्तालंकारस्य च विप्रलम्भशृङ्गार-परिपोषकत्वात् शब्दार्थनिष्ठं माधुर्यं ज्ञेयम् । चारु चान्द्रमसमिति ५वाक्यस्य कोपं विहाय मां भजस्व इत्यर्थतात्पर्यकत्वेन पर्यायोक्त्यलं-कारो ज्ञेयः ॥ ५७ ॥

अनुप्रासलक्षणे निवेशितस्य अदूरता इति विशेषणस्य अन्वयव्यति-रेकेण प्रयोजनं दर्शयति—इतीति । इति पूर्वश्लोकेषु दर्शिताम् नाति-३दूरान्तरश्रुतिम् अतिदूरं अत्यन्तं अन्तरं व्यवधानं यस्याः सा अति-दूरान्तरा तथाविधा श्रुतिर्यत्र सा अतिदूरान्तरश्रुतिः तथा न भवतीति नातिदूरान्तरश्रुतिः ताम् । अत्र वर्णावृत्तिरिति पदमध्याहार्यम् । अथवा ६नातिदूरान्तरश्रुतिम् इतिपदमनुप्रासम् इत्यस्यैव विशेषणम् । इच्छन्ति गौडा इति शेषः। अदूरतायाः प्रत्युदाहरणं कथयति—नत्विति। रामाया मुखमेव अम्भोजं तत्सदृशः चन्द्रमा इति । एवंविधविदूरावृत्तौ वृत्त्य-९नुप्रासो न भवति । अत्र रामा इति माकारस्य चन्द्रमा इत्यत्र आवृत्तिः । सा च दूरश्रुतिरिति पूर्वसंस्कारबोधिका न भवतीति नात्र माकारानुप्रासः । विभिन्नस्वरयोः मकारयोः प्रथमे पादे दकार-२रयोश्च नातिदूरस्थयोर्द्वितीये आवृत्तिर्वर्तते । अतः केवलवर्णावृत्तेः सत्त्वादत्र वृत्त्यनुप्रासो वर्तते एव । तथा सदृशश्चन्द्रमा इत्यत्र श्रुत्य-नुप्रासोपि दृश्यते । उदाहृते अस्मिन् वृत्त्यनुप्रासे वैदर्भाणां न प्रतिकूलता ५इति—अतो नैवमनुप्रासं दाक्षिणात्याः प्रयुञ्जते इति उत्तरश्लोकस्थ-विधानेन निष्पद्यते इति विचारणीयं विद्वद्भिः ॥ ५८ ॥

---

i. 57—कर्तुं for हन्तुं M, Rn;—कर्तुमुत्थितम् for हन्तुमुद्यतम् N;—मन्मथो ... उद्यतः for मन्मनो ... उद्यतम् D.

i. 58—स्थितिम् for श्रुतिम् Rn.

स्मरः खरः खलः कान्तः कायः कोपश्च नः कृशः ।
च्युतो मानोधिको रागो मोहो जातोसवो गताः ॥५९॥

इत्यादि बन्धपारुष्यं शैथिल्यं च नियच्छति ।
अतो नैवमनुप्रासं दाक्षिणात्याः प्रयुञ्जते ॥ ६० ॥

वैदर्भाप्रियं सदोषमनुप्रासं दर्शयति—स्मर इति । नायकेन उपेक्षिताया विरहिण्या उक्तिरियम् । स्मरः मदनः खरः तीक्ष्णः अतिदुःसहः इत्यर्थः । कान्तः प्रेयान् खलः निष्ठुरः । नः अस्माकं कायः शरीरं कोपश्च कान्तविषयकः कृशः क्षीणः नष्टप्रायः । मानः स्वगौरवम् च्युतः गलितम् । रागः संभोगाभिलाषः अधिकः वृद्धिं प्राप्तः । मोहः चित्तवैक्लव्यम् जातः उत्पन्नम् । असवः प्राणाः गताः गतप्रायाः । अत्र प्रथमचरणे रेफयोः द्वितीये ककाराणां च आवृत्त्या वृत्त्यनुप्रासः । तृतीयचतुर्थयोर्दन्त्यस्थानिनां निवेशात् श्रुत्यनुप्रासः । प्रथमार्धे विसर्गबाहुल्यात् पारुष्यम् उत्तरार्धे संयुक्तवर्णाद्यभावाच्च शैथिल्यम् । अत्र वृत्त्यनुप्रासश्रुत्यनुप्रासयोः पारुष्यशैथिल्यदोषग्रस्तत्वान्नेमौ अलंकारौ भवतः । तेन च नैताभ्यां विप्रलम्भशृङ्गारस्य परिपोष इति नास्त्यत्र माधुर्यगुणसद्भावः ॥ ५९ ॥

उदाहृतानुप्रासस्य दोषं दर्शयति—इत्यादीति । एवमादिकं सानुप्रासमपि काव्यं बन्धपारुष्यम् विसर्गबाहुल्येन पूर्वार्धे शैथिल्यम् संयुक्तव्यञ्जनविसर्गादीनामभावाच्छिथिलताम् उत्तरार्धे च नियच्छति अर्पयति । उक्तं हि विसर्गादीनां पारुष्यम्—अनुस्वारविसर्गौ तु पारुष्याय निरन्तरौ । इति । एवं दोषसनाथमनुप्रासम् वृत्तिश्रुत्यनुप्रासम् दाक्षिणात्याः वैदर्भाः न प्रयुञ्जते न व्यवहरन्ति । अयमाशयः । वैदर्भाः श्रुत्यनुप्रासे आदरयुक्ताः वृत्त्यनुप्रासे च अमत्सरिणः । तथापि केवलमनुप्रासलोभेन न सदोषयोस्तयोः स्वीकारं ते कुर्वन्ति । गौडास्तु सदोषमपि तमनुप्रासलोभेनाङ्गीकुर्वन्ति । अयमेव भावः नैवमनुप्रासं दाक्षिणात्याः प्रयुञ्जते इति वाक्येन कविना स्पष्टीकृतः । अत्र गौडैः प्रेमचन्द्रशर्मभिर्यद्व्याख्यानं कृतं तन्न ग्रन्थकृदाशयानुकूलमिति सुधीभिर्विचारणीयम् ॥ ६० ॥

i. 60—निगच्छति B, quoting in defence Manu x. 93 and xii.11. Manu ii. 93 is, says B, a misprint in Jolly; —अनुगच्छति for च नियच्छति V;—नैनं for नैवं N, V.

आवृत्तिमेव संघातगोचरां यमकं विदुः ।

ननु यदि वर्णावृत्तिः रसपोषकमाधुर्यगुणवती तर्हि यमकमपि वर्णसंघातावृत्तिरूपं माधुर्यगुणशालि अस्तीति तस्याप्यत्र निरूपणं कुतो न कृतमिति कथयति—आवृत्तिमिति । संघातः पूर्वोक्तवर्णसमुदायः गोचरो विषयो यस्यास्तामावृत्तिं पुनरुच्चारणम् यमकम् यमकसंज्ञकशब्दालंकारम् विदुः जानन्ति अलंकारिका इति शेषः । अत्र आवृत्तिः यथानुपूर्विकाणां स्वरसहितव्यञ्जनानाम् स्वररहितकेवलव्यञ्जनावृत्तेरनुप्रासविषयत्वात् । सेयमावृत्तिः सार्थपदस्यास्ति चेत् द्वितीयपदं भिन्नार्थमपेक्ष्यते । अन्यथा—यातु यातु किमनेन तिष्ठता मुञ्च मुञ्च सखि सादरं वचः । इत्याद्येकार्थपदावृत्तिस्थले यमकालंकारातिप्रसङ्गः स्यात् । परं नैतादृशे स्थले केनापि साहित्यकोविदेन यमकं स्वीक्रियते । ससुरभिं सुरभिं सुमनोभरैः इत्यादौ रभिंसु इति निरर्थकपदावृत्तौ यमकस्य सद्भावादुक्तं सार्थपदस्यावृत्तौ इति । तथा चोक्तं दर्पणे (x. 8)—

सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ॥ इति ।

अनुप्रासे बहूनां क्वचिदेकस्वरसहितस्य व्यञ्जनस्य आवृत्तिः संभवति । यमके तु स्वरसहितव्यञ्जनानां पूर्वक्रमेणैवावृत्तिः इत्युभयोर्भेदः । यमकविषये तृतीयपरिच्छेदे तन्निरूपणप्रसङ्गे विशेषं कथयामः । तत् तु तद्यमकं तु नैकान्तमधुरम् न अनुप्रासवच्छब्दमाधुर्यगुणवत् । यतः स्वरसहितवर्णसंघातावृत्त्यपेक्षया वर्णावृत्तौ मध्ये मध्ये विभिन्नवर्णनिवेशात् सा अनुप्रासरचना विशेषशोभाशालिनी भवति । यथा मालायाः सजातीयपुष्पसंघातग्रथनापेक्षया प्रतिकुसुमं परस्तात् भिन्नभिन्नकुसुमसंनिवेशे सति सा माला रमणीया भवति तथेयमनुप्रासरचना मनोहरा भवतीति भावः । अपसारय घनसारं कुरु हारं दूर एव किं कमलैः । इत्यादिवृत्त्यनुप्रासोदाहरणेषु अन्तरान्तरा एकवर्णावृत्त्या यादृशी चारुता न तादृशी—

नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्तमलोकयत् ससुरभिं सुरभिं सुमनोभरैः ॥

61—आवृत्ति वर्णसंघात for आवृत्तिमेव संघात P, B, D, Rn.

तत् तु नैकान्तमधुरमतः पश्चाद्विधास्यते ॥ ६१ ॥
कामं सर्वोप्यलंकारो रसमर्थे निषिञ्चति ।

२७इत्यादौ स्वरव्यञ्जनसंघातावृत्तिरूपे यमके । अपरं च वर्णसंघातावृत्तौ अर्थावबोधः क्लेशेन भवति । न तथा अनुप्रासविशिष्टे काव्ये । तथा च यमके अर्थानुसंधानव्यग्रतया रसप्रतीतेर्विलम्बेन भावान्नेयं रचना रसोप-
३०कारिका । अनुप्रासस्तु अर्थानुसंधाने व्यग्रतामकुर्वन्नेव श्रुतिमात्रेण शब्द-मलंकुर्वन् रसं पुष्णाति इति तत्र माधुर्यमस्तीति भावः । अथ यमकस्य रसानुपकारकत्वे कथमलंकारता स्यात् । रसोपकारकयोरेव शब्दार्था-
३३न्यतरशोभाजनकयोरलंकारत्वनियमात् इति चेत् सत्यम् । तदर्थमेव हि नैकान्तमित्युक्तम् । यमके माधुर्यं वर्तते एव । परं तन्नानुप्रासवत् विपुलमस्ति । अतस्तद् यमकनिरूपणं नात्र माधुर्यगुणविवेचने क्रियते ।
३६तद्विचारं शब्दालंकारप्रस्तावे करिष्यामः ॥ ६१ ॥

उद्देशवाक्ये वस्तुन्यपि रसः स्थितः इति अर्थगतमाधुर्यं निर्दिष्टमस्ति । तदिदानीं दर्शयति—काममिति । सर्वोपि शब्दगतः अर्थगतः उभयगत-
३९श्चानुप्रासोपमापुनरुक्ताद्यलंकारः । अर्थे वाच्यलक्ष्यव्यङ्ग्यस्वरूपे प्रस्तुतेर्थे कामं पर्याप्तं रसं निषिञ्चति । उत्कर्षतया स्वाश्रयीभूतार्थस्थिताम् रस-व्यञ्जकतामुत्कर्षयतीत्यर्थः । तथापि अलंकारस्य रसोत्कर्षाधायकत्वेपि ।
६अग्राम्यता ग्राम्यः हालिकादिप्राकृतजनव्यवहृतः तद्भिन्नः अग्राम्यः तस्य भावस्तत्ता विदग्धजनव्यवहारः इति भावः । भूयसा अलंकाराद्यपे-क्षयापि बाहुल्येन । एनं भारं रसनिषेकरूपं वहति । अलंकाराः यथा-
९कथंचिद्रसं परिपोषयन्ति । अग्राम्यता तु तदेव बाहुल्येनानुतिष्ठति । दृश्यते हि निरलंकारयोरपि विशुद्धयोः शब्दार्थयोः रसपरिपोषकता । तथा च अग्राम्यतासनाथा एव अलंकारा रसोत्कर्षा इति सिद्धम् । ग्रा-
१२म्यतापदं अश्लीलतादीनामुपलक्षणम् । भूयसा इत्यनेन प्राकृतजनव्यवहारे ग्राम्यता न दोषाय इति ध्वनितम् । तदुक्तं साहित्यदर्पणे विश्वनाथेन
• (vii.17)—सुरतारम्भगोष्ठ्यादावश्लीलत्वं गुणो भवेत् इति । तत्र

---

i. 62—निषिञ्चतु for निषिञ्चति M, R, Ca, Cb.

तथाप्यग्राम्यतैवैनं भारं वहति भूयसा ॥ ६२ ॥
कन्ये कामयमानं मां त्वं न कामयसे कथम् ।
इति ग्राम्योयमर्थात्मा

अवैदग्ध्यं ग्राम्यत्वं यथा—

स्वपिति यावदयं निकटे जनः स्वपिमि तावदहं किमपैति ते ।
इति निगद्य शनैरनुमेखलं मम करं स्वकरेण रुरोध सा ॥ इति ।

असभ्यार्थनिबन्धनं वा ग्राम्यत्वम् । यथा—

ब्रह्मचर्योपपन्नोहं त्वं च क्षीणा बुभुक्षया ।
भद्रे भजस्व मां तूर्णं तव दास्याम्यहं पणम् ॥ इति ।

व्रीडादित्यक्तकमश्लीलम् । यथा—

हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः ।
यथास्य जायते पातो न तथा पुनरुन्नतिः ॥

इत्यलं पल्लवितेन ॥ ६२ ॥

अग्राम्यतास्वरूपावबोधाय प्रथमं ग्राम्यं दर्शयति—कन्ये इति । कन्ये इति पदं पुत्र्या आह्वाने एव प्रयुज्यते । नायिकायास्तु प्रेयसिसुंदरिविलासिनीत्यादीनि पदानि प्रयुज्यन्ते । अतोत्र कन्ये इतिपदं वैरस्योत्पादकत्वेनानुचितम् अत एव ग्राम्यता । तदुक्तम्—यद्यत्रानुचितं तद्धि तत्र ग्राम्यं स्मृतं यथा । इति । अत्र वैरस्योत्पादकः कन्याशब्दार्थः एव । न तु अविदग्धजनव्यवहृतगल्लकट्यादिशब्दवत् कन्याशब्दः । स च—कन्येयं कलधौतकोमलरुचिः इत्यादौ सभ्यैर्व्यवहृतोस्ति । सभ्येतरव्यवहृतस्यैव गल्लादिशब्दस्य प्राचीनैर्ग्राम्यत्वमुक्तम् । कामयमानम् कामाभिलाषुकम् । मां कथं न कामयसे उपभोक्तुं कथं न वाञ्छसि । सुरताभिलाषरूपो ह्यर्थो निगूहितः सन् भङ्ग्यन्तरेण सूचितः कामिनीकुचकलशवत् रसातिशयं प्रापयति । न तथा विस्पष्टमभिधीयमानः सभ्यानां लज्जामुत्पादयन् रसास्वादवैमुख्यजनकः । अतः ईदृशः ग्राम्योर्थः सर्वथा परिहरणीय एव । अत्र यद्यपि शृङ्गारानुकूलयोः ककारमकारयोरावृत्त्या वृत्त्यनुप्रासः वर्तत एव तथापि न सोनुप्रासः अन्यो वा यःकोपि शब्दा-

i. 62—एतं for एनं B.

i. 63—कान्ते for कन्ये D;—न त्वं for त्वं न P, B, D, R.

वैरस्यायैव कल्पते ॥ ६३ ॥

कामं कन्दर्पचाण्डालो मयि वामाक्षि निर्दयः ।
त्वयि निर्मत्सरो दिष्ट्येत्यग्राम्योर्थो रसावहः ॥ ६४ ॥

शब्देपि ग्राम्यतास्त्येव सा सभ्येतरकीर्तनात् ।

१५अर्थालंकारः वर्ण्यमपि ग्राम्यार्थेन निकृष्टीकृतं पद्यस्थशृङ्गारं उपकर्तुं प्रभवति। अतोत्र ग्राम्यतादोषेण माधुर्यगुणाभावो बोद्धव्यः। एतदेव कथयति। इति एवंप्रकारकः ग्राम्यः ग्राम्यतादोषकवलितः अर्थात्मा अर्थस्वरूपम् १८वैरस्याय रसानुभवप्रतिबन्धेन अरुचये प्रकल्पते प्रभवति ॥ ६३ ॥

तमेवार्थमग्राम्यस्वरूपं दर्शयति—काममिति । वामे मनोहरे अक्षिणी यस्याः सा तत्संबुद्धिः हे वामाक्षि मनोहरलोचने । अनेन नायिकायाः ३सौन्दर्यप्रशंसया अभिप्रेतसंपादनानुकूलवचोवैदग्धिः चाटुकारस्य सूच्यते। अतो नाग्राम्यता। कन्दर्पचाण्डालः कन्दर्पे चाण्डालारोपेण तस्य प्रखरवेदनाप्रदत्वं तेन च स्वस्य दुःखातिरेकः सूच्यते । कामम् अत्यन्तं मयि ६निर्दयः तेनाभिहतः कथमपि जीवितं धारयामीत्यर्थः । त्वयि निर्मत्सरः मत्सदृशदुःखाप्रदानेन अपगतमत्सरोस्तीति जानामि । दिष्ट्या एतन्मदीयसौभाग्यमेव। इति अग्राम्यः शिष्टसंप्रदायानुसृतः अर्थः रसावहः रसव्यञ्जकतया माधुर्यगुणवानित्यर्थः। अयं भावः। कन्दर्पचाण्डालो मयि निर्दयः त्वयि निर्मत्सरः इति वाक्याभ्यां त्वयि अनुरक्तोहं त्वं च मां नानुकम्पसे इति पूर्वश्लोकोक्त एवार्थः मनोहरया भङ्ग्या सूचितोस्ति । अतः १२अग्राम्यः सन् वक्तृवैदग्ध्यसूचनेन चमत्कारभूमिरेषः । अनेन च विप्रलम्भशृङ्गारस्य परिपोषो भवति। अतोयमर्थो माधुर्यं गुणमावहति ॥ ६४ ॥

माधुर्यप्रतिबन्धकमर्थगतं ग्राम्यत्वं निरूप्य शब्दगतं तन्निरूपयति—शब्देपीति । सा ग्राम्यता सभ्येतरकीर्तनात् सभायामुच्चारणयोग्यत्वेन ३साधु सभ्यम् तस्मादितरदसभ्यम् ग्राम्यजनमात्रव्यवहृतं पदम् तस्य कीर्तनात् प्रयोगात् शब्देपि भवतीति शेषः। अत्र कीर्तनं विदग्धजनकर्तृकमेव।

---

1. 63—वैरस्याय प्रकल्पते for वैरस्यायैव कल्पते P, B, Rn.

i. 64—कामकन्दर्प for कामं कन्दर्पं M;—चण्डालो for चाण्डालो R, V.

यथा यकारादिपदं रत्युत्सवनिरूपणे ॥ ६५ ॥
पदसंधानवृत्त्या वा वाक्यार्थत्वेन वा पुनः ।
दुष्प्रतीतिकरं ग्राम्यं

ग्राम्यकर्तृके तु दोषाभावः । रत्युत्सवस्य संभोगशृङ्गारस्य निरूपणे वर्णनप्रसङ्गे यकारादिपदं यकारः आदिर्यस्य तत् पदं यभ्धातुनिष्पन्नं यभस्वेत्यादिपदम् । तत्पदप्रयोगश्च प्रयोक्तुर्ग्राम्यतां व्यञ्जयन् श्रोतुर्लज्जामुद्बोधयन् रसास्वादमाधुर्यमन्तरयति । अतः आस्वादव्यवधायकत्वान्नात्र माधुर्यगुण इति भावः । सुरतनिधुवनादिपदानां शिष्टाद्दतत्वात् तत्प्रयोगे न शब्दग्राम्यता । यथा मावे (si. 18)—नवनिधुवनलीलाः कौतुकेनाभिवीक्ष्य इति । उत्तिष्ठन्त्या रतान्ते इति च वेणीसंहारे (i. 3) ॥ ६५ ॥

पूर्वं विशिष्टपदे ग्राम्यता दर्शिता । इदानीं सा पदानां सान्निध्यविशेषेण वाक्यार्थविशेषेण च आविर्भवन्ती रसास्वादवैमुख्यं जनयतीति न तत्र माधुर्यमिति सोदाहरणं प्रदर्शयति—पदसंधानेति । पदानां संधानं संधिः संहितेति यावत् । तद्वृत्त्या तद्भत्त्वेन विशिष्टपदसंहिताजन्या इति यावत् । तथा वाक्यार्थत्वेन आर्थ्या व्यञ्जनया वाक्यार्थगतत्वेन वा । दुष्प्रतीतिकरम् दुः दुष्टा व्रीडाजुगुप्साद्यमङ्गलार्थसूचकत्वेन निन्दिता या प्रतीतिः पदार्थानुभवः तत्करम् । वाक्यस्य वाक्यार्थस्य वा दुष्प्रतीतिकरत्वरूपाश्लीलत्वमिति भावः । ग्राम्यम् ग्राम्यतादोषवत् । तच्च माधुर्यं परित्याज्यम् । तत्र पदसंधानगतं व्रीडाव्यञ्जकत्वरूपमश्लीलं दर्शयति यथेति । भवतस्तव प्रिया प्रेयसी इति असंहितायां प्रस्तुतार्थः । संहितायां तु याभो मैथुनं यभ् मैथुने इत्यस्मात् भावे क्विप् पश्चाद्भूमार्थे मतुप् । सततमैथुनानुरक्तस्य तव प्रिया मैथुनसाधनेन प्रीणयित्री इति अश्लीलार्थद्योतनेन सभ्यानां व्रीडाकरमेतद्वाक्यम् । अतो नात्र माधुर्यम् । ननु —यथा यकारादिपदम् इत्यनेनैव यभ्धातुनिष्पन्ने ग्राम्यत्वमुक्तमस्ति । अत्रापि तद्धातुनिष्पन्न एव याभवान् शब्दः । तर्हि तेनैवास्य प्रयोगस्य सदोषत्वे सिद्धे पुनः किमर्थं पदसंधानवृत्त्या दुष्प्रतीतिकरस्य सदोषत्वेन कथनमिति चेन्न । अभिधावृत्त्या

i. 66—संघात for संधान Pn.

यथा या भवतः प्रिया ॥ ६६ ॥

खरं प्रहृत्य विश्रान्तः पुरुषो वीर्यवानिति ।
एवमादि न शंसन्ति

१८असभ्यार्थोपस्थापकस्य स्वतन्त्रपदस्यैव शब्दग्राम्यत्वम् । अत्र तु मुख्यार्थबोधानन्तरं संहितोच्चारणकल्पनानुरोधेन व्यञ्जनया अश्लीलार्थभानम् । अतो न द्वयोः स्वरूपैक्यम् । पदसंधानवृत्त्या दुष्प्रतीतिकराणि—चलं २१डामरचेष्टितम् तदत्रैव रुचिं कुरु काचिन्नारीग्लंडदेशे विभाति इत्यादीनि बहूनि सन्ति । अत्र संहितानिरपेक्षाणि पदानि अभिधावृत्त्या असभ्यार्थं दर्शयितुं लेशतोपि न प्रभवन्ति । संहितायां तु असभ्यच्छाया २४वरीवर्ति । अतः पदपदसंधानयोर्दोषयोर्भिन्नस्वरूपत्वेन भिन्नं लक्षणं युक्तमेव ॥ ६६ ॥

वाक्यार्थगतं ग्राम्यमुदाहरति—खरमिति । वीर्यवान् पराक्रमशाली पुरुषः दाशरथी रामः खरं तन्नामकं राक्षसं प्रहृत्य विश्रान्तः विश्रान्तिं ३लेभे । अथवा पुरुषः कोपि शूरः खरं तीक्ष्णं प्रहृत्य शत्रुमभिहत्य विश्रान्तः विश्रान्तिं लेभे । एवं प्राकरणिकोर्थः प्रथममाविर्भवति । पश्चात् वक्त्रादिवैलक्षण्येन वीर्यवान् शुक्रवान् पुरुषः कश्चित् कामुको युवा खरं ६गाढं प्रहृत्य मदनध्वजप्रहारं दत्त्वा विश्रान्तः ग्लानिं प्राप्तः । इत्यर्थः आर्थ्या व्यञ्जनया पश्चात् प्रतीतिपदवीमारोहति । एवं वाक्यार्थगताश्लीलदोषेण दुष्टत्वान्नात्र माधुर्यम् । न चेदं वाक्यगतमश्लीलत्वम् । एकार्थमात्रसंके- ९तितानां खरमित्यादिवाक्यघटकपदानां शाब्द्या व्यञ्जनाया अनाश्रयत्वेन असभ्यार्थोपस्थापकत्वाभावात् । वाक्यार्थस्यैव वक्तृविशेषादिभिः आर्थ्या व्यञ्जनया द्वितीयार्थोपस्थापकत्वम् । एवं च शब्दपरिवृत्त्यसह- १२त्वसहत्वाभ्यां शब्दार्थगतत्वनिश्चयोवगन्तव्यः । तथा च यत्र शब्दपरिवृत्त्यसहमश्लीलं तद्वाक्यगतम् यत्र च तत्सहं तदर्थगतम् । प्रकृतोदाहरणे खरादिपदानां गाढादिपदैः परिवर्तनेपि अश्लीलतायाः सद्भावात् शब्द- १५परिवृत्तिसहत्वेन अर्थगतत्वं ज्ञेयम् । एवं च यत्र एकार्थमात्रप्रतिपाद-

i. 67—परं for खरं M, N, D, with a marginal emendation into खरं;—प्रशंसन्ति for न शंसन्ति M.

मार्गयोरुभयोरपि ॥ ६७॥

भगिनीभगवत्यादि सर्वत्रैवानुमन्यते ।

ानां पदानां प्रकरणादिभिः प्रस्तुतेर्थे निश्चितेपि वक्त्रादिवैशिष्ट्यसचिवया आर्थ्या व्यञ्जनया अपरार्थस्य भानम् तत्रार्थगतत्वम् । यत्र च अनेकार्थस्य शब्दस्य प्रकरणादिभिः प्रस्तुतार्थे निश्चिते शाब्द्या व्यञ्जनया अप्रस्तुतार्थप्रतीतिस्तत्र शब्दगतत्वम् । यदुक्तं प्रकाशे (ii. 19)—

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद्व्याप्तृतिरञ्जनम् ॥ इति ।

न चात्र वीर्यपदस्य शुक्रबलवाचकत्वेन द्व्यर्थता अस्तीति शाब्दी व्यञ्जना शङ्कितव्या । बलस्य केवलवीर्यजन्यत्वेन एकत्वाङ्गीकारात् । वीर्यपदस्य परिवृत्तावपि अश्लीलार्थभानस्य अनपायाच्च । तथा च इदं वाक्यगतमश्लीलत्वम् अपि तु अर्थगतमेव । एवमादि निरुक्तग्राम्यादि आदिशब्देन नेयत्वादयो दोषा अग्रे वर्ण्यमाना ग्राह्याः । उभयोः गौडवैदर्भयोः मार्गयोः न शंसन्ति न प्रशंसन्ति तत्तन्मार्गानुयायिनः इति शेषः । एवं च अनुप्रासकृतवैलक्षण्येपि ग्राम्यतादोषविषये उभयैकमत्यमिति भावः ॥ ६७ ॥

पूर्वोक्तग्राम्यतायाः अपवादमाह—भगिनीति । भगिनी भगवती आदेशब्देन योनिलिङ्गादीनां संग्रहः । सर्वत्र व्यवहारे काव्येषु वैदर्भ्यादिरीतिषु च अनुमन्यते निर्दुष्टतया सर्वैः स्वीक्रियते । शिष्टपरिगृहीतानां शब्दानां प्रयोगे दोषानुसंधानायोगात् । श्रोतृणां वैरस्योत्पादनेन वैमुख्यजनकत्वाभावात् इति भावः । तदुक्तं भोजराजेन (i. 105)—

ग्राम्यं घृणावदश्लीलामङ्गलार्थं यदीरितम् ।
तत् संवीतेषु गुप्तेषु लक्षितेषु न दुष्यति ॥ इति ।

संवीतेषु अपुष्टतयाङ्गीकृतेषु । स एव संवीतस्यादुष्टत्वं पुनर्दृष्टान्तपूर्वकमाह—

संवीतस्य हि लोकेस्मिन् न दोषान्वेषणं क्षमम् ।
शिवलिङ्गस्य संस्थाने कस्यासभ्यत्ववासना ॥ इति ।

68—भगवतीत्यादि for भगवत्यादि N;—अनुगम्यते for अनुमन्यते V.

विभक्तमिति माधुर्य-

१२संवीतादीनामुदाहरणानि—

तस्मै हिमाद्रेः प्रयतां तनूजां यतात्मने योजयितुं यतस्व ।
योषित्सु तद्वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टम् ॥ इति ।

१५अत्र तद्वीर्यनिषेकभूमिः इति पदस्याश्लीलत्वेपि संवीतत्वाद् गुणत्वम् । गुप्तत्वं नाम प्रसिद्ध्यर्थेनाप्रसिद्धासभ्यार्थस्य गोपनम् । यथा—सुदु-
स्त्यजा यद्यपि जन्मभूमिः । गजैरसंबाधमयांबभूवे । स तेनुनेयः सुभगो-
१८भिमानी । भगिन्ययं नः प्रथमाभिसंधिः । इति । अत्र जन्मभूमिसंबाधसुभगभ-
गिनीशब्दानां जन्मभूसंकटसुन्दरस्वस्राद्यर्थेषु प्रसिद्धानां योन्यादिरूपाश्लील-
लार्थान्तरत्वेपि प्रथमार्थप्रभावेन गुप्तत्वात् गुणत्वम् । तथा चोक्तम्
२१तत्रैव—

वस्तुमाहात्म्यगुप्तस्य पदार्थस्य विभावनात् ।
भगिनीभगवत्यादि नासभ्यत्वेन भाव्यते ॥ इति ।

२४लक्षितानि असभ्यार्थबोधकानियथा—

ब्रह्माण्डकारणं योप्सु निदधे बीजमात्मनः ।
उपस्थानं करोम्येष तस्मै शेषाहिशायिने ॥ इति ।

२७अत्र ब्रह्माण्डोपस्थानशब्दयोरसभ्यस्मृतिहेतुत्वेपि अन्यत्र लक्षितत्वाद्-
गुणत्वम् । क्वचिदाश्रयसंबन्धाद्श्लीलादीनां गुणत्वम् । तदुक्तं भोज-
राजेन (i. 106)—

किंचिदाश्रयसंबन्धाद्धत्ते शोभामसाध्वपि ।
कान्ताविलोचने न्यस्तं मलीमसमिवाञ्जनम् ॥ इति ।

३२यथा—

आन्त्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कङ्कण-
प्रायप्रेङ्खितभूरिभूषणरवैराघोषयत्यम्बरम् ।
पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्-
व्यालोलस्तनभारभैरववपुर्दर्पोद्धतं धावति ॥

अत्राश्रयस्य पिशाचाङ्गनानां बीभत्सरसोचितत्वात् तद्वर्णनमदोषः । एवं
शृङ्गारे शान्तरसे च न दोषः । तदुक्तं प्रकाशे(vii. 303)—अश्ली-
३९लत्वं क्वचिद्गुणः । यथा सुरतारम्भगोष्ठ्याम्—द्व्यर्थैः पदैः पिशुनयेच्च

मुच्यते सुकुमारता ॥ ६८ ॥

अनिष्ठुराक्षरप्रायं सुकुमारमिहेष्यते ।

४०रहस्यवस्तु । इति कामशास्त्रस्थितौ—

करिहस्तेन संबाधे प्रविश्यान्तर्विलोडिते ।
उपसर्पन् ध्वजः पुंसः साधनान्तर्विराजते ॥

इत्यत्र करिहस्तादयः शब्दा असभ्यार्थबोधकाः सुरतप्रसङ्गवर्णनोद्युक्तस्य कामिन उक्तित्वान्न दोषावहाः । अत्राप्रस्तुतसमरवृत्तान्तार्थस्तु स्फुट ४५एव । शान्तेपि रसे अश्लीलत्वं न दोषास्पदम् यथा—

उत्तानोच्छूनमडूकपाटितोदरसंनिभे ।
क्लेदिनि स्त्रीव्रणे सक्तिरकृमेः कस्य जायते ॥ इति ।

४८एवमादयो ग्राम्यदोषस्य बहवः अपवादाः सरस्वतीकण्ठाभरणादिषु द्रष्टव्याः । माधुर्यमुपसंहरति विभक्तमिति । इति एवं पूर्वोक्तगौडवैदर्भमार्गयोः विभक्तम् गौडा वृत्त्यनुप्रासप्रधानं प्रन्बधं मधुरं मन्यन्ते वैदर्भा- ५१स्तु श्रुत्यनुप्रासप्रधानम् इति विभागद्वयेन स्थितम् । माधुर्यम् माधुर्यगुणः अस्तीति शेषः । विभक्तं रसघटितत्वात् विशेषेण दर्शितमिति केचित् । उच्यते सुकुमारता क्रमप्राप्तं सौकुमार्यम् उच्यते ॥ ६८ ॥

सुकुमारं लक्षयति—अनिष्ठुरेति । निष्ठुराणि श्रुतिकटूनि तद्विपरीतानि अनिष्ठुराणि अपरुषाणि कोमलानीत्यर्थः । एतादृशानि यान्यक्ष- ३राणि तानि प्रायः बाहुल्येन यत्र तादृशं वाक्यं सुकुमारम् सौकुमार्यगुणयुक्तम् इह साहित्यशास्त्रे इष्यते कविभिरभिलष्यते । प्रायःशब्देन कोमलवर्णानां सामस्त्यं नापेक्ष्यते । तदेव सप्रयोजनं विशदयति बन्धेति । ६हि यस्मात् कारणात् सर्वकोमले कोमलवर्णात्मके काव्ये बन्धस्य शैथिल्यरूपो दोषो दर्शितः—अल्पप्राणाक्षरोत्तरम् शिथिलं मालतीमाला लोलालिकलिला यथा—इति पूर्वमेव कथितः (i. 43)। ९दोषोपि इत्यत्र दोषस्तु इति पाठे हेत्वर्थकः तुशब्दो ज्ञेयः । एवं च कोमलाक्षराणां मध्ये मध्ये च परुषाक्षरविन्यासेन मौक्तिकमालाया अन्तरान्तरा रत्नविन्यासेनेव प्रबन्धस्य चारुत्वं सौकुमार्यम् । न चैवं सति श्लेष- २पसौकुमार्ययोरभेदापत्तिः उभयोरपि लक्षणैक्यादिति वाच्यम् । श्लेषस्य

i. 69—उच्यते for इष्यते R.

बन्धशैथिल्यदोषोपि

महाप्राणमिश्रितालपप्राणविन्यासविशेषेण सौकुमार्यस्य चानिष्ठुराक्षरप्राय-
१४त्वेन च द्वयोः परस्परभिन्नत्वात् । नन्वल्पप्राणाक्षराण्येव सुकुमाराणीति
चेन्न । अल्पप्राणान्यक्षराणि रचनाविशेषेण निष्ठुराणि महाप्राणान्यपि च
कोमलानि भवन्ति । निष्ठुरत्वं नाम श्रुतिकटुत्वम् तच्चैकजातीयानां
१७संयुक्तवर्णानाम् तथा क्षकारह्लकारादीनामनुभवसिद्धम् । यथा—

व्यग्रैरग्र्यग्रहेन्दुग्रसनगुरुभरैर्नो समग्रैरुदग्रैः
प्रत्यग्रैरीषदुग्रैरुदयगिरिगतो गोगणैर्गौरयन् गाम् ।
उद्गाढार्चिर्विलीनामरनगरनगग्रावगर्भामिवाह्ना-
मग्रे श्रेयो विधत्ते ग्लपयतु गहनं स ग्रहग्रामणीर्वः ॥

२२यथा वा—क्षुत्क्षामान् रूक्षरक्षोरदखरनखरक्षुण्णविक्षोभिताङ्गान् । इति ।
यथा वा अग्रे कविनानेनैव दर्शितम् (i. 72)—न्यक्षेण क्षपितः
२४पक्षः क्षत्रियाणां क्षणादिति । अत्राल्पप्राणानामपि श्रुतिकटुत्वं वर्तते ।
महाप्राणानां रचनाविशेषेण श्रुतिमनोहरत्वं यथा—मधुरया मधु-
बोधितमाधवी इति पूर्वोदाहृते पद्ये(P. 11) । अत्र धकारस्य महाप्राण-
२७त्वेपि श्रुतिमाधुर्यं वरीवर्ति । नवीनास्तु इदं सौकुमार्यं श्रुतिकटुत्वदोषा-
भावफलं मन्वाना श्रुतिकटुत्वदोषपरिहारेणैव तल्लाभान्न स्वतन्त्रतया गुण-
त्वेन स्वीकुर्वन्ति ॥ सौकुमार्यस्यान्येषां लक्षणान्युदाहरणानि च । तत्रादौ
३०भरतः (xvi.100)—

सुखप्रयोज्यैर्यच्छन्दैर्युक्तं सुश्लिष्टसंधिभिः ।
सुकुमारार्थसंयुक्तं सुकुमारं तदिष्यते ॥ इति ।

३३उदाहरणम्—

अङ्गानि चन्दनरजःपरिधूसराणि
ताम्बूलरागसुभगोधरपल्लवश्च ।
अच्छाञ्जने च नयने वसनं तनीयः
कान्तासु भूषणमिदं विभवावशेषः ॥ इति ।

३८भोजराजस्तु (i. 68) आचार्यदण्डिन एव लक्षणोदाहरणानि स्वीक-

---

i. 69—दोषस्तु for दोषोपि P, B, Rn; दोषो हि D, Pn, M.

दर्शितः सर्वकोमले ॥ ६९ ॥

मण्डलीकृत्य बर्हाणि कण्ठैर्मधुरगीतिभिः ।

कलापिनः प्रनृत्यन्ति काले जीमूतमालिनि ॥ ७० ॥

१रेति । वामनः (iii. 1. 21)—अजरठत्वं सौकुमार्यम् । अजरठत्वमपारुष्यम् । यथा अस्त्युत्तरस्यां दिशि देवतात्मा इति । अकाण्डे शोकदायित्वाभावरूपमपारुष्यं सुकुमारता । यथा—त्वरया याति पान्थोयं प्रिया-
२विरहकातरः । इति जगन्नाथः (P.60) । अत्र प्रियामरणकातरः इति पाठे पारुष्यं तद्रहितत्वात् सुकुमारता इति भावः । आचार्यदण्डिना शब्दगुणत्वेन सौकुमार्यं स्वीकृतम् । परे तु अपारुष्यं सौकुमार्यम् इति तत्
५अर्थगुणत्वेन स्वीकुर्वन्ति । अपारुष्यं नाम परुषेप्यर्थे वक्तव्ये अपरुषरूपेणाभिधानम् । यथा मृत इति वक्तव्ये कीर्तिशेषं गतः इति । यथा वा—

स किलेन्द्रप्रयुक्तेन शौरिणा भूमिनन्दनः ।

चक्राघातोपदिग्धाध्वा नीतोत्यन्तप्रवासिताम् ॥ इति ।

९भोजोपि अर्थगुणं सौकुमार्यमाह (i. 80)—अनिष्ठुरत्वं यत् प्राहुः सौकुमार्यं तदुच्यते इति। उदाहरति च—

सद्यः पुरीपरिसरेपि शिरीषमृद्वी
सीता जवात् त्रिचतुराणि पदानि गत्वा ।
गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम् ॥ इति ।

५अयं अमङ्गलदोषाभावः अतो न गुणः । तदुक्तं दर्पणे(viii. 12)—ग्राम्यदुःश्रवतात्यागात् कान्तिश्च सुकुमारता । गतार्थेति भावः ॥ ६९ ॥

सुकुमारमुदाहरति—मण्डलीति । मधुराः गीतयः यत्र तादृशैः कण्ठैः उपलक्षिताः केकारवं कुर्वन्तः इत्यर्थः । कलापिनः मयूराः । जीमूताः
३मेघाः तेषां मालाः सन्ति यस्मिन् तादृशे वर्षाकाले । बर्हाणि पिच्छानि मण्डलीकृत्य मण्डलाकारं विधाय नृत्यन्ति । अत्र मयूरे नर्तकव्यवहारप्रतीतेः समासोक्तिः । नर्तका अपि गानपूर्वकं नृत्यन्ति । अत्र पूर्वोक्त-
निष्ठुरवर्णरचनाभावात् सौकुमार्यम् ॥ ७० ॥

इत्यनूर्जित एवार्थो नालंकारोपि तादृशः ।
सुकुमारतयैवैतदारोहति सतां मुखम् ॥ ७१ ॥

भरतमुनिना स्वीकृतापि सुकुमारता कैश्चित् प्राचीनाचार्यैर्न परिगणितास्ति। तदनुरोधेनैवार्वाचीना अपि वर्णविशेषविन्यासात्मका हि सुकुमारता तस्या न गुणत्वं युक्तम् अर्थस्यालंकारस्य च चमत्कृतेर्विना तस्याः स्वयं चमत्काराजनकत्वादिति वदन्तः सा ग्राम्यदुःश्रवणादिदोषपरिहारेण गतार्था भवतीति मन्यन्ते। तन्मतं खण्डयति—इतीति । इति मण्डलीकृत्येति पद्येन वर्णितः अर्थः कलापिनर्तनरूपः । अनूर्जित एव अतेजिष्ठ एव रससंपर्कशून्यत्वेनेति भावः। तथालंकारोपि समासोक्तिरूपः न तादृशः न चमत्कारातिशयेन शृङ्गारं परिपोषयति यथा पिबन् मधु (ii. 206) इत्यादिपद्ये। तथाप्येतत् पद्यं केवलं सुकुमारतयैव सौकुमार्यगुणसंबन्धेनैव सतां सहृदयानां मुखम् आरोहति तैः सश्लाघं पठ्यत इत्यर्थः। अयमत्राशयः। यद्यप्यस्मिन् पद्येस्ति समासोक्तिः तथापि न तया सविशेषा चमत्कृतिः रसशून्यत्वात्। सौकुमार्यगुणप्राधान्येनैवैतत् पद्यं काव्यं भवति। अतः सौकुमार्यं गुणत्वेन स्वीकार्यम्। गुणा एव अलंकारापेक्षया प्राधान्येन काव्यहेतवः। इमामेवार्थमभिसंधाय प्राचीनैरुक्तम्—

तया कवितया किं वा तया वनितया च किम् ।
पदविन्यासमात्रेण यया नापहृतं मनः॥ इति ।

अमति गुणवैचित्र्ये अर्थालंकारौ न शोभेते। तदुक्तं भोजराजेन (i. 59, 159)—अलंकृतमपि श्रव्यं न काव्यं गुणवर्जितम् । इति ।

यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवनवन्ध्यमङ्गनायाः।
अपि जनदयितानि दुर्भगत्वं नियतमलंकरणानि संश्रयन्ते ॥ इति च ।

जगन्नाथेनापि रसात्मकं वाक्यं काव्यम् इत्यस्य खण्डनप्रसङ्गे काव्ये शब्दप्राधान्यमुद्दिश्य यदुक्तं तदपि आचार्यदण्डिनोनुरोधेनैवेति ज्ञेयम् । तदोषौ शब्दार्थौ इति लक्षणं न विचारक्षममिति तु पूर्वं (p.13) प्रपञ्चितमेव ॥ ७१ ॥

---

i. 71—मनः for मुखम् P, B, R, and a marginalia in D; मुदम् M.

दीप्तमित्यपरैर्भूम्ना कृच्छ्रोद्यमपि बध्यते ।
न्यक्षेण क्षपितः पक्षः

गौडास्त्विदं सौकुमार्यं नापेक्षन्त इत्याह—दीप्तमिति । अपरैः गौडकविभिः दीप्तम् दीप्तिः औज्वल्यं तद्युक्तं तद्व्यञ्जकं समुत्तेजकमिति यावत् । दीप्तमिति हेतुना कृच्छ्रोद्यमपि कृच्छ्रेण कष्टेन उद्यं उच्चार्यमपि पदं वाक्यं चेति शेषः । भूम्ना बाहुल्येन बध्यते काव्ये प्रयुज्यते । ओजस्विरचनानुकूलतया परुषवर्णघटितमत एव कष्टोच्चार्यमपि तैः पदं वाक्यं वाङ्मीक्रियते । सर्वथा ओजोगुणविशिष्टरचनाप्रिया गौडा रसादिकमननुरुध्यैव तां रीतिमाद्रियन्ते । एतदुदाहरणेन विशदयति न्यक्षेणेति । निर्गते अक्षिणी यस्य सः न्यक्षः धृतराष्ट्रः तेन । क्षत्रियाणां पक्षः समूहः अखिलक्षत्रियकुलमिति यावत् । क्षणात् क्षणमात्रादेव क्षपितः दुर्मन्त्रेण पुत्रादिभिः नाशितः । कुरुक्षेत्रे महासंग्रामे इत्यर्थः । अत्र धृतराष्ट्रस्य वर्णनप्रसङ्गे तस्यायुध्यमानत्वान्न वीररसप्रसङ्गः । अपि तु दुर्मन्त्रेण सकलक्षत्रियोत्मादात् करुणरसस्यैव वर्णनं प्रस्तुतम् । तत्र चौजःप्रधानरचनाया अयुक्तत्वान्न केवलमुच्चारणेन अपि तु रसप्रसङ्गेनापि कृच्छ्रोद्यमेतादृशं प्रबन्धं गौडा विरचयन्ति । तच्च रसापकर्षकत्वान्न वैदर्भैरङ्गीक्रियते । अत्र प्रेमचन्द्रशर्मभिः स्वटीकायां यदुक्तम्—गौडा हि यत्र वीररसादिरूपमोजस्वि व्यङ्ग्यं तत्र परुषवर्णैस्तदुव्यञ्जनस्यावश्यकतया सौकुमार्यं नाद्रियन्ते । वैदर्भास्तु तत्रापि सौकुमार्यं प्रवेशयन्ति । यथा—

कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मथमहममृङ्मेदोमांसैः करोमि दिशां बलिम् ॥ इति ।

अत्र रौद्रेपि रसे नात्यन्तमुद्धता वर्णाः इति तत् सर्वं ग्रन्थकर्तुराशयविरुद्धम् । न हि ग्रन्थकर्त्रा वैदर्भाणां कुत्रचिदपि साक्षात् परंपरया वा निन्दा कृता दृश्यते यथा गौडानाम् । न वा वैदर्भैः कृतमनुमतमित्यादि पद्यमनुद्धतवर्णत्वेन निर्दोषमिति प्रशंसितमस्ति । तथा चैतादृशं क्वापि पद्यं प्रदर्श्य

i. 72—क्षयितः for क्षपितः P, B, Rn;—पक्षः क्षपितः for क्षपितः पक्षः V, Rn.

क्षत्रियाणां क्षणादिति ॥ ७२ ॥

अर्थव्यक्तिरनेयत्वमर्थस्य हरिणोदधृता ।

वैदर्भाणामुपहासविधानं गौडानामुपहासायैव भवतीत्याचार्यदण्डिन आशयं २७विजानन्तः पण्डिता अवगच्छेयुः । तथैव च गौडानां न्यक्षेणेत्यस्य परशुरामेणेत्यर्थकरणमपि कष्टसाध्यं केवलं गौडदोषपरिहारार्थं वीररसवर्णनप्रसङ्गसंपादनायैवेति सुधियो विदांकुर्वन्त्वित्यलं परमत्सरोद्घाटनेन ॥७२॥

क्रमप्राप्तामर्थव्यक्तिमुदाहरति—अर्थेति । अर्थस्य वाक्यार्थाङ्गभूतस्य अनेयत्वम् अध्याहारादिकष्टकल्पनानैरपेक्ष्येण प्रयुक्तपदेभ्य एवोपस्थितिः ३अर्थव्यक्तिः एतत्संज्ञको गुणः । तथा च यावन्तोर्था अन्वयोपयोगितयापेक्ष्यन्ते तद्बोधनाय तावतां पदानां विन्यासोर्थव्यक्तिः । उदाहरति हरिणेति । हरिणा वराहरूपधारिणा विष्णुना । खुरक्षुण्णनागास्मृग्लोहितात् ६खुरेण शफेन अर्थात् स्वस्यैव क्षुण्णाः ताडिताः ये नागाः रसातलवर्तिनो भुजगाः तेषामसृग्भिर्लोहितात् आरक्तात् उदधेः समुद्रात् भूः पृथ्वी उद्धृता ऊर्ध्वमानीता । अत्राप्रसिद्धस्योदधेर्लौहित्यस्य वर्णने किमपि कारणमवश्यं ९निर्देष्टव्यम् । तच्च खुरक्षुण्णेतिविशेषणेन अत्र स्पष्टमेवोपात्तम् । अतो नालोन्नयनपरिश्रमस्य प्रयोजनमस्ति । अतो यावदपेक्षितार्थस्य विन्यस्तपदेनैव भानादत्रार्थव्यक्तिः । अयं शब्दगुणः ॥ अथ भरतादीनां लक्षणोदा-१२हरणानि । तत्र भरतः (xvi. 101)—

सुप्रसिद्धा धातुना तु लोककर्मण्यवस्थिता ।
या क्रिया क्रियते काव्ये सार्थव्यक्तिः प्रकीर्त्यते ॥ इति ।

१५विवृणोत्येतद्धेमचन्द्रः (P. 199)—यस्मिन्नतथास्थितोपि तथास्थित एवार्थः प्रतिभाति सोर्थव्यक्तिर्गुण इति । उदाहरति च—

च्युतामिन्दोर्लेखां रतिकलहभग्नं च वलयं
द्वयं चक्रीकृत्य प्रहसितमुखी शैलतनया ।
अवोचद्यं पश्येत्यवतु स शिवः सा च गिरिजा
स च क्रीडाचन्द्रो दशनकिरणापूरिततनुः ॥ इति ।

२१सोयं प्रसादादभिन्न इति वामनादयः । यदुक्तं तेन—अर्थव्यक्तिर्हेतुत्वमर्थव्यक्तिः । यत्र झटित्यर्थप्रतिपत्तिहेतुत्वं स गुणोर्थव्यक्तिः । यथा—

भूः खुरक्षुण्णनागासृग्-

अस्त्युत्तरस्याम् इत्यादौ इति (iii. 1. 23)। वामनाभिप्रायमे-
१४वान्ये विवृण्वन्ति यथा—यत्र पुरस्तादिव वस्तुनोवगतिः पश्चादिव वाचां सार्थव्यक्तिः। उदाहरणं तु—

महेश्वरे वा जगतां महेश्वरे जनार्दने वा जगदन्तरात्मनि ।
न वस्तुभेदप्रतिपत्तिरास्ति मे तथापि भक्तिस्तरुणेन्दुशेखरे ॥ इति ।

२८अयं प्रसाद एवेति परे। भोजराजः—यत्र संपूर्णवाक्यत्वमर्थव्यक्तिं वदन्ति ताम् इति लक्षयित्वा उदाहरति यथा(i.69)—

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ इति ।

३२वाग्भटस्तु—यत्र सुखेनार्थप्रतीतिः सार्थव्यक्तिः। यथा(P. 30)—

बाले तिलकलेखेयं भाले भल्लीव राजते ।
भ्रूलताचापमाकृष्य न विद्मः कं हनिष्यति ॥ इति ।

अयमर्थगुणोपि। यत्र वस्तुस्वभावस्फुटीकरणरूपोर्थः सोर्थगुणः। तदुक्तं
३६वामनेन—वस्तुस्वभावस्फुटत्वमर्थव्यक्तिः। वस्तूनां भावानां स्वभावस्य स्फुटत्वं यत् असावर्थव्यक्तिः। यथा (iii. 2.13)—

पृष्ठेषु शङ्खशकलच्छविषु च्छदानां
राजीभिरङ्कितमलक्तकलोहिनीभिः ।
गोरोचनाहरितबभ्रुबहिःपलाश-
मामोदते कुमुदमम्भसि पल्वलस्य ॥ इति ।

४२अत्र कुमुदस्वरूपस्य साक्षादिव प्रतीयमानत्वेन यत् स्पष्टरूपाभिधानमसा-वर्थव्यक्तिः इति स्ववृत्तौ भोजः(i. 81)। जगन्नाथोपि झगिति प्रतीयमानार्थान्वयकत्वमथर्व्यक्तिः इति शाब्दीमभिधाय (P. 68) वस्तुनो
४५वर्णनीयस्यासाधारणक्रियारूपयोर्वर्णनमर्थव्यक्तिः इति आर्थीमाह। यथा (P. 60)—

गुरुमध्ये कमलाक्षी कमलाक्षेण प्रहर्तुकामं माम् ।
रदयन्त्वितरसनाग्रं तरलितनयनं निवारयांचक्रे ॥ इति ।

४९इयं स्वभावोक्तावन्तर्भवतीति प्रकाशकारादयः। तदुक्तं (P. 583)—अभिधास्यमानस्वभावोक्त्यलंकारेण वस्तुस्वभावस्फुटत्वरूपार्थव्यक्तिः स्वी-

लोहितादुदधेरिति ॥ ७३ ॥

मही महावराहेण लोहितादुदधूतोदधेः ।

५१कृता इति । दर्पणकारः शब्दगुणामिमां प्रसादगुणे एव अन्तर्भावयति यथा (viii. 11f.)—

अर्थव्यक्तेः प्रसादाख्यगुणेनैव परिग्रहः ।
अर्थव्यक्तिः पदानां हि झटित्यर्थसमर्पणम् ॥ इति ।

५५तथा च शाब्दी अर्थव्यक्तिः प्रसादगुणेन आर्थी स्वभावोक्त्यलंकारेण गतार्था इति ज्ञेयम् । अत्र केचित् इमामर्थव्यक्तिं निर्हेतुदोषाभावरूपां परि-
५७कल्प्य यत्र तद्दोषावसरो नास्ति तत्र नेयत्वेपि अर्थव्यक्तिरस्तीति मन्यन्ते । तच्च यत्रातिप्रसिद्धितो नेयार्थो झटित्याविर्भवति तत्रैव संभवति । यथा—संप्रति संध्यासमयश्चक्रद्वन्द्वानि विघटयति । इति । अत्र संध्यायां
६०चक्रवाकविघटनस्य कविसमयप्रसिद्धतया तत्कारणप्रतिपादकशब्दाभावेप्यर्थव्यक्तिरस्ति । भोजराजेनापि उक्तम् (i. 130)

अध्याहारादिगम्यार्थं नेयार्थं प्रागुदाहृतम् ।
स गम्यते प्रसिद्धश्चेत्स तद्दोषविदिष्यते ॥ इति ।

६४उदाहरति च—

मा भवन्तमनलः पवनो वा वारणो मदकलः परशुर्वा ।
वाहिनीजलभरः कुलिशं वा स्वस्ति तेस्तु लतया सह वृक्ष ॥

अत्र दहत्वित्यादीनामध्याहार्यतया नेयत्वेप्यतिप्रसिद्धत्या प्रतीयमान-
६८त्वात् गुणत्वम् । इति ॥ ७३ ॥

अनेयार्थप्रतियोगिभूतं नेयार्थं दर्शयति—महीति । पूर्वार्धस्यार्थः प्रोक्त एव । इति इयत्येव एतावन्मात्रे एव सुरक्षणनागामृग इति पदं परि-
३हृत्येत्यर्थः । निर्दिष्टे प्रयुक्ते सति उद्गामृजः नेयत्वम् अध्याहारेण कल्पनीयत्वमवश्यं स्यात् । अन्यथा उदधेर्लोहित्यस्यासंभवात् लोहितादिति विशेषणं व्यर्थं स्यात् । तथा च लौहित्यसंपादनाय कश्चिदुपाधिः कल्पनीयः ।
६तदुपाधिवाचकपदाभावे चावश्यमेवाध्याहारः कर्तव्यः इति नास्त्य-

i. 73—अपि for इति I), with a marginal emendation into इति.

इतीयत्येव निर्दिष्टे नेयत्वमुरगासृजः ॥ ७४ ॥

अर्थव्यक्तिः । तदुक्तं भोजेन (i. 34)—

वाक्यं भवति नेयार्थमर्थव्यक्तेर्विपर्ययात् ॥
मही महावराहेण लोहितादुद्धृतोदधेः ।
इतीयत्येव निर्दिष्टे नेया लौहित्यहेतवः ॥ इति ।

यत्र त्वन्वयबोधात् प्राक् बाधादिज्ञानेन लक्षणयार्थान्तरोपस्थितिस्तत्रार्थ-
१२व्यक्तिरस्त्येव न तत्र नेयत्वम् । अभिधाशक्तयेव लक्षणयाप्युपस्थाप्या-
र्थस्यान्वयबोधविषयतायामवैलक्षण्यात् । अन्वयबोधोत्तरमनुपपत्त्युदयेन
कल्पनीयार्थस्य नेयत्वात् । लक्षणायामपि यत्र रूढिप्रयोजनाभावेपि
१५लक्षणास्वीकारस्तत्रार्थस्य नेयत्वमिति नार्थव्यक्तिः । एतादृशलाक्षणिक-
पदस्यैव नेयार्थत्वमुक्तं प्रकाशकारादिभिः । एतादृशलक्षणाया निषेधोपि
१७भट्टकुमारिलेन तन्त्रवार्तिकेभिहितः । तथा हि (iii. 18, P. 700)—

निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत् ।
क्रियन्ते सांप्रतं काश्चित् काश्चिन्नैव त्वशक्तितः ॥ इति ।

अस्यार्थः —अभिधानवत् अभिधाशक्तिवत् सामर्थ्यात् प्रसिद्धेः शब्द-
२१स्वभावाद्वा निरूढाः अनादिप्रसिद्धाः काश्चिल्लक्षणा भवन्तीति शेषः ।
यथा कर्मणि कुशलः । सांप्रतम् अधुना काश्चित् लक्षणाः क्रियन्ते प्रयो-
जनवशादिति शेषः । यथा गङ्गायां घोषः इत्यादौ । काश्चिल्लक्षणा अश-
२४क्तितः प्रत्यायनसामर्थ्याभावान्नैव क्रियन्ते । तत्र रूढिप्रयोजनान्य-
तरासंभवादिति शेषः । यथा रूपी घट इत्यादौ । इति । एवं रूढि-
प्रयोजनान्यतराभावाल्लक्षणा नैव कर्तव्या इत्यर्थः । कविरशक्त्या यत्रैवं
२७लक्षणां करोति तत्रैव नेयत्वं यथा—

शरत्कालसमुल्लासि पूर्णिमाशर्वरीप्रियम् ।
करोति ते मुखं तन्वि चपेटापतनातिथिम् ॥ इति ।

३०अत्र जितमित्यर्थे चपेटापतनातिथिम् इत्यस्य लक्षणा वर्तते परं तत्र
रूढिप्रयोजनान्यतराभावात् मुख्यार्थातिरिक्तार्थस्याप्रतीतेर्नैव लक्षणा भवि-
तुमर्हतीत्यलं प्रसक्तानुप्रसक्तया ॥ ७४ ॥

---

i. 74—उरगासृजाम् for उरगासृजः marginalia in D.

नेदृशं बहु मन्यन्ते मार्गयोरुभयोरपि ।
न हि प्रतीतिः सुभगा शब्दन्यायविलङ्घिनी ॥ ७५ ॥
उत्कर्षवान् गुणः कश्चि-

नेयत्वदोषे गौडवैदर्भयोरैकमत्यं कथयति —नेदृशमिति। ईदृशं नेयार्थकं वाक्यमुभयोरपि मार्गयोः गौडवैदर्भयोः न बहु मन्यन्ते आलंकारिका इति शेषः। अत्र हेतुं दर्शयति न हीति । शब्दन्यायः शब्दजान्वयबोधपद्धतिः वृत्त्युपस्थाप्यानामेवार्थानामन्वय इत्येवंरूपा तं विलङ्घयति अतिक्रामतीति शब्दन्यायविलङ्घिनी अध्याहारेण यथाकथंचिदर्थसंपन्नेत्यर्थः। प्रतीतिः अन्वितो वाक्यार्थः न हि सुभगा न समीचीनः। अत्राहुः प्रेमचन्द्रशर्माणः—अर्थापत्त्याद्युपस्थापितार्थप्रतीतेस्तु न शाब्दबोधत्वं तदुत्तरमेव तस्याः सद्भावात् । एवं तात्पर्यपर्यालोचनया अर्थान्तरप्रतीतिरपि शाब्दबोधोत्तरकालीनैव। अतस्तादृशं वाक्यं नेयत्वदोषग्रस्तमिति भावः । यत्र तु द्वारं द्वारमित्यादौ त्वरादिना पिधेहीत्यादिसाकाङ्क्षपदान्तरानुपादानेन शाब्दबोधासंभवात् तदर्थं श्रुतार्थापत्त्या तादृशपदाध्याहारः तत्र अध्याहृतपदेपि शक्तिग्रहाभ्युपगमेन तदर्थस्य वृत्त्युपस्थाप्यत्वेन न तन्नियमातिक्रमः । एतच्च विशिष्टशक्तिवादमभिप्रेत्योक्तम् । उपाधिशक्तिवादिभिस्तु आक्षेपगम्यायाः अपि व्यक्तेः शाब्दबोधाभ्युपगमान्निरुक्तनियमो नाङ्गीक्रियते इति विभावनीयम् इति दिक् ॥ ७५ ॥

उदारं लक्षयति—उत्कर्षवानिति। यस्मिन् वाक्ये उक्ते सति उत्कर्षवान् वर्णनीयोत्कर्षप्रतिपादकः लोकोत्तरचमत्काराधायी गुणः धर्मविशेषः प्रतीयते ज्ञानविषयो भवति तद्वाक्यमुदाराह्वयम् उदारसंज्ञकम् । तेन औदार्यगुणेन काव्यपद्धतिः गौडवैदर्भीया काव्यरीतिः सनाथा प्रकृष्टाश्रया। औदार्याश्रयेण काव्यं सविशेषमुल्लसतीत्यर्थः । अत्रोत्कर्षवान् इत्यनेन वर्ण्योत्कर्षजनकगुणोपेक्ष्यते नापकर्षजनकः । तेन

हे हेलाजितबोधिसत्त्व वचसां किं विस्तरैस्तोयधे
नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः ।
तृष्यत्पान्थजनोपकारघटनावैमुख्यलब्धायशो-
भारप्रोद्वहने करोपि कृपया साहाय्यकं यन्मरोः ॥

i. 75—बहिः for न हि V;—शब्दशानानुबन्धिनी for शब्दन्यायविलङ्घिनी V;—विलम्बिनी for विलङ्घिनी marginalia in D.

दुक्ते यस्मिन् प्रतीयते ।

इत्यत्र नोदारतेति केचित् । परे तु उत्कर्षवान् वर्णनभङ्गिविशेषेण चमत्का-
१२रजनको गुणः उत्कर्षापकर्षस्वरूपो वर्ण्यस्य धर्मः औदार्यमिति स्वीकुर्व-
न्ति हे हेलाजितेत्यत्र औदार्यगुणं च मन्वते । सर्वपद्धतिः इति पाठे सर्वा
गौडवैदर्भीरूपा इति अयमेवार्थः । औदार्ये गौडवैदर्भयोरैक्यमस्तीति भावः ।
१५गुणव्यञ्जकता वाक्यस्य वाक्यार्थद्वारा । तेनास्य गुणस्यार्थगतत्वम् ।
शब्दगतस्त्वयं विकटत्वस्वरूपः वामनादिभिः स्वीकृतो वर्तते । विकटत्वं
१७च पदानां नृत्यत्प्रायत्वम् । उदाहरति च वामनः (iii.1.22)—

स्वचरणविनिविष्टैर्नूपुरैर्नर्तकीनां
झणिति रणितमासीत् तत्र चित्रं कलं च ।

२०इति । न पुनः—

चरणकमललग्नैर्नूपुरैर्नर्तकीनां
झटिति रणितमासीन्मञ्जु चित्रं च तत्र ।

२३इति । अन्येतरेषां लक्षणोदाहरणानि । तत्रादौ भरतः (xvi. 102)—

दिव्यभावपरीतं यच्छृङ्गाराद्भुतयोजितम् ।
अनेकभावसंयुक्तमुदारं तत् प्रकीर्तितम् ॥ इति ।

२६अत्रोदाहरति हेमचन्द्रः (P. 199)—

ये पूर्वं यवसूचिसूत्रसुहृदो ये केतकाग्रच्छद-
च्छायाधाम पुनर्मृणाललतिकालावण्यभाजोत्र ये ।
ये धाराम्बुविडम्बिनः क्षणमधो ये तारहाराश्रिय-
स्तेमी स्फाटिकदण्डडम्बरजितो जाताः सुधांशोः कराः ॥ इति ।

३१शब्दगुणमिममुदाहरति हेमचन्द्रः (P. 199)—

अत्रान्तरे झणितहारलतानितम्ब-
संवाहनस्खलितवेगतरङ्गिताङ्गी ।
देवी व्यपास्य शयनं धृतमानतन्तु-
रन्तःपुरं गतवती सह सौविदल्लैः ॥ इति ।

३६अर्थगुणं तु अग्राम्यत्वमुदारता इति लक्षयति वामनः । अस्य उदाहरणं

---

i. 76—यस्मिन्नुक्ते for उक्ते यस्मिन् P, B, V, R.

तदुदाराह्वयं तेन सनाथा काव्य-

३७च (iii. 2. 13)—

त्वमेवंसौन्दर्या स च रुचिरतायाः परिचितः
कलानां सीमान्तं परमिह युवामेव भजथः ।
अयि द्वन्द्वं दिष्ट्या तदिह सुभगे संवदति मा-
मतः शेषं चेत् स्यात् जितमिह तदानीं गुणितया ॥ इति ।

४२अत्र प्रथमं त्वं स चेति पृथक्त्वयोक्तेस्तदनन्तरं युवामिति सामान्यमिश्रीकरणादनन्तरं द्वन्द्वमिति विशिष्टसंश्लेषदर्शनात् अन्ते ततः शेषमिति विवक्षितार्थव्यञ्जनमुखेन फलपर्यवसायित्वम् औचित्यशालिना क्रमेण काम-
४५न्दक्या मालतीमुद्दिश्योक्तम् इति उदारता इति कामधेनुकाराः ।
अस्य प्रत्युदाहरणम्—स्वपिति यावदयमिति पूर्वोक्तः श्लोकः (P. 71)।
भोजराजः शब्दौदार्यम्—विकटाक्षरबन्धत्वमार्यैरौदार्यमुच्यते । इति लक्ष-
४८यति उदाहरति च (i. 70)—

आरोहत्यवनीरुहं प्रविशति श्वभ्रं नगः स्पर्धते
खं व्यालेढि विचेष्टते क्षितितले कुक्षोदरे लीयते ।
अन्तर्भ्राम्यति कोटरस्य विहरत्यालम्बते वीरुधः
किं तद्यन्न करोति मारुतवशं यातः कृशानुर्वने ॥ इति ।

५३अर्थगुणं तु भूत्युत्कर्षमुदारता इति संवर्ण्योदाहरति (i. 81)—

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे पुण्याभिषेकक्रिया ।
ध्यानं रत्नशिलागृहेषु विबुधस्त्रीसंनिधौ संयमो
यद्वाञ्छन्ति तपोभिरन्यमुनयः तस्मिंस्तपस्यन्त्यमी ॥ इति ।

५८वाग्भटो हि विकटबन्धत्वमौदार्यम् इति निर्दिश्य उदाहरति(P. 30)—

वाचाला कनकमयध्वजाग्रसङ्गि-
व्यालोलस्फुरदुरुकिङ्किणीनिनादैः ।
चैत्याली जगति न कस्य राहडस्य
प्रेङ्खन्ती भवति मनःप्रहर्षणीयम् ॥ इति ।

६३जगन्नाथः शब्दगुणस्य—कठिनवर्णघटनारूपविकटत्वलक्षणोदारता इति

---

i. 76—सर्व for काव्य N, R, Ch (as a variant).

पद्धतिः ॥ ७६ ॥

अर्थिनां कृपणा दृष्टिस्त्वन्मुखे पतिता सकृत् ।
तदवस्था पुनर्देव नान्यस्य मुखमीक्षते ॥ ७७ ॥
इति त्यागस्य वाक्येस्मिन्नुत्कर्षः साधु लक्ष्यते ।
अनेनैव पथान्यच्च समानन्यायमूह्यताम् ॥ ७८ ॥

६४लक्षणं प्रदर्श्य उदाहरति यथा (p. 57)—

प्रमोदभरतुन्दिलप्रमथदत्ततालावली-
विनोदिनि विनायके डमरुडिण्डिमध्वानिनि ।
ललाटतटविस्फुटन्नवकपीटयोनिच्छटो
हठोद्धतजटोद्भटो गतपटो नटो नृत्यति ॥

६९अर्थगुणं तु—चुम्बनं देहि मे भार्ये कामचाण्डालतृप्तये । इत्यग्राम्यार्थ-परिहारमुदारता इति । सोयं शब्दगुणः ओजसि अन्तर्भवति अर्थगुणस्तु अग्राम्यतादोषपरिहाररूपः इति वदन्त्यर्वाञ्चः दर्पणकारादयः ॥ ७६ ॥

उदारमुदाहरति—अर्थिनामिति । कस्यचिद्राज्ञः प्रशंसेयम् । हे देव महाराज अर्थिनाम् याचकानां कृपणा दीना दृष्टिः त्वन्मुखे सकृत् ३एकवारमेव पतिता सती पुनः पश्चात् तदवस्था दीना भूत्वा अन्यस्य मुखं नेक्षते । त्वयैव परिपूरिताशानां नान्यत्र याच्ञार्थं गमनमिति भावः । एतेन राज्ञः ईदृशी दानशक्तिर्यद्याचकाः परिपूर्णमनोरथाः नान्यं ६दातारं पश्यन्ति इति भङ्ग्यन्तरेण दानमाहात्म्यवर्णनेन सहृदयानां चमत्कारविशेषो भवति । अतः उदारगुणमेतत् पद्यम् ॥ ७७ ॥

उदाहरणं लक्षणेन संयोजयति—इतीति । इति पूर्वोक्तप्रकारेण दर्शितस्य वर्णनीयस्य राज्ञो दानस्य उत्कर्षः चमत्कारविशेषेण परिपोषः । ३अस्मिन् वाक्ये अर्थिनां कृपणेत्यादिवाक्ये साधु सम्यक् लक्ष्यते दृश्यते । खलु इति पाठे निश्चयेनेत्यर्थः । अनेनैव पथा ईदृशवर्णनप्रकारेण अन्यत् वीर्यधैर्यादेरपकर्षादेर्वा वर्णनं समानन्यायम् समानः सदृशः न्यायो व्यव-६स्थितिः उत्कर्षेण वर्णनरूपा यस्य तत् तादृशमुदाहरणम् ऊह्यतां विभाव्यताम् । अनेन गुणवर्णने एव उदारो भवतीति न अपि तु दोषस्याप्युत्कर्षेण वर्णने स भवति यथा हे हेलाजितेत्यादौ इति सूचितम् ॥ ७८ ॥

---

i. 78—खलु for साधु Pn;—अन्यत्र for अन्यच्च P, B, Cs.

श्लाघ्यैर्विशेषणैर्युक्तमुदारं कैश्चिदिष्यते ।
यथा लीलाम्बुजक्रीडासरोहेमाङ्गदादयः ॥ ७९ ॥

ओजः समासभूयस्त्व-

उत्तानपदतौदार्यं युतं श्लाघ्यैर्विशेषणैः । इत्यग्निपुराणस्थम् (346. 9) उदारतालक्षणं वर्णयति—श्लाघ्यैर्विशेषणैरिति । श्लाघ्यैः विशेष्यस्योत्कर्षा-
३धायकत्वेन मनोहरैर्विशेषणैर्युक्तम् उदारम् उदारगुणवत् इति कैश्चिदभि-युक्तैरिष्यते अङ्गीक्रियते । अत्र कैश्चिदित्यनेन साभिप्रायविशेषणत्वस्या-पुष्टार्थत्वदोषाभावरूपत्वादन्यैः परिकरालंकारेणोक्तत्वाच्च न गुणत्वमुचि-
६तमित्यस्मिन् कल्पे स्वस्यास्वरसः सूचितः इति यत् प्रेमचन्द्रमहाशयै-रुक्तं तन्न मनोहरम् । प्रकृतकविना अर्थालंकारे परिकरस्यापरिगणितत्वात् दोषविचारेऽपि अपुष्टार्थत्वदोषस्यानुक्तत्वाच्चेति ज्ञेयम् । उदाहरति—
९यथेति । अत्र लीलाशब्देन वर्णाकारसौरभ्यातिशयः क्रीडाशब्देन कमलमारसविहारनौसनाथत्वम् हेमशब्देन च महार्घत्वं रत्नखचितत्वं च सूच्यते । एवं मणिनूपुरं रत्नकाञ्चीं कनककुण्डलम् इत्यादीन्युदाहरणानि
१२ऊह्यानि ॥ ७९ ॥

क्रमप्राप्तमोजो लक्षयति—ओज इति । समासभूयस्त्वम् समसनम् पदयोः पदानां वा एकीकरणं समासः । अथवा समस्यते एकीक्रियते
३अनेकं पदं यस्मिन् स समासः । अकर्तरि च कारके संज्ञायामिति घञ् । तेषां भूयस्त्वं बाहुल्यम् बहुपदसमासः इत्यर्थः । ओजः ओजोगुणः । एतत् समासभूयस्त्वरूपमोजः गद्यस्य गद्यप्रबन्धस्य जीवितं प्राणभूतम् ।
६इदं चोभयोः मार्गयोः समानम् । अदाक्षिणात्यानां गौडानां पद्येपि अपिना गद्यममुच्चयः । एकं परायणम् अद्वितीयावलम्बनम् । विकटबन्ध-प्रिया हि गौडाः तत्संपादकानुप्रासदीर्घसमासादिषु अत्यन्तादरशालिन
९इत्यर्थः । समासस्य शब्दमात्रगतत्वेन इदमोजः शब्दगुणः । वामनस्तु (iii. 2.2) अर्थस्य प्रौढिरोजः इति अर्थगतमपि तं स्वीकरोति ।

---

i. 79—नीलाम्बुज for लीलाम्बुज D, emended into लीलाम्बुज in the margin.

मेतद्व्यस्य जीवितम् ।

१सा च प्रौढिः पञ्चविधा । तथाहि—

पदार्थे वाक्यवचनं वाक्यार्थे च पदाभिधा ।
प्रौढिर्व्यासस्समासौ च साभिप्रायत्वमस्य च ॥ इति ।

एकपदार्थस्य बहुभिः पदैरभिधानं पदार्थे वाक्यवचनम् । यथा चन्द्र इत्येक-
५पदार्थे वक्तव्ये —अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः इति वाक्यवचनम् ।
बहूनां पदार्थानामेकपदेनाभिधानं वाक्यार्थे पदाभिधा यथा—दिव्येयं
न भवति किन्तु मानुषी इति वक्तव्ये निमिषति इति पदप्रयोगः । व्यासः
१विस्तारः एकवाक्यार्थस्यानेकवाक्येन प्रतिपादनम् यथा—

अयं नानाकारो भवति सुखदुःखव्यतिकरः
सुखं वा दुःखं वा न भवति भवत्येव च ततः ।
पुनस्तस्मादूर्ध्वं भवति सुखदुःखं किमपि तत्
पुनस्तस्मादूर्ध्वं भवति न च दुःखं न च सुखम् ॥ इति ।

अयमविसंवादितयानुभूयमानः सुखदुःखव्यतिकरो नानाकारो विचित्र-
१रूपो भवतीति प्रतिपाद्यार्थः । तस्यैव सुखं वा दुःखं वा इत्यादिभिर्वि-
स्तरः । अनेकवाक्यार्थस्यैकवाक्येन प्रत्यायनं समासः यथा—

ते हिमाल्यमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम् ।
सिद्धिं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥ इति ।

ते खमुद्ययुरित्येकेनैव वाक्येनामन्त्रणप्रेक्षणनिवेदनविसर्जनाद्यर्थानां नाना-
वाक्यार्थप्रतिपाद्यानां प्रतिपादनात् समासः । अस्य वाक्यार्थस्य साभि-
प्रायत्वं सहेतुकत्वम् यथा—

सोयं संप्रति चन्द्रगुप्ततनयश्चन्द्रप्रकाशो युवा
जातो भूपतिराश्रयः कृतधियां दिष्ट्या कृतार्थश्रमः ॥ इति ।

अत्राश्रयः कृतधियामित्यस्य वसुबन्धुसाचिव्योपक्षेपपरत्वात् साभिप्रायत्व-
१ । अथवा सुधांशुकलितोत्तंसमस्तापं हरतु वः शिवः । इत्यत्र सुधांशुक-
लेतोत्तंसः इति विशेषणस्य तापहरणरूपप्रकृतार्थोपयुक्तत्वात् साभिप्राय-
वमिति केचित् । तत्र चत्वारः प्रथमभेदाः उक्तिवैचित्र्यमात्ररूपाः न तु
१णरूपास्तेषामभावेपि यः कौमारहरः इत्यादिप्रबन्धेषु काव्यव्यवहा-

पद्येष्यदाक्षिणात्यानाम्

रात्। यश्च साभिप्रायत्वरूप ओजोगुणस्तस्याप्युष्टार्थत्वदोषपरिहारस्वरूपेण
३९गतार्थत्वान्न पृथक् परिगणनमावश्यकमिति प्रकाशकारादयः(iii.P.582)॥
अत्रान्येषां लक्षणोदाहरणानि। तत्र भरतः (xvi. 99)—

समासवद्भिर्विविधैर्विचित्रैश्च पदैर्युतम्।
सा तु(यत् तु)स्वरैरुदारैश्च तदोजः परिकीर्त्यते ॥ इति।

४३अत्र हेमचन्द्रः—अवगीतस्य अहीनस्य वा वस्तुनः शब्दार्थसंपदा यदु-
दात्तत्वं निपिञ्चन्ति कवयस्तदोज इति भरतः इति भरतमनूद्य उदा-
४५हरति (P. 195)—

गोमायवः शाकुनयोत्र शुनां गणोत्र
लुम्पन्ति कीटकृमयः परितस्तथैते।
त्वं संपदं सकलसत्त्वकृतोपकारां
न [नो] दृष्टवान् यदसि तच्छव वञ्चितोसि ॥ इति।

अयं कवेर्वर्णनप्रकारो न तु काव्यगुणः इति आचार्यदण्डिन आकृतमभिधाय
५१समासभूयस्त्वमोजः इति तल्लक्षणमभिधत्ते। वामनस्तु (iii. 1. 5)
गाढबन्धत्वमोजः इति शब्दगतौजसो लक्षणं विधाय विलुलितमकरन्दा
मञ्जरीर्नर्तयन्ति इति उदाहरति। हेमचन्द्रस्तु वामनेन लक्षितस्यौजसः
५४(P. 195)—

भस्मवर्म फणिनः पतिर्गवा-
स्थिपङ्क्तिरिति ते परिग्रहः।
ईश इत्ययमनन्यचुम्बित-
श्चन्द्रचूड तदपि त्वयि स्थितिः ॥ इति।

एतदुहारणं दर्शयति। भोजराजस्तु—ओजः समासभूयस्त्वम् इति शब्द-
६०गुणस्य लक्षणं विधाय (i. 74)—

जयति भुजगराज्ञुग्रन्थिनिष्पीडितेन्दु-
स्रवदमृतनिवृत्तप्रेतभावैः कपालैः।
विरचिततनुतिबन्धो मूर्ध्नि सद्यः पुरारेः
परिणतबहुकल्पब्रह्मणां ब्रह्मघोषः ॥

---

i. 80—दाक्षिणात्यानां for अदाक्षिणात्यानां I).

मिदमेकं परायणम् ॥ ८० ॥

इत्युदाहरति । अर्थगुणं तु—ओजः स्वाभ्यवमायस्य विशेषोर्थेषु यो भ-
६६वेत् । इति लक्षयित्वोदाहरति (i. 82)—

तान्येव यदि भूतानि ता एव यदि शक्तयः ।
ततः परशुरामस्य न प्रतीमः पराभवम् ॥ इति ।

६९अत्र परशुरामो विजयते एव इत्यभिप्रेतार्थे स्वनिश्चयप्रतिपादनत्वेनौजः। प्रकाशकारः (viii. 69) चित्तस्य विस्तारस्वरूपदीप्तत्वजनकमोजः इति लक्षयति । उदाहरणं तु चञ्चद्भुजेत्यादि ऊहनीयम् । दीप्तिहेतुरोजः
७२इति तु वाग्भटः । तच्च वीरबीभत्सरौद्रेषु क्रमेण विशेषतो रम्यम् इत्यभिधायोदाहरति । तत्र वीरे(P. 30)—

शैलोत्तुङ्गतरङ्गवेगगमनप्रोत्कम्पमानावनि-
स्तम्बक्षोभितभैरवार्णवभवत्कल्पान्तकालभ्रमम् ।
क्रोधान्धाः खरदूषणत्रिशिरसः प्राप्तास्त एव द्रुतं
ब्रूत ब्रूत भटाः क्व मे क्व मे नरः शम्बूकजीवाहरः ॥ इति ।

७८बीभत्से—उत्कृत्योत्कृत्य कृत्तिम् इत्यादिकम् रौद्रे—चञ्चद्भुजभ्र-
मितेत्यादिकम् च अनुसर्तव्यम् । दर्पणकारस्य लक्षणं प्रकाशकारानुरोधि एव । कविराजस्तु संयोगपरह्रस्वप्राचुर्यरूपं गाढत्वमोजः इति लक्षणं
८१विधाय (रसगङ्गाधर P. 58)—

साहंकारसुरासुरावलिकराकृष्टभ्रमन्मन्दर-
क्षुभ्यत्क्षीरधिवल्गुवीचिवलयश्रीगर्वसर्वंकषाः ।
तृष्णाताम्यदमन्दतापसकुलैः सानन्दमालोकिता
भूमीभृषण भूषयन्ति भुवनाभोगं भवत्कीर्तयः ॥

८६इत्युदाहरति । पदार्थे वाक्यरचना इत्याद्यर्थगुणस्य पञ्चप्रकारत्वं प्रपञ्च्य विविधान्युदाहरणान्यपि ददाति तेषां च निष्प्रयोजकत्वं काव्यप्रकाशकारानुरोधेनैव दर्शयति । परं विस्तारभयान्न तदनुवादः क्रियतेस्माभि-
८९रित्यलम् ॥ ८० ॥

तद्गुरूणां लघूनां च बाहुल्यात्पत्वमिश्रणैः ।
उच्चावचप्रकारं सदृश्यमाख्यायिकादिषु ॥ ८१ ॥
अस्तमस्तकपर्यस्तसमस्तार्कांशुसंस्तरा ।
पीनस्तनस्थितातास्रकम्रवस्त्रेव वारुणी ॥ ८२ ॥
इति पद्येपि पौरस्त्या बध्नन्त्योजस्विनीर्गिरः ।

ओजोगुणस्य रचनाप्रकारं दर्शयति—तदिति । समासभूयस्त्वरूपमोजः गुरूणाम् पदघटकगुरुवर्णानाम् लघूनाम् लघुवर्णानाम् । बाहुल्याल्पत्वमिश्रणैः क्वचिद्बहूनां बाहुल्यं लघूनामल्पत्वं क्वचिदेतद्विरुद्धं लघूनां बाहुल्यं गुरूणामल्पत्वं क्वचिच्च उभयोरपि समानं यन्मिश्रणम् संमेलनम् तैः उच्चावचप्रकारम् अनेकविधम् भवतीति शेषः । अत्र केचित् गुरूणां महाप्राणानां लघूनामल्पप्राणानामिति व्याख्यां कुर्वन्ति । तदेतादृशं बहुप्रकारमोजः आख्यायिकादिषु गद्यप्रबन्धविशेषेषु दृश्यम् । आदिना चम्पूविरुदादीनां संग्रहः ॥ ८१ ॥

ओज उदाहरति—अस्तेति । अस्तः अस्ताचलः तस्य मस्तकं शिखरं तत्र पर्यस्ताः प्रसृता ये समस्ताः सायंकाले तत्रैव सर्वेषाम् अवस्थानात् संपूर्णाः अर्कांशवः सूर्यकिरणाः तैः संस्तरः आच्छादनं यस्याः सा तादृशी सूर्यकिरणव्याप्तेत्यर्थः । वारुणी वरुणस्वामिका पश्चिमदिक् । पीनः पुष्टो यः स्तनः तस्मिन् स्थितम् आताम्रं किंचिल्लोहितं कम्रं मनोहरं च वस्त्रं यस्याः तादृशी नायिका इव शोभते । अत्र पीनस्तनेत्यनेन सायंकालीनसूर्यमण्डलस्य वारुण्याः स्तनत्वेनारोपः सूचितः । एतदनुप्रासपरिपूर्णतया अनुप्रासाकुलधियां गौडानाम् ओजस उदाहरणं ज्ञेयम् । वैदर्भाणामग्रे (i. 84) वक्ष्यति ॥ ८२ ॥

पूर्वोदाहरणं गौडानामिति स्पष्टमभिधत्ते—इतीति । पौरस्त्याः गौडाः इति पूर्वश्लोकोक्तप्रकारेण पद्येपि ओजस्विनीः समासबाहुल्येन ओजोगुणवतीः गिरो बन्धन्ति रचयन्ति । वैदर्भाभिमतमोजो लक्षयति अन्ये त्वि-

---

i. 81—गुरूणां च for तद्गुरूणां M;—तदृश्यं for सदृश्यं P,B,R, M, Cb (?); स्यादृश्यं N.

i. 82—वस्त्रेवाभाति for कम्रवस्त्रेव R, Ch.

अन्ये त्वनाकुलं हृद्यमिच्छन्त्योजो गिरां यथा ॥ ८३ ॥
पयोधरतटोत्सङ्गलग्नसंध्यातपांशुका ।
कस्य कामातुरं चेतो वारुणी न करिष्यति ॥ ८४ ॥

ति । अन्ये तु वैदर्भास्तु गिरामनाकुलम् भावप्रधानो निर्देशः अनाकुलत्वमित्यर्थः । अथवा न विद्यते आकुलं विषमोच्चारणं यस्य इत्यनाकुलं ६सुखोच्चारणमित्यर्थः । एतादृशं पारुष्यशैथिल्यादिदोषपरिमार्जनेन मनोहारि ओजः ओजोगुणम् इच्छन्ति । अयमत्राशयः । ओजोगुणः उभयोः गौडवैदर्भयोः इष्टः परं गौडा अनुप्रासलोभात् कष्टपदबहुलसमासविन्यासेन ९सहृदयानां बुद्धिं व्याकुलयन्ति । वैदर्भास्तु बन्धपारुष्यशैथिल्यादिदोषपरिहारेण प्रसन्नार्थानां पदानां समासेन बुद्धेरनाकुलत्वं साधयन्ति । तादृशसमासभूयस्त्वं च ओज इति मन्यन्ते । समासभूयस्त्वं उभयोरपि १२अभिप्रेतम् । परं बुद्धेराकुलीकरणानाकुलीकरणविषये उभयोर्भेदः । गौडाः अनुप्रासानुकूलतया क्लिष्टत्वं न विचारयन्ति । वैदर्भास्तु तत्परिहरन्तीति भावः ॥ ८३ ॥

वैदर्भाभिमतम् ओज उदाहरति—पयोधरेति । पयोधरो मेघ एव पयोधरः स्तनः तस्य तटः प्रान्तप्रदेशः तस्य उत्सङ्गे मध्यप्रदेशे ३लग्नं संलग्नं संध्यातपः संध्याकालीनसौरकिरणा एव अंशुकं आरक्तवसनं यस्याः सा । एतादृशी वारुणी पश्चिमदिक् कस्य सहृदयस्य चेतः कामातुरं मदनव्यथितं न करोति । आरक्तवसनावगुण्ठितस्तनमनोहरायाः ६नायिकायाः स्मरणेनेति भावः । अत्र पूर्वार्धे दीर्घसमासवद्वाक्यमपि अस्तमस्तकेतिवत् क्लिष्टपदशून्यत्वात् न बुद्धिमाकुलयति प्रत्युत प्रसन्नार्थतया उच्चारणसौकर्येण च चित्तश्रवणयोः सौख्यमादधाति । अत्र ९तृतीयचरणे अल्पसमासः चतुर्थचरणे तु समासाभावः । तथापि रचनायाः गाढत्वेन लालित्येन च इदं पद्यं रसिकानां मन आकर्षति । अनेन कुत्रचिदंशे समासहानावपि न ओजोगुणहानिरिति मन्तव्यम् ॥ ८४ ॥

---

i. 83—अन्येष्यनाकुलं for अन्ये त्वनाकुलं R;—गिरः for गिरां variant in Cs.

i. 84—संध्यातपांशुना for संध्यातपांशुका D, marginal emendation.

कान्तं सर्वजगत्कान्तं लौकिकार्थानतिक्रमात् ।

कान्तिं लक्षयति—कान्तमिति। लौकिकस्य लोकप्रसिद्धस्य अर्थस्य वस्तुनः अनतिक्रमात् अपरित्यागात् लोकप्रसिद्ध्यनुरूपवस्तुवर्णनादित्यर्थः। सर्वजगत्कान्तम् सर्वजगतां विदग्धादिबालान्तानां कान्तं कमनीयम् अर्थबोधसौकर्येण चमत्कारजनकतया च सर्वमनोहरमिति भावः। ईदृशं वाक्यं कान्तं कान्तिगुणविशिष्टम्। एवं च लोकप्रसिद्ध्यनुरोधेन वस्तुवर्णनं कान्तिरिति लक्षणं संपन्नम्। अयं च कान्तिगुणः आचार्यदण्डिनो मतेन अर्थगुणः। अर्थानुसंधानतः प्रागस्य अनुदयात्। कान्तेर्विषयं दर्शयति तच्चेति। तत् कान्तिगुणयुतं वाक्यं वार्ताभिधानेषु वार्तायाः लौकिकोपचारवचनस्य अभिधानानि कथनानि तेषु तथा च वर्णनासु प्रशंसावचनेषु दृश्यते। केचित्तु वार्ताभिधानेषु अनामयप्रियालापप्रस्तावेषु वर्णनासु वस्तुस्वरूपनिरूपणेषु इत्येवमर्थं दर्शयन्ति। उभयत्रापि लौकिकसीमानतिक्रमस्यावश्यकत्वं वर्तत एव। अन्ये तु वार्ताभिधानेषु इतिहासवर्णनेषु इतिहासे यथावद्वर्णनस्यौचित्यादित्याहुः। अनेन व्यङ्ग्यकार्थस्य स्वतः संभवित्वेन प्रौढोक्तिसिद्धत्वेन च प्रकाशकारादीनां काव्यभेदकरणं संगच्छते। तदुक्तं प्रकाशकारेण (iv. 39)—

> अर्थशक्त्युद्भवोप्यर्थो व्यञ्जकः संभवी स्वतः ।
> प्रौढोक्तिमात्रात् सिद्धो वा कवेस्तेनोम्भितस्य च ॥ इति ।

अत्रान्येषां लक्षणोदाहरणानि। तत्र भरतः (xvi. 103)—

> यन्मनःश्रोत्रविषयमाह्लादयति हीन्दुवत् ।
> लीलाद्यर्थोपपन्नां वा तां कान्तिं कवयो विदुः ॥ इति ।

अत्रोदाहरति हेमचन्द्रः (P.200)—

> ददृशुर्द्वारदेशस्थां सीतां वल्कलधारिणीम् ।
> अङ्गदाहादनङ्गस्य रतिं प्रव्रजितामिव ॥ इति ।

स एवाग्रे कथयति—तदिदं माधुर्यसाधारणम् इति वामनीयाः इति। वामनस्तु (iii.1.25) औज्वल्यं कान्तिः। औज्वल्यं नाम नवप्रतिभाप्रकर्षः यदभावे पुराणी बन्धच्छायेयमिति व्यपदिशन्ति। इदमुदाहरति स्वटीकायां

तच्च वार्ताभिधानेषु

२७हेमचन्द्रः (P. 200)—

स्त्रीणां केतकगर्भपाण्डुसुभगच्छेदावदातप्रभे
मन्दं कुड्मलिताः कपोलफलके लावण्यनिष्यन्दिनि ।
अन्यां कामपि कामनीयककलामातन्वते नूतनां
शीतांशोर्बिसकन्दकन्दलशिखामुग्धश्रियो रश्मयः ॥ इति ।

ओजोपि औज्ज्वल्ययोगात् कान्तिः स्यात् तत्परिजिहीर्षया लोकसीमा-
३३नतिक्रमात् इत्युक्तम्। अस्य गुणस्य वार्तावर्णनात्वेन द्विविधत्वं प्रोच्य उदाहरति हेमचन्द्रः । तत्र वार्तायाम् (P. 200)—

एते वयममी दाराः कन्येयं कुलजीवितम् ।
ब्रूत येनात्र वः कार्यमनास्था बाह्यवस्तुषु ॥ इति ।

३७वर्णनायां—

तदाननं निर्जितचन्द्रकान्ति कन्दर्पदेवायतनं मनोज्ञम् ।
प्रदक्षिणीकर्तुमितः प्रवृत्ते विलोचने मुग्धविलोचनायाः ॥ इति।

४०लोकसीमातिक्रमणे न कान्तिः । तत्र वार्तायामतिक्रमणं यथा—

मम दृष्टस्य राजेन्द्र तव दीर्घेण चक्षुषा ।
चरणद्वितयस्याग्रे नित्यं लुठति चन्द्रमाः ॥ इति ।

४३एवमेव वर्णनायां यथा—

वदनस्य तवैणाक्षि लक्ष्यते पुरतः शशी ।
पिण्डीकृतेन बहुना कज्जलेनैव निर्मितः ॥ इति ।

४६वामनस्तु दीप्तरसत्वं कान्तिः इति अर्थगतायाः कान्तेर्लक्षणं विधायोदाहरति(iii. 2. 14)—

प्रेयान् सोयमपाकृतः सशपथं पादानतः कान्तया
द्वित्राण्येव पदानि वासभवनाद्यावन्न यात्युन्मनाः ।
तावत् प्रच्युतपाणिसंपुटलसन्नीवीनितम्बं धृतो
धावित्वैव कृतप्रणाममहहा प्रेम्णो विचित्रा गतिः ॥ इति।

५२अत्र शृङ्गाररसस्य दीप्तत्वम् । एवमन्येषामपि रसानां कामधेनुव्याख्यायाम् उदाहरणानि द्रष्टव्यानि। भोजराजस्तु (i.69)—यदुज्ज्वलत्वं बन्धस्य

वर्णनास्वपि दृश्यते ॥ ८५ ॥

५४काव्ये सा कान्तिरुच्यते। इति शब्दगुणं कान्तिमभिधाय उदाहरति—

निरानन्दः कौन्दे मधुनि विधुरो बालबकुले
न साले सालम्बो लवमपि लवङ्गे न रमते।
प्रियङ्गौ नासङ्गं रचयति न चूते विचरति
स्मरश्लक्ष्मीलीलाकमलमधुपानं मधुकरः ॥ इति ।

५९अर्थगुणं तु वामनवत् दीप्तरसत्वं स्वीचक्रार उदाहरति च (i. 81)—

मा गर्वमुद्वह कपोलतले चकास्ति
कान्तस्वहस्तलिखिता मम मञ्जरीति ।
अन्यापि किं न सखि भाजनमीदृशीनां
वैरी न चेद्भवति वेपथुरन्तरायः ॥ इति ।

६४वाग्भटस्तु आचार्यदण्डिमतानुरोधेन लौकिकार्थानतिक्रमेणौज्ज्वल्यं कान्तिः इति लक्षणं विधाय उदाहरति (P. 29)—

सजलनिबिडवस्त्रव्यक्तनिम्नोन्नताभिः
परिगततटभूमिः स्नानमात्रोत्थिताभिः।
रुचिरकनककुम्भश्रीमदाभोगतुङ्ग-
स्तनविनिहितहस्तस्वस्तिकाभिर्वधूभिः॥ इति ।

७०प्रकाशकारादयस्तु ग्राम्यपदाघटितत्वेनोज्ज्वलत्वरूपां कान्तिं स्वीकृत्य तां ग्राम्यरूपदोषाभावे अन्तर्भावयन्ति । जगन्नाथस्तु अविदग्धवैदिकादिप्रयो-
७२गयोग्यानां पदानां परिहारेण प्रयुज्यमानेषु पदेषु लोकोत्तरशोभारूपमौ-ज्ज्वल्यं कान्तिः इति लक्षणं विधायोदाहरति (P. 58)—

नितरां परुषा सरोजमाला न मृणालानि विचारपेशलानि ।
यदि कोमलता तवाङ्गकानामथ का नाम कथापि पल्लवानाम्॥ इति।

७६अर्थगुणस्य तु दीप्तरसत्वं कान्तिः इत्येव लक्षणं विहितम् (P. 62)। उदाहरणं च—नवोच्छलितयौवनस्फुरदखर्वगर्वज्वरे इत्यादि ॥ ८९ ॥

---

i. 85—विद्यते for दृश्यते V.

गृहाणि नाम तान्येव तपोराशिर्भवादृशः ।
संभावयति यान्येवं पावनैः पादपांसुभिः ॥ ८६ ॥
अनयोरनवद्याङ्गि स्तनयोर्जृम्भमाणयोः ।
अवकाशो न पर्याप्तस्तव बाहुलतान्तरे ॥ ८७ ॥
इति सम्भाव्यमेवैतद्विशेषाख्यानसंस्कृतम् ।

तत्र वार्ताभिधाने कान्तिमुदाहरति—गृहाणीति । तान्येव गृहाणि गृहपदवाच्यानि प्रशस्तानि गृहाणीत्यर्थः । नाम इति संभावनायां निपातः । भवादृशः युष्मत्सदृशः तपोराशिः तपस्संघस्वरूपः यानि गृहाणि पावनैः पवित्रैः पादपांसुभिः चरणधूलिभिः संभावयति गौरवं प्रापयति । अत्र सत्पुरुषचरणसंपर्केण गृहादीनां प्राशस्त्यवर्णनं लोकव्यवहारप्रसिद्धमेवेति इयं वार्ताभिधानरूपा कान्तिः ॥ ८६ ॥

वर्णनायां कान्तिमुदाहरति—अनयोरिति । हे अनवद्याङ्गि शोभनगात्रे तव बाहुलतान्तरे हस्तद्वयस्य मध्ये वक्षसि जृम्भमाणयोः वर्धमानयोः स्तनयोः कुचकलशयोः अवकाशः अवस्थितये स्थानं न पर्याप्तः न अलम् । करिकुम्भसदृशयोः पयोधरयोः तदपेक्षया ह्रस्वस्वरूपे वक्षसि परस्परविमर्देन कथमपि स्थितिरस्तीति भावः । अत्र वर्णनायां पीनस्तनयोः वक्षसि ससंबाधावस्थानं लोकप्रसिद्धमेव । अतो लौकिकार्थस्यानतिक्रमेण वर्णनादत्र कान्तिगुणः ॥ ८७ ॥

उपरिनिर्दिष्टोदाहरणद्वये कान्तिलक्षणं संगमयति—इतीति । इति वार्तावर्णनाविषये उदाहरणद्वयदर्शितप्रकारमिदं संभाव्यमेव लोकप्रसिद्धतया संभवनीयमेव न तु प्रौढोक्त्या कल्पनीयम् । एवमेव एतत् विशेषाख्यानसंस्कृतम् विशेषेण यथा स्यात् तथा यदाख्यानं कथनं तेन संस्कृतं

---

i. 86—यान्येव for यान्येवं all except R.

i. 87—संप्राप्तः for पर्याप्तः N;—लतान्तरं for लतान्तरे N, Rn.]

i. 88—R, probably through mistake, places this stanza before no. 92, thus causing a change in numbering.

कान्तं भवति सर्वस्य लोकयात्रानुवर्तिनः ॥ ८८ ॥
लोकातीत इवात्यर्थमध्यारोप्य विवक्षितः ।
योऽर्थस्तेनातितुष्यन्ति विदग्धा नेतरे यथा ॥ ८९ ॥

सुशोभितम् कान्तम् कान्तिगुणयुतम् भवति । कस्य भवतीत्याह सर्व-
६स्येति लोकयात्रानुवर्तिनः लोकव्यवहारनिष्णातस्य सर्वस्य जनस्य। वार्ता-
वर्णनयोः केवलं सामान्यपदप्रयोगेण कथने न कान्तिगुणः अपि तु सहृद-
८यहृदयहारिविशिष्टवर्णनप्रकारेणैव कान्तिगुणो भवतीति भावः । अन्यथा—

गोरपत्यं बलीवर्दः घासमत्ति मुखेन सः ।
मूत्रं मुञ्चति शिश्नेन अपानेन तु गोमयम् ॥

इत्यत्रापि कान्तिगुणसद्भावः स्यात्। अतश्चमत्कृतिसापेक्षोयं गुण इति
१२ध्येयम् ॥ ८८ ॥

कान्तिगुणविषये गौडानां विपर्ययं दर्शयति—लोकातीत इति । अत्र इवशब्दः प्रायोर्थे । अत्यर्थम् अत्यन्तम् । लोकातीत इव लोकप्रसिद्धि-
३मतिक्रान्तप्रायः यः अर्थः । अध्यारोप्य कल्पयित्वा स्वप्रतिभया संभाव्य इत्यर्थः । विवक्षितः वक्तुमिष्टः । तेन कल्पितार्थेन विदग्धाः अत्युक्ति-कुशला गौडाः इत्यर्थः अग्रे गौडोपलालितमिति कथनादत्र विदग्धा गौडा
६एव। अतितुष्यन्ति नितरां प्रमोदन्ते । इतरे लोकयात्रानुवर्तिनः वैदर्भाः न तुष्यन्ति। अत्र केचित् इवशब्दः अप्यर्थे तथा च लोकातीतोपि योर्थः अध्यारोप्य विवक्षितः इति योजयन्ति तथैव च विदग्धाः गौडाः सोच्छ्वस्-
९नोक्तिरियमिति कथयन्ति। अथवा विगतं दग्धं दाहः असंभव्यर्थानुभवकृत-मनःक्लेशो येषां ते विदग्धा गौडा इत्यर्थमाविष्कुर्वन्ति। ननु आरोपिता-र्थस्यान्वयायोग्यत्वेन कथं शाब्दबोध इति वाच्यम् शाब्दबोधे योग्यताया
१२हेतुत्वेन सर्वैः अभ्युपेतत्वात् इति चेत् सत्यम् । परं रूपकालंकारादिवत् आहार्यारोपेण शाब्दबोधस्य सर्वैः आलंकारिकैः स्वीकृतत्वात् नात्र अनुपपत्तिः। अत एवोक्तम्—अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति
१५हि । इति ॥ ८९ ॥

---

i. 89—अर्थो यस्तेन for योर्थस्तेनाति V;—जनाः for यथा P, B, R, D with a marginal emendation into यथा.

देवधिष्ण्यमिवाराध्यमद्यप्रभृति नो गृहम् ।
युष्मत्पादरजःपातधौतनिःशेषकिल्बिषम् ॥ ९० ॥
अल्पं निर्मितमाकाशमनालोच्यैव वेधसा ।
इदमेवंविधं भावि भवत्याः स्तनजृम्भणम् ॥ ९१ ॥
इदमत्युक्तिरित्युक्त-

वार्ताभिधाने गौडाभिमतं कान्तेरुदाहरणं दर्शयति—देवेति । अद्य-
प्रभृति युष्मत्पादरजःपातधौतनिःशेषकिल्बिषम् भवतां पादरजः चरण-
३धूलिः तस्याः पातः पतनं तेन धौतं शोधितं निःशेषं किल्बिषं पातकं
यस्य एतादृशम् नो गृहम् अस्मदीयागारम् देवधिष्ण्यमिव देवागारमिव
सर्वैः पूजनीयम् जातमिति शेषः । सत्पुरुषचरणधूलिसंपर्केण गृहस्य
६प्रशस्ततैव लोकप्रसिद्धा न तु देवागारमिव आराध्यता । सा तु प्रौढो-
क्त्या तस्मिन्नारोपिता इति ज्ञेयम् । अत्र लौकिकार्थातिक्रमान्नेयं वैद-
र्भाणां मते कान्तिः अपि तु गौडानामेव ॥ ९० ॥

वर्णनायां गौडाभिमतां कान्तिमुदाहरति—अल्पमिति । भवत्याः
इदम् पुरो दृश्यमानं स्तनजृम्भणम् कुचकलशविकासः । एवंविधम् निखिला-
३काशव्यापकम् भावि भविष्यति इति अनालोच्यैव अविचार्यैव वेधसा
विधात्रा आकाशम् अल्पम् स्तनविस्तारापेक्षया अत्यल्पपरिमाणं निर्मि-
तम् । अत्र आकाशस्याल्पत्ववर्णनेन स्तनयोः पीनतुङ्गत्वप्रतिपादनमत्यु-
६क्तिविलास एव । तथा हि सर्वज्ञस्यापि विधातुरनालोचनपूर्विका सृष्टिः
बिल्वफलसदृक्षयोः स्तनयोः मेरुमन्दराहिमालयादिभिरपि साकल्येनाव्याप्ते
आकाशे संबाधेन स्थितिरित्यादिवर्णनमतिशयोक्तिरूपम् अतो न वैदर्भा-
९नुरोधेनेदं कान्तम् । गौडास्तु एतदेव कान्तत्वेन अङ्गीकुर्वते ॥ ९१ ॥

एवं गौडवैदर्भयोः कान्तिं प्रदर्श्य उपसंहरति—इदमिति । इदम्
एवंविधं काव्यम् अत्युक्तिः अतिशयोक्तिरिति नाम्ना उक्तम् आलंकारि-

---

i. 90—मे for नः M, V;—निर्धूताशेष for धौतनिःशेष M;—
कल्मषम् for किल्बिषम् R, V; कलुषम् Cs, which also
mentions किल्बिषम् as a variant.

मेतद्गौडोपलालितम् ।

प्रस्थानं प्राक्प्रणीतं तु सारमन्यस्य वर्त्मनः ॥ ९२ ॥

अन्यधर्मस्ततोन्यत्र

३कैरिति शेषः । अत्राह भोजराजः (i. 144)—

लौकिकार्थमतिक्रम्य प्रस्थानं यत्र वर्ण्यते ।
तदत्युक्तिरिति प्रोक्तं गौडानां मनसो मुदे ॥ इति ।

६एतत् अत्युक्तिवर्णनम् गौडोपलालितम् गौडैः कान्तिगुणत्वेन अङ्गीकृतम् । प्राक्प्रणीतम्—कान्तं सर्वजगत्कान्तं लौकिकार्थानतिक्रमात् इत्यादिना पूर्वं सोदाहरणं प्रपञ्चितं प्रस्थानम् मार्गः सरणिरिति यावत् । अन्यस्य ९वर्त्मनः वैदर्भमार्गस्य सारम् हृद्यम् । एवं गौडवैदर्भयोः कान्तिगुणविषये नैकमत्यमिति भावः ॥ ९२ ॥

उद्देशवाक्यस्थमन्तिमं धर्मं समाधिं लक्षयति—अन्यधर्म इति । लोकसीमानुरोधिना लोकव्यवहारपरिपालकेन कविना अन्यधर्मः अन्यस्या-३प्रस्तुतस्य धर्मो गुणक्रियारूपः ततः तस्मादप्रस्तुतात् अन्यत्र प्रस्तुते यत्र यस्मिन् वाक्यार्थे सम्यगाधीयते साध्यवसानलक्षणया उपचर्यते स वाक्यार्थः समाधिः समाधिगुणविशिष्टः स्मृतः पूर्वाचार्यैः कथितः । ६सम्यगाधीयते उपचर्यते स समाधिः इति अन्वर्थकी संज्ञा । उपचारश्चात्र आहार्याभेदप्रतीतिरूपः । स एव हि लक्षणायाः प्रयोजनभूतः । यतो लक्षणाजन्यसादृश्यप्रतीतेरनन्तरमेव तन्मूलव्यञ्जनया तस्य प्रतीतिसंभवात् । ९तदुक्तं प्रकाशकृता गौणलक्षणाप्रस्तावे (P. 59)—भेदेपि तादृप्यप्रतीतिः सर्वथैवाभेदावगमश्च प्रयोजनम् इति । लक्षणा चात्र साध्यवसानरूपा । सा च विषयस्यानुपादाने एव संभवति । तेन च विषयोपादाने सारोपगौण्यां न १२समाधेः संभवः । इत्थं च प्रस्तुतस्य धर्मं निगीर्य तत्र सदृशतयाऽप्रस्तुतधर्मस्य तादात्म्याध्यवसानं समाधिरिति लक्षणम् इति प्रेमचन्द्रशर्माणः । धर्म इत्यनेन धर्मिणः समारोपे नायं गुणः । तत्रातिशयोक्ति-

i. 92—उपपादितम् for उपलालितम् D, with marginal emendation into उपलालितम्.

लोकसीमानुरोधिना ।

१५रलंकार एव । यथा—

लतामूले लीनो हरिणपरिहीनो हिमकरः
स्फुरत्तारकारा गलति जलधारा कुवलयात् ।
धुनीते बन्धूकं तिलकुसुमजन्मापि पवनो
बहिर्द्वारे पुण्यं परिणमति कस्यापि कृतिनः ॥ इति ।

अत्र मुखादौ धर्मिणि धर्मिणश्चन्द्रादेरध्यवसानादतिशयोक्तिरलंकारः ।
२१लोकसीमानुरोधिना इत्यनेन स्वेच्छया लोकसीमातिक्रमेण अन्यधर्मारोपश्चेत् समाधिर्न । यथा बृंहन्ति मशका यत्र तत्र निद्रा सुदुर्लभा । इति ।
अत्र बृंहितं करिगर्जितम् इति कोशात् करिधर्मस्य बृंहितस्य मशकरुतेध्यव-
२४सानं लोकविरुद्धम् । यथेति पदस्य उत्तरश्लोकस्थेन उदाहरणवाक्येनान्वयः । अयमर्थगुणः अर्थे अर्थान्तरारोपात् । वामनादिभिस्तु आरोहावरोहक्रमरूपः शब्दगुणः समाधिरुक्तः स चानुपद एव स्फुटीक्रियते ॥ अथान्य-
२७साहित्यप्रबन्धेषु समाधेर्लक्षणोदाहरणानि । तत्र भरतः (xvi. 97)—

अभियुक्तैर्विशेषस्तु योर्थस्यैवोपलभ्यते ।
तेन चार्थेन संपन्नः समाधिः परिकीर्त्यते ॥ इति ।

३०अर्थस्य गुणान्तरसमाधानात् समाधिरिति अस्य व्याख्यां विधायोदाहरति हेमचन्द्रः (P. 197)—

परिणतशरकाण्डच्छायमच्छाच्छया यत्
किसलयितमिवासीच्चारुलावण्यलक्ष्म्या ।
तदनुदिवसमस्यास्तोयविच्छेदसीद-
न्नवकुवलयदामश्यामलं जातमङ्गम् ॥ इति ।

३६अयमतिशयोक्तिविशेष इति वामनीयाः । तथा च सूत्रयति वामनः (iii.2. 6)—अर्थदृष्टिः समाधिः । अर्थो द्विविधः अयोनिरन्यच्छा-
३८यायोनिश्च । तत्राद्यो यथा—

आश्वपेहि मम सीधुभाजनाद्यावदग्रदशनैर्न दश्यसे ।
चन्द्र मद्दशनमण्डलाङ्कितः खं न यास्यसि हि रोहिणीभयात् ॥ इति ।

---

i. 93—सीमानुवर्तिना for सीमानुरोधिना D.

सम्यगाधीयते यत्र

४१द्वितीयो यथा—

मा भैः शशाङ्क मम सीधुनि नास्ति राहुः
खे रोहिणी वसति कातर किं बिभेषि ।
प्रायो विदग्धवनितानवसंगमेषु
पुंसां मनः प्रचलतीति किमत्र चित्रम् ॥ इति ।

४६अत्र गातिस्थाघुपाभूभीभ्यः (II. vi. 77) इति पाठं स्वीकृत्य भैः इति लुङो रूपं ज्ञेयम् । भोजराजः—समाधिः सोन्यधर्माणां यदन्यत्राधिरो-
४८पणम् । इति लक्षणं विधायोदाहरति (i. 72)—

प्रतीच्छत्याशोकीं किसलयपरावृत्तिमधरः
कपोलः पाण्डुत्वादवतरति तालीपरिणतिम् ।
परिम्लानप्रायामनुवदति दृष्टिः कमलिनी-
मितीयं माधुर्यं स्पृशति च तनुत्वं च भजते ॥ इति ।

अत्र प्रतीच्छति-अवतरति-अनुवदति-इत्यादिचेतनक्रियाधर्माणां अचेतने-
५४ष्वधरादिषु उपचारेणाध्यारोपणात् समाधिः । वाग्भटोपि अन्यस्य धर्मो यत्रान्यत्रारोप्यते स समाधिरित्याह । उदाहरति च (P. 30)—

रिपुषु सहजतेजःपुञ्जलीलायितैस्तै-
रजनि जनितकम्पस्तत्सुतो भूमिभर्ता ।
प्रतिनृपतिवधूनां पल्लविन्यश्रुपुरै-
रधिवियदधिरूढा कीर्तिवल्लिर्यदीया ॥ इति ।

६०जगन्नाथोपि (P. 62)—अवर्णितपूर्वोयमर्थः पूर्ववर्णितच्छायो वेति कवेरालोचनं समाधिः इति लक्षणं विधाय अवर्णितपूर्वमुदाहरति । तन-
यमैनाकगवेषणलम्बीकृतजलधिजठरप्रविष्टहिमगिरिभुजायमानाया भग-
६३वत्या भागीरथ्याः सखी इति । यमुनावर्णनमेतत् । इमं समाधिगुणं तु कविगतत्वेन काव्यमात्रस्य कारणं मत्वा तस्य गुणत्वमग्रे निराकृतं तेनैव (P. 63) ॥ अर्थगुणीभूतस्य समाधेरयं विस्तारः । शब्दगुणीभूतस्तु
६६वामनेन—आरोहावरोहक्रमः समाधिः (iii. 1. 12) इति लक्षयित्वा

i. 93—यत् तु for यत्र Pn.

स समाधिः स्मृतो यथा ॥ ९३ ॥

कुमुदानि निमीलन्ति कमलान्युन्मिषन्ति च ।

तत्रारोहपूर्वकोवरोहो यथा—निरानन्दः कौन्दे मधुनि परिभुक्तोज्झित-
रसे । अवरोहपूर्वकस्त्वारोहो यथा—नराः शीलभ्रष्टा व्यसन इव म-
६९ज्जन्ति तरवः । इति उदाहृतः । उदाहरति चेमं हेमचन्द्रः(P. 198)—

शृङ्गोत्खातभुवः कृतान्तमहिषादत्रस्त उच्चैःश्रवाः
श्रुत्वैरावणकण्ठगर्जितमयं क्रुद्धोम्बिकाकेसरी ।
संगीतागतकम्बलाश्वतरयोः प्रेक्षागृहद्वारि च
प्रेक्ष्य स्कन्दशिखण्डिनं चकितयोः कस्मान्मुखं म्लायति ॥ इत्यादि ।

प्रकाशकारा अपि आरोहावरोहक्रमरूपं समाधिमङ्गीकृत्य तस्यौजस्य-
७५न्तर्भावं कुर्वन्ति (viii. 72) । एवमेव दर्पणकाराः । जगन्नाथोपि
बन्धगाढत्वशिथिलत्वयोः क्रमेणावस्थापनं समाधिः इति शब्दगुणस-
७७माधेर्लक्षणं विधायोदाहरति—

स्वर्गनिर्गतनिरर्गलगङ्गातुङ्गभङ्गुरतरङ्गसखानाम् ।
केवलामृतमुचां वचनानां यस्य लास्यगृहमास्यसरोजम् ॥ इति ।

अस्य च ओजस्येवान्तर्भावं कुरुते । अन्ये तु—आचार्यदण्डिनोक्ता समा-
८१धिरुपचरितवृत्तिस्वरूपा उपचरितवृत्तिर्गुणश्चेत् योगवृत्त्या किमपरा-
द्धम् इति तां नैवाङ्गीकुर्वन्ति । वामनोक्तामर्थगुणसमाधिमयोनिरन्यच्छा-
यायोनिस्वरूपामपि न गणयन्ति सर्वस्यापि कविकाव्यप्रपञ्चस्य अयोनि-
८४रन्यच्छायायोनिस्वरूपत्वात् इत्यलं पल्लवितेन ॥ ९३ ॥

समाधिमुदाहरति—कुमुदानीति । कुमुदानि निमीलन्ति संकुच-
न्ति । कमलानि उन्मिषन्ति विकसन्ति । अत्र निमीलोन्मेषौ
३नेत्रस्य धर्मौ कुमुदकमलयोः संकोचविकासतादात्म्येन अध्यव-
सितौ । सादृश्यातिशयमहिम्नेदमध्यवसानं लोकसिद्धम् । सादृश्याति-
शयादेवानयोरेकशब्दप्रयोगप्रतिपाद्यत्वम् । यथा चक्षुरुन्मिषति कम-
६लमुन्मिषति तथा चक्षुर्निमीलति कमलं निमीलति इत्यादि । इति एवं-
प्रकारेण नेत्रक्रियाध्यासात् नेत्रक्रिया निमीलनोन्मीलनरूपा तया सह

---

i. 93—मतः for स्मृतः N.

इति नेत्रक्रियाध्यासाल्लब्धा तद्वाचिनी श्रुतिः ॥ ९४ ॥
निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम् ।
अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते ॥ ९५ ॥
पद्मान्यर्काशुनिष्ठ्यूताः पीत्वा पावकविप्रुषः ।

अध्यासात् तादात्म्यारोपात् । कुमुदकमलधर्माभ्यां संकोचविकासाभ्यां तद्वाचिनी तयोर्निमीलनोन्मेषयोर्वाचिनी प्रतिपादिका श्रुतिः निमीलन्ती-त्यादयः शब्दाः लब्धा अधिगताः । पदार्थानामेकत्वे एकशब्दप्रतिपा-द्यत्वं समुचितं यथा घटः घटः इति विभिन्नत्वे तु भिन्नशब्दप्रतिपाद्यत्वं यथा घटः पटः इति ॥ ९४ ॥

कानिचित् पदानि काव्ये गौणवृत्त्या एव शोभामावहन्ति न तु मुख्य-वृत्त्या । तादृशपदप्रयोगे चायमेव गुणः इति तानि पदानि दर्शयति—निष्ठ्यूतेति । निष्ठ्यूतम् उद्गीर्णम् वान्तम् इत्यादिपदम् गौणवृत्तिव्य-पाश्रयम् गौणवृत्तिः गौणीलक्षणावृत्तिः सैव व्यपाश्रयः विशिष्टाश्रयो यस्य तत् गौणलक्षणया मुख्यार्थसदृशेर्थे प्रयुक्तमित्यर्थः । अतिसुन्द-रम् सहृदयहारित्वेन मनोहरम् । तदेव समाधिगुणवदिति भावः । ननु वान्तादिपदमतिसुन्दरमित्यनेन अयं समाधिगुणः शब्दस्य दर्शितो भवति स तु पुनः अर्थगुणः अर्थस्यैवारोपादिति चेत् अत्र शब्दगतत्वं परंपर-येति बोध्यम् । अन्यत्र मुख्यार्थे अभिधावृत्त्या प्रयुक्तं निष्ठ्यूतादिपदं ग्राम्यकक्षाम् ग्राम्यतादोषकालुष्यम् विगाहते लभते । अभिधावृत्त्या प्रयुक्तं निष्ठ्यूतादिपदं सदोषमपि गौणवृत्त्या गुणवद्भवति । तत्र हेतुस्तु लक्षणा-फलभूततादात्म्यारोप इति विभावनीयम् ॥ ९५ ॥

उक्तार्थमुदाहरति—पद्मानीति । पद्मानि कमलानि अर्काशुनिष्ठ्यूताः अर्कस्य सूर्यस्य अंशवः किरणानि तैः निष्ठ्यूताः बहिः क्षिप्ताः पावक-विप्रुषः वह्निस्फुलिङ्गान् पीत्वा । उद्गीर्णा बहिस्त्यक्ता अरुणरेणवः रक्त-परागाः यैस्तैः मुखैः । उद्गीर्णरेणुत्वं पावकस्फुलिङ्गवमनोत्प्रेक्षायां कार-णम् । भूयः पुनः पुनः वमन्तीव उद्गिरन्तीव । संध्याकालीनपवनान्दो-

i. 95—गौड for गौण V;—अन्यत् तु for अन्यत्र Rn.
i. 96—विद्विषः for विप्रुषः D (emended into विप्रुषः).

भूयो वमन्तीव मुखैरुद्गीर्णारुणरेणुभिः ॥ ९६ ॥
इति हृद्यमहृद्यं तु निष्ठीवति वधूरिति ।

६लनस्खलत्परागपद्मवर्णनमिदम् । अत्र निष्ठ्यूतोद्गीर्णशब्दौ दैहिककफ-
पित्तलालादिविशेषनिःक्षेपवाचकौ अपि सामान्यनिक्षेपार्थे लक्षणया प्रयु-
क्तौ सहृदयमनोहरतां प्राप्तौ इति समाधिगुणः । लक्षणया सामान्य-
९शब्दस्य विशेषार्थपरत्ववत् विशेषार्थकस्य पदस्यापि सामान्यार्थपरत्वं
सर्वसंमतमेव । सा च लक्षणात्र शक्यार्थलक्ष्यार्थयोः सादृश्याद् गौणीति
ज्ञेयम् । वमन्तीवेत्यत्र उत्प्रेक्षैव न लक्षणा इवशब्दवैयर्थ्यापत्तेः । तथा च
१२पूर्वश्लोके गौणवृत्तिपदं संभावनाया अपि उपलक्षकम् । आहार्यारोपवत्
संभावनायामपि बाधोदयस्यार्किंचित्करत्वेनान्वयबोधाप्रतिबन्धात् । लक्ष-
णाफलीभूतताद्रूप्यप्रतीतेरिव संभावनाया अपि चमत्कारजनकत्वेन गुणत्वं
१५युज्यते इति प्रेमचन्द्रशर्माणः । एवं च

आघ्राय निरवशेषं विरहिवधूनां मृदूनि मांसानि ।
करकामिषेण मन्ये निष्ठीवति नीरदोस्थीनि ॥

१८इत्यादिसापह्नवोत्प्रेक्षायां निष्ठीवतीत्यादिपदेषु न लक्षणा ॥ ९६ ॥

निष्ठीवनादिशब्दानां गौणवृत्त्या प्रयोगं प्रशस्य मुख्यवृत्त्या प्रयोगं
सोदाहरणं दूषयति—इतीति । इति पूर्वं दर्शितं गौणवृत्त्या प्रयुक्तं
३निष्ठ्यूतादिपदं हृद्यम् गौणार्थप्रतिपादकत्वेन समाधिगुणवत्त्वात् सहृदयम-
नोहारि । अहृद्यं तु ग्राम्यतादोषेण रसिकमनोद्वेजकं तु । वधूः उह्यते
पितृगेहाद्भर्तृगेहं सा वधूः नवोढा स्त्री । निष्ठीवति खाट् इति कृत्वा कफं
६निक्षिपति इति । अत्र मुख्यार्थे प्रयुक्तेन ष्ठीविना जुगुप्सा प्रतीयते । वधू-
शब्दप्रयोगश्च वध्वाः शृङ्गारस्य आलम्बनविभावत्वेनाङ्गत्वात् शृङ्गारे
बीभत्साङ्गभूतं कफनिक्षेपवर्णनमत्यन्तमनुचितमिति सविशेषं ग्राम्यतां
९दर्शयति । एवं अन्यधर्मस्यान्यत्रारोपरूपं समाधिं प्रदर्श्य अन्यधर्मस्त-
तोन्यत्र इति लक्षणवाक्ये सूत्रे लिङ्गवचनमतन्त्रम् इतिन्यायेन एक-
वचनं द्विवचनबहुवचनोपलक्षकमिति विशदयति—युगपदिति । नैक-
२धर्माणाम् अन्यदीयगुणक्रियादिरूपानेकधर्माणां युगपद् एकस्मिन् समये

युगपन्नैकधर्माणामध्यासश्च मतो यथा ॥ ९७ ॥
गुरुगर्भभरक्रान्ताः स्तनन्त्यो मेघपङ्क्तयः।
अचलाधित्यकोत्सङ्गमिमाः समधिशेरते ॥ ९८ ॥
उत्सङ्गशयनं सख्याः स्तननं गौरवं क्रमः ।

एव अध्यासः निगरणेनाध्यवसानम् । मतः समाधिगुणत्वेन प्राचीनैरनुमतः । तथा च बहूनामप्यन्यधर्माणां युगपदन्यत्र समारोपः समाधिरिति निष्कर्षः ॥ ९७ ॥

बहुधर्मारोपरूपसमाधिमुदाहरति—गुरुगर्भेति । गुर्व्यः एकत्र जलेनान्यत्र गर्भविस्तारेण स्थूलाः तथा गर्भभरेण गर्भस्य अन्तर्गतजलस्य भ्रूणस्य च भरेण क्लान्ताः मन्दाः इव । विशेषणोभयपदकर्मधारयः । अथवा गुरुरिति गर्भस्य विशेषणम् । स्तनन्त्यः गर्जन्त्यः । अन्यत्र क्लान्तिसूचकं शब्दं कुर्वन्त्यः । एतादृशः इमा मेघपङ्क्तयः मेघावलयः । अचलाधित्यकोत्सङ्गम् अचलस्य पर्वतस्य अधित्यका ऊर्ध्वप्रदेशः तस्योत्सङ्गम् मध्यम् । अन्यत्र अधित्यकेति स्त्रीलिङ्गसाम्यात् सखी ग्राह्या तस्या उत्सङ्गः क्रोडः तस्मिन् । समधिशेरते समाधीयन्ते । अत्र मेघपङ्क्तिषु तत्तद्धर्मनिगरणेन बहूनां गुर्वादीनां गर्भिणीधर्माणां युगपदध्यासात् समाधिगुणः ॥ ९८ ॥

पूर्वश्लोकस्थानां बहूनां गर्भिणीधर्माणामध्यवसानं विशदयति—उत्सङ्गेति । अत्र पूर्वश्लोके उत्सङ्गशयनं स्तननं गौरवं क्रमः इति इमे बहवः गर्भिणीधर्माः दर्शिताः आरोपेणेति भावः । एतेषां गर्भिणीधर्मत्वमाह वाग्भटः (शारीरस्थान, i. 50-51)—

क्षामता गरिमा कुक्षौ मूर्च्छा छर्दिररोचकम् ।
जृम्भाप्रसेकः । इत्यादि ।

ननु स्तनितं मेघगर्जितम् इति कोशात् स्तनन्तीशब्देन मेघगर्जनमेव लभ्यते तत् कथं स्तननस्य गर्भिणीधर्मत्वमिति चेत् सत्यम् । स्तनितभणितादि

i. 97—स्मृतो for मतो N, R.
i. 98—भराक्रान्ताः for भरक्लान्ताः D; भराक्लान्ताः N, Rn.
i. 99—सख्यां for सख्याः N.

इतीह गर्भिणीधर्मा बहवोन्यत्र दर्शिताः ॥ ९९ ॥

तदेतत् काव्यसर्वस्वं समाधिर्नाम यो गुणः ।

[9]सुरते मेघादिषु गर्जितप्रमुखम् । इति कोशान्तरेणास्य स्तनितशब्दस्य सुरतशब्दत्वाभिधानान्न केवलं मेघगर्जिते एव शक्तिः । तथा—आर्तस्तनितसंनादे रुधिराम्बुह्रदाकुले । इति हरिवंशस्थप्रयोगेण (99. 48) [12]तस्य सामान्यध्वनिपरत्वमपि ज्ञेयम् । एवं सामान्यध्वनिपरत्वेपि स्तननशब्दस्य गर्भिणीशब्दपरत्वं कथमिति चेत् गर्भिण्याः अन्येषामसाधारणधर्माणामन्तःपतितत्वादस्याप्यत्र गर्भिणीशब्दविशेषवाचकत्वं ज्ञे[15]यम्* ॥ ९९ ॥

समाधिं प्रशंसन्नुपसंहरति—तदेतदिति । तत् तस्मादुक्तप्रकारेण काव्यस्य चारुत्वातिशयाधानात् समाधिर्नाम यो गुणः एतत् काव्यस्य सर्वस्वम् [3]सारभूतं हृद्यम् अवश्यमपेक्षणीयमित्यर्थः । समग्रः गौडवैदर्भः कविसार्थः कविसंघः । तम् तथाभूतमेनं समाधिगुणम् उपजीवति एतत्परिशीलनेन काव्यं विरचयति । एतेषु दशसु गुणेषु मध्ये केचित् तत्तद्दोषाभावरूप[6]तया केचिदलंकृतिरूपतया नव्यैः प्रकाशकारादिभिरनादृताः केवलं माधुर्यौजःप्रसादाख्यास्त्रय एव गुणाः स्वीकृताः । तथैव वामनभोजादिभिः शब्दार्थरूपेण एते एव द्विविधाः स्थापिताः अन्यैश्च तत्तद्गु[9]णानां लक्षणोदाहरणानि च विभिन्नानि विहितानि । तदेतत् सर्वं तत्त-

i. 99—इतीमे for इतीह P, B, R; इहेमे Rn;—बहवोप्यत्र for बहवोन्यत्र P, B, R;—बहवोत्र प्रदर्शिताः for बहवोन्यत्र दर्शिताः D.

* सामान्यार्थानां शब्दानां कविसंप्रदायतो विशिष्टार्थपरत्वं भवति यथा—आरवः पटहेषु कटत्कारः भङ्गेषु कूजितं विहगादिषु केकारवः कलापिषु [3]क्वणितं वीणादिषु गुञ्जाकारः भृङ्गेषु घमघमाकारः घर्घरेषु घूत्कारः घूकेषु घोषः नदीवीचिषु चटत्कारः अग्निस्फुलिङ्गेषु झङ्कारः किङ्किणीषु टङ्कारः मौर्वीषु ढेल्कृतं वृषभेषु ध्वनितं मृदङ्गादिषु नादः सिंहेषु फूत्कारः सर्पेषु [6]बूत्कारः कपिषु बृंहितं वारणेषु भणितं सुरतादिषु भाङ्कारः भेरिषु भात्कारः झल्लरीषु रणितं वलयादिषु रवः मण्डूकेषु शिञ्जितं नूपुरादिषु सीत्कारः कामिनीषु सूत्कारः सायकेषु स्तनितं मेघसमुद्रादिषु ह्रेषितं हयेषु इत्याद्यूहनीयम् ।

कविसार्थः समग्रोपि तमेकमुपजीवति ॥ १०० ॥
इति मार्गद्वयं भिन्नं तत्स्वरूपनिरूपणात् ।
तद्भेदास्तु न शक्यन्ते वक्तुं प्रतिकवि स्थिताः ॥ १०१ ॥
इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत् ।
तथापि न तदाख्यातुं सरस्वत्यापि शक्यते ॥ १०२ ॥

द्विगुणनिरूपणप्रसङ्गे अस्माभिर्विशदीकृतमेव । आचार्यदण्डिना तु भरत-
११मुनिमतमेव प्रायः स्वीकृतमिति सुधीभिर्विचारणीयम् ॥ १०० ॥

तत्र वैदर्भगौडीयौ वर्ण्येते प्रस्फुटान्तरौ (i. 40) इति पूर्वं प्रतिज्ञातं गौडवैदर्भमार्गवर्णनमुपसंहरति—इतीति । इति एतावत्पर्यन्तं
३कथितेन प्रकारेण तयोः गौडवैदर्भयोः स्वरूपम् असाधारणधर्मः तस्य निरूपणात्—वैदर्भमार्गस्य प्राणा दशगुणाः स्मृताः । एषां विपर्ययः प्रायो लक्ष्यते गौडवर्त्मनि । इत्यनेन (i. 42) विभिन्नधर्मत्वेन प्रति-
६पादनात् । मार्गद्वयम् गौडवैदर्भमार्गद्वितयम् । भिन्नम् अत्यन्तविसदृशम् वर्तते इति शेषः । तद्भेदाः गौडवैदर्भभेदाः आवन्तिकीलाटीयामागध्यादयः प्रतिकवि स्थिताः तत्तद्देशीयैः कविभिराहृताः । वक्तुं न
९शक्यन्ते । एषां मिश्रणप्रकारः प्रागुपवर्णित एवास्माभिः ४२—४३ पत्रयोः । केचित्तु तद्भेदशब्देन रीतिभेदं पाञ्चाल्यादिरूपं स्वतन्त्रमेव स्वीकुर्वन्ति । तेपि तत्तद्देशकविभिः कल्पितत्वादनन्ताः । अतस्ते परि-
१२गणितुं नैव शक्यन्ते इति भावः ॥ १०१ ॥

समग्रभेदस्य निरूपणाशक्यत्वं दृष्टान्तेन विशदयति—इक्षुक्षीरेति । इक्षुः पुण्ड्रकादिः क्षीरं पयः गुडः इक्षुविकारः आदिशब्देन शर्करा-
३खर्जूरादयो ग्राह्याः । तेषां माधुर्यस्य मधुरतायाः अन्तरं रुचिभेदः महत् महानस्ति । तथापि विस्पष्टभेदेपि तत् आख्यातुं तत्तदुचितज्ञापकसंज्ञाविशेषेण कथयितुं सरस्वत्यापि वागधिष्ठात्र्या देवतयापि न शक्यते ।
६माधुर्यस्य विविधभेदवत् काव्यमार्गाणां विविधभेदस्य निर्वचनमशक्यमिति भावः । अतः प्रधानौ एव गौडवैदर्भभेदौ दर्शितौ इत्यभिप्रायः ॥ १०२ ॥

---

i. 100—तमेनं for तमेकं M, N, R; तमेवं D, marginally emended into तमेकं;—अनुगच्छति for उपजीवति all except V.

नैसर्गिकी च प्रतिभा श्रुतं च बहुनिर्मलम् ।

एतावता काव्यस्वरूपमुक्त्वा इदानीं तत्कारणमाह—नैसर्गिकीति । नैसर्गिकी स्वाभाविकी पूर्वजन्मसंस्कारसंपन्ना प्रतिभा नवनवोल्लेखशालिनी प्रज्ञा । यदुक्तम् (रुद्रट i. 15)—

मनसि सदा सुसमाधिनि विस्फुरणमनेकधाभिधेयस्य ।
अक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्तिः ॥ इति ।

तथैव बहु विविधं पदवाक्यप्रमाणसाहित्यच्छन्दोलंकारश्रुतिस्मृतिपुराणेतिहासागमनाट्याभिधानकोशकामार्थयोगादिरूपम् वाग्भटप्रभृतिभिः परिगणितम् निर्मलम् संशयादिदोषरहितम् एतादृशं श्रुतम् शास्त्रम् विविधशास्त्रनैपुण्यमित्यर्थः । एतल्लोकव्यवहारनैपुण्यस्यापि उपलक्षणम् । तदुक्तं प्रकाशकारेण (i. 3)—शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् इति । तथा अमन्दः महान् अभियोगः अभ्यासः काव्यविच्छिक्षया पुनः पुनः प्रवृत्तिरित्यर्थः । यदाहुः—अभ्यासो हि कर्मसु कौशलमावहति । न हि सकृन्निपतितमात्रेणोदबिन्दुरपि ग्रावणि निम्नतामादधतीति [हेम० P.8] । अभ्यसनप्रकारस्तु हेमचन्द्राचार्यैः महता प्रपञ्चेन वर्णितः स तद्ग्रन्थादेव ज्ञातव्यः । अभ्यसनसौकर्याय विशिष्टदेशकालादिसाचिव्यमप्यपेक्ष्यत इति वामनः (i. 3. 18–20) । एतत् त्रितयं अस्याः उक्तलक्षणायाः काव्यसंपदः कारणम् । काव्यप्रणयनावगमयोः कारणमित्यर्थः उभयोरपि एतत्त्रितयजन्यत्वात् । प्रतिभाशून्येनापि पुरुषेण महता कालेन एकद्विश्लोककरणेति-व्याप्तिपरिहाराय संपदिति । तदुक्तं काव्यमीमांसायाम् (P. 54)—

मुक्तके कवयोनन्ताः संघाते कवयः शतम् ।
महाप्रबन्धे तु कविरेको द्वौ दुर्लभास्त्रयः ॥ इति ।

अत्र कारणमित्येकवचनेन कारणता व्यासक्ता न तु प्रत्येकं पर्याप्ता । तदुक्तं प्रकाशकृता (P.16)—शक्तिर्व्युत्पत्तिः पौनःपुन्येन प्रवृत्तिरिति त्रयः समुदिता न तु व्यस्ताः तस्य काव्यस्य निर्माणे समुल्लासे च हेतुर्न तु हेतवः इति । अन्ये हेमचन्द्रवाग्भटादयस्तु प्रतिभैव

अमन्दश्चाभियोगोस्याः कारणं काव्यसंपदः॥ १०३॥

न विद्यते यद्यपि पूर्ववासना-
गुणानुबन्धि प्रतिभानमद्भुतम् ।

२७हेतुः शास्त्रव्युत्पत्त्यभ्यासौ तु प्रतिभायाः संस्कारकौ । तथा चोक्तम् (वाग्भट P. 2)—व्युत्पत्त्यभ्याससंस्कृता प्रतिभास्य हेतुः इति । काव्य-
२९मीमांसायां तु (P. 49)—

स्वास्थ्यं प्रतिभाभ्यासो भक्तिर्विद्वत्कथा बहुश्रुतता ।
स्मृतिदार्ढ्यमनिर्वेदश्च मातरोष्टौ कवित्वस्य ॥

इत्यष्टौ कारणानि समाख्यातानि । अत्र कानिचित् साधारणानि कानि-
३३चिदसाधारणानि कारणानीति ज्ञेयम् । आचार्यदण्डिना परिगणितेषु प्रतिभाश्रुताभियोगेषु प्रतिभा द्विविधा सहजा उत्पाद्या च । यदाह
३५रुद्रटः (i. 16)—

प्रतिभेत्यपरैरुदिता सहजोत्पाद्या च सा द्विधा भवति ।
पुंसा सह जातत्वादनयोस्तु ज्यायसी सहजा ॥ इति ।

तत्राद्या जन्मसिद्धा द्वितीया शास्त्राद्यभ्यासेन मणिमन्त्रौषधिना च संप-
३९द्यते इत्याहुः । उभयरूपा चेयं घटं प्रति चक्रदण्डाविव काव्यं प्रति परस्परसहकार्यतया कारणमिति केचित् । अपरे पुनः अनयोः प्रतिभयोर्मध्ये एकतरा कवित्वसंपादनाय प्रभवति अपरा तदुत्कर्षायैव इति ।
४२अस्मिन् व्याख्याने न विद्यते इत्याद्यग्रिमश्लोकस्य अविरोधः संपद्यते इति विमर्शनीयम् ॥ १०३ ॥

यद्यपि सहजा प्रतिभा पुरुषप्रयत्नेन लब्धुमशक्या तथापि तदभावेपि कवित्वं न सर्वथा दुःसंपाद्यमिति प्रतिपादयति—न विद्यते इति ।
३अद्भुतम् अलौकिककाव्यसंपादनेनाश्चर्यावहम् । पूर्ववासनागुणानुबन्धि प्राक्तनसंस्कारगुणसंबद्धम् सहजमिति भावः । प्रतिभानम् प्रतिभाशक्तिः ।

---

i. 103—स्यात् for अस्याः D (emended into अस्याः in the margin);—पद्धतेः for संपदः D (as emended in the margin).

i. 104—श्रुतानुबन्धि for गुणानुबन्धि M.

15656

अथ द्वितीयः परिच्छेदः

काव्यशोभाकरान् धर्मा-

प्रथमपरिच्छेदे वैदर्भगौडमार्गोपलक्षितं धर्मिभूतं काव्यशरीरं प्रदर्श्य इदानीं तद्धर्मानलंकारान् दिदर्शयिषुः अलंकारसामान्यलक्षणमाह—
३काव्यशोभाकरानिति । काव्यस्य इष्टार्थव्यवच्छिन्ना पदावलिः इत्युक्त-स्वरूपस्य शोभा मनोहरता तस्याः कर्तारः तत्संपादकाः तान् । धर्मान् अनुप्रासोपमादीन् । अलंकारान् प्रचक्षते अलंकारनाम्ना व्यवहरन्ति
६प्राञ्चः साहित्यकोविदा इति शेषः । यथा लावण्यमनोहरस्य शरीरस्य हारादयो अलंकाराः शोभातिशयं जनयन्ति तथा श्लेषप्रसादादिगुणोप-स्कृतस्य इष्टार्थव्यवच्छिन्नपदावलिरूपस्य रमणीयार्थप्रतिपादकस्य काव्य-
९स्य अनुप्रासोपमादयोलंकाराः शोभां परिवर्धयन्ति । अनेन एते अलं-काराः शब्दार्थगताः इति आचार्यदण्डिनो मतमवगन्तव्यम् । भरतेनापि (xvi. 41) —काव्यस्यैते त्वलंकाराश्चत्वारः परिकीर्तिताः । इत्यनेन ते
१२काव्यधर्मत्वेनैव स्वीकृताः सन्ति । भामहोपि—इति वाचामलंकाराः पञ्चैवान्यैरुदाहृताः । इत्युपक्रमे (iii. 4)—गिरामलंकारविधिः सवि-स्तरः स्वयं विनिश्चित्य धिया मयोदितः । इति तृतीयपरिच्छेदोपसंहारे
१५कथयन् (iii. 57) शब्दार्थगतत्वमेव तेषां दर्शयति । वामनादयोपि इमामेव पद्धतिमनुसरन्ति । तदुक्तं वामनेन (iii. 1. 1–2)—काव्यशो-भायाः कर्तारो धर्मा गुणाः । तदतिशयहेतवस्त्वलंकाराः इति । अत्र
१८च प्रमाणत्वेन प्राचीनश्लोकावपि अवतारयति—

युवतेरिव रूपमङ्ग काव्यं स्वदते शुद्धगुणं तदप्यतीव ।
विहितप्रणयं निरन्तराभिः सदलंकारविकल्पकल्पनाभिः ॥

यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवनवन्ध्यमङ्गनायाः ।
अपि जनदयितानि दुर्भगत्वं नियतमलंकरणानि संश्रयन्ते ॥

इति । अत्र पूर्वश्लोकेन अलंकाराणां सगुणकाव्यस्य शोभाकरत्वं दर्शितम्
२४द्वितीयेन तु गुणानां अलंकाराणां वैयर्थ्यं प्रोक्तम् । तत्र काव्यशोभासंपा-दने गुणा नित्याः अलंकारास्त्वनित्याः इति अग्निमेण (iii.1.3)पूर्वे नित्याः

नलंकारान् प्रचक्षते ।

इति सूत्रेण अभिहितम् । अयमेव च गुणालंकारयोः प्रभेदः यद्गुणा नित्याः
२७तैर्विनाकाव्यशोभानुपपत्तेः। आचार्यदण्डिना हि गुणा वैदर्भमार्गस्य प्राणत्वेन
कथिताः । वामनेन ते नित्या इत्यनेन स एवार्थः पर्यायेण अभिहितः ।
रीतिरात्मा काव्यस्य इति काव्ये रीतेः प्राधान्यस्वीकारेपि तस्या गुणसमु-
३०दायाभिन्नस्वरूपत्वात् गुणाधीनत्वं स्पष्टमेव । एवं च प्राणा दशगुणाः
स्मृताः इति आचार्यदण्डिनः सिद्धान्तस्य रीतिरात्मा काव्यस्य इति सूत्र-
यता वामनेन भङ्ग्यन्तरेण स्वीकारो दर्शितः । एवं भरतभामहवामनप्र-
३३भृतीनां गुणालंकारविषये ऐकमत्यमेव दृश्यते । प्रकाशकारादयस्त्ववर्वा-
चीनाः माधुर्यौजःप्रसादाख्यान् गुणान् रसस्याङ्गभूतान् अलंकारांश्च
३५शब्दार्थयोरअङ्गभूतान् कल्पयन्ति । तदुक्तं प्रकाशे (viii.66–67)—

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः ॥
उपकुर्वन्ति तं सन्तं येङ्गद्वारेण जातुचित् ।
हारादिवदलंकारास्तेनुप्रासोपमादयः ॥
माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश । इति ।

प्रतिपादितं च माधुर्यौजःप्रसादाख्या रसस्य गुणाः । हारादिवत् वाच्य-
४२वाचकलक्षणाङ्गगताः स्वाश्रयशोभाजननद्वारा अङ्गिनो रसस्य शोभा-
जनका अलंकारा इति । आश्रयभेदाच्च गुणालंकारयोर्भेदः इति ।
ओजस्वी प्रबन्धः मधुरा वर्णाः इत्यादिव्यवहारस्तु आकारोस्य शूरः
४५इतिवत् औपचारिकः ॥ तत्र तावद्विचार्यते । मधुरो रसः इति सामा-
नाधिकरण्यात् अनुभवसिद्धानां रसस्वरूपविशेषकाणां माधुर्यादीनां गुणत्व-
स्वीकारे यदिदं साहित्यग्रन्थकाराणां काव्ये तादृशगुणनिवेशावश्यकत्व-
४८कथनं तत् विफलं स्यात् । रसवत् काव्यमित्येतावतैव लक्षणेन रसनिवेशे
रसस्वरूपविशेषाणां माधुर्यादीनां निवेशस्यापि नियतत्वात् । यतः तन्मते
माधुर्यौजःप्रसादाख्या गुणा रसव्यभिचारिणः न कुत्रचिदुपलभ्यन्ते ।
५१अथ गुणाभिव्यञ्जकशब्दार्थप्रयोगाय लक्षणे गुणग्रहणमिति चेत् तादृश-
व्यञ्जकतायाः एव गुणत्वमुचितम् । सौन्दर्यादेः आत्मोत्कर्षत्ववत् तस्या
एव रसोत्कर्षत्वात् । उत्कर्षकस्यैव गुणत्वात् । सा च व्यञ्जकता श्लेषा-

ते चाद्यापि विकल्प्यन्ते

५४दिधर्मस्वरूपा एव । अतः सिद्धं श्लेषादीनां गुणत्वं शब्दार्थगतत्वं च । तथैव स्वाश्रयशोभाजननद्वारा रसशोभाजननत्वमलंकाराणामित्यपि न विचारक्षमं तेषां वचः । यतो नीरसे सकलालंकारिकैः काव्यतया स्वीकृ-
५७ते संलक्ष्यक्रमव्यङ्ग्यप्रभेदे चित्रे च उपमादीनामनलंकारतापत्तेः । स्वीकृतं हि तत्र तैरुपमादीनामलंकारत्वम् । तथाहि (का.प्र. iv.40)—

वस्तु वालंकृतिर्वेति षड्भेदोसौ व्यनक्ति यत् ।
वस्त्वलंकारमथवा तेनासौ [व्यञ्जकः] द्वादशात्मकः ॥ इति ।

६१तथा—शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम् । इत्यस्य व्याख्याने (i.5) चित्रमिति गुणालंकारयुक्तम् इति । अष्टमोल्लासेपि यत्र तु नास्ति रसः
६३तत्रोक्तिवैचित्र्यमात्रपर्यवसायिनः इत्यादिना प्रबन्धेन तेनैव कथितमस्ति । ननु रसोपकारयोग्यत्वमलंकार इति तल्लक्षणमस्तु । तेन नीरसस्थले नाव्याप्तिः इति चेन्न । योग्यताया निर्वचनस्याशक्यत्वात् तादृशानुगमकधर्मेण
६६लक्षणविधानस्यायुक्तत्वात् । जगन्नाथेनापि गुणानां शब्दार्थरसरचनागतत्वं स्वीकृत्य केवलरसधर्मत्वं खण्डितम् । तद्यथा (P.54f.)—येमी माधुर्यौजःप्रसादाः रसमात्रधर्मतया उक्ताः तेषां रसधर्मत्वे किं मानम् । प्रत्यक्ष-
६९मेवेति चेन्न । दाहादेः कार्यात् अनलगतस्य उष्णस्पर्शस्य यथा भिन्नतयानुभवः तथा द्रुत्यादिचित्तवृत्तिभ्यः रसकार्येभ्यः अन्येषां रसगतगुणानां अननुभवात् । तादृशगुणविशिष्टरसानां द्रुत्यादिकारणत्वात् कारणताव-
७२च्छेदकतया गुणानामनुमानमिति चेत् प्रातिस्विकरूपेणैव रसानां कारणतोपपत्तौ गुणकल्पने गौरवात् । शृङ्गारकरुणशान्तानां माधुर्यत्वेन द्रुतिकारणत्वं प्रातिस्विकरूपेण कारणत्वकल्पनापेक्षया लघुभूतमिति तु न
७५वाच्यम् । परेण मधुरतरादिगुणानां पृथग्द्रुततरादिकार्यतारतम्यप्रयोजकतयाभ्युपगमेन माधुर्यत्वेन कारणताया गडुभूतत्वात् । इत्थं च प्रातिस्विकरूपेणैव कारणत्वे लाघवम् । किं च आत्मनो निर्गुणतया आत्म-
७८रूपरसगुणत्वं माधुर्यादीनामनुपपन्नम् । एवं तदुपाधिरत्यादिगुणवत्त्वमपि । मानाभावात् । पररीत्या गुणे गुणान्तरस्यानौचित्याच्च । अथ शृङ्गारो मधुरः इत्यादिव्यवहारः कथमिति चेत् एवं तर्हि द्रुत्यादिचित्तवृत्तिप्रयो-
८१जकत्वं प्रयोजकतासंबन्धेन द्रुत्यादिकमेव वा माधुर्यमस्तु । व्यवहारस्तु

कस्तान् कात्स्न्र्येन वक्ष्यति ॥ १ ॥

किंतु बीजं विकल्पानां

वाजिगन्धोष्णेतिव्यवहारवत् अक्षतः । प्रयोजकत्वं च अदृष्टादिविलक्षणं शब्दार्थरसरचनागतमेव ग्राह्यम् । अतो न व्यवहारातिप्रसक्तिः । तथा
८४च शब्दार्थयोरपि माधुर्योदेरीदृशस्य सत्त्वादुपचारो नैव कल्प्यः इति तु मादृशाः इति ॥ रहस्यं तु एतदेव यद्गुणानां रसधर्मत्वं न विचारक्षमम् । ते शब्दार्थरसरचनागता एवेति ज्ञेयम् । आचार्यद-
८७ण्डिप्रभृतयः प्राचीनाः रसानां रसवदलंकारत्वेनैव काव्यशोभाकरत्वं मन्यन्ते । तथा च गुणे गुणान्तरस्यानौचित्यान्न माधुर्यादयो गुणा रसानामिति तेषां राद्धान्तः । अस्त्वेषा सूक्ष्मविचारचर्चा प्रकृतमनुसरामः ॥
९०अलंकाराणां एवं काव्यशोभाकरधर्मरूपं सामान्यलक्षणमभिधाय वक्तव्यानां विशिष्टालंकाराणामानन्त्यं विचिन्त्य तद्विवेचने स्वस्यासामर्थ्यं विनयेन प्रकटयति—ते चेति । ते अलंकाराः अद्यापि विकल्प्यन्ते विवि-
९३धकल्पनाभिः नवनवा उद्भाव्यन्ते कविभिरिति शेषः । अतः कः पण्डितः तान् अलंकारान् कात्स्न्र्येन साकल्येन वक्ष्यति निरूपयिष्यति । न कोपि विवेक्तुं प्रभविष्यतीत्यर्थः । वक्ष्यतीति भविष्यत्प्रयोगेण न पूर्वं
९३केनापि निरूपिताः नाधुनापि कश्चिन्निरूपयति न वाग्रे केपि निरूपयेयुः इति साकल्येन कालत्रयेपि ते निरूपयितुमशक्या इति सूचितम् । मेधाविनां कल्पनायाः अविरामात् कल्पनोपजीविनोलंकारस्याप्यविरामः । अत इय-
९९त्तया तेषां निरूपणं दुःशकमिति भावः ॥ १ ॥

अलंकाराणामानन्त्यात् भवता तद्वर्णनं परित्याज्यमिति चेन्न । ते प्राचीनैः बीजरूपेण निरूपिता एव स्फुटतया मया कथ्यन्ते इति निवेद-
३यति—किन्त्विति । विकल्पानां अर्वाचीनैः कल्पितानां अलंकारविशेषाणां पूर्वाचार्यैः भरतादिभिः बीजं सामान्यतः सर्वत्र वर्तमानं मूलं प्रदर्शितम् कथितम् । यथा नवीनैः उद्भावितानां उपमाभेदानां बीजं—
६उपमा नाम सा ज्ञेया गुणाकृतिसमाश्रया । इत्येव केवलं उपमालक्षणं (xvi.42) विदधता भरतेन कथितम् । अग्रे दर्शितास्तु वाक्यार्थोपमा सातिशयोपमा श्लेषोपमा निन्दोपमा अभूतोपमा विपर्ययोपमा संशयोपमा
९नियमोपमा मालोपमा विक्रियोपमा इत्यादयः प्रभेदाः अन्यैः कल्पिताः

पूर्वाचार्यैः प्रदर्शितम् ।

तदेव प्रतिसंस्कर्तु-

सन्ति । अत्र सर्वत्र बीजभूतमौपम्यं वतर्त एव । अयमुपमालंकारप्रपञ्चो दर्शितः। एवं रूपकादिष्वपि प्रपञ्चो द्रष्टव्यः । एवमेव औपम्यमूलको-
१२लंकारान्तरविस्तारोपि दृश्यते । तदुक्तं वामनेन (iv. 3. 1)—प्रतिवस्तुप्रभृतिरुपमाप्रपञ्चः इति । तेनैव च विविधैः सूत्रैः अग्रे प्रभृतिपदोपसंग्राह्या अलंकारा दर्शिताः तट्टीकाकारेण च ते श्लोकैरेवं निबद्धाः ।
१५यथा—

प्रतिवस्तुप्रभृतय उद्दिश्यन्ते यथाक्रमम् ।
प्रतिवस्तु समासोक्तिरथाप्रस्तुतशंसनम् ॥
१८अपह्नुती रूपकं च श्लेषो वक्रोक्त्यलंकृतिः ।
उत्प्रेक्षातिशयोक्तिश्च सन्देहः सविरोधकः ॥
विभावनानन्वयः स्यादुपमेयोपमा ततः ।
२१परिवृत्तिः क्रमः पश्चाद्दीपकं च निदर्शना ॥
अर्थान्तरस्य न्यसनं व्यतिरेकस्ततः परम् ।
विशेषोक्तिरथ व्याजस्तुतिर्न्याजोक्त्यलंकृतिः ॥
२४स्यात् तुल्ययोगिताक्षेपः सहोक्तिश्च समासतः ।
अथ संसृष्टिभेदौ द्वावुपमारूपकं तथा ।
उत्प्रेक्षावयवश्चेति विज्ञेयोलंकृतिक्रमः ॥ इति ।

२७भरतमुनिना तु (xvi. 41)—

उपमा दीपकं चैव रूपकं यमकं तथा ।
काव्यस्यैते ह्यलंकाराश्चत्वारः परिकीर्तिताः ॥

३०इत्यलंकारचतुष्टयमेवोक्तम् । एतद्विस्तारो भामहादिभिः प्रदर्शितस्तत एव बोद्धव्यः । प्रदर्शितमिति कथनं प्रायिकमिति बोध्यम् । यतो निश्चयो-
३३लेखादीनां नवीनतरैरुद्भावितानां केषांचिदलंकाराणां सामान्यलक्षणरूपबीजस्य प्राचीनैरकथनात् ॥ तदेव पूर्वाचार्यैः दर्शितमेव विकल्पमूलभूतं बीजं

---

ii. 2—प्रकल्पितम् for प्रदर्शितम् V, Rn;—परिसंस्कर्तुं for प्रतिसंस्कर्तुं J, P, B, Cs, R.

मयमस्मत्परिश्रमः ॥ २ ॥
काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलंक्रियाः ।
साधारणमलंकारजातमन्यत् प्रदर्श्यते ॥ ३ ॥
स्वभावाख्यानमुपमा रूपकं दीपकावृती ।

प्रतिसंस्कर्तुं सम्यक्तया विशदीकर्तुम् अयं प्रक्रान्तग्रन्थरूपः अस्मत्परिश्रमः मदीयो व्यवसायः । पूर्वाचार्यकथितबीजभूतानि अलंकारतत्त्वानि ३६मया विविधैर्लक्षणैरुदाहरणैश्च विव्रियन्ते। अनया दिशा अन्ये विकल्पाः प्रतिभावद्भिः स्वयमूहनीया इति भावः ॥ २ ॥

एवं सामान्यतः अलंकारनिरूपणे प्रतिज्ञाते प्रसङ्गतः पूर्वं निर्णीतानामलंकाराणां पुनर्निरूपणं पिष्टपेषणवद्विफलं स्यादिति तान् परि-३हृत्यैव निरूपणं क्रियते इति कथयति—काश्चिदिति । काश्चित् श्रुत्यनुप्रासवृत्त्यनुप्रासयमकादयः अलंक्रियाः शब्दालंकाराः मार्गविभागार्थम् गौडवैदर्भमार्गयोर्वैसादृश्यद्योतनार्थम् प्रागपि प्रथमपरिच्छेदे उक्ताः । ६तत्र श्रुत्यनुप्रासः ९२ श्लोकेन वृत्त्यनुप्रासः ९५ श्लोकेन यमकं च सामान्यतः ६१ श्लोकेन निर्दिष्टम् । तत्प्रयोजनं तु श्रुत्यनुप्रासो वैदर्भैरङ्गीकृतः न गौडैरित्यादिना मार्गभेदकथनम् । अतः तेऽलंकाराः न ९पुनर्निरूप्यन्ते इति भावः। अन्यत् पूर्वोक्तात् अन्यत् साधारणम् उभयमार्गसमानम् गौडवैदर्भानुमतमित्यर्थः । अलंकारजातम् स्वभावाख्यानमुपमेत्यादिना अग्रे निरूप्यमाणोलंकारसमूहः प्रदर्श्यते विविच्यते । यम-१२कस्य पूर्वं सामान्यतः लक्षणमुक्तं तद्विशेषप्रकारनिरूपणं तु—तत् तु नैकान्तमधुरमतः पश्चाद्विधास्यते । इति (i. 61) पूर्वप्रतिज्ञानुरोधेनैव तृतीयपरिच्छेदे सोदाहरणं प्रपञ्चितमस्तीति ज्ञेयम् ॥ ३ ॥

प्रतिज्ञातालंकारनिरूपणाय प्रथमं तानुद्दिशति—स्वभावाख्यानमिति । स्वभावाख्यानं स्वभावोक्तिः अस्यैव जातिरिति संज्ञान्तरम् । दीपकं च ३आवृतिश्च दीपकावृती । आङ्पूर्वकाद् वृतेः इगुपधात् कित् इति

---

ii. 3—अद्य for अन्यत् R; अत्र M, Cs (which also mentions अन्यत् as a variant).

ii. 4—दीपकावृत्ती for दीपकावृती M.

आक्षेपोर्थान्तरन्यासो व्यतिरेको विभावना ॥ ४ ॥
समासातिशयोत्प्रेक्षा हेतुः सूक्ष्मो लवः क्रमः ।
प्रेयो रसवदूर्जस्वि पर्यायोक्तं समाहितम् ॥ ५ ॥
उदात्तापह्नुतिश्लिष्टविशेषास्तुल्ययोगिता ।
विरोधाप्रस्तुतस्तोत्रे व्याजस्तुतिनिदर्शने ॥ ६ ॥
सहोक्तिः परिवृत्त्याशीः संकीर्णमथ भाविकम् ।

औणादिः कित्प्रत्ययः आवृत्तिरित्यर्थः । सोयं अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरेव च (ii. 116) इति त्रिधा अग्रे निरूपितोस्ति । अन्यत् ६स्पष्टम् ॥ ४ ॥

समासेति । समासः समासोक्तिः । अतिशयः अतिशयोक्तिः । लवः लेशः । तथा चाग्रे वक्ष्यति—हेतुश्च सूक्ष्मलेशौ च वाचामुत्तमभूषणम् ३(ii. 235) इति । क्रमः यथासंख्यम् । अस्यैव संख्यानमिति संज्ञान्तरम् तदुक्तमग्रे—यथासंख्यमिति प्रोक्तं संख्यानं क्रम इत्यपि (ii. 273) इति । समाहितम् अर्वाचीनैः समाधिनाम्ना व्यवहृतोलंकारः ॥ ५ ॥

उदात्तेति । उदात्तश्च अपह्नुतिश्च श्लिष्टश्च विशेषश्चेति द्वन्द्वः । विशेषः विशेषोक्तिः । विरोधः अप्रस्तुतस्तोत्रं च विरोधाप्रस्तुतस्तोत्रे । ३अप्रस्तुतस्तोत्रम् अप्रस्तुतप्रशंसा । व्याजस्तुतिश्च निदर्शनं च व्याजस्तुतिनिदर्शने ॥ ६ ॥

सहोक्तिरिति । संकीर्णं संसृष्टिः । तदुक्तमग्रे—नानालंकारसंसृष्टेः संसृष्टिस्तु निगद्यते (ii.359) इति । इति एवं नामनिर्देशपूर्वकं कथिताः पूर्वोक्ताः

---

ii. 4—आक्षेपार्थान्तरन्यासौ for आक्षेपोर्थान्तरन्यासो M.

ii. 5—समासो for समासा N;—पर्यायान्यत् for पर्यायोक्तं Rn; पर्यायोक्तिः Cs, M.

ii. 6—उदात्तापह्नुती श्लिष्टं विशेषः for उदात्तापह्नुतिश्लिष्टविशेषाः M, D;—श्लेष for श्लिष्ट J, P, B, R;—विदर्शने for निदर्शने mentioned by Cs.

इति वाचामलंकारा दर्शिताः पूर्वसूरिभिः ॥ ७ ॥
नानावस्थं पदार्थानां रूपं साक्षाद्विवृण्वती ।

३पञ्चत्रिंशत्संख्याकाः वाचाम् वाक्यानाम् अलंकाराः पूर्वसूरिभिः दर्शिताः। यद्यपि एते अर्थालंकाराः तथापि शब्दार्थयोः वैयाकरणानुमतं तादात्म्यमङ्गीकृत्योक्तं वाचामिति। पूर्वसूरिभिः इत्यनेन संप्रदायागताने-
६तानेव विवृणोमि न तु निश्चयोल्लेखादीनर्वाचीनकविकल्पितसदृशानन्यान् कानपि विशिनष्मि तादृशवैचित्र्यस्वीकारेण अलंकारान्तरकल्पने तेषामानन्त्यापत्तेरिति भावः ॥ ७ ॥

तत्र उद्देशवाक्यानुसारेण अलंकारान् लक्षयति—नानावस्थमिति । सा अलंकारेषु प्रथिता आद्या उद्देशवाक्ये प्रथमा अलंकृतिः स्वभावोक्तिः
३जातिः इति च नामद्वयवती वर्तते इति शेषः । तल्लक्षणं तु नानावस्थमित्यादि। पदार्थानाम् स्थावरजङ्गमानाम् नानावस्थम् जातिगुणक्रियाद्रव्यवशेन विविधप्रकारम् रूपम् स्वरूपविशेषम् असाधारणधर्मं साक्षात् अन्या-
६जेन विवृण्वती दर्शयन्ती अथवा साक्षात् विवृण्वती सूक्ष्मत्वाद्दुर्लक्षमपि प्रत्यक्षमिव दर्शयन्ती सा जातिरिति संबन्धः। एवं च वस्तुनः यथावत् स्वरूपस्फुटीकरणसमर्थमसाधारणधर्मवर्णनं स्वभावोक्तिः इति लक्षणं
९संपन्नम् । अत्र सर्वत्र अलंकारेषु काव्यशोभाकरत्वरूपं साधारणलक्षणप्राप्तं चमत्कृतिहेतुत्वमपेक्ष्यते एव । तेन च—

दीर्घपुच्छश्चतुष्पादः ककुद्मांल्लम्बकम्बलः ।
गोरपत्यं बलीवर्दस्तृणमत्ति मुखेन सः ॥

१३इत्यादौ नायमलंकारः । अत्र केचित् नानावस्थमित्यनेन एकावस्थवस्तुरूपवर्णने न वैचित्र्यातिशयः इति नालंकारता यथा—अम्भो-
१५दमुदितं दृष्ट्वा मुदा नृत्यन्ति बर्हिणः । इत्यत्र नर्तनमात्रं वर्णितमिति नात्र स्वभावोक्तिरित्याहुः । प्रकाशकारस्तु—स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् इति लक्षणं विधाय (x. 111) रूपवत् क्रिया-
१८वर्णनमपि स्वभावोक्तिमाह । भोजस्तु—अर्थव्यक्तिः स्वरूपस्य साक्षात् कथनमुच्यते । इति (i. 81) अर्थव्यक्तिम् अर्थगुणमाह। अनया सह

---

ii. 7—निर्दिष्टाः for दर्शिताः N; स्मर्यन्ते R, V, M, J.

स्वभावोक्तिश्च जातिश्चेत्याद्या सालंकृतिर्यथा ॥ ८ ॥
तुण्डैराताम्रकुटिलैः पक्षैर्हरितकोमलैः ।
त्रिवर्णराजिभिः कण्ठैरेते मञ्जुगिरः शुकाः ॥ ९ ॥
कलक्वणितगर्भेण कण्ठेनाघूर्णितेक्षणः ।

स्वभावोक्तेः सांकर्यपरिहाराय सार्वकालिकस्य वस्तुस्वरूपस्य वर्णनम् १अर्थव्यक्तिगुणः आगन्तुकस्य वस्तुस्वरूपस्य वर्णनं स्वभावोक्तिरलंकारः इति निरदिशत् (iii. 5) यथा—

अर्थव्यक्तेरियं भेदमियता प्रतिपद्यते ।
जायमानमियं वक्ति रूपं सा सार्वकालिकम् ॥ इति ।

५अन्यत्रापि—

स्वभाव एव भावानां स्वरूपमभिधीयते ।
निजमागन्तुकं चेति द्विविधं तदुदाहृतम् ॥

८इति प्रपञ्चितमस्ति । आचार्यो दण्डी तु—अर्थव्यक्तिरनेयत्वमर्थस्य इति तां शब्दगुणत्वेनैव स्वीचकार । अतस्तन्मते उपर्युक्तं सार्वकालिकागन्तु-°कोभयरूपं पदार्थस्वरूपवर्णनं स्वभावोक्तेरेव विषयः इति ध्येयम् ॥ ८ ॥

जात्यादिचतुष्टयरूपां स्वभावोक्तिं क्रमेण उदाहरति—तुण्डैरिति । आताम्रकुटिलैः आताम्राणि ईषल्लोहितानि कुटिलानि वक्राणि च तैः ३तुण्डैः मुखैः उपलक्षिताः इत्थंभूतलक्षणे इति तृतीया । एवमग्रेपि । हरितकोमलैः हरिताः पालाशवर्णाः कोमलाः सुकुमाराः तैः पक्षैः गरुद्भिः । त्रिवर्णराजिभिः त्रयो वर्णाः नीलरक्तधूसराः तेषां राजयः ६रेखाः यत्र तैः कण्ठैः ग्रीवाभिः । एते अग्रे वर्तमानाः शुकाः कीराः मञ्जुगिरः मधुरप्रलापिनः वर्तन्ते इति शेषः । अत्र तुण्डादीनां ताम्रत्वादिकः सर्वशुकजातेर्धर्मः तेन जात्युदाहरणमेतत् ॥ ९ ॥

क्रियास्वभावोक्तिमुदाहरति—कलेति । कलक्वणितगर्भेण कलम् अव्यक्तमधुरं यत् क्वणितं मञ्जुलध्वनिः स गर्भे अन्तः यस्य तेन कण्ठेन ३उपलक्षितः । आघूर्णितेक्षणः आघूर्णिते प्रेम्णा प्रियामुखमभितः संचा-

ii. 9—अमी for एते D.

पारावतः परिक्षिप्य रिरंसुश्चुम्बति प्रियाम् ॥ १० ॥

बध्नन्नङ्गेषुरोमाञ्चं कुर्वन् मनसि निर्वृतिम् ।
नेत्रे चामीलयन्नेष प्रियास्पर्शः प्रवर्तते ॥ ११ ॥

कण्ठेकालः करस्थेन कपालेनेन्दुशेखरः ।

लिते ईक्षणे नयने येन सः । रिरंसुः रन्तुमिच्छुः पारावतः कलरवः सन् परिक्षिप्य प्रेयसीकृतचुम्बननिषेधं निवार्य अथवा परिवार्य सर्वतोनुगत्य। ६प्रियां कपोतीं चुम्बति तस्याः अधरपानं करोति । अत्र कलकणितादयः सर्वे धर्माः पारावतचुम्बनक्रियायाः इति क्रियास्वभावोक्तिरियम् ॥१०॥

गुणगतां स्वभावोक्तिमुदाहरति—बध्नन्निति। एषः अनुभूयमानः प्रियास्पर्शः दयितास्पर्शः अङ्गेषु गात्रेषु रोमाञ्चम् रोमहर्षणम् बध्नन् संपा-३दयन् मनसि निर्वृतिम् परमानन्दम् कुर्वन् जनयन् नेत्रे आमीलयन् सौख्यातिशयेन निमीलयन् प्रवर्तते जयतीत्यर्थः । अत्र प्रियास्पर्शः इति स्पर्शस्य गुणत्वाद्गुणगतेयं स्वभावोक्तिः। भोजराजेन स्वभावोक्तेः—देशः ६कालश्च शक्तिश्च साधनानि च हेतवः (iii. 8) इति हेतून् कथयित्वा शक्तेरिदमुदाहरणं दर्शितम् । अत्र रोमाञ्चबन्धादिषु प्रियास्पर्शप्रवृत्तेर्निमित्तस्योक्तत्वादियं शक्तिहेतुर्नाम जातिः इति च तेन लक्षणसंगति-९र्दर्शिता ॥ ११ ॥

द्रव्यगतजातिमुदाहरति—कण्ठेकाल इति। कण्ठेकालः कण्ठे कण्ठप्रदेशे कालः कालकूटं तदुत्पन्नकालिमा वा यस्य स शिवः। अमूर्धमस्तकात् ३स्वाङ्गादकामे इति अलुक्समासः । करस्थेन करस्थितेन कपालेन शिरोस्थ्ना तथा स्निग्धताम्राभिः स्निग्धाः कोमलाः ताम्राः अरुणाः ताभिः

---

ii. 10—परिक्रम्य for परिक्षिप्य D, M, V, Rn; परिभ्रम्य J, B, P, R; परिष्वज्य Cs, which also mentions परिक्षिप्य; परावृत्य in सुभाषितरत्नभाण्डागार.

ii. 11—चामीलयत्येष for चामीलयन्नेष M.

जटाभिः स्निग्धताम्राभिराविरासीद्वृषध्वजः ॥ १२ ॥
जातिक्रियागुणद्रव्यस्वभावाख्यानमीदृशम् ।
शास्त्रेष्वस्यैव साम्राज्यं काव्येष्वप्येतदीप्सितम् ॥ १३ ॥
यथाकथंचित्

जटाभिः जटिलकेशपाशैः उपलक्षितः एतादृक् वृषध्वजः वृषः वृषभः ध्वजः केतुचिह्नं यस्य सः आविरासीत् प्रादुरभूत् । अत्र कण्ठेकालत्वादयः सर्वेपि धर्माः शिवरूपद्रव्यगताः इति द्रव्यस्वभावोक्तिरियम् । वृषध्वजशब्दो यादृच्छिकः शिवसंज्ञायां संकेतितः संज्ञासंज्ञिनोश्चाभेदाद्द्रव्यगतेयं स्वभावोक्तिः ॥ १२ ॥

स्वभावोक्तिमुपसंहरति—जातीति । जातिश्च क्रिया च गुणश्च द्रव्यं च जातिक्रियागुणद्रव्याणि तेषां स्वभावः नैसर्गिकस्वरूपं तस्य आख्यानं मनोहरतया कथनम् ईदृशम् अनया रीत्या स्वभावो वर्णितश्चेत् स्वभावोक्तिरलंकारो भवति इति भावः । अत्र द्रव्यपदं वैयाकरणपरिभाषितैकव्यक्तिवाचकम् न तु नैयायिकपरिभाषितपृथिव्यादिवाचकम् तेषां जातिपदेन संग्रहात् । अस्यैव स्वभावाख्यानस्यैव शास्त्रेषु पदार्थस्वरूपनिरूपणप्रधानेषु न्यायव्याकरणवेदान्तादिशास्त्रेषु साम्राज्यम् प्राधान्यम् । सर्वाण्यपि शास्त्राणि पदार्थस्वभावनिर्णायायैव प्रवृत्तानि अतः स्वभावाख्यानं सर्वत्र वरीवर्ति इति भावः । एवकारेण अलंकारान्तराणां न एतादृक् शास्त्रेषु उपयोगः इति सूचितम् । काव्येष्वपि एतत् स्वभावाख्यानम् ईप्सितम् कविभिः अलंकारान्तरापेक्षया एतदेव सहृदयतया आदृतम् सर्वेषु अलंकारेषु एतदेव विराजते इति भावः ॥ १३ ॥

क्रमप्राप्तामुपमां निरूपयति—यथेति । यत्र काव्ये । वृत्तित्वं सप्तम्यर्थः तच्च वृत्तित्वं शक्तिलक्षणान्यतरसहकारेण बोधकत्वसंम्बधेन ज्ञेयम् । केचित्तु यत्र वैचित्र्ये । इयं तु विषयसप्तमी विषयश्च प्रतिपाद्यरूपः इत्याहुः । यथाकथंचित् येनकेनाचित् प्रकारेण गुणक्रियाद्रव्यवशेनेति भावः । उद्भूतम् प्राधान्येन स्फुटं सादृश्यम् साम्यम् प्रतीयते अभिधालक्षणव्यञ्जनान्यतरवृत्त्या प्रतीतिविषयमेति सा उपमा तत् सादृश्यमुपमालंकारः ।

---

ii. 13 —आख्यात for आख्यान V.

सादृश्यं यत्रोद्भूतं

विधेयगतलिङ्गत्वेन तच्छब्दस्य स्त्रीत्वम् । तथा च काव्यनिष्ठमलौकिक-
चमत्कारजनकं सादृश्यमुपमेति फलितम् । चमत्काराजनकं सादृश्यं
९नोपमालंकारः यथा गौरिव गवयः घट इव घटः पदार्थः अथवा—अस्थि-
वद्दधिवच्चैव पिष्टवत् कुष्टवत् तथा । राजन् तव यशो भाति इत्यादिषु । एतत्
सर्वालंकारसमानम् तेन गोसदृशो गवयः इति नोपमा गौर्वाहीकः इति
१२न रूपकम् स्थाणुर्वा पुरुषो वा इति न संदेहः इदं रजतम् इति न भ्रान्ति-
मान् नायं सर्पः इति नापह्नुतिः पीनो देवदत्तो दिवा न भुङ्क्ते इति
न पर्यायोक्तम् पर्वतो वह्निमान् इति नानुमानम् सोयं देवदत्तः इति न
१५स्मरणम् तस्थस्थमिपां तातंतामः इति न यथासंख्यम् पुत्रेण सह
आगतः पिता इति न सहोक्तिः तेन विना गतः इति न विनोक्तिः श्वेतो
धावति इति न श्लेषः इत्याद्यूहनीयम् इति चित्रमीमांसायां (p. 6)
१८अप्पयदीक्षिताः । उक्तं हि रसगङ्गाधरे (p.157) सादृश्यं सुन्दरं वाक्यार्थो-
पस्कारकं उपमालंकृतिरिति । व्याख्यातं च सुन्दरमिति सादृश्यविशेषणम्
सौन्दर्यं च चमत्कृत्याधायकत्वं चमत्कृतिश्चानन्दविशेषः इति ॥ तस्याः
२१प्रपञ्चो विस्तरः अयं वक्ष्यमाणप्रकारकः प्रदर्श्यते निदर्श्यते । अस्योप-
मालंकारस्य चत्वार्यङ्गानि । उपमानम् उपमेयम् साधारणो धर्मः उपमावा-
चकश्चेति । तत्र सादृश्यप्रतियोगि उपमानम् । सादृश्यानुयोगि उपमेयम्
२४उपमाने उपमेये चोभयत्र संगतो धर्मः साधारणो धर्मः । उपमावाच-
कश्च इवादिशब्दः । परे तु यस्य धर्मस्य संबन्धात् येन सह यदुपमीयते
स साधारणो धर्मः । तदुपमानम् । तच्चोपमेयम् । इति साधारणधर्मो-
२७पमानोपमेयपदानि विवृण्वन्ति । यथा कमलमिव मुखं मनोज्ञम्
इत्यादौ मनोज्ञत्वधर्मसंबन्धेन तद्वत्तया प्रसिद्धेन कमलेन सह मुखमुप-
मीयते इति मनोज्ञत्वं साधारणो धर्मः कमलमुपमानं मुखमुपमेयम् इव-
३०शब्दश्च उपमावाचकः इत्युपमालंकारः । एते च उपमानादयः पदार्थाः
क्वचित् सन्तः क्वचिदसन्तः क्वचिदुपात्ताः क्वचिदनुपात्ता अपि सामर्थ्यो-
वसेया भवन्ति । अत एव त्वयि कोपोयमाभाति सुधांशाविव पावकः
३३इत्यत्र सुधांशौ पावकस्यासतोपि उपमानत्वसिद्धिः । तत्र उपात्तानां
गुणक्रियाद्रव्याणां सादृश्यात् क्रमेणोपमालंकारो यथा हंसीव धवला

ii. 14—येनोद्भूतं for यत्रोद्भूतं Cs.

प्रतीयते ।

कीर्तिः इत्यत्र धवलत्वगुणेन सलीलमियमायाति वधूर्गजवधूरिव
३६इत्यत्र गमनक्रियया आकाशः काशतेत्यर्थं शिववद्विधुभूषणः इत्यत्र
विधुरूपद्रव्येण । अनुपात्तानां यथा—

मुखमिन्दुर्यथा पाणिः पल्लवेन समः प्रिये ।
वाचः सुधा इवौष्ठस्ते बिम्बतुल्यो मनोऽमवत् ॥ इति ।

४०अत्र मुखेन्दुप्रभृतीनां प्रसिद्धसादृश्यानां मनोज्ञत्वादयो धर्मा नोपात्ताः
ते सामर्थ्यादेव ज्ञायन्ते ॥ उद्भूतम् प्राधान्येन स्फुटम् । तेन यत्र वैचि-
४२च्यान्तरनिर्गीणसादृश्यवैचित्र्यं तत्र नोपमालंकारः । तथा च रूपकादि-
स्थले तादृप्यादिप्रतीतिजन्यवैचित्र्यस्य चमत्कारातिशयजनकतया तत्कु-
क्षिनिलीनमिवोपमावैचित्र्यं न तादृशं चमत्कारं दर्शयति इति न तत्रो-
४५पमालंकारप्रसक्तिः । एवमेव व्यतिरेकालंकारेपि तत्र भेदप्रतीतिवैचि-
त्र्येण सादृश्यप्रतीतिजन्यवैचित्र्यस्य तिरोधानात् । अङ्गाङ्गिभावसंकरे तु
सादृश्यजन्यवैचित्र्यं नान्येन तिरोधीयते। परं काव्यार्थालोचनया प्रधान-
४८निर्वाहकत्वेन तदङ्गत्वेन प्रतीयते ॥ सादृश्यमतिरिक्तः पदार्थः इति वै-
याकरणमीमांसकादयः । साधर्म्यमिति नैयायिकादयः । साधर्म्यमुप-
माभेदे इति प्रकाशकारः । साधर्म्यं च उपमानोपमेययोरेकधर्मसं-
५१बन्धः समासोत्तरवर्तिभाववाचितद्धितप्रत्ययस्य संबन्धाभिधायकत्वात् ।
तदुक्तं भर्तृहरिणा—कृत्तद्धितसमासेभ्यः संबन्धाभिधानं भावप्रत्ययेनेति ।
एकत्वं हि धर्माणां क्वचिद्भस्तुतः अभिन्नत्वं क्वचिदेकजातियत्वम् क्वचि-
५४देकशब्दप्रतिपाद्यत्वं क्वचिदेकधर्मत्वं चेति चतुर्विधम् । तत्र गुणक्रिया-
यदृच्छानां साधर्म्यत्वे प्रथमम् तेषामभिन्नत्वस्य वैयाकरणैरङ्गीकृतत्वा-
त् । द्रव्यसामान्यादीनां साधर्म्यत्वे द्वितीयम् । एकजातीयत्वं च एक-
५७जातित्वम् । एकशब्दप्रतिपाद्यत्वं श्लिष्टपदोपस्थाप्ये धर्मे ज्ञेयम् । तत्र
शब्दश्लेषे सकलकलं पुरमेतज्जातं संप्रति सुधांशुबिम्बमिव इत्यादि ।
अत्र सकलकलम् इत्यस्य कलकलसहितं संपूर्णकलायुतं चेत्यर्थः । बिम्बा-
६०नुबिम्बितायामेकधर्मवत्त्वम् यथा—

भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम् ।
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ॥ इति ।

उपमा नाम सा तस्याः

६३अत्र श्मश्रुलत्वसरघाव्याप्तत्वयोः धर्मयोः एककृष्णत्वादिगुणयोगा-
देकत्वम् । आचार्यदण्डिनो मते एतत् सादृश्यं द्वयोरेवेति नाग्रहः । एक-
स्यैव उपमानोपमेयस्वरूपस्य अनन्वयस्याप्यनेन उपमात्वस्वीकारात् ।
६६तथैव वाक्यद्वयगता उपमेयोपमा अपि एतन्मते उपमैव । अतस्तदर्थं
सादृश्यस्य एकवाक्यगतत्वमिति विशेषणं नापेक्ष्यते । तत्र इवादिपदप्र-
योगे वाच्यम् तदप्रयोगे क्वचिल्लक्ष्यम् क्वचिद्वाक्येन व्यङ्ग्यम् इति
६९ज्ञेयम् ॥ अत्र तावदुपमायाः वाक्यार्थबोधं संक्षेपतः दर्शयामः । चन्द्र
इव मुखं आह्लादकम् इत्यत्र आह्लादकोपमानभूतचन्द्राभिन्नमाह्लादक-
मुपमेयं मुखमिति बोधः । अत एव इवादिसमभिव्याहारे उपमानो-
७२पमेययोः समानविभक्तिकत्वनियमः । साधारणधर्मसंबन्धश्च क्वचिद्वि-
शेषणतया यथा चन्द्र इव मुखमाह्लादकम् इत्यादौ क्वचिद्विशेष्यतया
यथा चन्द्र इव मुखमाह्लादयति । अत्र उपमानचन्द्रकर्तृकाह्लादाभिन्नः
७५उपमेयमुखकर्तृकाह्लादः इति बोधः । अतोऽपि तयोः समानविभक्ति-
कतैव । हरीतकीं भुङ्क्ष्व राजन् मातेव हितकारिणीम् । इत्यादि तु असा-
ध्वेव । समानविभक्तिकत्वाभावात् । ये त्वत्र चन्द्रसादृश्यप्रयोजको मु-
७८खकर्तृक आह्लादः इति बोधं वदन्ति तेषां मते उपमानोपमे-
ययोः समानविभक्तिकत्वनियमे मानं चिन्त्यम् । यत्तु वाचनिकी समा-
नविभक्तिकतेति तन्न व्याकरणशास्त्रे तादृशवचनानुपलम्भात् । एवं गज-
८१राज इव गच्छति देवदत्तः इत्यादौ बोध्यम् । वनं गज इव शूरः सम-
रभूमिं गच्छति इत्यादौ उपमानगजकर्तृकवनकर्मकगमनाभिन्नमुपमेयशूर-
कर्तृकसमरकर्मकं गमनमिति बोधः । साधारणधर्मरूपगमनस्य विधेयतया
८४उपमाविधेयिकात्र धीः । व्याघ्र इव यः शूरः पुरुषः स गच्छति
इत्यादौ उपमानशूरव्याघ्राभिन्नपुरुषकर्तृकगमनमिति धीः । शूरत्वादि-
साधारणधर्मस्योद्देश्यतया उपमोद्देश्यिकात्र धीः । अत एव भेदाभेद-
८७प्रधाना उपमेति वृद्धाः । यद्यपि चन्द्रमुखयोस्तत्त्वेन भेदः तथापि साधा-
रणधर्मवत्त्वेनाभेदान्वययोग्यता बोध्या इति मञ्जूषायां नागेशः । विस्त-
रस्तु रसगङ्गाधरे द्रष्टव्यः ॥ उपमायाः विविधालंकारमूलत्वमाह उपमा-
९०प्रस्तावे अप्पयदीक्षितः चित्रमीमांसायाम् यथा (p. 5)—

प्रपञ्चोयं प्रदर्श्यते ॥ १४ ॥

उपमैका शैलूषी संप्राप्ता चित्रभूमिकाभेदान् ।
रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः ॥

९३चन्द्र इव मुखमिति सादृश्यवर्णनं तावदुपमा सैव उक्तिभङ्गभेदेनानेकालंकारत्वं भजते । तथाहि चन्द्र इव मुखं मुखमिव चन्द्रः इत्युपमेयोपमा । मुखं मुखमिव इत्यनन्वयः । मुखमिव चन्द्रः इति प्रतीपम् ।
९६चन्द्रं दृष्ट्वा मुखं स्मरामि इति स्मरणम् । मुखमेव चन्द्रः इति रूपकम् । मुखचन्द्रेण तापः शाम्यति इति परिणामः । किमिदं मुखमुताहो चन्द्रः इति संदेहः । चन्द्र इति चकोरास्त्वन्मुखमनुधावन्ति इति
९९भ्रान्तिमान् । चन्द्र इति चकोराः कमलमिति चञ्चरीकास्त्वन्मुखे रज्यन्ति इत्युल्लेखः । चन्द्रोयं न मुखम् इत्यपह्नवः । नूनं चन्द्रः इत्युत्प्रेक्षा । चन्द्रोयम् इत्यतिशयोक्तिः । मुखेन चन्द्रकमले निर्जिते इति
१०२तुल्ययोगिता । निशि चन्द्रस्त्वन्मुखं च हृष्यति इति दीपकम् । त्वन्मुखे एवाहं रज्यामि चन्द्र एव चकोरा रज्यन्ते इति प्रतिवस्तूपमा । दिवि चन्द्रो भुवि त्वन्मुखम् इति दृष्टान्तः । मुखं चन्द्रश्रियम्
१०५बिभर्ति इति निदर्शना । निष्कलङ्कं मुखं चन्द्रादतिरिच्यते इति व्यतिरेकः । त्वन्मुखेन समं चन्द्रो निशासु हृष्यति इति सहोक्तिः । मुखं नेत्राङ्कुरुचिरं स्मितज्योत्स्नोपशोभितम् इति समासोक्तिः । अब्जेन
१०८सदृशं वक्त्रं हरिणाहितसक्तिना इति श्लेषः । मुखस्य पुरतश्चन्द्रो निष्प्रभः इत्यप्रस्तुतप्रशंसा । एवमुक्तानेकालंकारविवर्तवतीयमुपमा ।

तदिदं चित्रं विश्वं ब्रह्मज्ञानादिवोपमाज्ञानात् ।
ज्ञातं भवतीत्यादौ निरूप्यते निखिलभेदसहिता सा ॥ इति ।

११२राजशेखरोपि—

अलंकारशिरोरत्नं सर्वस्वं काव्यसंपदाम् ।
उपमा कविवंशस्य मातेवेति मतिर्मम ॥

११५इति तां प्रशंसति ॥ १४ ॥

---

ii. 14—निदर्श्यते for प्रदर्श्यते J, P, B, D, V, Rn.

अम्भोरुहमिवाताम्रं मुग्धे करतलं तव ।

प्रतिज्ञातमुपमाप्रपञ्चं दर्शयति—अम्भोरुहमिति । हे मुग्धे सुन्दरि
तव करतलं पाणितलम् अम्भोरुहमिव कोकनदमिव आताम्रम् आलोहितम्।
३अम्भोरुहमिवेति समस्तम् इवेन नित्यसमासो विभक्त्यलोपश्चेति शास-
नात् । अम्भोरुहपदं च अम्भोरुहसदृशे लाक्षणिकम् । इवशब्दः सादृ-
श्यद्योतकः। तथा च आताम्रोपमानभूताम्भोरुहाभिन्नमाताम्रमुपमेयं कर-
६तलमिति बोधः । यत्तु— इवार्थः सादृश्यम् । तत्र प्रतियोग्यनुयोगि-
भावेनैव अम्भोरुहकरतलयोरन्वयोपपत्तौ किं लक्षणया । तथा च अम्भो-
रुहप्रतियोगिकसादृश्यानुयोगि करतलमिति बोधः इति तन्न । इवशब्द-
९स्य सादृश्यार्थवाचकत्वे तदर्थे सादृश्ये उपमानस्य भेदेनान्वये अम्भोरु-
हमिव मुखं पश्यामि अम्भोरुहमिव मुखं दृश्यते इत्यादौ अम्भोरुहप-
दस्य करतलरूपकसामानाधिकरण्याभावात् उक्तानुक्तत्वप्रयुक्तविभक्त्य-
१२नापत्तेः षष्ठ्यापत्तेश्च । तथा अम्भोरुहेणेव करतलेन शोभसे इत्यादौ
समानविभक्तित्वं न स्यात् । अभेदान्वयस्थले एव विशेषणविशेष्ययोः
समानविभक्तित्वनियमात् । ननु अभेदान्वयस्थलवदुपमानोपमेयभावस्थ-
१५लेपि समानविभक्तित्वस्यानुशासनमस्ति । तथा हि विभक्तिः पुनरेका
स्यादुपमानोपमेययोः इति । इति चेन्नैतद्रुचिरम् । एतच्छासनस्य
मुनित्रयानुपदिष्टत्वात् । अत्र केचित् साधारणधर्मस्य आताम्रत्वस्य
१८प्रथममुपमेयभूतकरतलेनैवान्वयः न तु उपमानभूतेनाम्भोरुहेण तस्य
समस्तैकपददेशपदबोध्यत्वात् । तद्वतत्वेन प्रतीतिस्तु पर्यालोचनया अन्वय-
बोधोत्तरमेव । अत एव धर्मसाधारण्यप्रतीतिः तयैव च वैचित्र्यमिति
२१साधारणधर्मसंबन्धे विषये आहुः । परं नैतद्रुचिरम् । पूर्वोक्तदोषपरिहा-
राय इवशब्दस्य द्योतकत्वात् तेनोपमानोपमेयगतं सादृश्यं सममेव स
द्योतयति इति ज्ञेयम् । अपरं च यथैवादिशब्दा यत्परास्तस्यैवोपमानता-
२४प्रतीतिरिति यद्यप्युपमानविशेषणान्येवेत्यादिप्रकाशकारोक्तिविरुद्धमेतत्
इति सुधीभिः विचार्यमेतत् । प्रकृतमनुसरामः ॥ इति एवं साधा-
रणधर्मप्रयोगस्थले धर्मोपमा धर्मस्य उपादानेन धर्मोपमा इत्यर्थः । अत्र
२७हेतुमाह साक्षादिति । साक्षाच्छब्देन प्रतिपादितस्य तुल्यधर्मस्य आता-
म्रत्वस्य प्रदर्शनात् कीर्तनात् । अत्र इवशब्दश्रवणमात्रेण सादृश्यरूप-

इति धर्मोपमा साक्षात् तुल्यधर्मनिदर्शनात् ॥ १५ ॥

राजीवमिव ते वक्त्रं नेत्रे नीलोत्पले इव ।
इयं प्रतीयमानैकधर्मा वस्तूपमैव सा ॥ १६ ॥

संबन्धस्य प्रतीतेरियं श्रौती। उपमानोपमेयसाधारणधर्मसादृश्यवाचकानां
३०चतुर्णामपि प्रयोगाच्च पूर्णेयमुपमा । चतुर्षु अङ्गेषु कस्यचिदनुपादाने
लुप्तोपमेति ज्ञेयम् । एतद्भेदकरणमर्वाचीनानामेव प्राचीनग्रन्थेष्वनुपल-
म्भात् । आचार्यदण्डी तु प्राचीनमतमेवानुसरति । धर्मवस्तूपमाविषये
३३प्रमाणमाग्नेये यथा(344. 10)—

यत्र साधारणो धर्मः कथ्यते गम्यतेथवा ।
ते धर्मवस्तुप्राधान्याद्धर्मवस्तूपमे उभे ॥ इति ।

३६इत्यलं पल्लवितेन ॥ १५ ॥

वस्तूपमां दर्शयति—राजीवमिति । ते तव वक्त्रं वदनं राजीवमिव
कमलसदृशम् । नेत्रे नयने नीलोत्पले नीलकमले इव । इयं निर्दिष्ट-
३स्वरूपा उपमा प्रतीयमानः शब्देनानुपादानाद् गम्यमानः एव केवलः
अन्येषामुपमानोपमेयोपमावाचकानां शब्दोपात्तत्वात् इति भावः धर्मः
साधारणो धर्मः मनोज्ञत्वसौरभत्वादिः यत्र सा वस्तूपमा। वस्तुनोः उप-
६मानोपमेययोरुपादानादियं वस्तूपमा । प्रसिद्धतया अत्र साधारणधर्मस्य
शब्दप्रयोगमन्तरेणापि औपम्यप्रतीतिर्भवतीति भावः । केचित्तु प्रतीय-
मानैकधर्मेतिपदस्यैकशब्दस्य सामान्यः साधारणः इति अर्थं दर्शयन्ति ।
९इदमेकधर्मत्वं यत्राप्रसिद्धं तत्र नेयं वस्तूपमा भवति । तथा च सकल-
कलं पुरमेतज्जातं संप्रति सुधांशुबिम्बमिव । इत्यादौ न वस्तूपमा ।
अत्र सकलकलमिति समानधर्मस्यानुपादाने न हि पुरसुधांशुबिम्बयोः
१२सादृश्यं प्रसिद्ध्या बुद्ध्यारूढं भवति । इयं च धर्मलुप्तोपमेति अप्पय्य-
दीक्षितैर्मन्यते ॥ १६ ॥

---

ii. 15—प्रदर्शनात् for निदर्शनात् P, B, D, Cs, M, J, R; प्रद-
र्शनम् Rn.

ii. 16— इति for इयं Cs; —वस्तूपमा तु for वस्तूपमैव D.

त्वदाननमिवोन्निद्रमरविन्दमभूदिति ।
सा प्रसिद्धिविपर्यासाद्विपर्यासोपमेष्यते ॥ १७ ॥
तवाननमिवाम्भोजमम्भोजमिव ते मुखम् ।

विपर्यासोपमामाह—त्वदाननेति। त्वदाननमिव उन्निद्रं प्रबुद्धम् अरविन्दं कमलम् अभूत् आसीत्। इति प्रसिद्धेः विपर्यासात् वैपरीत्यात् सा प्रसिद्धा ३विपर्यासोपमा अत्रास्तीति शेषः। अयं भावः प्रस्तुतत्वेन वर्णनीयानां मुखादीनामेवोपमेयत्वं तदुत्कर्षविकासाय न्यस्तानां चन्द्रारविन्दानामुपमानत्वम् इति कविसंप्रदायसिद्धः पन्थाः। तस्य मार्गस्य उपमेयस्य ६उत्कर्षप्रतिपादनाय विपर्यासः उपमेयोपमानभावविपर्ययः तस्माद्विपर्यासोपमा। प्रस्तुते उदाहरणे आननमुपमेयभूतमपि उपमानतया वर्णितम्। इवान्तस्य उपमानत्वनियमात्। तदनुरोधेन च यच्च उपमान- ९भूतमरविन्दं तत् उपमेयतया वर्णितम् अतः विपर्यासोपमालंकारः। नव्यास्तु अमुं प्रतीपं कथयन्ति। तदुक्तं कुवलयानन्दे(p. 14)—

प्रतीपमुपमानस्योपमेयत्वप्रकल्पनम्।
त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः ॥ इति।

१३उदाहरति च जगन्नाथः (p. 496)—

किं जल्पसि मुग्धतया हन्त ममाङ्गं सुवर्णवर्णमिति।
तद्यदि पतति हुताशे तदा हताशे तवाङ्गवर्णं स्यात् ॥

१६इति ॥ १७ ॥

अन्योन्योपमामाह—तवाननमिति। अन्योन्यस्य आननेन उपमानेन अम्भोजस्य अम्भोजेन उपमानेन आननस्य इति परस्परस्य उत्कर्षः गुण- ३माहात्म्यं तत् शंसिनी कथयित्री सेयमन्योन्योपमा। इति इत्यनेन उदाहरणस्वरूपं निर्दिश्यते। तेन च यत्र पर्यायेण उपमानोपमेयभावस्तत्रैवेयमिति सिद्धम्। तेन च मुखमम्भोजं च तुल्यमित्यत्र तथा

ii. 17—तवाननम् for त्वदाननम् P, B, Rn;—विपर्यासोपमा तु सा for विपर्यासोपमेष्यते D;—V puts stanza 18 before stanza 17.

ii. 18—त्वदाननम् for तवाननम् V, M.

इत्यन्योन्योपमा सेयमन्योन्योत्कर्षशंसिनी ॥ १८ ॥

त्वन्मुखं कमलेनैव तुल्यं नान्येन केनचित् ।
इत्यन्यसाम्यव्यावृत्तेरियं सा नियमोपमा ॥ १९ ॥

६प्रतीतावपि नेयं भवति उपरिदर्शितवैचित्र्याभावात् । अत्र पर्यायेणोपमानोपमेयकत्वकल्पनं तृतीयसदृशव्यवच्छेदार्थम् । तेन न्यूनगुणेनोपमेयेनोपमीयमानस्य गुणाधिकस्योपमानस्य कथमुत्कर्षः इति शङ्का ९परास्ता । अत्र द्वयोरेव मुखाम्भोजयोः प्रस्तुतत्वं बोध्यम् अम्भोजस्य अप्रस्तुतत्वे तदुत्कर्षप्रतिपादनवैयर्थ्यात् । प्रस्तुतोत्कर्षप्रतिपादनायैव गुणालंकाराणां समुत्पत्तेः । अत एव हेमचन्द्रः इमामुपमेयोपमा-१२भिधानेन इत्थमुदाजहार (p. 247)—

तवाननमिवाम्भोजमम्भोजमिव ते मुखम् ।
निलीनां नलिनीखण्डे कथं नु त्वां लभेमहि ॥ इति ।

१५निलीनां गूढाम् । अप्पय्यदीक्षितोपि—धर्मोर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि । इत्युभयप्रस्तुतमेवोदाहरत् । अर्वाचीनैस्तु इयमुपमेयोपमाशब्देन व्यवह्रियते । जगन्नाथादयस्तु केवलं तृतीयसदृशव्यवच्छेद-१८मेवास्याः फलं मन्वते । तथा प्रस्तुताप्रस्तुतेपि इयं भवतीति—

कौमुदीव भवती विभाति मे कातराक्षि भवतीव कौमुदी ।
अम्बुजेन तुलितं विलोचनं लोचनेन च तवाम्बुजं समम् ॥

२१इत्येतदुदाहरणतः स्पष्टं भवति । अत्र आननं मुखमिति प्रक्रमभङ्गः प्राचां निरङ्कुशत्वात् सोढव्यः इति प्रेमचन्द्रशर्माणः । परे तु कविना एतदुदाहरणं केवलमुपमाभेदप्रदर्शनायोल्लिखितं न तु काव्यत्वेनोपन्यस्तम् अत-२४स्तत्र प्रस्तुतमपहाय केवलक्षुद्रदोषैकदृष्टिभिर्विपश्चिद्भिर्न भवितव्यमित्याहुः ॥ १८ ॥

नियमोपमामाह—त्वन्मुखमिति । कमलेनैवेति एवकारः अन्ययोगव्यवच्छेदकः तदेव शब्दतः कथयति नान्येनेति । अन्यसाम्यव्यावृत्तेरिति ३उपमानबाहुल्यमुपमेयस्यापकर्षं गमयति । तद्व्यावृत्त्या प्रकृष्टेनैकेन साम्यकथनम् उत्कर्षातिशयवैचित्र्यमावहतीति अस्याः अलंकारत्वं ज्ञेयम् ॥ १९ ॥

पद्मं तावत् तवान्वेति मुखमन्यच्च तादृशम् ।
अस्ति चेदस्तु तत्कारीत्यसावनियमोपमा ॥ २० ॥
समुच्चयोपमाप्यस्ति न कान्त्यैव मुखं तव ।
ह्लादनाख्येन चान्वेति कर्मणेन्दुमितीदृशी ॥ २१ ॥
त्वय्येव त्वन्मुखं दृष्टं दृश्यते दिवि चन्द्रमाः ।

अनियमोपमां दर्शयति—पद्ममिति । पद्मम् कमलम् । तावत् इति वाक्यालंकारे । तव मुखमन्वेति अनुकरोति । अन्यत् कमलादितरत् तादृशं सुन्दरं वस्तु चन्द्रादि तत्कारि तव मुखानुकारि अस्ति चेदस्तु । इति एवं नियमाभावरूपा अनियमोपमा । नास्ति नियमः उपमानविषये यत्र सा अनियमोपमेत्यर्थः ॥ २० ॥

समुच्चयोपमां दर्शयति—समुच्चयेति । तव मुखं कान्त्यैव केवलकान्त्या एव इन्दुं नान्वेति । ह्लादनाख्येन संतोषजननाख्येन कर्मणा क्रियया च । चशब्दः समुच्चयद्योतकः तेनापि इत्यर्थः । अन्वेति अनुकरोति । इतीदृशी एतादृशवैचित्र्यविशिष्टा समुच्चयोपमा अपि अस्ति । अत्र गुणक्रिययोः समुच्चयः । ईदृशीत्यनेन केवलगुणकेवलक्रियासमुच्चये साधारणधर्मसमुच्चयेपि इयं ज्ञेया ॥ २१ ॥

अतिशयोपमां दर्शयति—त्वय्येवेति । त्वन्मुखं त्वयि एव दृष्टम् । दिवि आकाशे चन्द्रमा दृश्यते । एवं मुखचन्द्रमसोर्भिन्नाश्रयत्वं प्रतिपादितम् । इयती एव भिदा एतावानेव भेदः नान्या अन्यो भेदो न । गुणक्रियादिकं सकलं समम् इति भावः । इति एवं वैचित्र्यशालिनी अतिशयोपमा भवतीति शेषः । उपमानोपमेययोः गुणक्रियादिभिः महत्यपि भेदे किंचिद्भेदप्रदर्शनपुरःसरं नान्यो भेदः इति अभिन्नाध्यवसानेन उपमेयस्य गुणक्रियातिशयो वर्णितो भवति अतः अतिशयोपमा । अत्र इवादिसाधर्म्यवाचकशब्दाप्रयोगात् साम्यं व्यञ्जनगम्यमेव । व्यञ्जनेन च वक्तृवैशिष्ट्यसचिवया भेदाभेदप्रतीत्या प्राप्तप्रसरा वर्तते । नात्र

ii. 20—तत्कान्ति for तत्कारि V.

ii. 21—कान्त्यैवमसुंवद (?) for कान्त्यैव मुखं तव V.

इयत्येव भिदा नान्येत्यसावतिशयोपमा ॥ २२ ॥
मय्येवास्या मुखश्रीरित्यलमिन्दोर्विकत्थनैः ।
पद्मेपि सा यदस्त्येवेत्यसावुत्प्रेक्षितोपमा ॥ २३ ॥
यदि किंचिद्भवेत् पद्ममुद्भ्रु विभ्रान्तलोचनम् ।

रूपकध्वनिः आश्रयभेदस्य स्पष्टप्रतिपादनेन अभेदप्रतीतेः अभावात् । नापि व्यतिरेकः उपमानादुपमेयगताधिक्यस्य अनुद्भवात् । तस्मादु-१२पमा एव इयम् ॥ २२ ॥

उत्प्रेक्षितोपमां दर्शयति—मय्येवेति । अस्याः प्रकृतनायिकायाः मुखश्रीः मुखलक्ष्मीः मुखशोभासदृशशोभेति निदर्शनागर्भेयमुक्तिः । ३मय्येव इति एवंप्रकारैः इन्दोः विकत्थनैः श्लाघावचनैः अलम् । यत् यस्मात् सा श्रीः पद्मेपि अस्त्येव वर्तते एव इति एतादृशी वर्णना उत्प्रेक्षितोपमा ज्ञेया । अत्र चन्द्रमस आत्मश्लाघायाः अतात्त्विक-६त्वेन नायकस्य चाटूक्त्या संभावनयोत्प्रेक्षितत्वेन इयमुत्प्रेक्षितोपमा । अत्र साम्यं व्यञ्जनागम्यम् । एवमेवाग्रेपि तत्र तत्र बोद्धव्यम् ॥ २३ ॥

अद्भुतोपमामाह—यदीति । हे सुन्दरि यदि पद्मं किंचित् मनाक् उद्भ्रु उन्नमितभ्रूलतं तथा विभ्रान्तलोचनं घूर्णितनयनं भवेत् तत् तर्हि ३ते तव मुखश्रियं धत्ताम् प्राप्नोतु । इति असौ अद्भुतोपमा । विभ्रान्त-लोचनादयो धर्मा मुखस्यैव तेषां संभावनया पद्मस्थितिकल्पनेन मुख-५सादृश्यवर्णनं चमत्काराति शयाय भवति इतीयमद्भुतोपमा । यदुक्तम्—

यत्रोपमेयधर्माः स्युरुपमानेधिरोपिताः ।
चमत्कारविधानार्थं तामाहुरद्भुतोपमाम् ॥ इति ।

प्रकाशकारादयस्तु एनामतिशयोक्तिमाहुः तदुक्तं प्रकाशे (p. 762)—९प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् । उदाहृतं च—

राकायामकलङ्कं चेदमृतांशोर्भवेद्वपुः ।
तस्या मुखं तदा साम्यपराभवमवाप्नुयात् ॥ इति ।

---

ii. 23—मय्येवास्य for मय्येवास्याः D; मय्येव त्वन् J;—तदस्त्येव for यदस्त्येव P, J (?).

ii. 24—सुभ्रु for उद्भ्रु all except Cs, M.

तत् ते मुखश्रियं धत्तामित्यसावद्भुतोपमा ॥ २४ ॥

शशीत्युत्प्रेक्ष्य तन्वङ्गि त्वन्मुखं त्वन्मुखाशया ।

१२इदमत्रावधेयम् । यत्र संभावनयापि पर्यन्ते औपम्यस्य अनिष्पत्तिः कवेरभिप्रेता तत्र नोपमा किंतु अतिशयोक्तिः । यथा प्रस्तुतोदाहरणे सुधांशुवपुषो अकलङ्कभवनमशक्यमतस्तेन मुखसाम्यप्रापणमपि अशक्य-
१५मेवेत्यत्र कवितात्पर्यमस्ति अतो नेयमुपमा किन्तु अतिशयोक्तिः ।

यथा वा—

उभौ यदि व्योम्नि पृथक् प्रवाहौ आकाशगङ्गापयसः पतेताम् ।
तदोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः ॥

१९इत्यादावपि अनयैव दिशा अतिशयोक्तिः ।

पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोनुकुर्याद्विशदस्य तस्यास्ताम्रोष्ठपर्यस्तरुचः स्मितस्य ॥

२२इत्यादौ तु नातिशयोक्तिः पुष्पस्य प्रवालोपहितत्वस्य संभवात् नात्र कवेरौपम्याभावप्रदर्शने यत्नः । केवलं चारुतातिप्रदर्शनायैव चेयं संभा-
२४वना । अत इयं कविकल्पितोपमानतया उत्पाद्योपमेति प्राचीनैर्व्यवहृतास्ति । आचार्यदण्डिमते तु उभयत्रापि अद्भुतोपमैवेति सुधीभिर्विचार्यम् ॥ २४ ॥

मोहोपमां दर्शयति—शशीति । हे तन्वङ्गि कृशाङ्गि तव मुखं शशी इत्युत्प्रेक्ष्य सादृश्यादभिन्नं परिकल्प्य भ्रान्तिविषयीकृत्येत्यर्थः । अनन्तरं
३त्वद्विरहे शशिनं दृष्ट्वा त्वन्मुखाशया तव वदनस्पृहया त्वन्मुखमिदमेवेति बुद्ध्या इन्दुमपि अनुधावामि तद्दर्शनबद्धरतिर्भवामि । इत्येषा इयं मोहोपमा स्मृता कविभिरिति शेषः । मोहो भ्रान्तिः सादृश्येन इन्दौ
६मुखभ्रान्तिः तेन मोहोपमेति । तदुक्तमाग्नेये—

प्रतियोगिनमारोप्य तदभेदेन कीर्तनम् ।
उपमेयस्य यन्मोहोपमासौ भ्रान्तिमद्वचः ॥ इति ।

९अत्र साम्यं व्यङ्ग्यम् । शशी इन्दुरिति प्रक्रमभङ्गोपि पूर्ववन्न दोषायेति बोद्धव्यम् । अर्वाचीनानां मते अत्र भ्रान्तिमानलंकारः । तदुक्तं

इन्दुमप्यनुधावामीत्येषा मोहोपमा मता ॥ २५ ॥
किं पद्ममन्तर्भ्रान्तालि किं ते लोलेक्षणं मुखम् ।

११अप्पय्यदीक्षितेन (चि. मी. p. 64-5)—

कविसंमतसादृश्याद्विषये पिहितात्मनि ।
आरोप्यमाणानुभवो यत्र स भ्रान्तिमान् मतः ॥ इति ।

१४अत्राप्पय्यदीक्षितोक्तानि उदाहरणानि मनोहराणीति प्रदर्श्यन्ते—

कपाले मार्जारो पय इति करांल्लेढि शशिन-
स्तरुच्छिद्रप्रोतान् बिसमिति करी संकलयति ।
रतान्ते तल्पस्थान् हरति वनिताप्यंशुकमिति
प्रभामत्तश्चन्द्रो जगदिदमहो विप्लवयति ॥

१९क्वचित् भ्रान्तेरुत्तरोत्तरं पल्लवेन चमत्कारः—

बल्लालक्षोणिपाल त्वदहितनगरे संचरन्ती किराती
कीर्णान्यादाय रत्नान्युरुतरखदिराङ्गारशङ्काकुलाङ्गी ।
कृत्वा श्रीखण्डखण्डं तदुपरि मुकुलीभूतनेत्रा धमन्ती
श्वासामोदानुधावन्मधुकरनिकरैर्धूमशङ्कां तनोति ॥

२४क्वचित् भिन्नकर्तृकोत्तरोत्तरभ्रान्तिनिबन्धनेन चमत्कारः यथा—

शिञ्जानैर्मञ्जरीति स्तनकलशयुगं चुम्बितं चञ्चरीकै-
स्तत्रासोल्लासलीलाः किसलयमनसा पाणयः कीरदृष्टाः ।
तल्लोपायालपन्त्यः पिकनिनदधिया ताडिताः काकलोकै-
रित्थं चौलेन्द्रसिंह त्वदरिमृगदृशां नाप्यरण्यं शरण्यम् ॥

२९इति ॥ २९ ॥

संशयोपमामाह—किमिति। अन्तः भ्रान्तौ अली यस्य एतादृशं किमेतत् पद्मम् अथवेदं ते तव लोले चञ्चले ईक्षणे नयने यस्मिन् एतादृशं किं मुखम् इत्येवं विरुद्धनानार्थावगाहि मम चेतः दोलायते संशयं प्राप्नोति । इयं संशयोपमा । एकस्मिन् धर्मणि विरुद्धनानार्थावमर्शः संशयः । अस्य च सादृश्यपर्यवसायित्वादुपमाभेदे संग्रहः । अत्र

ii. 25—स्मृता for मता P, B, R, Cs.

ii. 26—किं वा for किं ते N.

मम दोलायते चित्तमितीयं संशयोपमा ॥ २६ ॥

न पद्मस्येन्दुनिग्राह्यस्येन्दुलज्जाकरी द्युतिः ।
अतस्त्वन्मुखमेवेदमित्यसौ निर्णयोपमा ॥ २७ ॥

६भ्रान्ताल्लित्वविलोलेक्षणत्वयोः बिम्बानुबिम्बिता तया च सादृश्यविकासः। अर्वाचीनास्तु इमां संदेहालंकारकारणमिति स्वीकुर्वन्ति तदुक्तं कविराजेन (p. 256)—सादृश्यमूला भासमानविरोधका समबला नाना-
९कोट्यवगाहिनी धी रमणीया संदेहालंकृतिः इति । उदाहरति च—

अधिरोप्य हरस्य हन्त चापं परितापं प्रशमय्य बान्धवानाम् ।
परिणेष्यति वा न वा युवायं निरपायं मिथिलाधिनाथपुत्रीम् ॥

१२इति ॥ २६ ॥

निर्णयोपमां वक्ति—न पद्मस्येति । इन्दुनिग्राह्यस्य चन्द्रनिगृहीतस्य चन्द्राभिभाव्यस्य पद्मस्य इन्दुलज्जाकरी अपकर्षत्वेन संकोचमापादयित्री
३द्युतिः कान्तिः न निगृहीतस्य निग्राहकत्वाभावादिति भावः। अतः इदम् इन्दुनिग्राहकत्वेन पुरोभासमानं वस्तु त्वन्मुखमेव तस्यैव तत्सामर्थ्यात् । एवशब्देन न पद्ममिति पद्मस्य व्युदासः । इत्यसौ निर्णयोपमा भवति ।
६उपमेयस्य निर्णयभङ्ग्या सादृश्यप्रकाशनादिति भावः । संशयानन्तरमेव निर्णयस्योद्भवनात् अत्रेदं पद्मं वा मुखं वा इति प्रथमं संशयः परिकल्पनीयः । संशयोत्तरस्यैव निर्णयस्य निर्णयालंकारत्वमुक्तमग्निपुराणे यथा
९(344. 18)—उपमेयस्य संशय्य निश्चयान्निश्चयोपमा इति। निश्चयोपमा निर्णयोपमा इति पर्यायौ । उदाहरणान्तरं यथा—

किं तावत् सरसि सरोजमेतदारा-
दाहोस्विन्मुखमवभासते तरुण्याः ।
संशय्य क्षणमिति निश्चिकाय कश्चि-
द्विम्बोकैर्बकसहवासिनां परोक्षैः ॥ इति ।

१५विश्वनाथादय एनां निश्चयालंकृतिमाहुः ॥ २७ ॥

---

ii. 26—डोलायते for दोलायते N, Cs.

ii. 27—कुतः for अतः V;—इतीयं for इत्यसौ M.

शिशिरांशुप्रतिद्वन्द्वि श्रीमत् सुरभिगन्धि च ।
अम्भोजमिव ते वक्त्रमिति श्लेषोपमा स्मृता ॥ २८ ॥
सरूपशब्दवाच्यत्वात् सा समानोपमा यथा ।

श्लेषोपमां दर्शयति—शिशिरांश्विति । ते वक्त्रम् अम्भोजमिव शिशि-
रांशुप्रतिद्वन्द्वि शिशिरांशुश्चन्द्रः तस्य प्रतिद्वन्द्वि प्रतिस्पर्धि अम्भोजपक्षे
[3]शिशिरांशुः प्रतिद्वन्द्वी यस्येति बहुव्रीहिः । श्रीमत् सुश्रीकम् प्रशंसायां
मतुप् । सुरभिगन्धि सुरभिः घ्राणतर्पकः गन्धः यस्य तत् । इति विशे-
षणत्रयं श्लेषेणोभयत्र संबन्धं लभते अतः इयं श्लेषोपमा स्मृता ।
[6]केचित्तु वक्त्रपक्षे शिशिरांशुप्रतिद्वन्द्विश्रीमत् इत्येकं पदं परिकल्प्य
शिशुरांशुप्रतिद्वन्द्विनी या श्रीः तद्विशिष्टम् इत्यर्थं प्रकाशयन्ति । पूर्वप-
द्धत्या अभङ्ग-श्लेषो भवति अनया तु सभङ्ग-श्लेषो भवति इति ज्ञेयम् ।
[9]श्लेषेण उपमा उपमानोपमेयगतसाधर्म्यं द्योत्यते यत्र सा श्लेषोपमेति
निरुक्तिः । श्लेषश्चात्र अर्थ-श्लेषः शब्द-श्लेषस्य वक्ष्यमाणसमानोपमा-
विषयत्वादिति अनुपदमेव स्फुटीभविष्यति । श्लेषस्य शब्दार्थवृत्तित्वं
[12]शब्दपरिवृत्यसहत्वसहत्वाभ्यां ज्ञेयम् । अत्र श्लेषस्य विद्यमानत्वेपि न
श्लेषालंकारः सादृश्यवैचित्र्ये श्लेषवैचित्र्यस्य निलीनत्वात् । यत्र यद्वै-
चित्र्यं प्रधानतयाविर्भवति तत्रैव तदलंकारव्यवहारः । एतेनात्र अलंकारान्त-
[15]रस्य श्लेषस्य सद्भावेपि न तत्त्वेन व्यपदेशः श्लेषवैचित्र्यस्य प्रधाने
सादृश्यवैचित्र्ये निलीनतया व्यपदेशकत्वाभावात् । प्राधान्येन व्यपदेशा
भवन्ति इत्युक्तेः इति केषांचिदुक्तिरपि एतदभिप्रायिकैवेति बोद्धव्यम् ।
[18]अत्र श्लेषानुप्राणिता उपमा ज्ञेया ॥ २८ ॥

समानोपमां निरूपयति—सरूपेति । सरूपं समानं भिन्नार्थमपि एक-
वर्णत्वेन अभिन्नं रूपं यस्य तादृशशब्देन वाच्यत्वात् प्रतिपाद्यत्वात्
[3]समानधर्मस्येति शेषः । सा प्रसिद्धा समानोपमा मता शिष्टानामिति

ii. 28—प्रतिस्पर्धि for प्रतिद्वन्द्वि P, B, Rn;—मता for स्मृता D, V, Cs, M.

ii. 29—सरूपोपमा for समानोपमा M, Pn; सन्दानोपमा N, V, Cs, J.

बालेवोद्यानमालेयं सालकाननशोभिनी ॥ २९ ॥
पद्मं बहुरजश्चन्द्रः क्षयी ताभ्यां तवाननम् ।
समानमपि सोत्सेकमिति निन्दोपमा स्मृता ॥ ३० ॥
ब्रह्मणोप्युद्भवः पद्मश्चन्द्रः शंभुशिरोधृतः ।

शेषः। तथा च यत्र श्लिष्टशब्देन साधारणधर्मोपस्थितिः सा समानोपमा। उदाहरति बालेति। इयमुद्यानमाला वनपङ्क्तिः बालेव वधूरिव सालकान-
६नशोभिनी सालानां वृक्षाणां काननं वनं तेन शोभिनी। वधूपक्षे अलकैः चूर्णकुन्तलैः सहितं सालकम् एवं यदाननं मुखं तेन शोभिनी। अत्र भिन्नयोरपि उपमानोपमेयधर्मयोः समानशब्दवाच्यत्वात् साधारण्यम्।
९अत्र वृक्षकाननेति परिवृत्तौ न श्लेषः अतः शब्दश्लेषेयमुपमा ॥ २९ ॥

निन्दोपमां लक्षयति—पद्ममिति। पद्मं बहुरजः परागधूलिधूसरम् चन्द्रश्च क्षयी क्षयिष्णुः अर्थात् कृष्णपक्षे तवाननं तु निर्मलत्वात् परागशून्यं
३सदा शोभापरिपूर्णत्वाच्च न क्षयिष्णु। अतः ताभ्यां पद्मचन्द्राभ्यां समानमपि तवाननं सोत्सेकं दोषशून्यत्वेन उत्कर्षशालि इति निन्दोपमा। उपमानस्य निन्दया साम्यस्य कीर्तनात् निन्दोपमा। अत्र केचित् रजः-
६क्षयशब्दाभ्यां रजोगुणक्षयरोगरूपार्थान्तरं श्लेषेणाङ्गीकृत्य तदेव दोषत्वेन कल्पयन्ति। तथा ताभ्यामिति पञ्चम्यन्तं स्वीकृत्य तत् सोत्सेकमित्यनेन संबध्य सोत्सेकशब्दस्य अधिकम् इत्यर्थं दर्शयन्ति। अत्र
९साम्यमात्रपर्यवसायित्वात् तत्रैव कवेरभिनिवेशात् प्रतीयमानेपि भेदे तस्य प्राधान्याभावान्न व्यतिरेकः। प्राधान्येन भेदचमत्कृतौ एव तस्य निश्चितत्वात् ॥ ३० ॥

प्रशंसोपमां दर्शयति—ब्रह्मण इति। पद्मः कमलम्—वा पुंसि पद्मं नलिनम् इत्यमरकोशात् पद्मशब्दस्य पुंस्त्वम्। पद्ममिति पाठे अप्रयुक्तत्व-
३दोषोपि न। ब्रह्मणोपि जगत्स्रष्टुरपि उद्भवः उत्पत्तिस्थानम्। तस्य

---

ii. 29—शाल for साल J.

ii. 30—सोत्कर्षं for सोत्सेकं D;—निन्द्योपमा for निन्दोपमा N;—मता for स्मृता V;—निन्दोपमेष्यते for निन्दोपमा स्मृता D.

ii. 31—पद्मं for पद्मः Cs, V, B (who explains the mistake by a natural confusion between श्र and श्र).

तौ तुल्यौ त्वन्मुखेनेति सा प्रशंसोपमोच्यते ॥ ३१ ॥
चन्द्रेण त्वन्मुखं तुल्यमित्याचिख्यासु मे मनः ।
स गुणो वास्तु दोषो वेत्याचिख्यासोपमां विदुः ॥ ३२ ॥
शतपत्रं शरच्चन्द्रस्त्वदाननमिति त्रयम् ।

अरविन्दनाभनाभ्यरविन्दजातत्वादिति भावः । तथा चन्द्रः शंभुशिरोधृतः शंकरस्य शशिखण्डमौलित्वादिति भावः । एतादृशौ महामहिमशालिनौ तौ त्वन्मुखेन तुल्यौ इति विपर्यासोपमया मुखस्य गुणातिशयवर्णनात् इयं प्रशंसोपमा इत्युच्यते । अयमाशयः । पद्मचन्द्रौ तावन्महामहिमगुणशालिभ्यां कमलासनशशिशेखराभ्याम् आश्रितौ इति अनुपमगुणशालिनौ तौ त्वन्मुखेनापि तुल्यौ इति अहो तेषां गुणराशिसंपत्तिः इति तौ अधिकगुणेनोपमानभूतेन मुखेन प्रशंसितौ तेन च मुखस्य गुणातिशयः व्यक्तो भवति । इयं विपर्यासोपमानुप्राणिता प्रशंसोपमा ज्ञेया । अत्र प्रशंसायाः प्राधान्यात् तद्वैचित्र्यकुक्षिनिलीनं विपर्यासोपमावैचित्र्यम् तेन न विपर्यासोपमेति ज्ञेयम् ॥ ३१ ॥

आचिख्यासोपमां व्याख्याति—चन्द्रेणेति । मे मनः चन्द्रेण त्वन्मुखं तुल्यम् इति आचिख्यासु विवक्षु वर्तते । स आख्यानाभिलाषः गुणो वा दोषो वा अस्तु इत्याचिख्यासोपमां विदुः पण्डिताः इति शेषः । अत्र गुणो वा दोषो वास्तु इत्यनेन आख्यानाभिलाषस्य समुद्रेकः दर्शितो भवति । तेन च मुखस्य उपमेयस्य चारुतातिशयो व्यञ्जितो भवति अत आचिख्यासया उपमेयचारुत्वपोषणादियमाचिख्यासोपमेति भावः । केचित्तु गुणो वा दोषो वास्तु इत्यनेन हृद्गतभावप्रकटनया सारल्यद्योतनाच्चारुत्वातिशयः इति मन्यन्ते ॥ ३२ ॥

विरोधोपमां दर्शयति—शतपत्रमिति । शतपत्रम् कुशेशयम् शरच्चन्द्रः शारदीयशर्वरीशः त्वदाननम् भवदीयाननं च एतत् त्रयं परस्परविरोधि अन्योन्यस्पर्धि । शतपत्रस्य विकासे दिवा चन्द्रस्य मालिन्यम् चन्द्रोदये

ii. 31—ते मुखेन for त्वन्मुखेन N, M, V;—प्रशंसोपमा मता for प्रशंसोपमोच्यते N, M.

ii. 32—आचिख्यासोपमा मता for आचिख्यासोपमां विदुः N, V, J.

परस्परविरोधीति सा विरोधोपमा मता ॥ ३३ ॥

न जातु शक्तिरिन्दोस्ते मुखेन प्रतिगर्जितुम् ।
कलङ्किनो जडस्येति प्रतिषेधोपमैव सा ॥ ३४ ॥
मृगेक्षणाङ्कं ते वक्त्रं मृगेणैवाङ्कितः शशी ।

रात्रौ शतपत्रस्य संकोचः इति ते परस्परविरुद्धे तयोरुभयोः तवाननेन सह विरुद्धत्वं त्वन्मुखसौरभ्याह्लादकत्वादिगुणमत्सरित्वादिति ज्ञेयम् । ६अस्य विरोधस्य साम्यपर्यवसायित्वादियं विरोधोपमा ॥ ३३ ॥

प्रतिषेधोपमां निर्दिशति—न जात्विति । इन्दोः ते मुखेन सह न जातु न कदाचिदपि प्रतिगर्जितुं प्रतिस्पर्धितुम् शक्तिः अस्तीति भावः । उक्तमर्थं ३विशेषणाभ्यां संपादयति । कलङ्किनः कलङ्कदूषितस्य तथा जडस्य शीतलस्य मूर्खस्येति च ध्वनिः । तथा च एतादृशस्य चन्द्रस्य निष्कलङ्किना अजडेन च ते मुखेन स्पर्धितुं का शक्तिरस्ति । अत्र सादृश्य-६प्रतिषेधेन उपमेयगुणस्योत्कर्षो वर्णितो भवति इति प्रतिषेधोपमा । पूर्वोक्तनिन्दोपमायां प्रतिषेधो नास्ति इति तस्या भेदः । नात्र परिकरशङ्का कर्तव्या कविनानेन परिकरस्य अगणितत्वात् । विशेषणद्वयानुपादाने ९इदं—मही महावराहेण लोहितादुद्धृतोदधेः इतिवन्नेयार्थदोषग्रस्तं भवेत् अतस्तद्दोषपरिहाराय विशेषणस्यावश्यकत्वं ज्ञेयम् । नवीनमते तु अपुष्टतादोषपरिहारार्थं तयोरावश्यकत्वं ज्ञेयम् । अपि चात्र औपम्यवर्णन-१२स्यैव प्राधान्यात् प्रतिषेधोपमैव स्वीकार्या इत्यलम् ॥ ३४ ॥

चटूपमां वर्णयति—मृगेक्षणाङ्कमिति । मृगस्य ईक्षणेन सदृशम् ईक्षणम् अवलोकनं मृगेक्षणं तदेव अङ्कं चिह्नं यस्य तन्मृगेक्षणाङ्कम् । अथवा ३मृगस्य ईक्षणे नयने मृगेक्षणे ते अङ्कं चिह्नं यस्य तन्मृगेक्षणाङ्कम् । मृगनयनसदृशनयनशोभितमित्यर्थः । शशी चन्द्रः मृगेणैव अङ्कितः भूषितः । तथापि वक्त्रं मृगस्य कयाचिदपि एकावयवक्रियया अथवा ६एकेनावयवेन युक्तम् शशी तादृशावयवसमुदायविशिष्टशरीरेण मृगेण

---

ii. 33—विरोधोपमोदिता for विरोधोपमा मता D.

ii. 34—प्रतिषेधोपमोच्यते for प्रतिषेधोपमैव सा D; प्रतिषेधोपमा मता M.

ii. 35—मृगेक्षणाद्वं for मृगेक्षणाङ्कं D;—त्वद्वक्त्रं for ते वक्त्रं D.

तथापि सम एवासौ नोत्कर्षीति चटूपमा ॥ ३५ ॥
न पद्मं मुखमेवेदं न भृङ्गौ चक्षुषी इमे ।
इति विस्पष्टसादृश्यात् तत्त्वाख्यानोपमैव सा ॥ ३६ ॥
चन्द्राराविन्दयोः कक्ष्यामतिक्रम्य मुखं तव ।

युक्तः अतस्तत्साधनसंपत्तिरधिका एवं स्थितेपि । असौ शशी सम एव वदनेन समान एव एवशब्देनाधिक्यव्यवच्छेदः । नोत्कर्षीति एवकार-
५व्यवच्छेद्यमेव स्फुटतयाभिहितम् । अयमाशयः अधिकसाधनवता अधिकोत्कर्षेण भाव्यम् । परं तादृशविशेषसाधनसंपत्तिमानपि शशी न मुखतो विशेषशोभाशाली इति शशिनः समीकरणे मुखस्य सौन्दर्यपरि-
१२पोषो दर्शितः । एतादृशवर्णनशैली सुमधुरा इति चटूपमा । चटुः प्रियोक्तिपरा उपमा औपम्यवर्णनम् । अत्रोत्कर्षकारणे सत्यपि नोत्कर्षः
१४इति विशेषोक्तिः । तस्या लक्षणमग्रे (ii. 323)—

गुणजातिक्रियादीनां यत् तु वैकल्यदर्शनम् ।
विशेषदर्शनायैव सा विशेषोक्तिरिष्यते ॥

इति ग्रन्थकृतैव दर्शितम् । विशेषोक्तिमूला एव चटूपमा अन्यथा सर्वत्रो-
१८पमायां चटूक्तिसंभवात् सर्वत्रेयमेव स्यात् इति प्रेमचन्द्रशर्माणः ॥३५॥

तत्त्वाख्यानोपमां दर्शयति—न पद्ममिति । इदं पद्मं न किंतु मुखमेव इमौ भृङ्गौ न किंतु चक्षुषी एव । इत्येवं विधिनिषेधप्रकारेण विस्पष्टसादृश्यात्
३सादृश्यस्य स्पष्टीकरणात् । सदृशे भ्रान्तिर्भवति अत्र च भ्रान्तेरपनयनात् सा पूर्वमासीत् इति निष्पन्नम् । सा च सादृश्यमूला इति सादृश्यस्य प्रकटीकरणात् तत्त्वाख्यानोपमा इयं ज्ञेया । भ्रमनिरासाय भ्रमविषयस्य
६तत्त्वस्य यथार्थस्वरूमाविष्करणं तत्त्वाख्यानम् तन्मूलमस्याः अतस्तत्त्वाख्यानोपमा । निर्णयोपमायां संशयपूर्वकं तत्त्वाख्यानम् अत्र तु भ्रान्तिपूर्वकमित्युभयोर्भेदः ॥ ३६ ॥

असाधारणोपमामाह—चन्द्रेति । तव मुखं चन्द्राराविन्दयोः कान्तिं शोभाम् अतिक्रम्य स्वकान्त्या विजित्य आत्मनैव स्वेनैव तुल्यमभवत् ।

---

ii. 35—चाटूपमा for चटूपमा Cs.

ii. 37—कक्षां for कक्ष्यां M, V; कान्तिं P, B, D, Rn, J.

आत्मनैवाभवत् तुल्यमित्यसाधारणोपमा ॥ ३७ ॥

सर्वपद्मप्रभासारः समाहृत इव क्वचित् ।
त्वदाननं विभातीति तामभूतोपमां विदुः ॥ ३८ ॥

३इति असाधारणोपमा । चन्द्रपद्मे एव मुखस्योपमानतया प्रसिद्धे तयोरतिक्रमे तु अन्योपमानस्य विरहात् स्वस्मिन्नेव उपमानोपमेयभावः विश्रान्तः तेन च औपम्यस्य असाधारणत्वं निष्पन्नम् अत इयम् असाधारणो-
६पमा । न च एकस्यैवोपमानोपमेयत्वं कथमिति वाच्यम् आहार्यभेदेन भिन्नत्वात् । आहार्यत्वं नाम बाधकालिकेच्छाजन्यं ज्ञानम् । अत्र बाधशब्देन बाधकं ज्ञानमपेक्ष्यते तच्च मुखं चन्द्रः इत्यत्र मुखं
९चन्द्रो न इति तात्कालिकी या मुखे चन्द्रत्वज्ञानं मे जायतामिति इच्छा तज्जन्यं यत् ज्ञानं मुखं चन्द्रः इति तदाहार्यम् ॥ ३७ ॥

अभूतोपमामाह—सर्वेति । क्वचिदेकत्रस्थाने विधात्रा समाहृतः संगृहीतः सर्वपद्मप्रभासारः सर्वेषां पद्मानां प्रभायाः सारः कान्तिपुञ्जः इव
३त्वदाननं विभाति । इति एवंप्रकारां तां प्रसिद्धाम् अभूतोपमाम् उपमेयस्य वर्णनाय संभावनया कल्पितस्य उपमानस्य वस्तुतः अभूतत्वात् तादृशेन अभूतेन उपमानेन औपम्यस्य वर्णनमभूतोपमा इति समाख्या-
६निरूपणम् । नात्र इवशब्दः संभावनार्थकः अपि तु साधर्म्यवाचकः । तेन समाहृत इत्यस्य संभावनया समाहरणेपि उत्प्रेक्षावाचकाभावात् केवलसंभावनाचमत्कृत्यपेक्षया तादृशसंभावनानिष्पन्नोपमानसादृश्यवर्ण-
९नचमत्कृतेः प्राधान्यादत्र उपमैव ज्ञेया । केचित्तु इवशब्दं समाहृतशब्देन संयुज्य संभावनायाः प्राधान्यादत्रोत्प्रेक्षां वदन्ति । प्रस्तुते अप्रस्तुतस्य धर्मिणः यत्र संभावना तत्रोत्प्रेक्षा यत्र तु प्रस्तुते अप्रस्तुतधर्मस्य
१२संभावना तथा च प्रस्तुताप्रस्तुतयोः प्रतीतिः न तत्रोपमा इति प्राचामाशयं विवृण्वन्ति । परं पूर्वोक्तप्रक्रियया संभावनाया उत्थितिरेव नात्रेति सुधीभिर्विचारणीयम् । वस्तुतः अविद्यमानस्य केवलं कविप्रतिभया नि-
१५ष्पाद्यमानस्य धर्मिणः यत्र वर्णनं तत्राभूतोपमा । स्वयं विद्यमानस्य धर्मिणः यत्रान्यधर्मिणां संमेलनकल्पनया साम्यवैचित्र्यवर्णनं तत्राद्भुतोपमा इत्युभयोर्भेदः ॥ ३८ ॥

---

ii. 38—इति for इव N;—तवाननं for त्वदाननं Cs, M.

चन्द्रबिम्बादिव विषं चन्दनादिव पावकः ।
परुषा वागितो वक्त्रादित्यसंभावितोपमा ॥ ३९ ॥
चन्दनोदकचन्द्रांशुचन्द्रकान्तादिशीतलः ।
स्पर्शस्तवेत्यतिशयं प्रथयन्ती बहूपमा ॥ ४० ॥
इन्दुबिम्बादिवोत्कीर्णं पद्मगर्भादिवोद्धृतम् ।

असंभावितोपमामाह—चन्द्रबिम्बादिति । इतः एतस्मात् वक्त्रात् वदनात् परुषा कठोरा वाक् चन्द्रबिम्बात् विषमिव चन्दनात् पावक इव ३निःसरेदिति शेषः । अत्र उपमानभूताभ्यां चन्द्रचन्दनाभ्यां विषपावकनिःसरणस्येव वदनात् परुषवाङ्निःसरणस्य असंभावितत्वादसंभावितोपमा ॥ ३९ ॥

बहूपमां दर्शयति—चन्दनेति । चन्दनोदकं मलयाङ्गरागः चन्द्रांशुः इन्दुकिरणं चन्द्रकान्तः मणिविशेषः एतदादयः मृणालकदलीपत्रमुक्ता-३हारादयः ते इव शीतलः सुखकरः । उपमानानि सामान्यवचनैः इति कर्मधारयः । तव प्रकृतनायिकायाः स्पर्शः अस्ति इति शेषः । इति अतिशयम् प्रस्तुते शैत्यगुणातिशयम् उपमानान्तरेषु वर्णितगुणेभ्यः अति-६शयं बोधयन्ती प्रकटीकुर्वती बहूपमा एतन्नाम्ना व्यवहृता भवति । एकस्योपमेयस्य बहूपमाननिबन्धनेन साम्योत्कर्षविधायित्री इति बहुपमेत्यर्थः । यथा बहूनां मधुररसानां संमेलने चारुत्वातिशयः तथा बहूपमानदर्शनेन ९उपमेयधर्मस्य चारुत्वातिशयः इति केवलोपमाया अस्या भेदः । अर्वाचीनास्तु एनां मालोपमामाहुः ॥ ४० ॥

विक्रियोपमामाह—इन्दुबिम्बादिति । हे तन्वङ्गि तव वदनम् इन्दुबिम्बादुत्कीर्णमिव उट्टङ्कितमिव पद्मगर्भात् पद्ममध्यात् उद्धृतमिव इत्यसौ

---

ii. 39—असंभावनोपमा for असंभावितोपमा V.

ii. 40—कान्ताति for कान्तादि M;—बोधयन्ती for प्रथयन्ती P, B, R.

ii. 41—चन्द्र for इन्दु M, J, P, B, R;—उद्गीर्ण for उत्कीर्ण a variant mentioned by Cs.

तव तन्वङ्गि वदनमित्यसौ विक्रियोपमा ॥ ४१ ॥
पूष्ण्यातप इवाह्नीव पूषा व्योम्नीव वासरः ।
विक्रमस्त्वय्यधाल्लक्ष्मीमिति मालोपमाक्रमः ॥ ४२ ॥
वाक्यार्थेनैव वाक्यार्थः कोपि यद्युपमीयते ।

३विक्रियोपमा । अत्रोपमानभूतौ इन्दुबिम्बपद्मगर्भौ प्रकृती वदनं विकृतिः । प्रकृतिविकृत्योः साम्यमस्ति इति विक्रियया उपमानविकारभूतोपमेयवर्णनेन उपमा अतो विक्रियोपमा । तथा चोक्तम् अग्निपुराणे(344.15)—

६उपमानविकारेण तुलना विक्रियोपमा इति । अन्यत्रापि—

उपमेयस्य यत्र स्यादुपमानविकारता ।
प्रकृतेर्विकृतेः साम्यात् तामाहुर्विक्रियोपमाम् ॥ इति ।

९अत्रापि पूर्ववदुपमानवैचित्र्यविलीनमुत्प्रेक्षासाम्यमतो नोत्प्रेक्षा इति ज्ञेयम् ॥ ४१ ॥

मालोपमामाह—पूष्ण्यातप इति । आतप इव प्रकाशो यथा पूष्णि सूर्ये पूषा यथा अह्नि दिवसे वासरः दिवसः यथा व्योम्नि आकाशे ३तथा विक्रमः पराक्रमः त्वयि लक्ष्मीम् अधात् निहितवान् इति एवंप्रकारा मालोपमा मालायां यथा ग्रथितस्य एकस्य कुसुमस्य अपरेण तस्यापि अपरेण इति परस्थितस्य कुसुमस्य संश्लेषो भवति तथा पूर्वपूर्ववाक्यस्थिता-६धिकरणपदार्थस्योत्तरोत्तरवाक्यस्थोपमानत्वनिवेशनेन संबन्धात् इयं मालोपमा मता आलंकारिकसंमता । अयमेव रचनावैचित्र्यविशेषः बहूपमातः अस्या भेदकः । बहूपमायां केवलमुपमाबाहुल्यम् अस्यां तु ९पूर्ववाक्यस्थपदस्य उत्तरत्र संबन्धः एवमुपमाबाहुल्यम् । नव्यास्तु प्रकारद्वयेपि मालोपमामेव मन्यन्ते । तत् रचनावैचित्र्यविशेषाज्ञानविजृम्भितमिति प्रेमचन्द्रशर्माणः ॥ ४२ ॥

वाक्यार्थोपमां लक्षयति—वाक्यार्थेनेति । वाक्यार्थेनैव वाक्यार्थो विशे-

---

ii. 41—विक्रयोपमा for विक्रियोपमा D, M.

ii. 42—मालोपमा मता for मालोपमाक्रमः P, B, R, M.

ii. 43—वाक्येनैव तु for वाक्यार्थेनैव D, K.

एकानेकेवशब्दत्वात् सा वाक्यार्थोपमा द्विधा ॥ ४३ ॥
त्वदाननमधीराक्षमाविर्दशनदीधिति ।

षणविशेष्यतामापन्न उद्देश्यविधेयभावप्रधान एकतिङ्घटितः पदसमूहः ३तेन । एवकारेण पदार्थोपमानिवृत्तिः । कोपि वाक्यार्थः तादृश एव काश्चित् प्रस्तुतवाक्यार्थः यदि उपमीयते तर्हि सा वाक्यार्थोपमा भवति । वाक्यार्थयोः उपमानोपमेयभावेन साम्यस्य वर्णनात् सा वाक्यार्थोपमा इति ६व्यवह्रियते । सा च एकानेकेवशब्दत्वात् एकानेकेवशब्दोपादानात् द्विधा द्विप्रकारा । अयमाशयः यदा वाक्यस्थितप्रतिपदार्थसाम्यावबोधनेच्छा तदा प्रत्युपमानं पुरतः इवशब्दप्रयोगस्य आवश्यकत्वात् ९अनेकेवशब्दप्रयोगः यदा तु प्रधानपदार्थान्वयबोधोत्तरं पश्चात् पर्यालोचनया अवान्तरपदार्थानां साम्यं प्रतीतिपदवीमारोहति तदा प्रधानोपमानपुरतः एव इवशब्दप्रयोगेण एकेनैव सकलार्थसिद्धिरिति एके- १२वशब्दप्रयोगः । एतादृशसाङ्गोपमायां प्रायः कवय इवशब्दं प्रयुञ्जते इति लक्षणे इवशब्दोपादानम् । अत्र अप्रस्तुतेन अवयवविशिष्टावयविना प्रस्तुतस्य अवयवविशिष्टावयविनः साम्यवर्णनमपेक्षितं भवति । अयमेव वाक्यार्थो- १५पमायां वैचित्र्यातिशयः अन्यथा—यथा व्योम्नि विधुर्भाति तथा भूम्यां मुखं तव । इत्यत्रापि वाक्यार्थोपमा स्यात् । भवतु नाम सा किं नश्छिन्नमिति चेन्न पदार्थोपमाया अस्या वैचित्र्यविशेषाभावात् वैचित्र्यविशेष- १८स्यैव अलंकारान्तरविधायकत्वात् ॥ ४३ ॥

एकेवशब्दघटितां वाक्यार्थोपमामुदाहरति—त्वदाननमिति । अधीरे चकितचञ्चले अक्षिणी नयने यस्मिन् तत् अधीराक्षम् आविः आविर्भवन्त्यः ३दशनानां रदानां दीधितयः किरणानि यस्मिन् तत् आविर्दशनदीधिति एतादृशं तवाननम् भ्रमन्तौ संचरन्तौ भृङ्गौ यत्र तत् भ्रमद्भृङ्गम् आ ईषत् लक्ष्याः केसराः किञ्जल्काः यत्र तादृशं पङ्कजमिव भाति । अत्र सावयवस्य ६आननस्य सावयवेन पद्मेन साम्यम् उपमानम् उपमेयात्मकवाक्यद्वयेन वर्णितम् । एवं वाक्यार्थगतत्वात् वाक्योपमेयम् । अत्र विशिष्टयोरेवोप-

---

ii. 43—एकेनैकेवशब्दत्वात् later emendation for एकानेकेवशब्दत्वात् V.

ii. 44—तदाननम् for त्वदाननम् V.

भ्रमद्भृङ्गमिवालक्ष्यकेसरं भाति पङ्कजम् ॥ ४४ ॥
नलिन्या इव तन्वङ्ग्यास्तस्याः पद्ममिवाननम् ।
मया मधुव्रतेनेव पायं पायमरम्यत ॥ ४५ ॥
वस्तु किंचिदुपन्यस्य न्यसनं तत्सधर्मणः ।

मानोपमेयत्वप्रतीतिरिष्टा इति एकेवशब्दप्रयोगः । विशिष्टयोः पद्म-
९मुखयोः साम्यबोधानन्तरं पर्यालोचनया अवयवानां विशेषणानां साम्य-
प्रतीतिः बुद्ध्यारूढा भवति । अत्र उपमानोत्तरतः इव शब्दप्रयोगविर-
हात् उपमानोत्तरत एव इवशब्दः प्रयोक्तव्य इति नियमं प्राचीना न
१२मन्वते इति भाति ॥ ४४ ॥

अनेकेवशब्दप्रयोगघटितां वाक्योपमां दर्शयति—नलिन्या इति । नलिन्याः नलिनानि कमलानि सन्ति अस्याः इति नलिनी पद्मलता तस्या इव
३तन्वङ्ग्याः पद्ममिव आननं मधुव्रतेन भ्रमरेण इव मया पायं पायं पीत्वा पीत्वा अरम्यत भावे लङ् । मधुव्रतेनेव मया इति प्रधानोपमानोपमेयौ । नलिनी-तन्वङ्गीपद्ममुखादयः अङ्गभूताः तत्र प्रत्युपमानम् इवशब्दप्रयोगः । तेन
६च अङ्गाङ्गिनोः साम्यं शाब्दबोधविषयीभवत् चमत्कारातिशयं जनयति। अत्र साम्यबोधः अङ्गवाक्यानां शाब्दः पूर्वोदाहरणे तु अङ्गिनः शाब्दः इतरेषां तु उन्नयनोद्भवः इति भेदः ॥ ४५ ॥

प्रतिवस्तूपमालक्षणं विधत्ते—वस्तु किंचिदिति । किंचिदपि किमपि प्रकृतं वस्तु उपन्यस्य प्रथमं प्रतिपाद्य तत्सधर्मणः तस्य प्रकृतस्य सधर्मणः
३समानधर्मस्य अप्रस्तुतस्य न्यसनात् प्रस्तुतवस्तुसमर्थनाय वाक्यान्तरेण प्रतिपादनात् साम्यप्रतीतिः इवादिशब्दप्रयोगाभावेपि व्यञ्जनया सादृश्या
वबोधो भवतीति प्रतिवस्तु प्रतिवाक्यार्थम् उपमा समानधर्मो यस्यां सा
६प्रतिवस्तूपमा भवति । सधर्मणः इतिपदेन अप्रस्तुतवाक्येपि धर्मोपादनम-
वश्यमिति सूचितम् तदुक्तं काव्यप्रकाशे (p. 769)—प्रतिवस्तूपमा

---

ii. 45—मधुव्रतेनैव for मधुव्रतेनेव D.

ii. 46—न्यसनात् for न्यसनं all except M, J, N, V;—सदनं Cs (which gives न्यसनं as a variant).

साम्यप्रतीतिरस्तीति प्रतिवस्तूपमा यथा ॥ ४६ ॥

नैकोपि त्वादृशोद्यापि जायमानेषु राजसु ।
ननु द्वितीयो नास्त्येव पारिजातस्य पादपः ॥ ४७ ॥

तु सा सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः इति । वाक्ययोरे-
९कसामान्ये प्रतिवस्तूपमा मता इत्यप्पय्यदीक्षितः । व्याख्याति च
यत्रोपमानोपमेयवाक्ययोरेकः समानो धर्मः पृथक् निर्दिश्यते सा प्रति-
वस्तूपमा इति । पृथङ्निर्देशनं कथितपदस्य दुष्टत्वाभिधानात् भिन्नवा-
१२चकेन ज्ञेयम् ॥ साम्यप्रतीतिरस्तीतीत्यनेन उपमाजीवातुसाम्यस्यात्र
प्राधान्येन भानात् उपमाविशेषे एव अस्या अन्तर्भाव उचितः वैचित्र्या-
न्तराभावात् नालंकारान्तरं युक्तम् इति ध्वन्यते ।अनेन प्रतिवस्तूपमायां
१५अलंकारान्तरविधानम् न क्षोदक्षममिति बोद्धव्यम् । यथा इत्युदाहरणो-
पन्यासाय ॥ ४६ ॥

प्रतिवस्तूपमामुदाहरति—नैकोपीति । जायमानेषु उत्पद्यमानेषु इद-
मुपलक्षणं जातेष्वपि । तेन अद्यापीतिवचनं सुसंगतं भवति। तथा च जातेषु
३जायमानेषु राजसु अद्यापि अद्ययावत्कालपर्यन्तम् एकोपि त्वादृशो नास्ति ।
ननु इति निश्चये । पारिजातस्य राहोः शिर इतिवत् भेदविवक्षया षष्ठी ।
पारिजातवृक्षः द्वितीयो नास्त्येव एक एव समुल्लसतीत्यर्थः । पारिजा-
६तस्य द्वितीयो पादपो नास्ति इति वान्वयः । अत्र सदृशो नास्ति द्वितीयो
नास्ति इति एक एव समानो धर्मः शब्दान्तरेण वाक्यद्वये निर्दिष्ट इति
८प्रतिवस्तूपमा । साम्यं चात्र गम्यम् । इयं वैधर्म्येणापि भवति यथा—

विद्वानेव हि जानाति विद्वज्जनपरिश्रमम् ।
न हि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम् ॥

११इति । यथा वा—

यदि सन्ति गुणाः पुंसां विकसन्त्येव ते स्वयम् ।
न हि कस्तूरिकामोदः शपथेन विभाव्यते ॥

१४इति ॥ ४७ ॥

---

ii. 47—तादृशो जातो for त्वादृशोद्यापि D.

अधिकेन समीकृत्य हीनमेकक्रियाविधौ ।
यद्ब्रुवन्ति स्मृता सेयं तुल्ययोगोपमा यथा ॥ ४८ ॥
दिवो जागर्ति रक्षायै पुलोमारिर्भुवो भवान् ।

इदानीं तुल्ययोगोपमां लक्षयति—अधिकेनेति। एकक्रियाविधौ एकजातीयक्रियाया अनुष्ठाने हीनं न्यूनगुणं वस्तु अधिकेन गुणाधिकवस्तुना ३समीकृत्य समानं विधाय यत् सप्तम्यर्थकमव्ययमेतत् यत्र चमत्कृतौ ब्रुवन्ति वैचित्र्येण कथयन्ति सेयं तुल्ययोगोपमा। हीनाधिकयोः तुल्यत्वेन योगः संबन्धः तेन संबन्धेन औपम्यं यत्र सा तुल्ययोगोपमा इति ६स्मृता। तथा च एकजातीयक्रियया प्रस्तुताप्रस्तुतयोः हीनाधिकयोः साम्यकीर्तनं तुल्ययोगोपमा इति फलितम्। प्रकृतानामप्रकृतानां वा एकधर्मसंबन्धरूपा अर्वाचीनैरुक्ता तुल्ययोगिता तु भिन्नैव स्वरूपभेदात्। ९तथा अग्रे वक्ष्यमाणा (ii. 330)—

विवक्षितगुणोत्कृष्टैर्यत् समीकृत्य कस्यचित् ।
कीर्तनं स्तुतिनिन्दार्थं सा मता तुल्ययोगिता ॥

१२इयमपि भिन्नैव। अस्यां तुल्ययोगितायां सर्वस्य समकक्षतया वर्णनस्यापेक्षिततया न तत्रोपमानोपमेयभावस्यापेक्षा। तेन च न साम्यं वाच्यं व्यङ्ग्यं वात्र समुद्भवति पर्यालोचनया पर्यवसाने तत् यथाकथंचित् प्रतीति- १५पदवीमारोहति। तुल्ययोगोपमायां तु प्रकृताप्रकृतत्वेनोपमानोपमेयभावस्य विवक्षितत्वादत्रसाम्यं वाच्यमर्यादया व्यङ्ग्यमर्यादया वा शब्दादेव प्रतीतं भवति इत्युभयोर्भेदः। तथैव च स्तुतिनिन्दार्थं तुल्ययोगिताप्रवृत्तिः १८केवलसमत्वापादनाय च तुल्ययोगोपमाप्रवृत्तिः इति प्रवृत्तिनिमित्तभेदेनापि उभयोर्भेदः इति बोद्धव्यम्। यथेत्युदाहरणोपन्यासाय ॥ ४८ ॥

तुल्ययोगोपमामुदाहरति—दिवो जागर्तीति । पुलोमारिः इन्द्रः । २इन्द्रेण श्वशुरः पुलोमा निहतः तदुक्तं हरिवंशे—

---

ii. 48—समाहृत्य for समीकृत्य N, Cs, M, J, Cb, (?) —यद्वदन्ति for यद्ब्रुवन्ति D.

ii. 49—भवान् भुवः for भुवो भवान् D.

असुरास्तेन हन्यन्ते सावलेपास्त्वया नृपाः ॥ ४९ ॥
कान्त्या चन्द्रमसं धाम्ना सूर्यं धैर्येण चार्णवम् ।
राजन्ननुकरोषीति सैषा हेतूपमा मता ॥ ५० ॥
न लिङ्गवचने भिन्ने न हीनाधिकतापि वा ।

कृत्वा संबन्धकं चापि विश्वसेच्छत्रुणा न हि ।
पुलोमानं जघानाजौ जामाता सञ् शतक्रतुः ॥ इति ।

दिवः स्वर्गस्य रक्षायै जागर्ति अवहितो भवति भवान् भुवः रक्षायै ६जागर्ति । तेन पुलोमारिणा असुरा हन्यन्ते त्वया सावलेपाः उद्धताः नृपाः हन्यन्ते । अत्र हीनस्य प्रस्तुतस्य राज्ञः गुणाधिकेन महेन्द्रेण सह एकजाती-यक्रियाविधानेन तुल्यताप्रतिपादनात् तुल्ययोगोपमा । अत्र साधर्म्यं ९व्यङ्ग्यम् ॥ ४९ ॥

हेतूपमां उदाहरणेन दर्शयति—कान्त्येति । निगदेनेवार्थो भवति । अत्र चन्द्रादिभिः समं नृपगतसादृश्यस्य कान्त्यादयो हेतवो निर्दिष्टाः ३अतो हेतूपमा ॥ ५० ॥

एवं विविधभेदसहितामुपमां विस्तरतो निरूप्य प्रसङ्गतस्तद्गतान् दोषान् विवक्षुरादौ प्राचीनोक्तं निरपवादं दोषस्वरूपं खण्डयति—नेति । ३भामहो हि उपमाया इत्थं दोषानाह (ii. 39-40)—

हीनतासंभवो लिङ्गवचोभेदो विपर्ययः ।
उपमानाधिकत्वं च तेनासदृशतापि च ॥
त एते उपमादोषाः सप्त मेधाविनोदिताः । इति ।

७अत्र विपर्ययः असादृश्यम् असंभवश्चेति त्रयो दोषाः यथाकथंचित् सादृश्यं यत्रोद्भूतं प्रतीयते इत्युपमालक्षणे सादृश्यस्य उद्भूतविशेषणत्वेनैव निरस्ता ९भवन्तीति न विचारणीयाः । उर्वरितदोषचतुष्टयस्य उद्वेगतानुद्वेगते विमृ-श्येते । यत्र धीमतां सहृदयानाम् उद्वेगः प्रतीतिविघातजन्यसंत्रासो न

---

ii. 49—नृपास्त्वया for त्वया नृपाः D, V.

ii. 50—स्मृता for मता N, Cs, D (emended to मता in the margin).

उपमादूषणायालं यत्रोद्वेगो न धीमताम् ॥ ५१ ॥

स्त्रीव गच्छति षण्ढोयं वक्त्येषा स्त्री पुमानिव ।
प्राणा इव प्रियोयं मे विद्या धनमिवार्जिता ॥ ५२ ॥

भवति तादृशस्थले भिन्ने उपमानोपमेयपदयोः पृथग्भूते लिङ्गवचने तथा १२हीनाधिकता उपमानस्य न्यूनत्वम् अधिकत्वं च उपमादूषणाय नालम् समर्थानि न भवन्ति। एवं च धीमतामुद्वेग एव दोषस्य कारणम् तदुक्तमाग्नेये (347. 29)—विभक्तिसंख्यालिङ्गानां यत्रोद्वेगो हि धीमताम् इति । स- १५चोद्वेगः विशेषणविशेष्यादिपदानां परस्परसंबन्धक्लेशरूपो विगीतवर्णने समुद्भवति। यदि केनापि विशेषकारणेन स न प्रादुर्भवेत् तर्हि तत्र नास्ति उपमादीनां दुष्टत्वम्। प्रायः भिन्नलिङ्गवचनयोरुपमानोपमेययोः एकतरलिङ्ग- १८वचनानुगतेन समानधर्मेण तदन्येन भिन्नलिङ्गवचनविशिष्टेन संबन्धो दुष्करो भवति अत एतादृशी उपमा उद्वेगकरी। तथा उपमानस्य हीनतायां उपमेयस्यानुत्कर्षात् अधिकतयां च तत्सापेक्षतया उपमे- २१यस्यात्यन्तनिकृष्टत्वेन वैरस्येनोद्वेगो भवति। एतच्चाग्रे उदाहरणे स्फुटीभविष्यति ॥ ९१ ॥

तत्र लिङ्गवचनभेदस्य निर्दोषत्वं दर्शयति—स्त्रीवेति। अत्र षण्ढः स्त्रीव गच्छति एषा स्त्री पुमानिव वक्ति इति वाक्यद्वये गमनवचनक्रियाया ३एव साधारणधर्मत्वात् तस्य च भिन्नलिङ्गयोरुपमानोपमेययोरक्लेशेनैवान्वयान्न भिन्नलिङ्गदोषः। अयं जनः मे प्राणा इव प्रियः तथा मया विद्या धनमिव अर्जिता संपादिता इत्यत्र च प्राणशब्दः नित्यबहुवच- ६नान्तः धनशब्दश्च नित्यनपुंसकः। नानयोः पर्यायशब्दाः प्रकृतोचितलिङ्गवचनाः। अतोगतिकगत्या यथा प्राणाः प्रियास्तथायं मे प्रियः यथा च धनमर्जितं तथा विद्या अर्जिता इति लिङ्गविपरिणामेन अन्व- ९यः संपाद्य एव। अत्र च नोद्वेगः सहृदयानाम् अन्यगतेरभावात् अतोत्र नोपमादोषः। अनयैव दिशा चन्द्र इव मुखम् सुधावदधरः इत्यादिस्थले प्रतीतिमान्यर्थाभावान्नोपमा दुष्टा इति ज्ञेयम् ॥ ९२ ॥

---

ii. 52—स्त्रीवद्गच्छति for स्त्रीव गच्छति D;—वदत्येषा for वक्त्येषा D;—अर्जिताः for अर्जिता Rn, Cb.

भवानिव महीपाल देवराजो विराजते ।
अलमंशुमतः कक्षामारोढुं तेजसा नृपः ॥ ५३ ॥
इत्येवमादि सौभाग्यं न जहात्येव जातुचित् ।

उपमानस्य हीनाधिकत्वयोर्निर्दोषतां दर्शयति—भवानिति । हे महीपाल राजन् भवान् इव देवराजः महेन्द्रः विराजते । अत्र नृपतेर्मर्त्यधर्मत्वात् प्रकृतदेवतास्वरूपाद्देवराजादपकृष्टत्वं स्पष्टमेव । तथापि राज्ञां लोकपालांशसंभवत्वेन केषांचिद्देवराजसदृशपरामक्रशालित्वेन च नेदं वैरस्यमावहति । राज्ञां लोकपालांशत्वमाह मनुः (v. 96)—अष्टानां लोकपालानां वपुर्धारयते नृपः इति । अन्यत्रापि—

इन्द्रात् प्रभुत्वं तपनात् प्रतापं क्रोधं यमाद्वैश्रवणाच्च वित्तम् ।
आह्लादकत्वं च निशाधिनाथादादाय राज्ञः क्रियते शरीरम् ॥ इति ।

इयं च विपर्यासोपमा । अस्यां च पर्यायेणोपमेयस्यैव वर्णनं भवति । तेन चात्र न पर्यवसाने हीनतादोषः समुद्भवतीति अरुचिं प्रदर्श्य केचित्—

उत्सङ्गितकुरङ्गोयमृक्षमण्डलमध्यगः ।
विधुर्व्याघ्र इवाभाति हन्तुं विरहदुर्बलान् ॥

इति पद्यमुदाहरन्ति । अत्र श्लिष्टविशेषणाभ्यां प्रतीयमानं निकृष्टस्यापि व्याघ्रस्योपमानत्वं न दोषाय भवति प्रत्युत विरहिनिषूदनक्रौर्यसूचनाय तदतीवोपयुक्तमिति कथयन्ति । तेजसा नृपः अंशुमतः सूर्यस्य कक्षां साम्यम्—

पापे कक्षा त्विभरज्ज्वां काञ्च्यां हेमप्रकोष्ठके ।
भित्तौ साम्ये रथभागेन्तरीये पश्चिमाचले ॥

इति हेमचन्द्रः । आरोढुम् आक्रमितुम् अलं पर्याप्तः । अत्र जात्याधिकोंशुमान् उपमानीकृतः परं पूर्वोक्तदिशा नृपस्य तदंशत्वान्नोद्वेगकरं तत् इति ज्ञेयम् ॥ ५३ ॥

दोषस्य दोषाभावप्रस्तावमुपसंहरति—इतीति । इत्येवमादि एतदादि-

---

ii. 53—महाराज for महीपाल D;—कक्ष्यां for कक्षां Cs, R; कान्तिं V.
ii. 54—इत्येवमादौ for इत्येवमादि P, B, R.

अस्ति च क्वचिदुद्वेगः प्रयोगे वाग्विदां यथा ॥ ५४ ॥

हंसीव धवलश्चन्द्रः सरांसीवामलं नभः ।
भर्तृभक्तो भटः श्वेव खद्योतो भाति भानुवत् ॥ ५५ ॥
ईदृशं वर्ज्यते सद्भिः

वर्णनं जातुचित् कदाचिदपि सौभाग्यम् अनुद्वेगेन वैचित्र्यसौन्दर्यं न जहाति ३न त्यजति । तर्हि किं सर्वथा दोषा न सन्त्येव इति चेन्न । क्वचित् प्रयोगे वाग्विदां सहृदयानाम् उद्वेगः प्रतीतिमान्थर्येण वैचित्र्यव्याघातेन वा संत्रासः अस्त्येव । यथा इति उदाहरणप्रस्तावाय। अत्र केचित् इत्येव- ६मादौ इति सप्तम्यन्तपाठं स्वीकृत्य जहाति इत्यस्य कर्तृपदं लिङ्गवचन- भेदो हीनाधिकता च इति मत्वा सौभाग्यं प्रस्तुतस्योत्कर्षं न जहाति न प्रतिबध्नाति इत्यर्थं प्रकाशयन्ति। परं क्लिष्टमेतत् इति भाति सहृदयै- ९र्विचारणीयम् ॥ ९४ ॥

दुष्टोपमामुदाहरति—हंसीवेति। चन्द्रः हंसीव धवलः। नभः सरांसीव अमलम्। भटः वीरः श्वा इव सारमेय इव स्वामिभक्तः भर्तृभक्तः। ३खद्योतः भानुवत् भाति इति। अत्र प्रथमोपमायां हंसीव चन्द्र इति लिङ्गभेदः तेन धवलशब्दस्योभयत्र संबन्धे लिङ्गविपरणामादिक्लेशः। द्वितीयोपमायाम् सरांसीव नभ इत्यत्र वचनभेदः तेन अमलशब्दस्या- ६न्वयानुपपत्तौ पूर्ववदेव वचनविपरिणामः विधेयः। तृतीयोपमायां भटः श्वेव इत्यत्र शुनः अत्यन्तापकृष्टजातित्वात् सहृदयानां तत्सादृश्येनोद्वेगो भवति इति जातिन्यूनता । चतुर्थोपमायां खद्योतो भानुवदित्यत्र खद्योत- ९सूर्ययोर्महदन्तरेण तत्सादृश्यवर्णनं वैरस्याय भवति इति अधिकता- दोषः ॥ ९९ ॥

दोषविवेचनमुपसंहरति—ईदृशमिति। सद्भिः काव्यशास्त्रनिष्णातैः ईदृशं वर्ज्यते। तत्र कारणं प्रतीतिमान्थर्यवैरस्योत्पादनादिकं चिन्त्यताम् ३स्वयमेवोह्यताम्। स्पष्टत्वात् ग्रन्थविस्ताराभिया मया न सर्वं तन्निरूप्यते। एतेन मया दोषनिरीक्षणस्य पद्धतिर्दर्शिता अनयान्येपि दोषा विपश्चि- द्भिर्ज्ञेया इति सूचयन् स्वग्रन्थस्य न्यूनतां परिहरतीति ज्ञेयम्।

ii. 54—अस्त्येव for अस्ति च P, B, J, R;—तद्विदां for वाग्विदां R, Cb.

15656

कारणं तत्र

६अत्र मुद्रितपुस्तकेषु गुणदोषविचाराय स्वयमेव मनीषिभिः । इत्यर्ध-
मधिकं दृश्यते अर्थस्तु स्पष्ट एव । प्राचीनपुस्तकेषु तददर्शनात् पुन-
रुक्तप्रायत्वाच्च वयं तत् प्रक्षिप्तमिति शङ्कामहे॥ अस्मिन् दोषविचारे भा-
९महवामनभोजराजानां लक्षणोदाहरणानि व्युत्पादकानीति दर्शयामः । तत्र
वामनः(iv. 2.8ff)—हीनत्वाधिकत्वलिङ्गवचनभेदासादृश्यासंभवास्त-
द्दोषाः । तत्र जातिप्रमाणधर्मन्यूनतोपमानस्य हीनत्वम् । तत्र जातिन्यूनत्व-
१२रूपं हीनत्वं यथा—चाण्डालैरिव युष्माभिः साहसं परमं कृतम् ।
प्रमाणन्यूनत्वंयथा—वह्निस्फुलिङ्ग इव भानुरयं चकास्ति । उपमेया-
१४दुपमानस्य धर्मन्यूनत्वं यथा—

स मुनिर्लोञ्छितो मौञ्ज्या कृष्णाजिनपटं वहन् ।
व्यराजन्नीलजीमूतभागाश्लिष्ट इवांशुमान् ॥

अत्र मौञ्जीप्रतिवस्तु तडिन्नास्ति इत्युपमानहीनत्वम् । तत्र जात्याधिक्यं
१८यथा—विशन्तु विष्टयः शीघ्रं रुद्रा इव महोजसः इति । विष्टयः कर्मकराः ।
प्रमाणाधिक्यं यथा—

पातालमिव नाभिस्ते स्तनौ क्षितिधरोपमौ ।
वेणीदण्डः पुनरयं कालिन्दीपातसंनिभः ॥ इति ।

२२धर्माधिक्यं यथा—

सरश्मि चञ्चलं चक्रं दधद्देवो व्यराजत ।
सवाडवाग्निः सावर्तः स्रोतसामिव नायकः ॥ इति ।

२५अत्र सवाडवाग्निरित्यस्य प्रतिवस्तुनः उपमेये अभावाद्धर्माधिक्यमिति
ज्ञेयम् । उपमानोपमेयमोर्लिङ्गव्यत्यासो लिङ्गभेदः यथा—सैन्यानि
२७नद्य इव जग्मुरनर्गलानि इति । अत्र अरुचिबीजं तु अस्माभिः पूर्वं

---

ii. 56—चात्र for तत्र D;—P, B, R, D supply the extra line गुणदोषविचाराय etc. which we preserve in the merely with a view not to disturb the n ing of the Editio Princeps which B for his German version. The line is an interpolation; it is given neither by J.

चिन्त्यताम् ।

दर्शितमनुसंधेयम्। वचनभेदो यथा—पश्यामि लोचने तस्याः पुष्पं मधुलिहो यथा इति । अप्रतीतगुणसादृश्यमसादृश्यम् यथा—अश्नामि काव्यशशिनं
३०वितितार्थरश्मिम् इति। काव्यस्य शशिना सह यत् सादृश्यं तदप्रतीतैरेव गुणैः प्रतीतैर्गुणैर्नास्ति तदिति भावः। अनुपपत्तिरसंभवः यथा—

चकास्ति वदनस्यान्तः स्मितच्छायाविकासिनः ।
उन्निद्रस्याविन्दस्य मध्ये मुग्धेव चन्द्रिका ॥ इति ।

३४अत्र चन्द्रिकायामरविन्दस्योन्निद्रत्वं सृष्टिक्रमविरुद्धमित्यनुपपत्तिः। भोजराजस्तु उपमायाः भिन्नलिङ्गन्यूनाधिकत्वरूपदोषम् वाक्यदोषेषु परि-
३६गणयति लक्षणपूर्वकमेवमुदाहरति च यथा (i. 25 ff)—

यत्रोपमा भिन्नलिङ्गा भिन्नलिङ्गं तदुच्यते ।
भवेत् तद्भिन्नवचनं यद्भिन्नवचनोपमम् ॥ इति ।

३९तत्र भिन्नलिङ्गस्योदाहरणं यथा—

वापीव विमलं व्योम हंसीव धवलः शशी ।
शशिलेखेव हंसोयं हंसालिरिव ते यशः ॥ इति ।

४२भिन्नवचनस्य यथा—

सरांसीवामलं व्योम काशा इव सितः शशी ।
शशीव धवला हंसा हंसीव धवला दिशः ॥ इति ।

४५न्यूनोपमामिह न्यूनमुपमानविशेषणैः। यथा—

संहतचक्रवाकयुगा विकसितकमला मृणालसंछन्ना ।
वापी वधूरिव रोचनाविलिप्तस्तनी सुखयति ॥ इति।

४८अत्र नेत्रबाहूपमापदानां वधूविशेषणत्वेनानुक्तत्वादिदं न्यूनोपमम्। अधिकं यत् पुनः स्तैः स्यात् तमाहुरधिकोपमम्। यथा—

अभिनवमनोहरविरचितवलयविभूषा विभाति नववधूः ।
कुन्दलतेव समुत्फुल्लगुच्छपरिणीयमानभ्रमरगणा ॥ इति ।

५२अत्र भ्रमरगणस्योपमानविशेषणस्याधिक्यादधिकोपमम्। वाक्यार्थदोषेपि पुनः (i. 51 ff)—

हीनोपमं भवेच्चान्यदधिकोपममेव च ।
असदृक्षोपमं चान्यदप्रसिद्धोपमं तथा ॥

[गुणदोष-

इति चतुर उपमादोषान् परिगणयति। उदाहरति च लक्षणपूर्वकम्
५७यथा—हीनं यत्रोपमानं स्यात् तत्तु हीनोपमं स्मृतम्। यथा—

क्वचिदग्रे प्रसरता क्वचिदाप्लुत्य निह्नता।
शुनेव सारङ्गकुलं त्वया भिन्नं द्विषत्कुलम्॥ इति।

६०तदेव यस्मिन्नधिकं तद्भवेदधिकोपमम्। यथा—

अयं पद्मासनासीनश्चक्रवाको विराजते।
युगादौ भगवान् ब्रह्मा विनिर्मित्सुरिव प्रजाः॥ इति।

६३यत्त्वतुल्योपमानं तद्वदन्त्यसदृशोपमम्। यथा—

नमत हरं रोषानलनिर्दग्धमुग्धमन्मथशरीरम्।
विस्तृतनितम्बनिर्गतगङ्गास्रोतसमिव हिमवन्तम्॥ इति।

६६अत्र कोपानलनिर्दग्धमुग्धमन्मथशरीरस्य हरस्य नितम्बनिर्गतस्रोतसा हिमवता सह असादृश्यादिदमसदृशोपमम्। अप्रसिद्धोपमानं यत्
६८अप्रसिद्धोपमं हि तत्। यथा—

कुमुदमिव मुखं तस्या गौरिव महिषः शशीव काव्यमिदम्।
शरदिव विभाति तरुणी विकसितपुलकोत्करा सेयम्॥ इति।

अत्र कुमुदमुखयोर्गोमहिषयोः काव्यशशिनोः प्रतीयमाने शरत्तरुण्योश्च
७२विधीयमाने सादृश्ये उपमानोपमेयस्याप्रसिद्धत्वादप्रसिद्धोपमामिदम्। तत्र वाक्यगतोपमादोषस्यापवादमाह (i. 120ff)—

यद्भिन्नलिङ्गमित्युक्तं विभिन्नवचनं च यत्।
उपमादूषणं तन्न यत्रोद्वेगो न धीमताम्॥

७६यथा—

अन्यदाभूषणं पुंसः शमो लज्जेव योषिताम्।
पराक्रमः परिभवे वैयात्यं सुरतेष्विव॥

अत्र पुंसो योषित इव शमो लज्जेव पराक्रमो वैयात्यमिव इति लिङ्ग-
८०भेदः। परिभवे सुरतेष्विव इत्यत्र लिङ्गवचनभेदः। स चैषामेव परस्पर-मुपमानोपमेयभावविवक्षायां पर्यायान्तराभावादन्यथाकर्तुं न शक्यते इति सहृदयानुद्वेजकत्वान्न दुष्यति इति दोषस्यापि गुणत्वम्। तदिदं
८३द्वयोरप्येकमुदाहरणम्। भिन्नलिङ्गस्यैव यथा—

विचाराय

यस्य त्रिवर्गशून्यानि दिनान्यायान्ति यान्ति च ।
स लोहकारभस्त्रेव श्वसन्नपि न जीवति ॥

अत्र पूर्ववदेव पर्यायान्तराभावात् स लोहकारभस्त्रेव इति लिङ्गभेदस्य ८७न दोषः। भिन्नवचनस्यैव यथा—

प्राज्यप्रभावः प्रभवो धर्मस्यास्तरजस्तमाः ।
मुक्तात्मानः शिवं नेमिरन्येपि ददतां जिनाः ॥

९०अत्र नेमिरन्येपि इति वचनभेददोषेपि ददताम् इति क्रियापदादेर्वचनश्लेषमाहात्म्याद्गुणत्वम् ।—

यत्रोपमानधर्माः स्युर्नोपमेयेन संमिताः ।
तद्धीनोपममित्याहुस्तत् प्रसिद्धौ न दुष्यति ॥

९४यथा—

स मारुताकम्पितपीतवासा बिभ्रत् सलीलं शशिभासमब्जम् ।
यदुप्रवीरः प्रगृहीतशार्ङ्गः सेन्द्रायुधो मेघ इवाबभासे ॥

९७अत्र सेन्द्रायुध इति कार्मुकस्योपादानं वासःशङ्खयोस्त्वनुपादानादूनोपमत्वम् । तत्रेन्दुविद्युतोरतिप्रसिद्धत्वाददोषत्वम् । यदाह—

सर्वं सर्वेण सारूप्यं नास्ति भावस्य कस्यचित् ।
यथोपपत्तिकृतिभिरुपमानं प्रयुज्यते ॥
अखण्डमण्डलः क्वेन्दुः क्व कान्ताननमद्युति ।
१०२यत् किंचित् कान्तिसाम्यात् तु शश्विनैवोपमीयते ॥
क्रमेणानेन कृतिभिरेष्टव्यमधिकोपमम् ।
विशेषतस्तूपमेयाङ्गमनुमानात् प्रतीयते ॥ इति ।

१०५यथा—

स पीतवासाः प्रगृहीतशार्ङ्गो मनोज्ञभीमं वपुराप कृष्णः ।
शतह्रदेन्द्रायुधवान् निशायां संसृज्यमानः शशिनेव मेघः ॥

१०८अत्र शशिनो ग्रहणादधिकोपमत्वेपि शङ्खचक्रगदाधरो विष्णुः इति प्रसिद्ध्या उपमेये शङ्खोनुमेयो भवति । अतोत्र न दोषः । एवं वाक्य-
११०दोषापवादं उक्त्वा वाक्यार्थदोषापवादमाह (i. 148ff)—

यत्रोपमानमुत्कृष्टमुपमेयं निकृष्यते ।
ज्ञेयं तदधिकौपम्यमस्यापि काप्यदोषता ॥

स्वयमेव

११३यथा—

कान्त्या चन्द्रमसं धाम्ना सूर्यं धैर्येण चार्णवम् ।
राजन्ननुकरोषि त्वं सौभाग्येनापि मन्मथम् ॥

११६अत्र अधिकौपम्येपि राज्ञो लोकपालांशत्वेन शिष्टैरादृतत्वाद्गुणत्वम् ।

उपमानस्य वैषम्याद्भवेदसदृशोपमम् ।
तस्याभ्यनुज्ञामिच्छन्ति व्यतिरेकोपमादिषु ।

११९यथा—

प्रहितः प्रधनाय माधवानहमाकारयितुं महीभृता ।
न परेषु महौजसश्छलादपकुर्वन्ति मलिम्लुचा इव ॥

१२२मलिम्लुचा इति उपमानस्य असदृशत्वेपि व्यतिरेकोषपादकत्वाद्गुणत्वम् ।

यस्योपमानं लोकेषु न प्रसिद्धं तदिष्यते ।
अप्रसिद्धोपमं नाम तत् क्वचिन्नैव दुष्यति ॥

१२५यथा—

उद्गर्भहूणरमणीरमणोपमर्दभुग्नोन्नतस्तननिवेशनिभं हिमांशोः ।
बिम्बं कठोरबिसकाण्डकडारगौरैर्विष्णोः पदं प्रथममग्रकरैर्व्यनक्ति ॥

१२८अस्यामप्रसिद्धोपमत्वेन दूषणत्वेपि द्वयोरपि प्रसिद्धाप्रसिद्धयोः शृङ्गार-
रसोद्दीपकत्वसाम्याद्गुणत्वम् । केचित्तु कालपुरुषलोडर्थादिभेदमपि दोष-
१३०माहुः । यथा—

तस्यापनोदाय फलप्रवृत्तावुपस्थितायामपि निर्व्यपेक्षः ।
त्यक्ष्यामि वैदेहसुतां पुरस्तात् समुद्रनेमिं पितुराज्ञयेव ॥

१३३अत्र समुद्रनेमिमत्यजमित्यन्वेति न तु त्यक्ष्यामीति । पुरुषभेदो यथा—

शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः ।
आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः ॥

१३६अत्र नीवारे आभाति इत्यन्वेति न तु आभासीति । विध्वादिभेदो
यथा—

आशास्यमन्यत् पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते ।
पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव ॥

मनीषिभिः ॥ ५६ ॥]

इववद्वायथाशब्दाः समाननिभसंनिभाः ।

अत्र भवन्तमलभत इत्यन्वेति न तु लभस्वेति । इति चित्रमीमांसादिप्रब-
१४१न्धेषु द्रष्टव्यम्* ॥ ५६ ॥

अभिधालक्षणाव्यञ्जनाभिरुपमाप्रतीतिर्भवति इति तस्या वाचकादीन् निर्दिशति—इवेति । इवादयः शब्दाः सादृश्यवाचकाः सन्ति । तत्र

---

*अत्र प्रसङ्गादलंकारशेखरे त्रयोदशमरीचौ साधर्म्यस्य प्रतियोग्यनुयोगिनावुक्तौ तदुपयुक्तमिति संगृण्हीमः—चन्द्रकलाम्बुजदामशिरीषं विद्युत्तारा कनक-
3लता च । दमनककाञ्चनयष्टी दीपः सर्वैरेभिर्योषिद्वर्ण्या ॥ रोचना स्वर्णविद्युद्भिर्द्राभिर्वराटकैः । चम्पकैर्हेमकेतक्या वर्ण्यते तत्तनोर्द्युतिः ॥ (वराटकः पद्मबीजम्) तमः शैवालजीमूतबर्हभ्रमरचामरैः । यमुनावीचिनीलाश्मनीलाब्जाभ्रैः समः
6कचः ॥ ललाटमर्धचन्द्रेण हेमपट्टिकया तथा । वल्लीस्मरधनुर्वीचिभृङ्गालीपल्लवैर्भ्रुवौ ॥ चन्द्रादर्शौ कपोलस्य मुखस्येन्द्वब्जदर्पणाः । तिलप्रसूनं नासायाः कण्ठः कम्बोः समः स्मृतः ॥ मृगतन्नेत्रपाथोजतत्पत्रञ्जषखञ्जनैः । नेत्रं चकोरतन्नेत्रकेतकालिस्मरा-
9शुगैः ॥ प्रवालबिम्बबन्धूकपल्लवैरधरोष्ठकौ । वर्ण्यौ माधुर्यमाश्रित्य यावन्मधुरवस्तुभिः । मुक्तामाणिक्यनारङ्गदाडिमीकुन्दकोरकैः । ताराभिश्च रदा वाणी हंसालिशुक-किंनरैः ॥ वेणुकोकिलवीणाभिर्माधुर्ये मधुरैः सह ॥ बाहुर्बिसेन विद्युद्वल्लिमृणालैः
12करस्तु पद्मेन । पल्लवविद्रुमकाभ्यां चन्द्रकलाकुन्दकोरकैश्च नखाः ॥ पूगाञ्जतत्कोरकबिल्वतालगुच्छेभकुम्भाद्रिघटेशचक्रैः । सौवीरजम्बीरकबीजपूरसमुद्गछोलङ्गफलैरुरोजः ॥ नाभीरसातलावर्तह्रदकूपनदादिभिः । वली तटिन्या तद्रूपैः
15पृष्ठं काञ्चनपट्टकैः ॥ शून्यग्रतलशून्याणुवेदीसिंहादिभिः समः । मुष्टिग्राह्यो भवेन्मध्यः जघनं पुलिनोपमम् ॥ पीठप्रस्तरभूचक्रैर्नितम्बः परिवर्ण्यते । करास्तु करिहस्तेन कदल्या करभेण च ॥ चरणः पल्लवाम्भोजस्थलपद्मप्रवालकैः । पूर्णे-
18न्दुनाङ्गुष्ठनखौ गमनं हंसहस्तिवत् ॥ कटाक्षो यमुनावीचिभृङ्गावलिविषामृतैः । ज्योत्स्नेन्दुपुष्पपीयूषफेनकैरववद्वसः ॥ दर्शनं वमदब्जादिः श्वासस्तु सुरभिः शनैः । हंससारसशब्दाभ्यां वर्ण्यते नूपुरध्वनिः ॥ राशामत्यन्तपीनत्वमुन्नता दीर्घबाहुता ।
21युगार्गलभुजङ्गेन्द्रदण्डस्तम्भेभहस्तकैः ॥ बाहुर्वक्षः कपाटेन शिलापट्टेन वर्ण्यते । अंसे विपुलता मध्ये कार्श्यमुन्नतता पदे ॥ स्तनयोरिव नारीणामत्यन्तस्वच्छता हृदि । कान्तिप्रयोजकं यावत् तावत् तद्वत् प्रवर्ण्यते ॥ प्रतापोर्काग्निवप्राद्यैः कीर्ति-
24श्चन्द्रादिशुभ्रकैः । करे पद्मोर्ध्वरेखादि पदे छत्रध्वजादिकम् । गमनं हस्ति-सिंहाभ्यां कार्यं च भुजादिषु ॥ इति । विस्तरस्तु कविकल्पलतादिषु द्रष्टव्यः ।

तुल्यसंकाशनीकाश-

३इवोदाहरणम्—

हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते ।

वत्—तत्र तस्येव इति सप्तम्यन्ताद्विहितः तेन तुल्यं क्रिया चेद्वतिः इति ६तृतीयान्ताद्विहितश्च तद्धितप्रत्ययो ग्राह्यः । उभयोः उदाहरणे यथा—

गाम्भीर्यगरिमा तस्य सत्यं गङ्गाभुङ्गजवत् ।
दुरालोकः स समरे निदाघाम्बररत्नवत् ॥

९वा यथा—

आशीविषो वा संक्रुद्धः सूर्यो वाभ्रविनिर्गतः ।
भीमोन्तको वा समरे गदापाणिरदृश्यत ॥

१२यथा यथा—

धन्यस्यानन्यसामान्यसौजन्योत्कर्षशालिनः ।
करणीयं वचश्चेतः सत्यं तस्यामृतं यथा ॥

१५समानं यथा—

व्रणमुखच्युतशोणितशीकरस्थगितशैलतटाभभुजान्तरः ।
अभिनवौषसरागभृता बभौ जलधरेण समानमुमापतिः ॥

१८समासे यथा—

भुजे भुजङ्गेन्द्रसमानसारे भूयः स भूमेर्धुरमाससज्ज ।

२०निभः यथा—

प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम् ।
दिवसं शारदमिव प्रारम्भसुखदर्शनम् ॥

२३संनिभः यथा—

भगवान् यज्ञपुरुषः जगर्जागेन्द्रसंनिभः ।

२५तुल्यं यथा—

अवेहि मां किङ्करमष्टमूर्तेः कुम्भोदरं नाम निकुम्भतुल्यम् ।

२७संकाशः यथा—

विमाने सूर्यसंकाशे रघुराजो व्यराजत ।

२९नीकाशः यथा—

आकाशनीकाशतटां तीरवानीरसंकुलाम् ।
बभूव चरतां हर्षः पुण्यतीर्थां सरस्वतीम् ॥

प्रकाशप्रतिरूपकाः ॥ ५७ ॥

प्रतिपक्षप्रतिद्वन्द्विप्रत्यनीकविरोधिनः ।
सदृक्सदृशसंवादिसजातीयानुवादिनः ॥ ५८ ॥
प्रतिबिम्बप्रतिच्छन्दसरूपसमसंमिताः ।

३२प्रकाशः यथा—

चन्द्रप्रकाशं वदनं कान्ताया भाति सुन्दरम् ।

३४प्रतिरूपकः यथा—

वाग्भिः सुधायाः प्रतिरूपकाभिस्तनोति मोदं हृदि मेनिशं या ॥५७॥

प्रतिपक्षेति । प्रतिपक्षप्रतिद्वन्द्विनौ यथा—

पङ्केरुहश्रीप्रतिपक्षभूतनेत्रप्रभाभिः स्पृहणीयशोभम् ।
चन्द्रप्रतिद्वन्द्वि विभाति बालामुखं निशायां ललितोत्सवेषु ॥

४प्रत्यनीकविरोधिनौ यथा—

कामस्य प्रत्यनीकोयं त्वं रतेश्च विरोधिनी ।
इति तौ विरहे नूनं भृशं पीडयतो युवाम् ॥

७सदृक् यथा—

न त्वया सदृगन्योस्ति त्रैलोक्येपि मनोरमः ।

९सदृशः यथा—

सुधेव वाणी वसुधेव मूर्तिः सुधाकरश्रीसदृशी च कीर्तिः ।
पयोधिकल्पा मतिरासफेन्दोर्महीतलेन्यस्य नहीति मन्ये ॥

१२संवादी यथा—

विभाति बालावदने स्मितश्रीः संवादिनी शारदचन्द्रिकायाः ।

१४सजातीयानुवादिप्रतिबिम्बाः यथा—

कृष्णागुरुसजातीयं पीयूषस्यानुवादिनम् ।
चन्द्रस्य प्रतिबिम्बं सत्सङ्गं संतापहं श्रये ॥ ५८ ॥

प्रतिबिम्बेति । प्रतिबिम्बोदाहरणं तु पूर्वश्लोकटीकायां दर्शितमेव ।

---

ii. 58—प्रतिपक्षि for प्रतिपक्ष V;—वाचिनः for वादिनः N, J, R; वाचकाः D.

ii. 59—प्रतिरूप for प्रतिबिम्ब N, D;—प्रतिच्छान्दि for प्रतिच्छन्द N; सप्रभाः for संमिताः N, V, D, M, J.

सलक्षणसदृक्षाभसपक्षोपमितोपमाः ॥ ५९ ॥
कल्पदेशीयदेश्यादि प्रख्यप्रतिनिधी अपि ।

२प्रतिच्छन्दसरूपसंमिताः यथा—

जामदग्न्यप्रतिच्छन्दः सरूपो यः किरीटिनः ।
संमितो रघुनाथस्य शिवराजो विराजते ॥

५समं यथा—

यथा लतायाः स्तबकानतायाः स्तनावनम्रे नितरां समासि ।
तथा लतापल्लविनी सगर्वे शोणाधरायाः सदृशी तवापि ॥

८सलक्षणसदृक्षाभाः यथा—

इन्दुसलक्षणवदनं सुधासदृक्षश्च मुखरसस्तस्याः ।
ज्योत्स्नाभाः स्मितमधुराः नर्मालापास्तु कस्य सदृशास्ते ॥

११सपक्षः यथा—

दलद्द्राक्षानिर्यद्रसभरसपक्षा भणितयः ।

१३उपमितोपमे यथा—

राक्षसोपमिता वाग्भिः खला दीनांस्तुदन्त्यलम् ।
साधवस्तोषयन्त्येनांस्ताभिरेव सुरोपमाः ॥

१६उदाहरणान्तरं यथा—

उभौ यदि व्योम्नि पृथक् प्रवाहौ आकाशगङ्गापयसः पतेताम् ।
तदोपमीयेत तमालनीलमामुक्तमुक्ताकलतमस्य वक्षः ॥ ५९ ॥

कल्पेति । कल्पदेशीयदेश्याः यथा—

पूर्णेन्दुकल्पवदना मृणालीदेश्यदोर्लता ।
चक्रदेशीयजघना सा स्वप्नेपि न दृश्यते ॥

४प्रख्यः यथा—

द्विपक्षगरुडप्रख्यैर्द्वारैः सौधैश्च शोभितम् ।
गुप्तमभ्रचयप्रख्यैर्गोपुरैर्मन्दरोपमैः ॥

---

ii. 59—सदृक्षाभा for सदृक्षाभ J.

ii. 60—देश्यादिः for देश्यादि J, P, B.

सवर्णतुलितौ शब्दौ ये चान्यूनार्थवादिनः ॥ ६० ॥
समासश्च बहुव्रीहिः शशाङ्कवदनादिषु ।

७प्रतिनिधिः यथा—

भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् ।
अलकेषु चमूरेणुश्चूर्णप्रतिनिधिः कृतः ॥

१०सवर्णः यथा—

ग्रथितमौलिरसौ वनमालया तरुपलाशसवर्णतनुच्छदः ।
तुरगवल्गनचञ्चलकुण्डलो विरुरुचे रुरुचेष्टितभूमिषु ॥

१३तुलितः यथा—

मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् ।

१५अन्यूनार्थवादिनः अहीनः अनूनः इत्यादयः यथा—

सुधान्यूनानि गङ्गाया जलानि श्रयतां जनाः ॥ ६० ॥

समासेति । समासश्च बहुव्रीहिः कर्मधारयोपि । तत्र बहुव्रीहिर्यथा—

कमलकरा रम्भोरू कुवलयनयना मृगाङ्कवदना सा ।
कथमिव चम्पकगात्री मृणालबाहुः प्रिया तपति ॥

४कर्मधारयो यथा—

शोणाधरांशुसंभिन्नास्तन्वि ते वदनाम्बुजे ।
केसरा इव काशन्ते कान्तदन्तालिकान्तयः ॥

७स्पर्धते यथा—

स्पर्धते रुद्धमद्भैर्यो वररामामुखानिलैः ।
चन्दनप्रणयोद्वन्धिर्मन्दो मलयमारुतः ॥

१०जयतिः यथा—

स काञ्चने यत्र मुनेरनुज्ञया नवाम्बुदश्यामवपुर्न्यविक्षत ।
जिगाय जम्बूजनितश्रियः श्रियं सुमेरुशृङ्गस्य तदा तदासनम् ॥

१३द्वेष्टिर्द्रुह्यतिश्च यथा—

राधामुखं द्वेष्टि सुधाकरस्तत् पापेन लोके दधते कलङ्कम् ।
द्रुह्यन्ति तल्लोचनमम्बुजानि ततो निमीलन्ति निशासु तानि ॥

---

ii. 60—च तुल्यार्थ for चान्यूनार्थ N, J, R; समानार्थ D.
ii. 61—कचित् तत्पुरुषोपि च for शशाङ्कवदनादिषु variant in C.

स्पर्धते जयति द्वेष्टि द्रुह्यति प्रतिगर्जति ॥ ६१ ॥
आक्रोशत्यवजानाति कदर्थयति निन्दति ।
विडम्बयति संधत्ते हसतीर्ष्यत्यसूयति ॥ ६२ ॥
तस्य मुष्णाति सौभाग्यं तस्य कान्तिं विलुम्पति ।

१६प्रतिगर्जति यथा—

न जातु शक्तिरिन्दोस्ते मुखेन प्रतिगर्जितुम् ।
कलङ्किनो जडस्यास्ति निर्दोषेणाजडेन च ॥ ६१ ॥

आक्रोशतीति । आक्रोशत्यवजानाति कदर्थयति निन्दति यथा—

आक्रोशत्यवजानाति कदर्थयति निन्दति ।
अम्बुजं त्वन्मुखं बाले अहो जडसमागमः ॥

४विडम्बयति यथा—

स एवमुक्त्वा मघवन्तमुन्मुखः करिष्यमाणः सशरः शरासनम् ।
अतिष्ठदालीढविशेषशोभिना वपुःप्रकर्षेण विडम्बितेश्वरः ॥

७संधत्ते यथा—

चन्दनः शीततां धत्ते सौरभ्यं कमलं शशी ।
लावण्यं त्वन्मुखं बाले संधत्ते तत् त्रयं कथम् ॥

१०हसतिः यथा—

श्रिया हसद्भिः कमलानि सस्मितैरलंकृताम्बुप्रतिमागतैर्मुखैः ।
कृतानुकुल्या सुरराजयोषितां प्रसादसाफल्यमवाप लक्ष्मीः ॥

१३ईर्ष्यत्यसूयती यथा—

ईर्ष्यति कपिचेष्टायै चपलमतिर्यो यदीयदुश्चरितम् ।
नित्यंमसूयति वानरवदनाय नमः खलाय शतशस्ते ॥ ६२ ॥

तस्यात । मुष्णात्यादीनां तस्य मुष्णाति सौभाग्यमित्यादीनि वाक्यान्येव मूले उदाहृतानि अतो नात्रोदाहरणापेक्षा । मुष्णात्यादीनां

---

ii. 61—प्रतिगर्हति for प्रतिगर्जति V.

ii. 62—M, puts the line विडम्बयति before आक्रोशति;—विलम्बयति for विडम्बयति J;—संरुन्धे for संधत्ते N, Cs, R, Pn.

ii. 63—पुष्णाति for पुष्णाति Pn.

तेन सार्धं विगृह्णाति तुलां तेनाधिरोहति ॥ ६३ ॥
तत्पदव्यां पदं धत्ते तस्य कक्षां विगाहते ।
तमन्वेत्यनुबध्नाति तच्छीलं तन्निषेधति ॥ ६४ ॥
तस्य चानुकरोतीति शब्दाः सादृश्यसूचकाः ।

[3]सादृश्यादयोर्थाः वाक्यमर्यादया यदा अभिप्रेतास्तदैव तेषां सादृश्यमर्थः नान्यथा। अत एव धनं मुष्णाति तस्करः इत्यादौ न सादृश्यार्थता। तुलां तेनाधिरोहति तुलां मानयन्त्रं स्वसमीकरणाय अधिरोहति। [6]नात्रोपमार्थः तथा सति तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्। इत्यतुलोपमाभ्यामिति पर्युदासात् षष्ठी स्यात्। अधिरोहतीति पदस्वारस्यं च लोपमियात् ॥ ६३ ॥

तत्पदव्यामिति। कक्षां सादृश्यम्। तच्छीलमनुबध्नाति इत्येकम्। तच्छीलमिति षष्ठीतत्पुरुषः न तु तस्येव शीलं यस्येति बहुव्रीहिः। [3]तथात्वे समासश्च बहुव्रीहिः इत्यनेनैव सिद्धे पुनरुपादानं व्यर्थं स्यात्। तन्निषेधति अपकृष्टत्वेन निन्दति अथवा उत्कर्षान्निवारयति ॥ ६४ ॥

तस्येति। सादृश्यसूचकाः अभिधालक्षणाव्यञ्जनामर्यादया सादृश्यबोधकाः। तत्र इवादयो वाचकाः। तत्रापि यथेवादिशब्दप्रयोगे साधर्म्ये वा-[3]च्यम् तत्रैव तेषां शक्तेः। तुल्यसदृशादिपदानां प्रयोगे साधर्म्यमार्थम् तेषां सादृश्यवति शक्तेरिति बोध्यम्। स्पर्धते इत्यादयो लक्षकाः तेषां सादृश्ये शक्तयभावात्। तस्य मुष्णाति सौभाग्यम् इत्यादीनि वाक्यानि तु व्यञ्ज-[6]कानि। उपमायामिमे प्रोक्ताः कवीनां बुद्धिसौख्यदाः। इति मुद्रित-पुस्तकेषु अर्धमधिकमस्ति परं प्राचीनग्रन्थेषु अनुपलम्भात् तथा प्राचीन-

---

ii. 63—तस्याधिरोहति for तेनाधिरोहति M, D.

ii. 64—दत्ते for धत्ते M;—कक्ष्यां for कक्षां R, Cs.

ii. 65—सूचिनः for सूचकाः N, V; वाचकाः D, M; सूचनः J;—P, B, R, give the extra line—उपमायामिमे प्रोक्ताः etc., which we admit into the text merely to preserve uniformity in numbering. D gives instead the extra line—आदित्सति श्रियं तस्य मैत्रीं तस्यानुरुध्यति.

[उपमायामिमे प्रोक्ताः कवीनां बुद्धिसौख्यदाः ॥६५॥]

॥ इत्युपमाचक्रम् ॥

उपमैव तिरोभूतभेदा रूपकमुच्यते ।

टीकासु चानुल्लेखात् तत्प्रक्षिप्तमिति भाति । न च कोपि विशेषार्थस्तस्मात्
९प्रतीतो भवति ॥ ६९ ॥

अथ रूपकं लक्षयति—उपमैवेति । तिरोभूतभेदा तिरोहितः निगूहितः विद्यमानोपि सादृश्यातिशयप्रदर्शनाय कविना निह्नुतः भेदः
३प्रस्तुताप्रस्तुतयोर्वैधर्म्यं यत्र तादृशी । उपमैव साधर्म्यमेव रूपकम् रूपयति उपमानोपमेययोरेकतां नयति इति रूपकम् तन्नामालंकारः । तथा च परस्परविरुद्धधर्मवत्त्वेन उपस्थित्या प्रकाशितभिन्नस्वरूपयोरपि
६उपमानोपमेययोः विशेषसाम्यप्रदर्शनाय भेदनिगूहनेन अभेदप्रतिपत्तिः रूपकालंकारः । मुखं चन्द्रः इत्यादौ मुखत्वचन्द्रत्वरूपपरस्परविरुद्धधर्मवत्त्वेनोपस्थितयोर्मुखचन्द्रयोः भेदनिगूहनेन अभेदप्रतिपत्तिः । इयं
९चाभेदप्रतिपत्तिः आहार्यरूपा । आहार्यत्वं च बाधकालिकेच्छाजन्यज्ञानत्वम् । अत्र बाधशब्देन बाधकज्ञानं विवक्षितम् । तथा च मुखं चन्द्र इत्यादौ बाधः मुखं चन्द्रो न इति ज्ञानम् तत्काले एव या इच्छा मुखे
१२चन्द्रज्ञानं मे जायताम् इत्यादिका तज्जन्यं यत् ज्ञानं मुखं चन्द्र इति तत् आहार्यम् । तथा च आहार्यत्वं नाम सत्यपि बाधे प्रमातुरिच्छाजन्यप्रयोज्यत्वम् इति निष्कर्षः । निगीर्याध्यवसानरूपायामतिशयोक्तौ उपमे-
१५यस्य नोपमेयगतधर्मत्वेनोपस्थितिरिति न तत्रातिव्याप्तिः । अपह्नुतौ उपमेयगोपनेन भेदस्यापह्नवः अत्र तथा न इति ततो भेदः । मुखपद्मम् इत्यादिसमासस्थले तु विशेषणस्य प्राधान्येनोपमानगतत्वे रूपकम् यथा
१८विकसितं मुखपद्ममिति । अत्र विकासस्य पद्मधर्मत्वेन तस्य प्राधान्येनोपमाने गतत्वेन मुखमेवपद्ममिति रूपकम् । तस्योमेयगतत्वे उपमा यथा सहास्यं मुखपद्मम् । अत्र हासस्य मुखधर्मत्वेन तद्विशेषणं मुखमिति उपमेयसंबद्ध-
२१मतः अत्र मुखं पद्ममिव इति उपमा । उपमानोपमेययोर्विशेषणस्य तुल्यत्वे संदेहसंकरः यथा रमणीयं मुखपद्मम् इति । अत्र रमणीयविशेषणस्य उभ-

---

ii. 66—भिदा for भेदा D, Cs, M; भेदात् J;—इष्यते for उच्यते N, D, Cs.

यथा बाहुलता पाणिपद्मं

यत्र समानमेव संबन्धः इति रूपकोपमयोः संकर इति बोध्यम्। रूपकस्य
२४लक्षणानि प्राचीनपण्डितैरव्याप्त्यतिव्याप्तिदोषपरिहारपुरःसरं विविधानि
प्रदर्शितानि परं तेषु जगन्नाथस्य लक्षणं (P. 224f) प्रायः सर्वसंग्राहकमिति
तत् सप्रपञ्चं संगृह्णीमः। स च उपमेयतावच्छेदकपुरस्कारेणोपमेये शब्दा-
२७न्निश्चीयमानमुपमानतादात्म्यं रूपकम् इति लक्षणं विधाय उपमेयतावच्छे-
दकपुरस्कारेणेतिविशेषणादपह्नुतिभ्रान्तिमदतिशयोक्तिनिदर्शनानिरासः।
अपह्नुतौ स्वेच्छया निषिध्यमानत्वात् भ्रान्तिमति च तज्जनकदोषेणैव
३०प्रतिबध्यमानत्वात् अतिशयोक्तिनिदर्शनयोश्च साध्यवसानलक्षणामूलत्वादु-
पमेयतावच्छेदकस्य नास्ति पुरस्कारः। शब्दादितिविशेषणात् मुखमयं चन्द्रः
इति प्रात्यक्षिकाहार्यनिश्चयगोचरचन्द्रतादात्म्यावच्छेदः। निश्चीय-
३३मानमितिविशेषणात् संभावनात्मनो नूनं मुखं चन्द्रः इत्याद्युत्प्रेक्षाया
व्यावृत्तिः। उपमानोपमेयविशेषणाभ्यां सादृश्यलाभात् सुखं मनोरमा
रामा इत्यादिशुद्धारोपतादात्म्यनिरासः। सादृश्यमूलकमेव च तादा-
३६त्म्यं रूपकमामनन्ति। इति व्याचख्यौ। मुखं चन्द्रः इत्यत्र प्रथमं लक्षणया
चन्द्रपदात् चन्द्रसादृश्योपस्थितिः। ततश्चन्द्रसदृशमुखमिति अन्वयबोधः।
पश्चात् लक्षणाफलावगमायोद्भूतया व्यञ्जनया चन्द्रो मुखमित्यभिन्नतया
३९चन्द्रमुखयोः प्रतीतिः। इदमेव लक्षणायाः फलम्। सा चाभेदप्रतीतिः
प्राधान्येन वैचित्र्यमीदृशस्थले प्राप्नोति तेन सादृश्यप्रतीतिजन्यमुपमा-
वैचित्र्यं तत्कुक्षिनिलीनमिव भवति अतोत्र नोपमा। प्रधानचमत्कृतेरेव
४२अलंकारप्रयोजकत्वात् तद्वैचित्र्योपस्थितस्यैवालंकारत्वम् नान्तर्विलीनभूत-
वैचित्र्योपस्थितानामिति पूर्वोक्तमत्रानुसंधेयम्। उपमैव इति एवकारेण
संबन्धान्तरनिरासः। सादृश्यसंबन्धमूलकलक्षणायामेव रूपकं न जन्य-
४५जनकभावादिसंबन्धमूलकलक्षणायामिति भावः। तेनायुर्घृतम् इत्यादौ न
रूपकम्। अत्र प्रेमचन्द्रः—नवीनतरास्तु रूपकस्य सादृश्यप्रतीति-
पूर्वकत्वमेव। तच्च सादृश्यं प्रत्यक्षादिप्रमाणान्तरगम्यं न तु गौणसारोप-
४८लक्षणया शब्दप्रमाणगम्यम्। तत्र सादृश्यस्य शब्दवेद्यत्वादुपमैव। अत
एवाग्नेये (344. 22)—

✓ उपमानस्य तत्त्वं यदुपमेये तु रूप्यते।

चरणपल्लवः ॥ ६६ ॥

अङ्गुल्यः पल्लवान्यासन् कुसुमानि नखार्चिषः ।

गुणानां समतां दृष्ट्वा रूपकं नाम तद्विदुः ॥

५२इत्यत्र दृष्ट्वेत्युक्तम् । तस्मात् सादृश्यस्य प्रमाणान्तरवेद्यत्वे एव रूपकम् । लक्षणास्थले तु लक्षणाफलत्वेनाभ्युपगतापि अभेदबुद्धिरुदीच्य-
५४बोधतया शाब्दबोधविषयतां गतस्य सादृश्यस्य तत्काल एव प्रवृत्त-मुपमाव्यपदेशं न व्याहन्तुमीष्टे प्रवृत्तत्वात् तस्य । न हि निर्बाधं लब्धसत्ताकं वस्तु कालान्तरीयेण प्रतिद्वन्द्विनान्यथाकर्तुं शक्यते इति
५७वदन्ति इत्याहुः । आस्तामेतत् प्रकृतमनुसरामः । एवं रूपकस्य सामान्य-लक्षणमभिधाय उदाहरति यथेति । बाहुरेव लता पाणिरेव पद्मम् चरण एव पल्लव इति उपमानप्रधानः मयूरव्यंसकादित्वात् समासः । अत्र
६०समासेपि प्रथमं गौणलक्षणया लतादिपदात् तत्सादृश्यप्रतीतिः तदनन्तरं तदनुरोधेन समुन्मिषन्त्या व्यञ्जनया ताद्रूप्यप्रतीतिर्ज्ञेया । अत्र केचित् बाहुर्लतेव इति उपमितं व्याघ्रादिभिः सामान्याप्रयोगे इति कर्मधारयं
६३अङ्गीकुर्वन्ति । परं तन्नरुचिरं इवादिशब्दवत् कर्मधारयस्यापि साम्य-वाचकत्वेन उपमानोपमेययोः भेदप्रदर्शनेन उपमायाः संभवात् । अत एव एवंविधस्थले साधकबाधकप्रमाणाभावे उपमारूपकयोः सांकर्य-
६६मिच्छन्ति तन्निरूपितमेव प्रागस्माभिः । प्रकृतोदाहरणेपि साधकबाधक-प्रमाणाभावाद्रूपकोपमयोः सांकर्यमेव स्यात् । शुद्धोदाहरणं तु—तव बाहुलता बाले कोमला भाति भूतले इति ऊह्यम् । अत्र कोमलेति
६९सामान्यधर्मप्रयोगात् सामान्याप्रयोगे एव उपमितिसमासस्य विहितत्वात् बाहुरेव लता इति समासः । अत्र कोमलेति विशेषणमुपमाया बाधकम् । एवमेव तव बाहुलता बाले पुष्पिता नखरश्रिया इति उदाहरणं ज्ञेयम् ।
७२अत्र पुष्पितत्वमुपमानलताया एव धर्म इति रूपकस्य साधकम् ॥ ६६ ॥

पूर्वं समस्तरूपकोदाहरणं प्रदर्शितम् इदानीमसमस्तं दर्शयति—अङ्गुल्य इति । त्वं नः अस्माकं प्रत्यक्षचारिणी प्रत्यक्षं चरितुं शीलमस्याः
३सा प्रत्यक्षचारिणी दर्शनविषयीभूतेत्यर्थः वसन्तश्रीः वसन्तलक्ष्मीः । वसन्त-श्रियः सादृश्यदर्शनाय तदुभयवृत्तिवस्तूनां बिम्बप्रतिबिम्बतया विषय-

ii. 67—नखात्विषः for नखार्चिषः M (?), Cs.

बाहू लते वसन्तश्रीस्त्वं नः प्रत्यक्षचारिणी ॥ ६७ ॥
इत्येतदसमस्ताख्यं समस्तं पूर्वरूपकम् ।
स्मितं मुखेन्दोर्ज्योत्स्नेति समस्तव्यस्तरूपकम् ॥ ६८ ॥
ताम्राङ्गुलिदलश्रेणि नखदीधितिकेसरम् ।
भ्रियते मूर्ध्नि भूपालैर्भवच्चरणपङ्कजम् ॥ ६९ ॥
अङ्गुल्यादौ दलादित्वं पादे चारोप्य पद्मताम् ।

विषयिभावं दर्शयति अङ्गुल्य इति । अङ्गुल्यः अङ्गुष्ठादयः करशाखाः
६पल्लवानि किसलयानि । उपमायामिव रूपके उपमानोपमेययोर्भिन्नलिङ्गत्वे न दोषः । अतोत्र वाक्यत्रये भिन्नलिङ्गयोर्निर्देशः । वचनभेदोपि रूपके क्वचिन्न दोषाय यथा शास्त्राणि चक्षुर्नवम् इत्यादि । अत्र शास्त्राणि
९इत्यनेन सकलशास्त्रप्रवीणत्वसूचनेन चमत्कारातिशयः । एवंविधस्थले न वचनभेदो दोषाय ॥ ६७ ॥

निर्दिष्टस्य द्विप्रकारकस्य रूपकस्य संज्ञां निर्दिशति—इत्येतदिति । इत्येतत् अङ्गुल्य पल्लवानीत्येतत् असमस्ताख्यम् असमस्तसंज्ञकम् । पूर्व-
३रूपकम् बाहुलता पाणिपद्मं चरणपल्लवः इत्यादिकं समस्तं समस्तसंज्ञकं रूपकम् । तत्रोपमानोपमेययोः समस्तत्वादिति भावः । समस्तव्यस्तरूपकं दर्शयति स्मितमिति । मुखेन्दोः मुखमेव इन्दुः तस्य स्मितं हास्यं
६ज्योत्स्ना । अत्र मुखेन्दोरिति समस्तं स्मितं ज्योत्स्नेति व्यस्तम् । इति समस्तव्यस्तरूपकम् ॥ ६८ ॥

सकलरूपकं दर्शयति—ताम्राङ्गुलिरिति । ताम्राङ्गुल्य एव दलश्रेणिः पत्रपङ्क्तिर्यत्र तत् । नखानां दीधितयः किरणानि एव केसराणि किञ्-
१ल्कानि यस्मिन् । एतादृशं भवच्चरणपङ्कजं त्वत्पदकमलं भूपालैः मूर्ध्नि भ्रियते उह्यते ॥ ६९ ॥

उदाहरणस्थसकलरूपकत्वं विशदयति—अङ्गुल्यादौ इति । अङ्गुल्यादौ आदिशब्देन नखग्रहणम् । दलादित्वम् अत्रादिशब्देन केसरग्रहणम् ।
३पादे च पद्मताम् आरोप्य तद्योग्यस्थानविन्यासात् तस्य पङ्कजस्य योग्यस्थानं

---

ii. 70—वारोप्य for चारोप्य Cs.

तद्योग्यस्थानविन्यासादेतत् सकलरूपकम् ॥ ७० ॥
अकस्मादेव ते चण्डि स्फुरिताधरपल्लवम् ।
मुखं मुक्तारुचो धत्ते घर्माम्भःकणमञ्जरीः ॥ ७१ ॥
मञ्जरीकृत्यघर्माम्भः पल्लवीकृत्य चाधरम् ।

मूर्धा तत्र विन्यासात् ध्रियते इति प्रतिपादनात् एतत् सकलरूपकम् सम्पूर्णरूपकम् दलकेसररूपसर्वावयवनिरूपणात्। अयं भावः चरणपङ्कज-
६मित्यत्र उपमारूपकयोः संशयः। तत्र भूपालैर्मूर्ध्नि ध्रियते इति वर्णनेन मूर्ध्नि धारणस्य पङ्कजस्यैव युक्तत्वात् तदुपमानप्राधान्ये सुसंगतं भवति। अतः मूर्ध्नि धारणं रूपकसाधकम् उपमेये चरणे तस्यासंभवादुपमाया बा-
९धकम्। अतोत्र रूपकमेव नोपमा न वा संदेहसंकरः। इदमेव साङ्गं साव-यवमिति अर्वाचीना व्यवहरन्ति। उक्तं च जगन्नाथेन (p. 231)—
११परस्परसापेक्षनिष्पत्तिकानां रूपकाणां संघातः सावयवम् यथा—

सुविमलमौक्तिकतारे धवलांशुकचन्द्रिकाचमत्कारे ।
वदनपरिपूर्णचन्द्रे सुन्दरि राकासि नात्र संदेहः ॥ इति ।

विस्तरस्तु तत्रैव द्रष्टव्यः। अङ्गुल्यः पल्लवान्यासन् इति असमस्तरूपको-
१५दाहरणमपि सकलरूपकस्य भवतीति ज्ञेयम् ॥ ७० ॥

अवयवरूपकोदाहरणं दर्शयति—अकस्मादिति। हे चण्डि कोपने अकस्मात् सहसैव स्फुरिताधरपल्लवं स्फुरितः कोपेन कम्पितः अधर एव
३पल्लवः यत्र तत् ते मुखम्। मुक्ताः मौक्तिकाः तद्वत् रुक् यासां ताः मुक्ताकारा इत्यर्थः घर्माम्भकणमञ्जरीः घर्माम्भसां स्वेदोदकानां ये कणाः बिन्दवः त एव मञ्जर्यः अथवा घर्माम्भः एव कणमञ्जरीः कण-
६वल्लरीः तुषारस्तबका इत्यर्थः। धत्ते दधते ॥ ७१ ॥

उदाहरणं विशदयति—मञ्जरीति। अत्र प्रस्तुतोदाहरणे घर्माम्भः उपरिदर्शितप्रथमसमासे घर्माम्भःशब्देन घर्माम्भकणाः ग्राह्याः। द्वितीय-
३समासस्वीकारे मञ्जरीशब्देन कणमञ्जरीः ग्राह्याः। अयमेव समासो युक्त इति भाति। अन्यथा कमले मञ्जरीवर्णनस्यानुपयुक्ततया मञ्जरीपदं व्यर्थ-

---

ii. 71—स्फुटिताधर for स्फुरिताधर M;—वमन्तिः(न्तीः?) for घर्माम्भः V.

ii 72—घर्माम्बु for घर्माम्भः D, M, V; स्वेदाम्भः Ca.

नान्यथा कृतमत्रास्यमतोवयवरूपकम् ॥ ७२ ॥

वल्गितभ्रु गलद्घर्मजलमालोहितेक्षणम् ।
विवृणोति मदावस्थामिदं वदनपङ्कजम् ॥ ७३ ॥

मिव भवति। मञ्जरीकृत्य मञ्जरीत्वेनारोप्य अधरम् अधरोष्ठं पल्लवीकृत्य
६पल्लवत्वेन आरोप्य आस्यम् मुखम् अवयवि नान्यथाकृतम् पद्माभिन्नत्वेन न वर्णितम्। अतोवयवमात्ररूपणात् अवयवरूपकमिदम्। मुखे पद्मत्वारोपस्तु अर्थवशादवसेयः। अर्वाचीनास्तु एतदेव एकदेशविवर्ति रूपकं मन्यन्ते
९परं तत्र स्वल्पो विशेषः। अवयवरूपके अवयविनः आरोपविषयत्वं नास्तीति निश्चयः। एकदेशविवर्तिरूपके तु अवयवानां अवयविनो वा यस्य कस्यापि रूपकैकदेशस्य रूपणाभावोभिप्रेतोस्ति। अतो जगन्नाथोदाहृत-
१२एकदेशिविवर्तिरूपकोदाहरणे—

रूपजला चलनयना नाभ्यावर्ता कचावलिभुजङ्गा ।
मज्जन्ति यत्र सन्तः सेयं तरुणी तरङ्गिणी विषमा ॥

१५इत्यत्र नावयवरूपकम्। तत्र अवयविन्यास्तरुण्यास्तरङ्गिणीत्वेनारोपात्। एकदेशेविवर्ति तु भवति रूपकस्यावयवभूतस्य चलनयनस्य विषयभूतस्य विषयिणा मीनेनानारोपणात्। अत एव प्रकाशकारेण (P. 723)—
१८श्रौता आर्थाश्च ते यस्मिन्नेकदेशाविवर्ति तत्। इति सामान्यं लक्षणं विहितम् ॥ ७२ ॥

अवयविरूपकमाह—वल्गितभ्रु इति। वल्गिते चलिते भ्रुवौ यस्मिन्स्तत् चलितभ्रुकुटि। गलन्ति घर्मजलानि स्वेदजलानि यस्मात् तत्।
३आलोहिते आरक्ते ईक्षणे नयने यस्मिन् तत्। इदं पुरो दृश्यमानं वदनपङ्कजं वदनमेवपङ्कजं कमलम् मदावस्थां मद्यसेवनजनितमदावस्थां विवृणोति प्रकाशयति। यथाश्रुतपाठेत्र उपमैव साधीयसी न रूपकम्। उपमानपङ्कजमा-
६त्रान्वयिधर्माणामनुपादानात् उपमेयवदनस्यैवान्वयिनो भूत्वादीनां चोपादानात्। सत्यम्। वदनमम्बुजमिति पाठं स्वीकृत्य व्यस्तरूपकेण समाधेयम् ७३

---

ii. 72 —अन्यथीकृतम् for अन्यथा कृतम् Cs.

ii. 73—वलित for वल्गित R;—जात for जल M;—between 72 and 73 V introduces stanza 90 and the first half of stanza 91, the same being also given in their proper place. This has thrown off its numbering.

अविकृत्य मुखाङ्गानि मुखमेवारविन्दताम् ।
आसीद्गमितमत्रेदमतोवयविरूपकम् ॥ ७४ ॥

मदपाटलगण्डेन रक्तनेत्रोत्पलेन ते ।
मुखेन मुग्धः सोप्येष जनो रागमयः कृतः ॥ ७५ ॥

एकाङ्गरूपकं चैतदेवं द्विप्रभृतीन्यपि ।

उदाहरणं विवृणोति—अविकृत्येति । अस्मिन्नुदाहरणे मुखाङ्गानि भ्रुकुटिघर्मजलनयनादीनि अविकृत्य पङ्कजाङ्गभूतैः अविकृत्य उपमानाङ्ग-
३भूतदलत्वमकरन्दत्वपरागपिञ्जरभ्रमरत्वादिभिः अनारोप्य अवयवि मुखमेव अरविन्दतां गमितमासीत् पङ्कजत्वेन आरोपितमासीत् । अतः अवयविनो मुखस्यैव पङ्कजत्वेनारोपणात् अवयविरूपकमिदम् । नव्यानां
६तु इदमेकदेशविवर्ति स्यात् इति भाति । नवीनमते इदं निरङ्गरूपकमिति केषांचिदुक्तिस्तु न क्षोदक्षमा । यतोत्रावयविनो मुखस्य अवयवा निर्दिष्टाः न तु आरोपावयविनो कमलस्य अवयवा निर्दिष्टाः । निरङ्गविषये तु
९अवयविनः आरोप्या अपि न निर्दिश्यन्ते । अत एव एकदेशवर्तिनो निरङ्गस्य भेदः इति सुधीभिर्विचारणीयम् ॥ ७४ ॥

अवयवरूपकभेदान् दिदर्शयिषुरेकाङ्गरूपकभेदमाह—मदेति । मदेन वारुणीमदेन पाटलौ श्वेतरक्तौ गण्डौ कपोलौ यत्र तेन तथा
३रक्तं ताम्रं नेत्रमेव उत्पलं यत्र तेन एतादृशेन ते मुखेन एषः मल्लक्षणः मुग्धः त्वत्सौन्दर्यमोहितः जनः रागमयः अनुरागपरिपूर्णः लोहितमयश्च कृतः ॥ ७५ ॥

नाम निर्दिशति—एकाङ्गेति । अत्र उदाहरणे रक्तनेत्रोत्पलेन इति एकाङ्गमात्ररूपणात् मदपाटलगण्डेन इत्यस्य अरूपणाच्च एकाङ्ग-
३रूपकमिदम् । एवम् अनयैव दिशा द्विप्रभृतीनि अपि द्वित्रिचतुःप्रभृतीनि अङ्गानि न तु अङ्गी रूपयन्ति उपमानेन आरोपविषयीकुर्वन्ति कवय इति

---

ii. 74—अविवृत्य for अविकृत्य Rn; अधिकृत्य D,V;—omits मुखाङ्गानि V;—अवयव for अवयवि V, M.

ii. 75—मुग्धे for मुग्धः V;—मुग्धे मुखेन for मुखेन मुग्धः D.

ii. 76—चेदम् for चैतद् M.

अङ्गानि रूपयन्त्यत्र योगायोगौ भिदाकरौ ॥ ७६ ॥
स्मितपुष्पोज्ज्वलं लोलनेत्रभृङ्गमिदं मुखम् ।
इति पुष्पद्विरेफाणां संगत्या युक्तरूपकम् ॥ ७७ ॥
इदमार्द्रस्मितज्योत्स्नं स्निग्धनेत्रोत्पलं मुखम् ।
इति ज्योत्स्नोत्पलायोगादयुक्तं नाम रूपकम् ॥ ७८ ॥

शेषः । ततश्च द्व्यङ्गरूपकं त्र्यङ्गरूपकं चतुरङ्गरूपकमित्यादीनि बहूनि रूपकाणि भवन्ति । अङ्गस्य अङ्गयोः अङ्गानां वा योगः आरोपणयोगः अयोगस्तदभावः भिदाकरौ भेदनिष्पादकौ । प्राचीनटीकाकारास्तु योगायोगौ भिदाकरौ एतावन्तं वाक्यांशमन्यथा विवृण्वन्ति । तथा हि तेषु एकाङ्गद्व्यङ्गादिरूपकेषु योगायोगौ भिदाकरौ भेदकौ । तानि रूपकाणि योगायोगाभ्यां पुनः द्विप्रकाराणि भवन्ति इत्यर्थः । योगः आरोप्यमाणानां परस्परं युज्यमानः संबन्धः अयोगस्तदभावः । एतच्च उदाहरणे स्पष्टीभविष्यति ॥ ७६ ॥

तत्रादौ युक्तरूपकमुदाहरति—स्मितेति । स्मितम्—

ईषद्विकसितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः ।
अलक्षितद्विजं धीरमुत्तमानां स्मितं भवेत् ॥

इत्युक्तलक्षणं तदेव पुष्पं तेन उज्ज्वलं कान्तिमत् । लोले चञ्चले नेत्रे एव भृङ्गौ यत्र तत् । इदं मुखं शोभते इति शेषः । इति एवं पुष्पद्विरेफाणां मुखावयवभूतयोः स्मितनेत्रयोः आरोपविषयीभूतानां तेषां संगत्या परस्परसंबन्धमुसंगत्या इदं युक्तरूपकम् । अत्र अवयत्वं नाम आधेयत्वम् तन्मुखनिरूपितं स्मिते वर्तते इति स्मितस्य मुखावयवत्वं बोध्यम् ॥ ७७ ॥

अयुक्तरूपकमुदाहरति—इदमिति । आर्द्रं प्रेमार्द्रं स्मितमेव ज्योत्स्ना चन्द्रिका यस्मिन् तत् । स्निग्धे स्नेहपूर्णे नेत्रे एव उत्पले कमले यस्मिन् । ज्योत्स्नोत्पलायोगात् आरोपविषयभूतयोः चन्द्रिकाकमलयोः अयोगात् परस्परविरोधितया असंबन्धात् इदम् अयुक्तरूपकम् ॥ ७८ ॥

---

ii. 76—रूपकं यत्र for रूपयन्त्यत्र D.

ii. 78—आविः for आर्द्रं M, Cs;—नेलाम्बुजं for नेत्रोत्पलं M;—ज्योत्स्नाम्बुजायोगात् for ज्योत्स्नोत्पलायोगात् M.

रूपणादङ्गिनोऽङ्गानां रूपणारूपणाश्रयात् ।
रूपकं विषमं नाम ललितं जायते यथा ॥ ७९ ॥
मदरक्तकपोलेन मन्मथस्त्वन्मुखेन्दुना ।
नर्तितभ्रूलतेनालं मर्दितुं भुवनत्रयम् ॥ ८० ॥
हरिपादः शिरोलग्नजह्नुकन्याजलांशुकः ।
जयत्यसुरनिःशङ्कसुरानन्दोत्सवध्वजः ॥ ८१ ॥
विशेषणसमग्रस्य रूपं केतोर्यदीदृशम् ।

विषमरूपकं लक्षयति—रूपणादिति । अङ्गिनः प्रधानस्य रूपणात् तथा अङ्गानाम् अप्रधानानां रूपणारूपणाश्रयात् भावे घञ् आश्रयणादित्यर्थः । ३तथा च कस्यचिदङ्गस्य रूपणं कस्यचिदरूपणं तस्मात् । ललितं वैचित्र्येण मनोहरं विषमं रूपणारूपणवैषम्यात् विषमसंज्ञकं जायते । यथेति उदाहरणप्रस्तावाय ॥ ७९ ॥

उदाहरति—मदरक्तेति । मदरक्तकपोलेन मदपाटलगण्डेन । नर्तित-भ्रूलतेन नर्तिते भ्रुवौ एव लते यत्र तादृशेन । तव मुखमेव इन्दुः तेन ३भुवनत्रयं मर्दितुं जेतुम् अलं समर्थः । अत्र अङ्गिनि मुखे इन्दुत्वारोपः तथा तदङ्गभूतयोः भ्रुवोर्लेतात्वारोपः कपोलयोस्तु न कस्यापि आरोपः इति वैषम्यम् ॥ ८० ॥

सविशेषणरूपकमाह—हरिपाद इति । शिरोलग्नजह्नुकन्याजलांशुकः शिरः चरणाग्रप्रदेशः ध्वजाग्रप्रदेशश्च तत्र लग्ना आसक्ता या जह्नु-३कन्या भागीरथी तस्याः जलम् उदकमेव अंशुकं श्वेतपताका यस्य सः । असुरनिःशङ्कसुरानन्दोत्सवध्वजः असुरेभ्यः निःशङ्का निर्भीका बलि-विजयादित्यर्थः ये सुराः तेषामानन्दोत्सवस्य ध्वजः केतुरेव हरेः ६वामनस्य पादः जयति सर्वोत्कर्षेण वर्तते ॥ ८१ ॥

उदाहृतालंकारं निर्देशपूर्वकं विशदयति—विशेषणेति । विशेषणेन शिरोलग्नेतिविशेषणेन समग्रस्य युक्तस्य केतोः असुरनिःशङ्कसुरानन्दो-

---

ii. 79—रूपणारूपणाश्रयम् for रूपणारूपणाश्रयात् N;—रूपणां रूपसंश्रयात् V;— जायते ललितं for ललितं जायते V.

ii. 81—सुरानन्दोत्सवो for सुरानन्दोत्सव N.

पादे तदर्पणादेतत् सविशेषणरूपकम् ॥ ८२ ॥
न मीलयति पद्मानि न नभोप्यवगाहते ।
त्वन्मुखेन्दुर्ममासूनां हरणायैव कल्पते ॥ ८३ ॥
अक्रिया चन्द्रकार्याणामन्यकार्यस्य च क्रिया ।
अत्र संदर्श्यते यस्माद्विरुद्धं नाम रूपकम् ॥ ८४ ॥
गाम्भीर्येण समुद्रोसि गौरवेणासि पर्वतः ।

[3]तत्सवध्वजस्य यत् ईदृशं रूपं विशेषणविशिष्टस्वरूपं सपताकध्वजरूपमित्यर्थः पादे तस्य सपताकध्वजरूपस्य समर्पणात् विशेषणविशिष्टस्य पदार्थस्यारोपात् सविशेषणरूपकमेतत् ॥ ८२ ॥

विरुद्धरूपकमाह—न मीलयतीति । त्वन्मुखेन्दुः तव वदनचन्द्रमाः पद्मानि न मीलयति न संकोचयति । नभोपि न अवगाहते नाक्रमति । [3]केवलं मम असूनां प्राणानां हरणाय कल्पते प्रभवति। विप्रलम्भोद्दीपकत्वादिति भावः ॥ ८३ ॥

उदाहरणं विशदयति—अक्रियेति । चन्द्रकार्याणां पद्मनिमीलननभोवगाहित्वादीनां चन्द्रव्यापाराणाम् अक्रिया अविधानम् अन्यस्य चन्द्र-[3]भिन्नमृत्योः कार्यं प्राणहरणरूपं तस्य क्रिया अनुष्ठानम् अत्र अस्मिन्नुदाहरणे यस्मात् संदर्श्यते अतः विरुद्धं विरुद्धसंज्ञकं रूपकम् । रूपके उपमानाभिन्नतया रूपितस्योपमेयस्य तत्कार्यकरणमेवोचितम् । परमत्र [6]तत् तेन न क्रियते प्रत्युत तद्विरुद्धशीलस्य कार्यकरणादिदं विरुद्धम् । विरोधश्चात्र अनौचित्यरूप इति बोध्यम् ॥ ८४ ॥

हेतुरूपकमुदाहरति—गाम्भीर्येणेति । गाम्भीर्येण दुरवगाहाशयत्वेन

---

ii. 82—पादेन दर्शनात् for पादे तदर्पणात् D.

ii. 83—निर्मीलयति for न मीलयति R, V;—हरणाय व्यवस्यति for हरणायैव कल्पते D;—यस्यति for कल्पते Pn, J; वर्तते V; यास्यति Cs.

ii. 84—अन्यकार्यक्रिया तथा for अन्यकार्यस्य च क्रिया D;—संदिश्यते for संदर्श्यते R; संदृश्यते M;—यस्मात् संदर्श्यते तस्मात् for अत्र संदर्श्यते यस्मात् D;—विरूपं for विरुद्धं Cs.

ii. 85—गुरुत्वेनापि for गौरवेणासि D.

कामदत्वाच्च लोकानामसि त्वं कल्पपादपः ॥ ८५ ॥

गाम्भीर्यप्रमुखैरत्र हेतुभिः सागरो गिरिः ।
कल्पद्रुमश्च क्रियते तदिदं हेतुरूपकम् ॥ ८६ ॥

राजहंसोपभोगार्हं भ्रमरप्रार्थ्यसौरभम् ।
सखि वक्त्राम्बुजमिदं तवेति श्लिष्टरूपकम् ॥ ८७ ॥

समुद्रोसि । गौरवेण सारवत्तया पर्वतः असि। लोकानां कामदत्वात् ३वाञ्छितप्रदत्वात् कल्पपादपः कल्पवृक्षः त्वमसि । सर्वत्र हेतौ तृतीया ॥ ८५ ॥

उदाहरणं विवृणोति—गाम्भीर्येति। गाम्भीर्यप्रमुखैः गाम्भीर्यगौरव-कामदत्वैः प्रस्तुतनृपः सागरः गिरिः कल्पद्रुमश्च क्रियते एतेषां आरो- ३पविषयीक्रियते गिरित्वादिभिः आरोप्यते इति भावः । अत्र गाम्भीर्यादिसाधारणधर्माणां हेतुत्वेन विन्यसनात् हेतुरूपकमिदम् । साहित्यदर्पणकारास्तु (x. 37)—एकस्यानेकधोल्लेखः यः स उल्लेख उच्यते । ६इति उल्लेखलक्षणं विधाय अत्र एकस्य प्रस्तुतस्य नृपस्य गाम्भीर्यादिविषयभेदेनानेकधोल्लेखादिममुल्लेखालंकारमाहुः । परं हेतुशून्यस्थले विविधारोपे उल्लेखः हेतुपुरःसरे तु हेतुरूपकमिति उभयोर्भेदे सति ९यत् तैरुल्लेख एव सामान्यतया सर्वत्र स्वीकृतः तच्चित्यमिति भाति ॥८६॥

श्लिष्टरूपकं दर्शयति—राजेति । राजहंसोपभोगार्हम् राजहंसो नृपश्रेष्ठः हंसविशेषश्च तेन उपभोगार्हं संभोगोचितम् । भ्रमरप्रार्थ्यसौरभम् ३भ्रमरैः कामुकैः भृङ्गैश्च प्रार्थ्यं स्पृहणीयं सौरभं यस्य । सखि दयिते तव वक्त्राम्बुजं वक्त्रमेव अम्बुजं भातीति शेषः । श्लिष्टरूपकम् साधारणधर्मस्य श्लेषनिष्पाद्यत्वादिति भावः । साधारणधर्मप्रयोगाच्च ६नोपमितिसमासः ॥ ८७ ॥

---

ii. 85—कामदानाच्च for कामदत्वाच्च D.

ii. 87—भोगार्थं for भोगार्हं B;—भाति for इदं D;—तदेतत् for तवेति Rn;—the stanza is omitted by M.

इष्टं साधर्म्यवैधर्म्यदर्शनाद्गौणमुख्ययोः ।
उपमाव्यतिरेकाख्यं रूपकद्वितयं यथा ॥ ८८ ॥
अयमालोहितच्छायो मदेन मुखचन्द्रमाः ।
संनद्धोदयरागस्य चन्द्रस्य प्रतिगर्जति ॥ ८९ ॥
चन्द्रमाः पीयते देवैर्मया त्वन्मुखचन्द्रमाः ।

उपमारूपकं व्यतिरेकिरूपकं चेति रूपकद्वयं लक्षयति—इष्टमिति । गौणः गुणसंबन्धादारोप्यमाणः चन्द्रादिर्विषयो गौणः मुख्यः वर्ण्यत्वेन ३प्रस्तुतत्वात् प्रधानः मुखादिविषयः तयोः गौणमुख्ययोः साधर्म्यदर्शनादुपमारूपकं वैधर्म्यदर्शनात् व्यतिरेकरूपकम् इष्टम् आलंकारिकैरिति शेषः ॥ ८८ ॥

उपमारूपकमुदाहरति—अयमिति । मदेन वारुणीमदेन आलोहितच्छायः आरक्तकान्तिः अयं मुखमेवचन्द्रमाः । सन्नद्धोदयरागस्य सन्नद्धः सर्व-३बिम्बव्यापनेन प्रस्फुरन्नुदयरागः उदयकालीनलौहित्यं यस्य तथाविधस्य चन्द्रस्य प्रतिगर्जति समानकान्तिमत्त्वात् स्पर्धते । चन्द्रस्येति कर्मणि षष्ठी । चन्द्रं स्पर्धते न तु तमनुकरोतीत्यर्थः । अन्यथा उपमाया एव प्रधान-६वाक्यस्थिततया प्राधान्यात् तत्कुक्षिनिलीनस्य मुखचन्द्रमा इतिरूपकस्य अलंकारव्यपदेशकत्वाभावेन इदं रूपकभेदोदाहरणमसंगतं स्यात् । तथैव रूपकेण चन्द्राभिन्नं मुखमिति अवगतस्य मुखस्य चन्द्रसदृशं मुखमिति ९प्रतीतेरसंगतत्वमपि स्यात् । एवं चात्र चन्द्राभिन्नतया आरोपविषयीभूतस्य मुखस्य औपम्यसूचकप्रतिगर्जनारूपसाधर्म्यसंबन्धादुपमारूपकमिदम् । अत्रासंतुष्टाः प्रेमचन्द्रशर्माणस्तु रक्तं तव मुखं चण्डि साक्षात् सन्ध्ये-१२न्दुमण्डलम् । इत्येतदुदाहरणं पर्यवर्तन्त ॥ ८९ ॥

व्यतिरेकरूपकं दर्शयति—चन्द्रमा इति । देवैः असमग्रोपि असंपूर्णोपि

ii. 88—दर्शनं गौण for दर्शनाद्गौण V;—व्यतिरेकाभ्यां for व्यतिरेकाख्यं D;—रूपकं द्वितयं for रूपकद्वितयं V, M.

ii. 89—मुखस्य for चन्द्रस्य P (evidently an oversight, as the commentary gives the correct reading; the mistake is corrected in the reprint);—आसन्नोदय for सन्नद्धोदय Cs.

असमग्रोप्यसौ शश्वदयमापूर्णमण्डलः ॥ ९० ॥
मुखचन्द्रस्य चन्द्रत्वमित्थमन्योपतापिनः ।

असौ चन्द्रमाः शश्वत् पीयते । अयं मत्पुरोवर्ती आपूर्णमण्डलः संपूर्ण-
३बिम्बः त्वन्मुखचन्द्रमाः त्वन्मुखमेवचन्द्रमाः मया पीयते। अत्र मुख्यगौ-
णचन्द्रमसोः असंपूर्णत्वसंपूर्णत्वरूपवैधर्म्ययोगात् व्यतिरेकरूपकमेतत्।
अयं च व्यतिरेकः उपमानादुपमेयस्योत्कर्षं द्योतयति। नायं वक्ष्यमाणो-
६व्यतिरेकालंकारः तस्य सादृश्यप्रतीतिपूर्वकभेदपर्यवसानविषयत्वात् ।
अत्र रूपकत्वेनाभेदप्रतीतिः । तदुक्तं—

शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयोः ।
तत्र यद्भेदकथनं व्यतिरेक स उच्यते ॥ इति ॥ ९० ॥

आक्षेपरूपकं दर्शयति—मुखेति। हे सुन्दरि इत्थं मया प्रत्यक्षीकृतम्
अतिप्रखरम् । अन्योपतापिनः अन्याः प्रतिनायिकाः तासां उपतापिनः
३संतापकस्य सौन्दर्यातिशयेन तासां मात्सर्योदयात्। ते मुखचन्द्रस्य चन्द्र-
त्वं न संवादि नानुगुणम्। यतः प्रसिद्धचन्द्रः सर्वेषामाह्लादकः तव मुखं
तु प्रतिनायिकानां संतापकरम् अतो न संवादि । अथवा अन्योपता-
६पिनः अन्यः त्वत्तो भिन्नः नायकोहं तस्य उपतापिनः प्रणयकलहे मधु-
रोक्तिशून्यतया। अन्यत् सर्वं पूर्ववत्। अत्र अन्ये टीकाकारास्तु—इत्थ-
मितिपदं वाक्यस्यास्य कमलसंकोचनकृतचन्द्रनिन्दाबोधकवाक्यानन्तर्य
९सूचयति । इत्थं कमलसंकोचनेन अन्योपतापिनः परपीडयितुः यद्वा
इत्थम् एवम् अतिनिर्दयमित्यर्थः। अन्योपतापिनः मादृशविरहिजनसंताप-
कस्य चन्द्रस्य प्रसिद्धस्य चन्द्रत्वं तव मुखचन्द्रस्य न संवादि न युज्यते।
१२सर्वेषामाह्लादकत्वेन परपीडकधर्मव्यासायोगादिति भावः इति विवृण्व-
न्ति। तत्र अन्योपतापिनः इति विशेषणमात्राद्विशेष्यस्य चन्द्रस्य प्रतीतिः
स्वीकर्तव्या। तदुक्तं वामनेन—विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ
१५इति। इत्येतत् आक्षेपरूपकम् आक्षेपः प्रतिषेधोक्तिः तदुपादाननियतत्वात्
आक्षेपरूपकम् । अथवा आक्षेपः निन्दा तन्निवेशनादिदमाक्षेपरूपकम् ।
नायं व्यतिरेकः सादृश्यप्रतीतेरभावात् । न वापह्नुतिः प्रस्तुतस्य

---

ii. 90—असमग्रो ह्यसौ for असमग्रोप्यसौ M.

न ते सुन्दरि संवादीत्येतदाक्षेपरूपकम् ॥ ९१ ॥
मुखेन्दुरपि ते चण्डि मां निर्दहति निर्दयम् ।
भाग्यदोषान्ममैवेति तत् समाधानरूपकम् ॥ ९२ ॥
मुखपङ्कजरङ्गेस्मिन् भ्रूलतानर्तकी तव ।

[18]निषेधायोगात् । अत्र निषेधश्चन्द्रत्वस्य स तु न प्रस्तुतः आरोपविषयत्वात् । प्रथमार्थस्वीकारेपि प्रस्तुतमुखचन्द्रस्य निषेधेपि अन्यार्थस्य अनारोपान्न सा भवति तत्र अन्यार्थारोपणस्य विहितत्वात् । तथा च [21]वक्ष्यति—अपह्नुतिरपह्नुत्य किंचिदन्यार्थदर्शनमिति ॥ ९१ ॥

समाधानरूपकं कथयति—मुखेन्दुरिति । हे चण्डि ते मुखेन्दुरपि मां निर्दयं दहति । अत्र अपिना दहनस्यान्त्यतायोग्यता सूचिता । तत्र स्वयं [3]समाधत्ते ममैवेति । भाग्यदोषात् दैवदुर्विपाकात् इति एवं स्वयं समाधानात् इदं समाधानरूपकम् ॥ ९२ ॥

रूपकरूपकमाह—मुखेति । मुखमेवपङ्कजं तदेव रङ्गं नृत्यस्थानं तस्मिन् । भ्रुवौ एव लता सा एव नर्तकी नटी लीलानृत्यं विलासनर्तनं [3]करोति इति एतत् रम्यं मनोहरं रूपकरूपकम् । एकेन रूपितस्यान्येन-रूपणात् तत्संज्ञकोलंकारः । तथा च मुखपङ्कजरङ्गे इत्यत्र प्रथमं मुखस्य पङ्कजेन रूपणं पश्चाच्च मुखपङ्कजस्य रङ्गेण रूपणम् । तथैव भ्रूलता-[6]नर्तकी इत्यत्र प्रथमं भ्रुवः लतात्वेन पश्चाद्भ्रूलतायाः नर्तकीत्वेन रूपणम् । इदं च समासे एव संभवति । वाक्ये तु एकस्मिन् बहूनामारोपे हेतूपा-दाने हेतुरूपकम् । यथा गाम्भीर्येण समुद्रोसि इत्यादि पूर्वं निर्दिष्टम् । [9]हेतोरनिर्देशे तु मालारूपकम् यथा प्रकाशे (P. 726)—

सौन्दर्यस्य तरङ्गिणी तरुणिमोत्कर्षस्य हर्षोद्गमः
कान्तेः कार्मणकर्म नर्मरहसामुल्लासनावासभूः ।
विद्या वक्रगिरां विधेरनवधिप्रावीण्यसाक्षात्क्रिया
बाणाः पञ्चशिलीमुखस्य ललनाचूडामणिः सा प्रिया ॥

---

ii. 92—यद्दहति for निर्दहति D;—निर्दयः for निर्दयम् D, M;—भाग्यदोषो for भाग्यदोषात् V,M;—भाग्यदोषो ममैवायं for भाग्यदोषान्ममैवेति D, Cs.

लीलानृत्तं करोतीति रम्यं रूपकरूपकम् ॥९३॥
नैतन्मुखमिदं पद्मं न नेत्रे भ्रमराविमौ ।
एतानि केसराण्येव नैता दन्तार्चिषस्तव ॥९४॥
मुखादित्वं निवर्त्यैवं पद्मादित्वेन रूपणात् ।

अत्र रम्यमिति लक्षणघटकतयाङ्गीकृत्य यत्र रूपकरूपणे रम्यत्वं नास्ति
१५तत्र नायमलंकारः । यथा—नारीबाहुलताव्यालीपरिरब्धः कुतः सुखी इति। अत्र बाहौ लतात्वारोपे न कापि रम्यता । अपकर्षप्रतिपादनस्यैव प्रस्तावात् इति प्रेमचन्द्रशर्माणः कथयन्ति । अस्मिन्नुदाहरणे चम-
१८त्कृतिरास्ति परं बाहौ लतात्वारोपे रम्यता नास्तीति तदभिप्रायः इति ध्येयम् ॥९३॥

तत्त्वापह्नवरूपकं दर्शयति—नैतादिति । एतन्मुखं न इदं पद्मम् । इमे नेत्रे न अपि तु भ्रमरौ । एता दन्तार्चिषः दन्तकान्तयः न किंतु केस-
३राणि किञ्जल्का एव । तवेति सर्वत्र उपमेयेन संबध्यते ॥९४॥

उक्तोदाहरणं व्याख्याति—मुखादित्वमिति। मुखादित्वम् मुखत्वादिकं मुखत्वनेत्रत्वदन्तार्चिष्टरूपमुपमेयं निवर्त्यैव प्रतिषिध्यैव पद्मादित्वेन
३पद्मत्वादिना पद्मत्वभ्रमरत्वकेसरत्वेन रूपणात् आरोपात् उद्भासित-गुणोत्कर्षम् उद्भासितः रूपकान्तरेभ्यः औन्नत्यं नीतः गुणानामुत्कर्षः तादात्म्यारोपहेतु प्रस्तुतगुणानाम् आधिक्यम् यत्र तत् । तत्त्वस्य
६यथार्थभूतस्य प्रस्तुतस्य मुखत्वरूपस्य अपह्नवेन अप्रस्तुतपद्मा-दित्वरूपारोपेण वस्तुनिह्नवेन रूपकम् इति तत्त्वापह्नवरूपकम् । रूप-कान्तरेषु केवलं सामानाधिकरण्येन उपमेयोपमानानामभेददर्शनेन यावान्
९गुणोत्कर्षः ततोपि अधिकोत्र प्रतिषेधपूर्वकारोपेण इति उद्भासितगुणो-त्कर्षत्वमस्मिन् रूपके सहृदयवेद्यमस्ति । केचित्तु उद्भासिगुणोत्कर्षम् इत्य-स्य उद्भासितः स्फुटं दर्शितः गुणोत्कर्षः प्रस्तुतस्य यत्रेति प्रस्तुतोपमेयस्य
१२गुणवर्णनरूपं तत्त्वापह्नवरूपकस्य विशेषं मन्यते । परं तदपेक्षया प्रथम-

---

ii. 93—नृत्यं for नृत्तं P, R, D;—रम्य for रम्यं D, M.

ii. 94—न तन्मुखम् for नैतन्मुखम् V;—इमे for इमौ R, D (emended to इमौ in the margin).

ii. 95—निवर्त्यैव for निवर्त्यैवं P, R, V;—पद्मादित्वनिरूपणात् for पद्मादि-त्वेन रूपणात् V, D.

उद्भासितगुणोत्कर्षं तत्त्वापह्नवरूपकम् ॥९५॥
न पर्यन्तो विकल्पानां रूपकोपमयोरतः ।

दर्शिताशयः एव गरीयान् इति भाति । नेयमपह्नुतिः तस्यां प्रस्तुतस्य धर्मनिषेधेन धर्मान्तरारोपः । यथा—न पञ्चेषुः स्मरस्तस्य सहस्रं पत्रिणा-
१५मिति । कुवलयानन्देपि—शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः । इति धर्मनिह्नवस्थले एव अपह्नुतेर्विषयो दर्शितः । अस्मिन्नुदाहरणे प्रस्तुतस्य स्मरस्य पञ्चेषुत्वरूपं धर्मं प्रतिषिध्य तस्मिन् सहस्रपत्रित्वा-
१८रोपः । अत्र तु धर्मिणं मुखादिकं प्रतिषिध्य धर्म्यन्तरस्य पद्मादिकस्यारोपः इति उभयोर्भेदः । केचित्तु सादृश्यप्रतीतिपूर्वकारोपो रूपकम् । अपह्नुतौ तु सादृश्यप्रतीतिर्नापेक्ष्यते सादृश्यप्रतीतिभिन्नस्थलीयारोपे एव
२१सा । तथा च प्रकृते निषेधेपि सादृश्यप्रतीतिरस्त्येव इति अत्र सादृश्यप्रतीतिर्जीवितस्य रूपकस्यैव साम्राज्यम् । दर्पणकारास्तु (x. 32)—प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः । इति सामान्यतः प्रतिषेधपूर्वकारोपे अप-
२४ह्नुतिं कथयन्ति । तदपह्नुतिविषयपरिहारार्थं च रूपकलक्षणे—रूपकं रोपितारोपो विषये निरपह्नवे । इति विषयस्य विशेषणमुपन्यस्यन्ति । तन्मतेत्रापह्नुतिर्ग्येव ॥९५॥

रूपकमुपसंहरति—न पर्यन्त इति । रूपकस्य उपमायाश्च विकल्पानां प्रकाराणां पर्यन्तः परिसमाप्तिः नास्ति । अतः दिङ्मात्रम् उपमारूपकस्वरू-
३पावगमाय किंचिदिव दर्शितं कथितम् । अनयैव दिशा धीरैः साहित्यशास्त्रप्रगल्भमतिभिः अनुक्तमपि अकथितः उपमारूपकविभागः अनुमीयताम् उन्नीयताम् । तथा च भेदद्वयविशिष्टं परंपरितमपि रूपकभेद
६एव । तदुक्तं प्रकाशकृता (P. 728f.)—

नियतारोपणोपायः स्यादारोपः परस्य यः ।
तत् परंपरितं श्लिष्टे वाचके भेदभाजि वा ॥

---

ii. 65—उद्भावित for उद्भासित P, R, D, M, Cs;—तत्त्वापह्नुति for तत्त्वापह्नव Cs, M, D (emended to तत्त्वापह्नव in the margin).

ii. 96—The stanza is omitted by M;—पर्यन्तो न for न पर्यन्तो D;—यतः for अतः D.

दिङ्मात्रं दर्शितं धीरै-

यथा—

विद्वन्मानसहंस वैरिकमलासंकोचदीक्षागुरो
दुर्गामार्गणनीललोहित समित्स्वीकारवैश्वानर ।
सत्यप्रीतिविधानदक्ष विजयप्राग्भावभीम प्रभो
साम्राज्यं नरवीर वत्सरशतं वैरिञ्चमुच्चैः क्रियाः ॥ इति ।

अत्र मानसमेव मानसम् कमलायाः संकोच एव कमलानामसंकोचः दुर्गाणाममार्गणमेव दुर्गायाः मार्गणम् समितां युद्धानां स्वीकारः एव समिधां स्वीकारः सत्ये प्रीतिरेव सत्यामप्रीतिः विजयः परपराभवः एव विजयः अर्जुनः एवमारोपणानिमित्तो हंसादेरारोपः ॥ भेदभाजि यथा—

आलानं जयकुञ्जरस्य दृषदां सेतुर्विपद्वारिधेः
पूर्वाद्रिः करवालचण्डमहसो लीलोपधानं श्रियः ।
संग्रामामृतसागरप्रमथनक्रीडाविधौ मन्दरो
राजन् राजति वीरवैरिवनितावैधव्यदस्ते भुजः ॥ इति ।

अत्र जयादेर्भिन्नशब्दवाच्यस्य कुञ्जरत्वाद्यारोपे भुजस्य आलानत्वाद्यारोपो युज्यते । अप्पय्यदीक्षितास्तु अश्लिष्टशब्दनिबन्धनं मालापरंपरितमपि दर्शयन्ति यथा(चि. मी. P. 51)—

पर्यङ्को राजलक्ष्म्या हरितमणिमयः पौरुषाब्धेस्तरङ्गः
संग्रामत्रासताम्यन्मुरलपतियशोहंसलीलाम्बुवाहः ।
भग्नप्रत्यर्थिवंशोल्बणविजयकरिस्त्यानदानाम्बुपट्टः
खड्गक्ष्मासौविदल्लः समिति विजयते मालवाखण्डलस्य ॥ इति ।

इदं चाधिकारारूढवैशिष्ट्यमपि भवति यथा—इदं वक्त्रं साक्षाद्विरहितकलङ्कः शशधरः । इति । वैयधिकरणेपि भवति यथा—विदधे मधुपश्रेणीमिह भ्रूलतया विधिः । इति । क्वचिद्वैधर्म्येणापि यथा—सौजन्याम्बुमरुस्थली सुजनता लेख्यद्युभित्तिर्गुणः । इत्यादि । काव्यानुशासने (P.251) अन्येपि भेदा हेमचन्द्रेण दर्शिताः । तथाहि अनेकविषयं रूपकं यथा—

यस्या बीजमहंकृतिर्गुरुतरो मूलं ममेति ग्रहो
नित्यत्वस्मृतिरङ्कुरः सुतसुहृज्जात्यादयः पल्लवाः ।

रनुक्तमनुमीयताम् ॥९६॥

॥ इति रूपकचक्रम् ॥

स्कन्धोदारपरिग्रहः परिभवः पुष्पं फलं दुर्गतिः
सा मे त्वच्चरणार्हणा परशुना तृष्णा लता लूयताम् ॥

३८इदमेव अन्यैः उभयावयवत्वेन निर्दिश्यते । उदाहरणान्तरं यथा—

इन्द्रस्त्वं तव बाहू जयलक्ष्मीद्वारतोरणस्तम्भौ ।
खड्गः कृतान्तरसना रसना च सरस्वती राजन् ॥ इति ।

४१सहजावयवरूपकं यथा—

गजो नगः कुथा मेघाः शृङ्खलाः पन्नगा अपि ।
यन्ता सिंहोपि शोभन्ते भ्रमरा हरिणास्तथा ॥ इति ।

४४यथा वा—

पप्फुरिअओट्ठदलअं तक्खणविगलिअरुहिरमहुविच्छड्डं ।
उक्खण्डिदअण्ठणालं पडिअं फुटदसणकेसरं मुहकमलं ॥

अत्र ओष्ठादीनां दलादीनां च मुखाम्भोजावयवानां स्फुरितविगलितोत्खण्डितस्फुटविशेषणविशिष्टानां परस्परमुपमानोपमेयभावरूपितानां मुखपक्षे कमलपक्षे च सहजत्वं गम्यते ।

५०उभयावयवं यथा—

अलिकुलकुन्तलभाराः सरसिजवदनाश्च चक्रवाककुचाः ।
राजन्ति हंसरसनाः संप्रति वापीविलासिन्यः ॥ इति ।

५३रशनारूपकं यथा—

किसलयकरैर्लतानां करकमलैर्मृगदृशां जगज्जयति ।
नलिनीनां कमलमुखैर्मुखेन्दुभिर्योषितां मदनः ॥ इति ।

अत्र हि किसलयकरैः करकमलैः कमलमुखैः मुखेन्दुभिरिति रशनाक्रमेण ५७शब्दानां संदर्भः उपलभ्यमानः तदर्थानां मनोभुवो जगद्विजये लतादिसंबन्धात् करणभावमनुमापयति । एवमन्येपि विविधाः कल्पिताः प्रभेदाः सन्ति । तेषु केचिदुक्तेषु अन्तर्भावनीयाः केचित्तु वर्णनानुरोधेन ६०तत्तदनुरूपनामभिरूहनीयाः । विस्तरस्तु सरस्वतीकण्ठाभरणे चतुर्थपरिच्छेदे द्रष्टव्यः ॥ ९६ ॥

जातिक्रियागुणद्रव्यवाचिनैकत्र वर्तिना ।
सर्ववाक्योपकारश्चेत् तदाहुर्दीपकं यथा ॥९७॥

क्रमप्राप्तं दीपकं लक्षयति—जातीति । एकत्र प्रबन्धान्तरगते कस्मिंश्चिदपि एकस्मिन् वाक्ये आदिमध्यावसानेषु एकस्मिन् स्थाने वर्तिना विद्यमानेन ३जातिक्रियागुणद्रव्यवाचिना जात्याद्यन्यतमवाचकेन पदेन सर्ववाक्योपकारश्चेत् स्वार्थद्वारा वाक्यान्तरार्थान्वयोपपत्तिश्चेत् तदा तं रचनाचमत्कारं दीपकं दीपकसंज्ञालंकारम् आहुः कवय इति शेषः । दीप ६इव दीपकम् । संज्ञायां कन् इति सूत्रेण इवार्थे कन् । दीपो यथा प्रासादार्थमारोपितः प्रासादमुपकृत्य रथ्यामपि उपकरोति तथा कस्मिंश्चिदपि एकस्मिन् वाक्ये स्थितं जात्यादिपदं तद्वाक्योपस्कारपूर्वकम् ९अन्यस्मिन् वाक्ये तदादिसर्वनाम्ना चकारादिना वा अनुषक्तं सत् तदर्थं संपादयति इति दीपसाम्यात् दीपकम् । एवं च एकवाक्योपात्तपदप्रतिपाद्यस्य जात्याद्यन्यतमस्य तत्रोपपन्नान्वयत्वेन निराकाङ्क्षस्यापि पुनः १२वाक्यान्तरान्वयोपपादनायानुषङ्गादिना तत्रान्वयित्वं दीपकमिति निष्कर्षः। अत एव अस्य अर्थालंकारत्वम् । इदमेव दीपकलक्षणं भरतभामहादिभिः कटाक्षितं दृश्यते । सरस्वतीकण्ठाभरणेपि इदमेव लक्षणं स्वीकृत्य १५विस्तरः प्रदर्शितः । प्रकाशकारादयः अर्वाचीनास्तु प्रस्तुताप्रस्तुतयोर्धर्मस्य सकृद्वृत्तित्वं दीपकमाहुः । तदनेकवाक्यगतं चेदेतन्मतेन दीपकं भवेत् । एकवाक्यगतत्वे तु भिन्नं तदिति ध्येयम् । उपमारूपकयोः साधारणधर्म- १८स्योभयान्वितत्वेपि अनुषङ्गादिना वाक्यान्तरार्थोपस्थापकत्वाभावान्न तत्र दीपकातिव्याप्तिः। सर्ववाक्योपकारः यत्र जात्यादिपदानामुपादानं तद्वाक्यस्य तथा तद्भिन्नानां जात्यादिपदाकाङ्क्षिणां वाक्यान्तराणां च उपकारः। अनेन २१एकवाक्ये दीपकं न भवतीति स्पष्टम् ॥ ९७ ॥

ii. 97—वाक्योपचार for वाक्योपकार R, P probably an oversight as the Com. gives the correct reading);—तमाहुः for तदाहुः P.

पवनो दक्षिणः पर्णं जीर्णं हरति वीरुधाम् ।
स एव च नताङ्गीनां मानभङ्गाय कल्पते ॥९८॥
चरन्ति चतुरम्भोधिवेलोद्यानेषु दन्तिनः ।
चक्रवालाद्रिकुञ्जेषु कुन्दभासो गुणाश्च ते ॥९९॥
श्यामलाः प्रावृषेण्याभिर्दिशो जीमूतपङ्क्तिभिः ।

दीपकमुदाहरति—पवन इति । दक्षिणः पवनः मलयानिलः वीरुधां जीर्णं पत्रं हरति। अनेन तस्य मान्द्यं सूचितम् । स एव अत्र तच्छब्दः ३पूर्ववाक्यस्थपवनशब्दपरामर्शकः। स एव पवनः आनताङ्गीनां विनम्रगात्रीणां मानभङ्गाय कल्पते कामोद्दीपकत्वादिति भावः। अत्र पूर्ववाक्यस्थस्य पवन इति जातिवाचकपदस्य उत्तरवाक्ये स इत्यनेन परामर्शादन्वयः ६सुघटितो भवति इति दीपकालंकारः । शास्त्रे वायोः एकाञ्चाशद्व्यक्तिकथनात् तत्सामान्यवाचकः पवनशब्दो जातिवाचकः । अत एतत् जातिर्दीपकम् ॥ ९८ ॥

क्रियादीपकमुदाहरति—चरन्तीति । कस्यचिच्चक्रवर्तिनः नृपस्य वर्णनमेतत् । ते दन्तिनः चतुरम्भोधिवेलोद्यानेषु चरन्ति । अनेन सार्वभौ- ३मत्वं सूचितम् । ते गुणाश्च चक्रवालाद्रिकुञ्जेषु लोकलोकपर्वतकुञ्जेषु कुन्दभासः कुन्दकुसुमस्येव भाः कान्तिः येषां ते तादृशाः गुणाः चरन्ति । अनेन गुणानां विश्वव्यापित्वं सूचितम् । अत्र चकारेण परामृष्टायाः ६चरन्तीतिक्रियायाः पूर्ववाक्यवदुत्तरवाक्योपकारकत्वात् क्रियादीपकमेतत् । अत्र केचित् दन्तिनः इत्यस्य दिग्दन्तिनः इत्यर्थं स्वीकृत्य ते इति षष्ठ्यन्तपदस्य तत्संबन्धविरहेणैवार्थं प्रदर्शयन्ति परं राजवर्णानुगुणः ९प्रथमनिर्दिष्ट एवार्थः इति नो भाति ॥ ९९ ॥

गुणदीपकमुदाहरति—श्यामला इति। दिशः दश दिशः प्रावृषेण्याभिः प्रावृट्कालसंभूताभिः । प्रावृष एण्यः इति प्रावृट्शब्दात् भवार्थे एण्य- ३प्रत्ययः । जीमूतपङ्क्तिभिः मेघराजिभिः श्यामलाः मलिनाः । भुवश्च

---

ii. 98—नवाय for स एव Cs;—स एवावनताङ्गीनाम् P, R, D; स एव नतगात्रीणाम् Rn.

भुवश्च सुकुमाराभिर्नवशाद्वलराजिभिः ॥१००॥
विष्णुना विक्रमस्थेन दानवानां विभूतयः ।
क्वापि नीताः कुतोप्यासन्नानीता देवतर्द्धयः ॥१०१॥
इत्यादिदीपकान्युक्तान्येवं मध्यान्तयोरपि ।
वाक्ययोर्दर्शयिष्यामः कानिचित् तानि तद्यथा ॥१०२॥
नृत्यन्ति निचुलोत्सङ्गे गायन्ति च कलापिनः ।

सुकुमाराभिः नवशाद्वलराजिभिः कोमलनूतनतृणहरितीकृतप्रदेशैः श्यामलाः । अत्र श्यामलाः इति गुणवाचकपदेन दिशः इति पदस्य ६तथा चकारेण भुवः इत्यस्य च संबन्धात् इदं गुणदीपकम् ॥ १०० ॥

द्रव्यदीपकमाह—विष्णुनेति । विक्रमस्थेन त्रिपादविक्रममाचरता त्रिविक्रमेण विष्णुना दानवानां बलिप्रभृतीनां विभूतयः संपदः क्वापि नीताः ३लयं प्रापिता इत्यर्थः । तथा दैवतर्द्धयः इन्द्रादीनां श्रियः कुतोपि आनीताः । अवितर्कितमेव संपादिता इत्यर्थः आसन्निति शेषः । अत्र विष्णुशब्दस्य व्यक्तिवाचकतया द्रव्यत्वम् । तच्च पूर्ववाक्यस्थितं ६काकाक्षिन्यायेन अनुषङ्गेन वा अपरत्रान्वेति इति द्रव्यदीपकम् ॥१०१॥

उक्तानि आदिदीपकानि मध्यान्तदीपकानि दर्शयामः इति प्रतिजानीते—इत्यादीति । इति पूर्वोक्तप्रकारेण आदिदीपकानि उक्तानि । ३वाक्यान्तरसंबध्यमानजातिक्रियागुणद्रव्यवाचकानां पदानां प्रथमवाक्ये निवेशितत्वात् । एवम् अनेनैव प्रकारेण अन्यत्र परामृश्यमानजात्यादिपदनिवेशान मध्यान्तवाक्ययोरपि कानिचित् तानि दीपकानि दर्शयिष्यामः । ६तद्यथा तानि यथा एतद्वक्ष्यमाणोदाहरणार्थम् ॥१०२॥

मध्यवाक्यगतं जातिदीपकमुदाहरति—नृत्यन्तीति । कलापिनः मयूराः निचुलो वेतसवृक्षः तस्य उत्सङ्गे अधोभूमौ नृत्यन्ति । तथा ३गायन्ति केकाशब्दं कुर्वन्ति । तथा पयोदेषु सजलमेघेषु हर्षाश्रुगर्भिणीम्

---

ii. 100—भवन्ति for भुवश्च M;—भिन्न for नव D.
ii. 101—दैवत for देवत V, J.
ii. 102—दर्शयिष्यामि for दर्शयिष्यामः D;—तच्छृणु for तद्यथा D.

बध्नन्ति च पयोदेषु दृशं हर्षाश्रुगर्भिणीम् ॥१०३॥
मन्दो गन्धवहः क्षारो वह्निरिन्दुश्च जायते ।
चर्चाचन्दनपातश्च शस्त्रपातः प्रवासिनाम् ॥१०४॥

आनन्दबाष्पपरिपूर्णां दृशं बध्नन्ति आसक्तां कुर्वन्ति । अत्र वाक्यान्तरैरन्वितं कलापिन इति जातिवाचकपदं मध्यवाक्यवर्ति इति मध्यगतं ६जातिदीपकम् ॥१०३॥

क्रियागतं मध्यदीपकमुदाहरति—मन्दो गन्धवह इति । प्रवासिनां विरहिपान्थस्थानां मन्दः मृदुः गन्धवहः सुरभिवातः क्षारः क्षतपतित-३क्षारवत् क्लेशकरः जायते। इन्दुश्च वह्निः वह्निरिव सन्तापकरः जायते। चर्चा अङ्गचर्चनं तदर्थो यश्चन्दनः शीतलचन्दनरस इत्यर्थः तस्य पातः संबन्धः शस्त्रपातः शस्त्रप्रहारः जायते । अत्र सर्ववाक्यान्वयिनः जा-६यते इति क्रियापदस्य मध्यवाक्यगतत्वात् मध्यवाक्यगतं क्रियादीपकमेतत् । किं च रूपकमपि । अत उभयोः संसृष्टिसंकरः । मध्यगतं गुण-८द्रव्यदीपकं श्रीप्रेमचन्द्रशर्माण इत्थं दर्शयन्ति यथा—

तडिद्विर्वारिवाहाणां योगः स्त्रीभिः प्रवासिनाम् ।
लताभिः पादपानां च समायाते घनागमे ॥ इति ।

११अत्र योगः संयोगः स च गुणः । मध्यवाक्यगतेन च सर्ववाक्यदीपनात् गुणगतं मध्यदीपकमिदम् । तथैव—

मुहुर्विश्वं संसृजति बिभर्ति च मुहुर्हरिः ।
मुहुश्च नाशं नयति बालक्रीडनकौतुकी ॥ इति ।

१५अत्र हरिर्द्रव्यम् तच्च मध्यवाक्यगतमिति मध्यगतं द्रव्यदीपकम् । इति ॥ १०४ ॥

---

ii. 103—दृशो for दृशं P, R, D, J;—गर्भिणीः for गर्भिणीम् P, R, D, J.

जलं जलधरोद्गीर्णं कुलं गृहशिखण्डिनाम् ।
चलं च तडितां दाम बलं कुसुमधन्वनः ॥१०५॥
त्वया नीलोत्पलं कर्णे स्मरेणास्त्रं शरासने ।
मयापि मरणे चेतस्त्रयमेतत् समं कृतम् ॥१०६॥

अन्तवाक्यगतजातिदीपकमुदाहरति—जलमिति । जलधरैः मेघैः उद्गीर्णं वान्तं जलं वृष्टिजलम् गृहशिखण्डिनां प्रासादस्थितमयूराणां कुलं समूहः चलं चञ्चलं तडितां विद्युतां दाम सन्दानम् एतत् त्रयं कुसुमधन्वनः मदनस्य बलं सैन्यम् । अत्र बलमिति जातिवाचकेन अन्तवाक्यस्थितेन पदेन वाक्यत्रये समन्वयात् एतत् अन्तगतं जातिदीपकम् ॥ १०५ ॥

अन्तदीपकं क्रियागतमुदाहरति—त्वयेति । त्वया कर्णे नीलोत्पलम् स्मरेण शरासने अस्त्रम् मयापि मरणे चेतः चित्तम् एतत् त्रयं समं युगपत् कृतम् । मानिनीं प्रति नायकस्योक्तिरियम् । अत्र चरमवाक्यस्थेन कृतमिति क्रियावाचकेन इतरवाक्यसंबन्धात् क्रियागतमन्त्यदीपकमिदम् । गुणद्रव्यगतमन्तवाक्यदीपकं श्रीप्रेमचन्द्रशर्माणः दर्शयन्ति यथा—

इदमुज्जृम्भते बिम्बं भानोस्तापयितुं जगत् ।
ममेव हृदयं चण्डि मुखं च तव लोहितम् ॥

अत्रान्त्यवाक्यगतं लोहितमिति गुणपदं वाक्यद्वयं दीपयति ।

सत्यं विश्वं संतपति सत्यं कर्षति वै रसान् ।
तमांसि तु निहन्तीति प्रार्थनीयोदयो रविः ॥

अत्र रविरिति द्रव्यपदं सर्वाणि वाक्यानि दीपयति । इति द्रव्यगतमन्त्यवाक्यदीपकम् । अत्र गुणगतान्त्यवाक्योदाहरणे ममेव हृदयं लोहितमित्यत्र लोहितमारक्तम् अनुरक्तमित्यर्थः ॥ १०६ ॥

---

ii. 105—कलं च शिखिनां रुतम् for कुलं गृहशिखण्डिनाम् V (marginal substitution).

ii. 106—कर्णोत्पलं for नीलोत्पलं N, D;—स्मरेणेषुः for स्मरेणास्त्रं D;—मया च for मयापि D;—रमणे for मरणे Cs.

शुक्लः श्वेतार्चिषो वृद्धयै पक्षः पञ्चशरस्य सः ।
स च रागस्य रागोपि यूनां रत्युत्सवश्रियः ॥१०७॥
इत्यादिदीपकत्वेपि पूर्वपूर्वव्यपेक्षिणी ।
वाक्यमाला प्रयुक्तेति तन्मालादीपकं मतम् ॥१०८॥

मालादीपकमुदाहरति—शुक्ल इति। शुक्लः पक्षः मासस्य प्रथमः पक्षः श्वेतार्चिषः चन्द्रस्य वृद्धयै परिपोषाय भवति । सः श्वेतार्चिः पञ्चशरस्य ३मदनस्य वृद्धयै भवति । स च पञ्चशरः रागस्य अनुरागस्य वृद्धयै भवति । रागोपि यूनां तरुणानां रत्युत्सवश्रियः विलासोत्सवलक्ष्म्याः वृद्धयै भवति ॥ १०७ ॥

उदाहरणं विशदयति—इतीति । इति एवम् आदिदीपकत्वेपि वृद्धयै इति सर्ववाक्यानुषक्तपदस्य प्रथमवाक्यस्थितत्वेन आदिदीपकसद्भावेपि ३पूर्वपूर्वव्यपेक्षिणी स्वोपकारकत्वेन पूर्वपूर्ववाक्यमपेक्षमाणा वाक्यमाला उत्तरीयो वाक्यसमूहः प्रयुक्ता ग्रथितः । इति एवं मालावैचित्र्यानुगतत्वात् इदं मालादीपकम् मतम् शिष्टानामिति भावः । तथा च पूर्व-६पूर्ववाक्यसापेक्षोत्तरवाक्येषु जात्याद्यन्यतमपदानुषङ्गो मालादीपकम् इति फलितम् । इदं सर्ववाक्येष्वनुषज्यमानं सापेक्षवाक्यस्थमेवेति नाग्रहः । ८अत एव प्रकाशकारेण मालादीपकस्य—

सङ्ग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद्यत् समासादितम् ।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् ॥

१३इति निरपेक्षवाक्यगतेनापि आसादितम् इति क्रियावाचकेन सर्वेषां वाक्यानां दीपनात् मालादीपकोदाहरणं दत्तम्। भोजस्तु अत्र भावलक्षणाक्षि-१५सस्य भावविशेषस्य द्वितीयपादे यत् संक्षेपेणाभिधानं तदेतत् चक्रवालाद्विणेव मालादीपकेन विस्तारवता वेष्टितमिदं चक्रवालं नाम दीपकस्य भेदः इत्याह ॥ १०८ ॥

---

ii. 108—व्यपेक्षणी for व्यपेक्षिणी D;—विदुः for गतम् Rn.

अवलेपमनङ्गस्य वर्धयन्ति बलाहकाः ।
कर्शयन्ति च घर्मस्य मारुतोध्दूतशीकराः ॥१०९॥
अवलेपपदेनात्र बलाहकपदेन च ।
क्रिये विरुद्धे संयुक्ते तद्विरुद्धार्थदीपकम् ॥११०॥
हरत्याभोगमाशानां गृह्णाति ज्योतिषां गणम् ।
आदत्ते चाद्य मे प्राणानसौ जलधरावली ॥१११॥
अनेकशब्दोपादानात् क्रियैकैवात्र दीप्यते ।

विरुद्धार्थदीपकमुदाहरति—अवलेपेति। बलाहकाः मेघाः अनङ्गस्य अवलेप दर्पं वर्धयन्ति । मारुतोध्दूतशीकराः वायूत्क्षिप्तजलकणाः ३बलाहकविशेषणमेतत् । घर्मस्य ग्रीष्मस्य अवलेपं कर्शयन्ति कृशं कुर्वन्ति । अत्र हेतुर्मारुतोध्दूतशीकरा इति ॥ १०९ ॥

उदाहरणं व्याख्याति—अवलेपेति । अत्र अस्मिन्नुदाहरणे अवलेप-पदेन कर्मभूतेन बलाहकपदेन कर्तृभूतेन च विरुद्धक्रिये वर्धनकृशीकरण-३रूपे संयुक्ते सामानाधिकरण्यं प्रापिते । एवं च विरुद्धक्रिययोर्वर्धनकृशी-करणरूपयोरपि एकस्मिन् कर्तरि कर्मणि च संबन्धेन वैचित्र्यविशेषात् विरुद्धदीपकमिदम्। एतच्च आदिवाक्यस्थअवलेपबलाहकपदाभ्याम् उत्तर-६वाक्यसमन्वयात् आदिदीपकम् । तथैव च अवलेपम् इति गुणवाचकं बलाहक इति जातिवाचकम् इति गुणजातिगतयोस्तयोः संकरः ॥११०॥

एकार्थदीपकमुदाहरति — हरतीति । असौ जलधरावली मेघपङ्क्तिः आशानां दिशाम् आभोगं विस्तारं हरति । ज्योतिषां नक्षत्राणां गणं ३समूहं गृह्णाति स्वमिन् निगूहति ते प्राणांश्च आदत्ते हरति ॥ १११ ॥

उदाहरणं विशदयति—अनेकेति । अत्र अस्मिन्नुदाहरणे यतः जलधरावल्यः अन्तवाक्यगतेन तत्पदेन एकैव क्रिया अदर्शनरूपा अनेक-३शब्दोपादानात् अनेका बहवः ये शब्दाः हरणग्रहणादानरूपाः क्रि-

---

ii. 109—कर्षयन्ति for कर्शयन्ति N,D.
ii. 110—रूपकम् for दीपकम् N.
ii. 111—चापि for चाद्य D.
ii. 112—क्रियैकत्र for क्रियैकैवात्र D;—P suggests the emend-ation अनेकशब्दोपादना.

यतो जलधरावल्यस्तस्मादेकार्थदीपकम् ॥११२॥
हृद्यगन्धवहास्तुङ्गास्तमालश्यामलत्विषः ।
दिवि भ्रमन्ति जीमूता भुवि चैते मतङ्गजाः ॥११३॥
अत्र धर्मैरभिन्नानामभ्राणां हस्तिनामपि ।

यावाचकाः तेषां उपादानात् स्वीकारात् हेत्वर्थे पञ्चमी । दीप्यते निर्व्यूढान्वयेनोज्ज्वलीक्रियते । तस्मात् अनेकपदप्रतिपाद्यस्य एकार्थस्य दीपनादेकार्थदीपकमिदम् । विभिन्नक्रियाणामेककारकसंबन्धरूपं नवीनैरङ्गीकृतं कारकदीपकम् अस्माद्भिन्नमेव एकार्थानेकक्रियाभावात् । कारकदीपकं प्रकाशे दर्शितं यथा (P.778)—

स्विद्यति कूणति वेल्लति विचलति निमिषति विलोकयति तिर्यक् ।
अन्तर्नन्दति चुम्बितुमिच्छति नवपरिणया वधूः शयने ॥

इति ॥११२॥

श्लिष्टार्थदीपकमाह—हृद्येति । हृद्यः निदाघसंतापदूरीकरणेन मनोरमः गन्धवहः वायुर्यत्र इति जीमूतपक्षे । हृद्यः घ्राणतर्पकः गन्धः दानोदकगन्धः तं वहन्ति धारयन्ति इति हृद्यगन्धवहाः गजाः । तुङ्गाः उच्चाः । तमालानामिव श्यामला मलिना त्विट् येषां ते तमालश्यामलत्विषः उभयत्र समानम् एतादृशा जीमूताः मेघाः दिवि आकाशे भ्रमन्ति पर्यटन्ति भुवि च एते मतङ्गजाः दन्तिनः ॥११३॥

उदाहरणं विवृणुते—अत्रेति । धर्मैः अभिन्नानां हृद्यगन्धवहत्वादिधर्मैः अभिन्नानाम् एकशब्दप्रतिपाद्यत्वेन च भेदशून्यानाम् तत्र प्रथमविशेषणे एकशब्दप्रतिपाद्यत्वम् उत्तरत्र एकार्थत्वमिति ज्ञेयम् । अभ्राणां तथा दन्तिनां भ्रमणेनैव भ्रमन्ति इति क्रिययैव संबन्धः वाक्यद्वये तस्या एव संबन्धात् इति । श्लिष्टशब्दप्रतिपाद्यसाधारणधर्मवतोर्जीमूतमतङ्गजयोः

---

ii. 112—जलधरावल्या for जलधरावल्यः J, P, R; जलधरावल्याः N, V.
ii. 114—दन्तिनां for हस्तिनां P, R.

भ्रमणेनैव संबन्ध इति श्लिष्टार्थदीपकम् ॥११४॥
अनेनैव प्रकारेण शेषाणामपि दीपके ।

कर्लोभ्रमन्तीति क्रियया दीपनात् इदं श्लिष्टार्थदीपकम् । तत्र हृद्यगन्धवहा इत्यत्र शब्दश्लेषः अपरत्रार्थश्लेषः॥११४॥

दीपकमुपसंहरति—अनेनेति । अनेनैव प्रकारेण एकत्रान्वितेन पदस्य वाक्यान्तरसमन्वयरूपवैचित्र्यमुपजीव्य विविधदर्शितरचनावैचित्र्येण शेषाणामपि उक्तेष्वशिष्टानामपि विकल्पानां प्रकाराणाम् आवलिसंपुटप्रभृतीनाम् अवगतिः यथायथं निवेशो विधातव्या कर्तव्यः । तथा चोक्तं भोजराजेन—

अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरावली ।
संपुटं रसना माला चक्रवालं च तद्भिदाः ॥ इति ।

तत्र अर्थावृत्तिः पदावृत्तिरुभयावृत्तिः इत्येतानि आचार्यदण्डिना आवृत्त्यलंकारनाम्ना अग्रे एव दर्शितानि । ततः आवली यथा—

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह-
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।
परिच्छिन्नामेवं त्वयि परिणतां बिभ्रति गिरं
न विद्मस्तत् तत्त्वं वयमिह हि यत् त्वं न भवसि ॥ इति ।

संपुटं यथा—

नवपल्लवेषु लोलति घूर्णति विटपेषु चलति शिखरेषु ।
स्थापयति स्तबकेषु चरणे वसन्तलक्ष्मीरशोकस्य ॥ इति ।

अत्र अशोकस्य नवपल्लवेषु वसन्तलक्ष्मीः लोलति अशोकस्य विटपेषु वसन्तलक्ष्मीः घूर्णते अशोकस्य शिखरेषु वसन्तलक्ष्मीः चलति अशोकस्य स्तबकेषु वसन्तलक्ष्मीः चरणे स्थापयति इति संपुटक्रमेण मिथः वसन्तलक्ष्मीरशोकः इति पदे द्रव्यवाचिनी संबध्यमाने मिथः संबद्धे एव दीपयतः । तदेतत् संपुटं नाम दीपकम् । रसनादीपकं मालादीपकं प्रायः समानमेव । तच्च मूले दर्शितेन मालादीपकेन ज्ञातप्राय-

---

ii. 114—तथा for अपि P, R, N.
ii. 115—एवमुक्त for अनेनैव D.

विकल्पानामनुगतिर्विधातव्या विचक्षणैः ॥११५॥
॥ इति दीपकचक्रम् ॥
अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरित्यपि ।
दीपकस्थान एवेष्टमलंकारत्रयं यथा ॥११६॥
विकसन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः ।

मिति न पुनः उदाहरणेन दर्शयामः। चक्रवालमपि न तथा मनोहारि। तत्स्वरूपं प्राक् दर्शितमेव। इति दीपकचक्रं दीपकसंघः ॥११५॥

दीपकनिरूपणानन्तरं तत्सजातीयमावृत्त्यलंकारं लक्षयति—अर्थावृत्तिरिति। दीपकस्थाने दीपकप्रसङ्गे अर्थावृत्तिः पदावृत्तिः उभयावृत्तिः इति एतत्संज्ञकम् अलंकारत्रयम् इष्टम् कविभिरिति शेषः। यथेति उदाहरणप्रदर्शनाय। अर्थावृत्तिर्नाम एकस्य वाक्यार्थस्य पुनः वाक्यान्तरेणोपस्थापनम्। पदावृत्तिः एकस्मिन् वाक्ये स्थितानां पदानां पुनर्वाक्यान्तरे तेन रूपेणोस्थितिः। उभयावृत्तिः वाक्यार्थपदयोरेकतरस्मिन् वाक्ये निर्दिष्टयोः पुनरन्यत्रोभयोरुत्थितिः। दीपके वाक्यान्तरे अपेक्षितपदस्यानुपादानेन पूर्ववाक्यस्थपदस्यानुषङ्गेणान्वयनिर्वाहः अत्र तु तादृशवाक्ये तत्तत्पदस्यार्थस्य वा पुनरुपादाने आवृत्तिरलंकारः इति युक्तमेवोक्तं दीपकस्थानत्वम् अस्य दीपकस्थाने एव इष्टमिति। एतेन पदावृत्तिरूपस्यास्य अलंकारस्य यमकादौ अतिप्रसङ्गः निराकृतः। यमके हि द्वितीयपदानुपादाने अन्यवाक्यीयपदसंबन्धस्य अनुपपन्नत्वेन विवक्षितार्थानुपपत्तिः। यत्र पूर्ववाक्यीयपदस्यानुषङ्गः उपयुक्तः तत्र यमकालंकारबाधेन पदावृत्तेरेव प्रवृत्तिरिति प्रेमचन्द्रशर्माणः। भोजराजस्तु एते त्रयोपि अलंकाराः दीपकविशेषा एव इति मन्यते इत्यनुपदमेव दर्शितमस्माभिः ॥११६॥

अर्थावृत्तिमुदाहरति—विकसन्तीति। कदम्बानि कदम्बमुकुलानि। कुटजद्रुमाः स्फुटन्ति पुष्पविकासेनोद्भिन्ना इव भवन्ति। कन्दल्यः उन्मीलन्ति पुष्पोद्गमेन विकसिता भवन्ति। ककुभानि अर्जुनवृक्षसुमनानि

ii. 115—अवगतिः for अनुगतिः P, R, अनुमतिः D.
ii. 116—एव च for इत्यपि P, R;—स्थानं for स्थाने V;— तथा for यथा V.
ii. 117—सरोजानि for कदम्बानि Rn;—कुटजद्रुमाः for कुटजोद्गमाः P, R, V.

उन्मीलन्ति च कन्दल्यो दलन्ति ककुभानि च ॥११७॥
उत्कण्ठयति मेघानां माला वर्गं कलापिनाम् ।
यूनां चोत्कण्ठयत्यद्य मानसं मकरध्वजः ॥११८॥
जित्वा विश्वं भवानत्र विहरत्यवरोधनैः ।
विहरत्यप्सरोभिस्ते रिपुवर्गो दिवं गतः ॥११९॥

दलन्ति । प्रावृड्वर्णनमिदम् । अत्र विकसन्तीत्यादिपदानि भिन्नरूपाण्यपि एकार्थानि इति अर्थस्यावृत्तेरर्थावृत्तिरलंकारः ॥११७॥

पदावृत्तिमुदाहरति—उत्कण्ठेति । मेघानां माला मेघपङ्क्तिः कलापिनां मयूराणां वृन्दं समूहम् उत्कण्ठयति स्वदिदृक्षया उद्ग्रीवं करोति । मक-
३रध्वजः कुसुमेषुः यूनां तरुणानां मानसम् उत्कण्ठयति विलासोत्सुकं विदधाति । मेघालोकस्योद्दीपकत्वादिति भावः । अत्र उत्कण्ठयतीतिपदस्य उभयत्र भिन्नार्थकत्वेन केवलं पदावृत्तिः इति पदावृत्तिरलंकारः ॥११८॥

उभयावृत्तिं दर्शयति—जित्वेति । अत्र मर्त्यलोके भवान् विश्वं भूमण्डलं जित्वा अवरोधनैः अन्तःपुरिकाभिः विहरति । ते रिपुवर्गः दिवं गतः सन् ।
३युद्धे सन्मुखमरणादिति भावः । अप्सरोभिः विहरति । अत्र विहरतीति पदस्य तदर्थस्य च आवृत्तिः । वाक्यद्वयेपि द्वयोरेकार्थकत्वात् । अतः उभयावृत्तिरलंकारः । ननु ईदृशस्थले अनेनैव कविना अग्रेनिर्दिष्टस्य (iii. 135)
६एकार्थरूपदोषस्यापात इति वाच्यमिति चेन्न । तस्योद्देश्यप्रतिनिर्देश्यव्यतिरिक्तविषयत्वात् । उद्देश्यप्रतिनिर्दिश्यतायाम् एकप्रयोगस्यैव युक्तत्वम् । यथा—उदेति सविता ताम्रस्ताम्र एवास्तमेति च । इत्यादौ । प्रकृते च
९राजोद्देशेन विधेयस्य विहरणस्य रिपुवर्गोद्देशेनापि विधेयत्वमित्युद्देश्यप्रतिनिर्देश्यत्वम् इति सर्वं समुचितमिति सुधीभिराकलनीयम् ॥११९॥

---

ii. 117—उन्मीलयन्ति for उन्मीलन्ति च V;—कुमुदानि for ककुभानि Rn.

ii. 118—वृन्दं for वर्गं P,J,R;—यूनामुत्कण्ठयत्यद्य for यूनां चोत्कण्ठयत्येष P, R, D; चोत्कण्ठयत्येव D.

ii. 119—भवानद्य for भवानत्र;—अप्सरोभिश्च for अप्सरोभिस्ते D, Rn.

प्रतिषेधोक्तिराक्षेपस्त्रैकाल्यापेक्षया त्रिधा ।
अथास्य पुनराक्षेप्यभेदानन्त्यादनन्तता ॥१२०॥
अनङ्गः पञ्चभिः पौष्पैर्विश्वं व्यजयतेषुभिः ।

आक्षेपालंकारं लक्षयति—प्रतिषेधोक्तिरिति । प्रतिषेधस्य निषेधस्य उक्तिः कथनमात्रं न तु वास्तवः प्रतिषेधः । तात्त्विके प्रतिषेधेचमत्कारा-
३भावादलंकारत्वाभावप्रसङ्गः । तथा च प्रतिषेधाभासः आक्षेपः इत्यर्थः । इयं च प्रतिषेधोक्तिः अर्थविशेषाविष्करणायेति बोध्यम् । तत एव वैचित्र्यातिशयः। तथा चायं प्रतिषेधः इष्टार्थस्यैव तत एव विशेषेण वैचि-
६त्र्यात् । उक्तं च अग्निपुराणे (345.15)—

शब्देनार्थेन यत्रार्थः कृत्वा स्वयमुपार्जनम् ।
प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सया ॥
तमाक्षेपं ब्रुवन्त्यत्र । इति ।

१०उक्तिरित्यस्य प्रतिपादनमिति सामान्यार्थः न तु शब्देनैव प्रतिपादनमपे-
क्ष्यते । व्यङ्ग्यप्रतिषेधेपि आक्षेपालंकारस्येष्टत्वात् । अन्यस्य अध्यवसा-
१२नाभावान्नात्रापह्नुतेराशङ्का ॥ अयमाक्षेपः त्रैकाल्यापेक्षया नाम त्रैका-
लिकवस्तुगतत्वेन त्रिविधः वर्तमानाक्षेपः अतीताक्षेपः भविष्यदाक्षेपश्चेति।
प्रकाशकारादयस्तु भूतभविष्यतोरेव प्रतिषेधोक्तिराक्षेपः इति मन्वते ।
१५तदुक्तम्—

निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया ।
वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः ॥ इति ।

१८अस्य च त्रिविधस्याक्षेपस्य आक्षेप्यभेदानन्त्यात् आक्षेप्याः निषेधनीयाः
तेषां भेदाः धर्मधर्मिकार्यकारणादयः तेषाम् आनन्त्यात् अनन्तता अपरि-
च्छिन्नता ज्ञेया ॥१२०॥

तत्र त्रिविधाक्षेपमध्ये आदौ वृत्ताक्षेपमुदाहरति—अनङ्ग इति । अनङ्गः स्मरः पञ्चभिः पौष्पैः तत्सरूपैः इषुभिः विश्वं व्यजयत ।

---

ii. 120—आक्षिप्य for आक्षेप्य V;—त्रैलोक्या for त्रैकाल्या marginal emendation in D.

ii. 121—पुष्पैः for पौष्पैः J,P;—विजयतेषुभिः for व्यजयतेषुभिः V, D.

इत्यसंभाव्यमथवा विचित्रा वस्तुशक्तयः ॥१२१॥
इत्यनङ्गजयायोगबुद्धिर्हेतुबलादिह ।
प्रवृत्तैव यदाक्षिप्ता वृत्ताक्षेपस्तदीदृशः ॥१२२॥
कुतः कुवलयं कर्णे करोषि कलभाषिणि ।
किमपाङ्गमपर्याप्तमस्मिन् कर्मणि मन्यसे ॥१२३॥

३अनङ्गस्य—

अरविन्दमशोकं च चूतं च नवमालिका ।
नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः ॥

६इति पञ्चकुसुमबाणत्वं प्रसिद्धमेव । इति पञ्चकुसुमेषुभिः विश्वविजयः अनुपपत्त्या असंभवनीय एव । तथा हि मदनः स्वयमनङ्गः बाणाः पञ्चैव ते च पुष्पमयाः जेतव्यं च विश्वं ब्रह्मेन्द्रादिधीरवीरैः परिपूर्णम् इति विजयः ९अश्रद्धेय एव इति विजयानुपपत्तिं स्थिरीकृत्य निषेधति अथवेति । अथवा वस्तूनां पदार्थानां शक्तयः कार्यसंपादनसामर्थ्यानि विचित्राः अचिन्त्यस्वरूपाणि । न ताः अन्वयव्यतिरेकादिना तर्कयितुं शक्या इति भावः । १२ततश्च संभवत्येव पञ्चेषुभिर्विश्वविजयः ॥१२१॥

उदाहरणे आक्षेपलक्षणं संगमयति—इतीति । एवंप्रकारेण अनङ्गस्य जयः विश्वजयः तस्य अयोगः असंभवः तद्विषये बुद्धिः । हेतुबलात् अन३ङ्गपञ्चेषुत्वादिहेतुसामर्थ्यात् । प्रवृत्ता एव उत्पन्ना एव यत् आक्षिप्ता विचित्रा वस्तुशक्तयः इति वस्तुमाहात्म्योद्घोषेण प्रतिषिद्धा स ईदृशः वृत्ताक्षेपः वृत्तस्य अतीतस्य आक्षेपः वृत्ताक्षेपः इत्यर्थः । अत्र केचित् ६हेतुबलात् इति विचित्रा वस्तुशक्तिरिति हेतुसामर्थ्यात् आक्षिप्ता प्रतिषिद्धा इति हेतुबलादिति पदमाक्षेपे योजयन्ति । अत्र प्रतिषेधो वाचकशब्दायोगात् व्यङ्ग्य एव ॥१२२॥

वर्तमानाक्षेपमुदाहरति—कुत इति । हे कलभाषिणि मधुरालापे कर्णे कुवलयं कुतः किमिति करोषि मा कुरु इत्यर्थः । अस्मिन् कर्मणि कर्ण३शोभासंपादनकर्मणि अथवा उत्पलभूषाविन्यासेन नायकचेतोहरणकर्मणि अपाङ्गम् नेत्रप्रान्तम् अपर्याप्तमसमर्थं मन्यसे किम् । अत्र कर्णे कुवलयधारणस्य कुत इत्यनेन कैमर्थ्येन प्रतिषेधो ज्ञेयः ॥१२३॥

---

ii. 122—प्रवृत्तौ च for प्रवृत्तैव V;—स ईदृशः for तदीदृशः P, J, R; अयमीदृशः D.

स वर्तमानाक्षेपोयं कुर्वत्येवासितोत्पलम् ।
कर्णे काचित् प्रियेणैवं चाटुकारेण रुध्यते ॥१२४॥
सत्यं ब्रवीमि न त्वं मां द्रष्टुं वल्लभ लप्स्यसे ।
अन्याचुम्बनसंक्रान्तलाक्षारक्तेन चक्षुषा ॥१२५॥
सोयं भविष्यदाक्षेपः प्रागेवातिमनस्विनी ।
कदाचिदपराधोस्य भावीत्येवमरुन्द्ध यत् ॥१२६॥
तव तन्वङ्गि मिथ्यैव रूढमङ्गेषु मार्दवम् ।
यदि सत्यं मृदून्येव किमकाण्डे रुजन्ति माम् ॥१२७॥

वर्तमानाक्षेपमुदाहरणे योजयति—स इति । यतः काचित् नायिका कर्णे असितोत्पलं कुर्वती एव न तु कृतवती करिष्यमाणा वा चाटुकारेण ३मधुरभाषिणा प्रियेण एवम् कुतः इति वैफल्यप्रदर्शनेन निषिद्धा अतोत्र वर्तमानकालीनस्यासितोत्पलधारणस्य निषेधात् वर्तमानाक्षेपोयं ज्ञेयः ॥१२४॥

भविष्यदाक्षेपमाह—सत्यमिति । हे वल्लभ अन्याचुम्बनसंक्रान्तलाक्षारक्तेन अन्यायाः नायिकान्तररूपजनस्य चुम्बनेन संक्रान्ता तदधरतः संप्राप्ता या लाक्षा तया रक्तेन लोहितीभूतेन चक्षुषा त्वं मां द्रष्टुं न लप्स्यसे मद्दर्शनं न प्राप्नोषीत्यर्थः । तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् इति तुमुन् । एतत् सत्यं ब्रवीमि ॥१२५॥

भविष्यदाक्षेपमुदाहरणेन संगमयति—सोयमिति । काचित् अतिमनस्विनी अत्यन्तमानिनी नायिका अस्य नायकस्य कदाचित् अपराधो ३भावी इति तं नायकं यत् यस्मात् एवम् अरुन्द्ध रुरोध तस्मात् सोयं भविष्यदाक्षेपः । अत्र सत्यं ब्रवीमीति वाक्येन नायकस्य भविष्यन्नायिकानुरागस्य प्रतिषेधादयं भविष्यदाक्षेपः ॥१२६॥

इत्थमाक्षेपस्य सामान्यभेदत्रयमुक्त्वा तस्य सूक्ष्मभेदानामानन्त्यात् संपूर्णतया निरूपणमशक्यमिति शिष्यशिक्षार्थं कांश्चित् प्रभेदान् दिदर्शयिषुः धर्माक्षेपमुदाहरति—तवेत्यादि । तन्वङ्गि तव अङ्गेषु रूढं परिणतम् अथवा सार्वजनीनप्रवादगोचरं मार्दवं मिथ्यैव असत्यमेव । यदि सत्यं तर्हि तादृशानि तेऽङ्गानि मामकाण्डे सहसैव किं रुजन्ति व्यथयन्ति ॥१२७॥

ii. 125—अन्य for अन्या P, R;—लाक्षारागेण for लाक्षारक्तेन V.
ii. 126—एनं for एवं D;—अरुन्धयत् for अरुन्द्ध यत् N, D;—अरोधयत् V.

धर्माक्षेपोयमाक्षिप्तमङ्गनागात्रमार्दवम् ।
कामुकेन यदत्रैवं कर्मणा तद्विरोधिना ॥१२८॥
सुन्दरी सा ममेत्येष विवेकः केन जायते ।
प्रभामात्रं हि तरलं दृश्यते न तदाश्रयः ॥१२९॥
धर्म्याक्षेपोयमाक्षिप्तो धर्मी धर्मं प्रभाह्वयम् ।
अनुज्ञायात्र यद्रूपमत्याश्चर्यं विवक्षता ॥१३०॥
चक्षुषी तव रज्येते स्फुरत्यधरपल्लवः ।

उदाहरणं योजयति—धर्माक्षेप इति । यदत्र एवम् उक्तिनैपुण्येन कामुकेन तद्विरोधिना मार्दवविरुद्धेन व्यथाकरणरूपेण कर्मणा अङ्ग-
३नायाः शुभाङ्ग्याः गात्राणां मार्दवम् आक्षिप्तं निषिद्धं तस्मादयं मार्दव-धर्मस्याक्षेपात् धर्माक्षेपः ॥१२८॥

धर्म्याक्षेपमुदाहरति —सुन्दरीति । सा प्रभाविशेषेण अनवगतस्वरूपा सुन्दरी नायिका मम मदीया एव इत्येष विवेकः निश्चयज्ञानं केन
३जायते कथं जायते । ननु प्रत्यक्षविषये कथं भ्रान्तोसीत्याह प्रभामात्र-मिति । हि यतः तरलं चञ्चलं सर्वतः दृष्टिविघातेन प्रसरत् प्रभामात्रं केवलं प्रभैव दृश्यते । तस्याः प्रभायाः आश्रयः आधारो नायिकाशरीरं
६न दृश्यते ॥१२९॥

धर्मिण आक्षेपं दर्शयति—धर्म्याक्षेपोयमिति । अत्याश्चर्यं रूपं प्रभा-तिशयेन विस्मयावहं नायिकाया रूपं विवक्षता प्रतिपिपादयिषता नायकेन
३प्रभाह्वयं प्रभासंज्ञकं धर्मं नायिकाधर्मम् अनुज्ञायैव स्वीकृत्यैव यत् यस्मात् धर्मी नायिकारूपः आक्षिप्तः निषिद्धः तस्मात् धर्म्याक्षेपोयम् ॥१३०॥

कारणाक्षेपमुदाहरति—चक्षुषीति । तव चक्षुषी नेत्रकमले रज्येते

---

ii. 128—अत्रैव for अत्रैवं D.

ii. 129—न वेत्येष for ममेत्येष P, J, N, R, D,Ca; भवत्येवं B,(following the सुभाषितरत्नभाण्डागार);— सा सुन्दरीयमित्येष for सुन्दरी सा ममेत्येष P's suggested emendation;—कस्य for केन Rn;—तत्र नाश्रयः for न तदाश्रयः N, J, D, V; नात्र संशयः marginal emendation in D.

ii. 130—अनुज्ञायैव for अनुज्ञायात्र P, R; अनुज्ञाय V; अनुज्ञायेव Rn;—तद्रूपं for यद्रूपं V, Rn.

ii. 131—स्फुरयति for स्फुरति D;

भ्रुवौ च भुग्ने न तथाप्यदुष्टस्यास्ति मे भयम् ॥१३१॥
स एष कारणाक्षेपः प्रधानं कारणं भियः ।
स्वापराधो निषिद्धोत्र यत् प्रियेण पटीयसा ॥१३२॥

कोपादारक्ते भवतः । अधरपल्लवः स्फुरति रोषेण कम्पते । भ्रुवौ भ्रुकुट्यौ ३भुग्ने क्रोधेन वक्रीभूतौ । तथापि एवंभूतेपि अदुष्टस्य नायिकान्तरानुराग-दोषशून्यस्य मे भयं नास्ति ॥१३१॥

उदाहरणं विशदयति—स एष इति । पटीयसा चतुरेण प्रियेण नायकेन भियः प्रधानं कारणं स्वापराधो यत् यस्मान्निषिद्धः अतः ३कारणाक्षेपोयम् । तथा च प्रधानकारणनिषेधः कारणाक्षेपस्य विषयः अप्रधानकारणाभावस्तु विभावनायाः इति आक्षेपविभावनयोर्भिन्नो विषयः कल्प्य इति केचित् । अन्ये तु चक्षुषी तव रज्येते इत्यादिकारणान्तरस्य ६शब्दतः प्रतिपाद्यत्वात् तस्य विभाव्यत्वं नास्ति । विभावनायां कारणा-न्तरस्य विभाव्यत्वमपेक्ष्यते । तदुक्तम्—

प्रसिद्धहेतुव्यावृत्त्या यत्किंचित् कारणान्तरम् ।
यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावना ॥ इति ।

१०तथैवात्र नास्ति मे भयम् इत्यनेन भयरूपकार्यप्रतिषेधात् कार्याक्षेपोपि इत्यपि केचित् । परमत्र पूर्वाक्षेपेण कारणनिषेधे तत्फलकथनं नास्ति मे भयमिति अतो न प्राधान्येन एष आक्षेपः चमत्कारशाली इति कारणा-१३क्षेप एवालंकार इति भाति । शुद्धोदाहरणमाहुः श्रीप्रेमचन्द्रशर्माणः—

अस्माकं सखि वाससी न रुचिरे ग्रैवेयकं नोज्ज्वलं
नो वक्रा गतिरुद्धतं न हसितं नैवास्ति कश्चिन्मदः ।
किन्त्वन्येपि जना वदन्ति सुभगोप्यस्याः प्रियो नान्यतो
दृष्टिं निक्षिपतीति विश्वमियता मन्यामहे दुःस्थितम् ॥ इति ।

१८अत्रोत्तरार्धव्यङ्ग्यस्य वशीभूतपतिकत्वरूपकार्यस्य वासोरुचिरत्वादि-रूपकारणान्येवाक्षिप्तानीति ॥१३२॥

---

ii.131—भुग्नौ for भुग्ने P.
ii.132—एष for एष Rn.

दूरे प्रियतमः सोयमागतो जलदागमः ।
दृष्टाश्च फुल्ला निचुला न मृता चास्मि किं न्विदम् ॥१३३॥
कार्याक्षेपः स कार्यस्य मरणस्य निवर्तनात् ।
तत्कारणमुपन्यस्य दारुणं जलदागमम् ॥१३४॥
न चिरं मम तापाय तव यात्रा भविष्यति ।
यदि यास्यसि यातव्यमलमाशङ्क्यात्र ते ॥१३५॥

कार्याक्षेपमाह—दूरे प्रियतम इति। प्रियतमः दूरे तिष्ठतीति शेषः। सोयं विरहिजनघातक इति प्रसिद्धः जलदागमः वर्षाकालः आगतः। फुल्लाः
३निचुला वेतसाः दृष्टाः प्रत्यक्षीकृताः। एवं स्थितेपि न मृतास्मि मदनानलेन न दग्धास्मि। किंनु इदम् अवश्यंभाविनि कार्ये कथं वैधुर्यम्। अत्याश्चर्यावहमेतत् ॥१३३॥

उदाहरणं विशदयति—कार्याक्षेप इति। तस्य मरणस्य कारणं प्रियतमदूरावस्थानादिकम्। अथवा तत् विरहिमारकत्वेन प्रसिद्धं कारणं
३कारणभूतम्। क्त्वाप्रत्ययान्तघटितवाक्यस्य प्रधानवाक्यात् पूर्वभावित्वेन तद्घटिततच्छब्देन मरणपरामर्शः कथं स्यादिति दोषोस्मिन् पक्षे अपहृतो भवति। तच्छब्दस्य बुद्धिपरामर्शकत्वेन सकलश्लोकार्थावलोचनया
६अत्र मरणमेव तच्छब्देनाभिप्रेतमिति स्फुटं तस्य कविबुद्धिस्थमरणावेद्यत्वात् प्रथमार्थेपि न क्षतिः इत्यन्ये। उपन्यस्य प्रथमं निवेश्य तत्कार्यस्य मरणस्य निवर्तनात् निषेधात् सः पूर्वश्लोकोदाहृतः कार्याक्षेपः।
९कारणमित्यस्य प्रसिद्धकारणमित्यर्थस्वीकारे अप्रसिद्धकारणोपन्यासे कार्याभावो विशेषोक्तिः इति विशेषोक्तेः विषयः स्वतन्त्रो दर्शितो भवति। अन्यथा उभयोर्विषयैक्यात् दुरवस्था स्यात् ॥१३४॥

अनुज्ञाक्षेपमुदाहरति—न चिरमिति। देशान्तरं जिगमिषुं नायकं प्रति नायिका ब्रूते न चिरमिति। तव यात्रागमनं मम तापाय विरह-
३वेदनायै चिरं बहुकालं न भविष्यति। अचिरादेव त्वद्विरहेण लोकयात्रायाः परिसमाप्तेः। यदि यास्यसि यातव्यम् अवश्यं गन्तव्यम्। अत्र मद्विषये शङ्क्या विरहपीडितेयं कथं दुःखं सहिष्यते इति शङ्क्या अलम् ॥१३५॥

---

ii.133—मृतास्मीति for मृता चास्मि D,V;—त्विदम् for न्विदम् N, D.
ii.135—यास्यति for यास्यसि D;—मे for ते D.

इत्यनुज्ञामुखेनैव कान्तस्याक्षिप्यते गतिः ।
मरणं सूचयन्त्येवं सोनुज्ञाक्षेप उच्यते ॥१३६॥
धनं च बहु लभ्यं ते सुखं क्षेमं च वर्त्मनि ।
न च मे प्राणसंदेहस्तथापि प्रिय मा स्म गाः ॥१३७॥
प्रत्याचक्षाणया हेतून् प्रिययात्राविबन्धिनः ।
प्रभुत्वेनैव रुद्धस्तत् प्रभुत्वाक्षेप ईदृशः ॥१३८॥

उदाहरणं व्याख्याति—इतीति । इति अनुज्ञामुखेनैव गमनानुमत्यैव एवकारेण निषेधार्थकशब्देन निषेधस्य व्यावृत्तिः सूच्यते । केचित्तु अनुज्ञामु- ३खेनैव इति मरणं सूचयन्त्यैव इत्यनेन संयोजयन्ति । कान्तस्य गतिः आक्षिप्यते अतः सोयमनुज्ञाक्षेपः । मरणं संसूचयन्त्यैवेति गतेराक्षेपस्य हेतुः अनिष्टस्य विधेयत्वासंभवेन प्रतिषेधपर्यवसानात् । दर्पणकारास्तु एता- ६दृशस्थले विध्याभासमलंकारमाहुः । तदुक्तम्—अनिष्टस्य तथार्थस्य विध्याभासः परो मतः । इति ॥१३६॥

प्रभुत्वाक्षेपमाह—धनं चेति । अस्मिन् विदेशगमने ते धनं बहुलभ्यम् । व्यवहारनैपुण्यादिति भावः । चकारो भिन्नक्रमः । तथा च ३ते वर्त्मनि सुखं च क्षेमं स्यात् । यात्रानुकूलसमयत्वात् सौराज्यत्वाच्चेति भावः । मे प्राणसंदेहोपि न त्वं सफलमनोरथोचिरादेव प्रत्यागमिष्यसीति मे दृढो विश्वासः । तथापि एवं सकलानुकूल्येपि हे प्रिय मा स्म गाः ६प्रेमभावार्द्राहं न त्वां मुञ्चामि त्वं मा गच्छ ॥१३७॥

उदाहरणं विशदयति—प्रत्याचक्षाणयेति । एवंप्रकारेण प्रिययात्राविबन्धिनः प्रियायात्राप्रातिकूलान् हेतून् अल्पधनलाभादीन् प्रत्याचक्षाणया आ- ३क्षिपन्त्यापि प्रभुत्वेनैव प्रेमभावस्वाधीनपतित्वरूपसामर्थ्येनैव रुद्धः गमनान्निवारितः प्रियः इति शेषः । तत् तस्मात् प्रभुत्वाक्षेपः साधनानुकूल्येन अवश्यं करणीये गमने केवलं प्रभुत्वेनैव निषेधः प्रदर्शितः इति ६प्रभुत्वाक्षेपः ॥१३८॥

---

ii. 136—सूचयन्त्यैव for सूचयन्त्यैवं P, R, D;—इष्यते for उच्यते N; ईदृशः Rn.

ii. 138—इत्याचक्षाणया for प्रत्याचक्षाणया P, R;—विरोधिनः for विबन्धिनः D; नुबन्धिनः P, R;—उच्यते for ईदृशः P,R,D,J.

जीविताशा बलवती धनाशा दुर्बला मम ।
गच्छ वा तिष्ठ वा कान्त स्वावस्था तु निवेदिता ॥१३९॥
असावनादराक्षेपो यदनादरवद्वचः ।
प्रियप्रयाणं रुन्धत्या प्रयुक्तमिह रक्तया ॥१४०॥
गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः ।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥१४१॥
इत्याशीर्वचनाक्षेपो यदाशीर्वादवर्त्मना ।

अनादराक्षेपमाह—जीविताशेति । हे कान्त मम जीविताशा जीववनेच्छा बलवती धनाशापेक्षया अधिकतरा । धनलाभापेक्षया त्वत्संनिधौ चिरं जीवितुमिच्छामि । धनाहरणाय त्वयि विदेशं गते न जीविष्यामि इति ध्वनिः । धनाशा दुर्बला जीविताशापेक्षया । अतः एवं स्थिते त्वं गच्छ अथवा तिष्ठ । स्वावस्था मम भाविनी अवस्था मरणरूपा इत्यर्थः अथवा मम वर्तमाना मनोवृत्तिः निवेदता ॥१३९॥

उदाहरणं समर्थयते—असाविति । इह उदाहरणे प्रियप्रयाणं नायकस्य विदेशगमनं रुन्धत्या परिहरन्त्या रक्तया अनुरागिण्या यत् अनादरवत् गच्छ वा तिष्ठ वेति अनादरसूचकं वचः प्रयुक्तम् अतः असौ अनादराक्षेपः ॥ १४० ॥

आशीर्वचनाक्षेपमुदाहरति—गच्छेति । हे कान्त गच्छसि चेत् यदि तव गमने निश्चयः तर्हि गच्छ । पन्थानः ते शिवाः कल्याणप्रदाः सन्तु । यत्र भवान् गतः भविष्यतीति शेषः । तत्रैव ममापि जन्म भूयात् भवतु इति आशासे । त्वद्गमनानन्तरमचिरादेव त्वद्विरहवेदनया मरिष्यामि मृतायाश्च—पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् इति क्रमेणावश्यं जननं भवेत् । तच्च यत्र भवान् तिष्ठति तत्रैव भवतु । तथा सति पुनस्त्रत्र भवद्दर्शनं भविष्यतीति भावः ॥१४१॥

आशीर्वचनाक्षेपं विशदयति—इतीति । अत्र कान्तया आशीर्वादवर्त्मना आशीः आशंसा सा चात्र सततप्रियदर्शनरूपा तस्या वादः

---

ii. 140—अनुरक्तया for इह रक्तया D.
ii. 141—तत्र जन्मैव for जन्म तत्रैव V.
ii. 142—स आशीर्वच for इत्याशीर्वच D;—यः for यद् D.

स्वावस्थां सूचयन्त्यैव कान्तयात्रा निषिध्यते ॥१४२॥
यदि सत्यैव यात्रा ते काप्यन्या गृह्यतां त्वया ।
अहमद्यैव रुद्धास्मि रन्ध्रापेक्षेण मृत्युना ॥१४३॥
इत्येष परुषाक्षेपः परुषाक्षरपूर्वकम् ।
कान्तस्याक्षिप्यते यस्मात् प्रस्थानं प्रेमनिघ्नगा ॥ १४४ ॥
गन्ता चेद्गच्छ तूर्णं ते कर्णे यान्ति पुरा रवाः ।

३ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् इति प्रकारेण कथनम् तद्वर्त्मना तद्द्वारेणैव स्वावस्थां विरहेण मरणरूपां सूचयन्त्या तया कान्तस्य यात्रा-गमनं निषिध्यते । आशीर्वचनस्य ममापि जन्म तत्र स्यादित्यस्य भावि-६मरणसूचनद्वारा कान्तयात्रागमनस्याक्षेपात् आशीर्वचनाक्षेपोयम् ॥१४२॥

परुषाक्षेपमुदाहरति—यदीति । यदि ते यात्रा सत्यैव तर्हि काप्यन्या त्वद्विरहेपि जीवितुं समर्था त्वया मृग्यतां सुखोपभोगाय अन्विष्यताम् । ३ननु त्वयि प्रेयस्यां सत्यां कोयमुपदेश इति चेत् कथयति । अहम् अद्यैव रन्ध्रापेक्षेण रन्ध्रस्य अपेक्षा यस्य तेन छिद्रान्वेषणतत्परेण मृत्युना रुद्धा-स्मि आक्रान्तास्मि ॥१४३॥

उदाहरणं विशदयति—इतीति । प्रेमनिघ्नया प्रेमपराधीनया कान्त-या कान्तस्य प्रस्थानं यस्मात् परुषाक्षरपूर्वकम्—काप्यन्या मृग्यतां त्वया । अह-३मद्यैव रुद्धास्मि मृत्युना । इत्यादिकठोरार्थकवाक्यपुरःसरं प्रस्थानं देशा-न्तरप्रवासः आक्षिप्यते निषिध्यते तस्मात् अयं परुषाक्षेपः ॥१४४॥

साचिव्याक्षेपमाह—गन्ता चेदिति । भवान् गन्ता चेत् निश्चितभावि-गमनश्चेत् । गन्तेति लुटः रूपम् । तूर्णं द्रुतं गच्छ । किमिति त्वरयसे ३मामिति चेत् कथयति । आर्तबन्धुमुखोद्गीर्णाः । आर्ताः मद्विनाशेन दुः-खिताः ये बन्धवः तैः मुखोद्गीर्णाः मुखोच्चारिताः प्रयाणप्रतिबन्धिनः यात्राप्रतिबन्धकाः रवाः मन्मरणसूचका ध्वनयः ते कर्णे कर्णयुगुलम् जा-

---

ii. 142—सूचयन्त्यैवं for सूचयन्त्यैव V.
ii. 143—मृग्यतां for गृह्यतां P,R,D;—ते यात्रा for यात्रा ते R;—रन्ध्रान्वेषेण for रन्ध्रापेक्षेण Rn.
ii. 144—प्रयाणं for प्रस्थानं D.
ii. 145—कर्णौ for कर्णे P,R; कर्णे V.

आर्तबन्धुमुखोद्गीर्णाः प्रयाणप्रतिबन्धिनः ॥१४५॥
साचिव्याक्षेप एवैष यदत्र प्रतिषिध्यते ।
प्रियप्रयाणे साचिव्यं कुर्वत्येवातिरक्तया ॥१४६॥
गच्छेति वक्तुमिच्छामि मत्प्रिय त्वत्प्रियैषिणी ।
निर्गच्छति मुखाद्वाणी मा गा इति करोमि किम् ॥१४७॥
यत्नाक्षेपः स यत्नस्य कृतस्यानिष्टवस्तुनि ।

६त्यैकवचनम् पुरा यान्ति यास्यन्ति । यावत्पुरानिपातयोर्लट् इति पुरा शब्दयोगे भविष्यति लट् ॥१४५॥

उदाहरणं नामाक्षरेण योजयति—साचिव्याक्षेप इति । यदत्र यस्मात् अत्र एतादृशवर्णनायां साचिव्यं कुर्वत्येव तूर्णं गच्छ इति साहाय्यम् ३आचरन्त्येव अतिरक्तया अत्यन्तासक्तया प्रियप्रयाणं नायकगमनं प्रतिषिध्यते स्वमरणसूचनेन निषिध्यते तस्मादेष साचिव्याक्षेपः साहाय्यपूर्वकनिषेधादिति भावः ॥१४६॥

यत्नाक्षेपमाह—गच्छेति । हे मत्प्रिय जीवितेश्वर त्वत्प्रियैषिणी त्वत्प्रियानुसरणशीला अहमस्मि अतः गच्छ त्वं याहि इति वक्तुमिच्छामि । परं ३मुखाद्वाणी मा गा इति निर्गच्छति अन्तर्भावानुसारित्वात् वाग्देव्या इति भावः । किं करोमि नास्ति अत्र कोप्युपायः । गच्छेति वक्तुं कृतप्रयत्नापि विफलपरिश्रमा भवामीत्यर्थः । अत्र त्वत्प्रियं मत्प्रियैषिणी इत्यपि पाठः ६साधुः । अर्थस्तु स्पष्ट एव ॥१४७॥

नामार्थं उदाहरणेन संयोजयति—यत्नाक्षेपः इति । अनिष्टवस्तुनि गच्छेति गमनविधानरूपानिष्टकार्ये कृतस्यापि यत्नस्य विपरीतफलोत्पत्तेः ३विपरीतं मा गा इति वचननिःसरणरूपं यत् फलं तस्य उत्पत्तेः हेतोः आनर्थक्योपदर्शनात् आनर्थक्यस्य गच्छेति वक्तुं कृतो यः प्रयत्नः तस्य विफलतायाः उपदर्शनात् मा गा इति विरुद्धवचननिःसरणेनावगमात्

---

ii. 145—परिपन्थिनः for प्रतिबन्धिनः P,R,D; प्रतिरोधिनः V.

ii. 146—कुर्वत्यैव for कुर्वत्येव V;—अनुरक्तया for अतिरक्तया P,R.

ii. 147—त्वत्प्रियं for मत्प्रिय P,R,D;—मत्प्रियैषिणी for त्वत्प्रियैषिणी P, R,D;—करोति for करोमि N.

ii. 148—वर्त्मनि for वस्तुनि V.

विपरीतफलोत्पत्तेरानर्थक्योपदर्शनात् ॥१४८॥
क्षणदर्शनविघ्नाय पक्ष्मस्पन्दाय कुप्यतः ।
प्रेम्णः प्रयाणं ते ब्रूहि मया तस्येष्टमिष्यते ॥१४९॥
अयं परवशाक्षेपो यत् प्रेमपरतन्त्रया ।
तया निषिध्यते यात्रान्यस्यार्थस्योपसूचनात् ॥१५०॥
सहिष्ये विरहं नाथ देह्यदृश्याञ्जनं मम ।

६यत्राक्षेपः प्रियानुसरणकृतयत्नस्य आक्षेपः वैफल्येन निषेधः इति यत्राक्षेपालंकारः ॥१४८॥

परवशाक्षेपमाह—क्षणेति । हे नाथ क्षणं पलमात्रं त्वद्दर्शनस्य स्वन्निरीक्षणस्य विघ्नः व्यत्ययः यस्मात् तस्मै । पक्ष्मस्पन्दाय पक्ष्मणां नेत्रलोम्नां ३स्पन्दाय निमेषोन्मेषरूपाय कुप्यतः निमेषमप्यसहमानस्य प्रेम्णः अनुरागं प्रति । कर्मणि षष्ठी । प्रयाणं ब्रूहि निवेदय । ननु त्वामेव प्रार्थये किमिति प्रेमप्रार्थनामुपदिशसि चेत् तत्राह मया प्रेमाधीनयेति भावः ६तस्य प्रेम्णः इष्टम् अभिलषितम् इष्यते वाञ्छ्यते । प्रेमपरार्धीनाया मम प्रार्थनयालं यदि तस्यानुमतिः तर्हि गच्छ नाहं प्रतिकूला भवामि परं त्वद्दर्शनस्य क्षणविच्छेदासहिष्णुः स प्रेमा कथमनुज्ञां दास्यति इति ९त्वमेव विचारय सर्वथा तनुन्नामंस्यते इति भावः ॥ १४९ ॥

अलंकारसंज्ञार्थं योजयति—अयमिति । यत् यस्मात् प्रेमापरतन्त्रया स्वस्य प्रेमपराधीनत्वं कथयन्त्या तया नायिकया अन्यस्य स्वापेक्षया ३भिन्नस्य प्रेमानुज्ञारूपस्य अर्थस्य वस्तुनः उपसूचनात् कथनात् यात्रा निषिध्यते अतोयं परावशाक्षेपः ॥ १५० ॥

उपायाक्षेपमाह—सहिष्ये इति । हे नाथ विरहं त्वद्वियोगं सहिष्ये । किंतु तदर्थं अदृश्याञ्जनम् अदर्शनसंपादकं कज्जलविशेषं देहि । किं तेनेति ३चेदाह येन अञ्जनेन अक्ते म्रक्षिते नेत्रे यस्याः सा ताम् माम् प्रहर्ता

ii. 148—उपसूचनात् for उपदर्शनात् Rn.
ii. 149—क्षणं for क्षण P;—त्वं for ते P, R, J, V;—प्रयाणतां for प्रयाणं ते N.
ii. 150—सोयं for अयं P, Rn;—यात्रेत्यन्यार्थस्य for यात्रान्यस्यार्थस्य J, P, V; यात्रा तस्यार्थस्य Pn; यात्रेत्यस्यार्थस्य N;—उपदर्शनात् for उपसूचनात् P, Rn, D; एव सूचनात् Pn.

यदक्तनेत्रां कन्दर्पः प्रहर्ता मां न पश्यति ॥१५१॥
दुष्करं जीवनोपायमुपन्यस्यावरुध्यते ।
पत्युः प्रस्थानमित्याहुरुपायाक्षेपमीदृशम् ॥१५२॥
प्रवृत्तैव प्रयामीति वाणी वल्लभ ते मुखात् ।
अयातापि त्वयेदानीं मन्दप्रेम्णा ममास्ति किम् ॥१५३॥

प्रहारशीलः ताच्छील्ये तृन् । कन्दर्पः न पश्यति न पश्येत् । तेन च त्वद्विरहे स मां न पीडयेत् इति भावः । त्वयि प्रयाणाभिमुखे कन्दर्प-
३बाधैव मां तरलीकरोति । तन्निवृत्तिश्चेत् सुखेन याहीत्यर्थः ॥१५१॥

दुष्करं दुर्घटं जीवनोपायं कामकर्तृकविलोकननिवारणाय अदर्शन-संपादकसिद्धाञ्जनदानरूपम् उपन्यस्य कथयित्वा पत्युः प्रस्थानं यात्रा
३उपरुध्यते तादृशाञ्जनप्राप्तेरसंभवात् प्रतिषिध्यते । ईदृशम् एवंप्रकारकम् उपायाक्षेपम् उपायेन अशक्योपायेन आक्षेपः निषेधः तम् उपायाक्षेपम् कवयः आहुरिति शेषः ॥ १५२ ॥

रोषाक्षेपमुदाहरति—प्रवृत्तैवेति । हे वल्लभ दयित ते मुखात् प्रयामि गच्छामि इति वाणी प्रवृत्तैव निःसृतैव । अत्र एवकारेण क्तप्रत्ययेन
३च आतिविस्मयो ध्वन्यते । मां प्राणेश्वरीति मन्यमानस्य तव वदनादीदृशं प्रयामीति वचनं प्राणवियोगवचनमिवातिदुःसहम् तत्तु त्वयोच्चारितमेव अतस्त्वया सर्वथा प्रेमबन्धः शिथलीकृतः तस्मात् इदानीं प्रयामीति
६उक्तेरनन्तरं मन्दप्रेम्णा त्वया अयातापि अगच्छतापि मम किमास्ति किं प्रयोजनम् । त्वच्छिथिलप्रेम्णा सर्वथा दूये इति भावः ॥ १५३ ॥

---

ii. 151—प्रहर्तुं for प्रहर्ता P,D;—यद्रक्तनेत्रां for यदक्तनेत्रां B,quoting सुभाषितरत्नभाण्डागार.

ii. 152—जीवितोपायं for जीवनोपायं N,D;—उपरुध्यते for अवरुध्यते P,R;—प्रयाणं for प्रस्थानं V.

ii. 153—अयतापि for अयातापि.P,R,D (later corrected into अयातापि);—करोमि for ममास्ति V,D,J;—मन्दास्तेम्ला(?) for मन्द-प्रेम्णा V.R takes this and the Following stanza after the two interpolated stanzas about मूर्छा-क्षेप.

रोषाक्षेपोयमुद्रिक्तस्नेहनिर्यन्त्रितात्मना ।
संरब्धया प्रियारब्धं प्रयाणं यन्निवार्यते ॥१५४॥
[मुग्धा कान्तस्य यात्रोक्तिश्रवणादेव मूर्छिता ।
बुद्ध्वा वक्ति प्रियं दृष्ट्वा किं चिरेणागतो भवान् ॥१५५॥]
[इति तत्कालसंभूतमूर्छयाक्षिप्यते गतिः ।
कान्तस्य कातराक्ष्या यन्मूर्छाक्षेपः स ईदृशः ॥१५६॥]

संज्ञार्थं घटयति—रोषाक्षेपोयमिति । उद्रिक्तः अतिशयस्य परां काष्ठां गतः यः स्नेहः प्रमा तेन निर्यन्त्रितः विह्वलीकृतः आत्मा अन्तःकरणं ३यस्याः सा तया संरब्धया संदर्शितकोपावेशया प्रियारब्धम् प्रियेण आरभ्यमाणम् प्रयाणं गमनं यत् यस्मान्निषिध्यते तस्मात् अयं रोषाक्षेपः रोषेण आक्षेपः रोषाक्षेपः । अस्मिन्नुदाहरणे निषेधो व्यङ्ग्यः ॥ १५४ ॥

मूर्छाक्षेपमुदाहरति——मुग्धेति । मुग्धा सुन्दरी कान्तस्य यात्रोक्ति-श्रवणादेव प्रयाणवचनश्रवणादेव न तु प्रयाणदर्शनात् मूर्छिता मोहं ३प्राप्ता बुद्ध्वा मूर्छापगमात् संज्ञां लब्ध्वा प्रियं च दृष्ट्वा वक्ति किं चिरेण आगतो भवानिति । कथं चिरकालेन त्वमागतोसि इति पृच्छतीत्यर्थः ॥ १५५ ॥

संज्ञार्थं योजयति—इतीति । इति एवंप्रकारेण तत्कालसंभूतमूर्छया तत्काले प्रयाणकाले एव संभूता संजाता या मूर्च्छा मोहः तया । करणे ३तृतीया । कातराक्ष्या चकितनयनया कान्तस्य गतिः आक्षिप्यते निषि-ध्यते । सः कविप्रसिद्धः मूर्छाक्षेपः मूर्छाया आक्षेपः ईदृशः अस्तीति शेषः । इदं श्लोकद्वयं प्राचीनेषु बहुषु पुस्तकेषु न दृश्यते मुद्रितपुस्तकेषु तु ६वर्तते न क्रमविसंगतं चातो व्याख्यातमिति ज्ञेयम् ॥ १५६ ॥

---

ii. 154—उदितः for उद्रिक्त V;—निर्यन्त्रणा for निर्यन्त्रिता V, D;—निषिध्यते for निवार्यते P,R,U.

ii. 155—बुद्धा for बुद्ध्वा P;—प्रियाश्लिष्टा for प्रियं दृष्ट्वा Rn.R gives stanzas 155–156 after stanza 153; N, V, D, J, and many Mss. used by P. omit them altogether. The first occurs in the सुभाषितरत्नभाण्डागार. We consider both as interpolations.

नाघ्रातं न कृतं कर्णे स्त्रीभिर्मधुनि नार्पितम् ।
त्वद्द्विषां दीर्घिकास्वेव विशीर्णं नीलमुत्पलम् ॥ १५७ ॥
सानुक्रोशायमाक्षेपः सानुक्रोशमिवोत्पले ।
व्यावर्त्य कर्म तद्योग्यं शोच्यावस्थोपदर्शनात् ॥ १५८ ॥
अर्थो न संभृतः कश्चिन्न विद्या काचिदर्जिता ।
न तपः संचितं किंचिद्गतं च सकलं वयः ॥ १६१ ॥

अनुक्रोशाक्षेपमाह—नाघ्रातमिति । त्वद्द्विषां त्वदरीणां स्त्रीभिः नीलमुत्पलं नाघ्रातम् नास्वादितम् । कर्णे भूषणार्थं न कृतम् । तथा मधुनि मद्ये सुवासार्थं नार्पितम् । दीर्घिकासु वापीषु तत् विशीर्णम् अनुपभोगेन कालपरिणामेन क्षयं गतम् त्वदरिनृपस्त्रीणां विधवात्वात् वने गमनाद्वा इति भावः ॥ १५७ ॥

उदाहरणं विशदयति—सानुक्रोशोयमिति । उत्पले सानुक्रोशमिव सदयमिव तद्योग्यं कर्म स्त्रीजनकृतम् आघ्राणादिकं व्यावर्त्य प्रतिषिध्य शोच्यावस्थोपदर्शनात् शोच्यावस्था विशीर्णत्वरूपा तस्याः प्रकाशनात् असौ सानुक्रोशाक्षेपः । अनुक्रोशपूर्वकं नाघ्रातमित्यादिनिषेधदर्शनादसौ सानुक्रोशाक्षेपः । अपरे तु नीलोत्पलानुक्रोशेन त्वद्द्विषस्तत्र न सन्तीत्याक्षेपसूचनादनुक्रोशाक्षेपः । व्यपदेशकस्य व्यपदेश्यं प्रति साक्षात् परंपरया वा हेतुतासद्भावस्यौचित्यादिति व्याख्यान्ति ॥ १५८ ॥

अनुशयाक्षेपमाह—अर्थो नेति । कश्चित् रत्नसुवर्णादिरूपः अर्थः न संचितः । काचिदपि पदवाक्यप्रमाणादिरूपा विद्या न संपादिता । किंचिदपि तपः सान्तपनादिकं न संभृतम् । सकलं वयः आयुः गतम् ॥१६१॥

---

ii. 157—तद्द्विषां for त्वद्द्विषां B;—जीर्णे for नीलं N, V.

ii. 158—असावनुक्रोशाक्षेपः for सानुक्रोशोयमाक्षेपः J, P, R, D;—इत्यनुक्रोशनाक्षेपः Pn; साक्षेपोसावनुक्रोशः V;—उपवर्णनात् for उपदर्शनात् R, D.

ii. 161—काचिदार्जिता for काचिदर्जिता N; कापि दर्शिता V;—P and R take this and the next stanza after श्लिष्टाक्षेप (158–159). We have purposely retained the numbering of the editio princeps;—see our Notes.

असावनुशयाक्षेपो यस्मादनुशयोत्तरम् ।
अर्थार्जनादेर्व्यावृत्तिर्दर्शितेह गतायुषा ॥ १६२ ॥
अमृतात्मनि पद्मानां द्वेष्टरि स्निग्धतारके ।
मुखेन्दौ तव सत्यस्मिन्नपरेण किमिन्दुना ॥ १५९ ॥
इति मुख्येन्दुराक्षिप्तो गुणान् गौणेन्दुवर्तिनः ।
तत्समान् दर्शयित्वेति श्लिष्टाक्षेपस्तथाविधः ॥ १६० ॥

संज्ञां विवृणोति—असाविति । यस्मात् अनुशयोत्तरम् अनुशयः पश्चात्तापः तस्मादनन्तरम् अर्थार्जनादेः व्यावृत्तिः विमुखता दर्शिता अतः ३असौ अनुशयाक्षेपः । अनुशपूर्वकः आक्षेपः अनुशयाक्षेपः ॥ १६२ ॥

श्लिष्टाक्षेपमाह—अमृतात्मनीति । अमृतस्येव आत्मा स्वभावः स्वरूपं वा यस्य तादृशे परमाह्लादके इत्यर्थः मुखपक्षे । चन्द्रपक्षे अमृतमेव ३आत्मा स्वरूपं यस्य अमृतमये इत्यर्थः । पद्मानां द्वेष्टरि सौन्दर्यातिशयेनेति मुखपक्षे । चन्द्रपक्षे तत्संकोचके । स्निग्धे तारके अक्षिकनीनिके यस्मिन् इति प्रथमपक्षे । अन्यत्र स्निग्धाः अनुरक्ताः तारकाः अश्विन्यादयो ६यस्मिन् भार्यात्वादिति भावः । एवं तव मुखेन्दौ सति अपरेण इन्दुना प्रसिद्धेन चन्द्रमसा किं प्रयोजनम् न किमपीति भावः ॥ १५९ ॥

उदाहरणं विशदयति—इतीति । एवंप्रकारेण इह रचनायाम् गौणेन्दुवर्तिनः अमुख्येन्दुवर्तिनः गुणान् अमृतात्मत्वादीन् तत्समान् मुख्येन्दुस-३मान् दर्शयित्वा श्लिष्टविशेषणोपन्यासमहिम्ना प्रकल्प्य मुख्येन्दुः उपमानभूतेन्दुः आक्षिप्तः प्रतिषिद्धः इति श्लिष्टपदविन्यासेन आक्षेपः श्लिष्टाक्षेपः ॥ १६० ॥

---

ii. 162—अर्थार्जनादि for अर्थार्जनादेः V;—दर्शितैवं for दर्शितेह N, J, V.

ii. 159—इतरेण for अपरेण N, V.

ii. 160—गुणादगौणेन्दु for गुणान् गौणेन्दु D;—तत्साम्यं for तत्समान् D;—दर्शयित्वेह for दर्शयित्वेति P, R;—स ईदृशः for तथाविधः D.

किमयं शरदम्भोदः किं वा हंसकदम्बकम् ।
रुतं नूपुरसंवादि श्रूयते तन्न तोयदः ॥ १६३ ॥
इत्ययं संशयाक्षेपः संशयो यन्निवर्त्यते ।
धर्मेण हंससुलभेनास्पृष्टघनजातिना ॥ १६४ ॥
चित्रमाक्रान्तविश्वोपि विक्रमस्ते न तृप्यति ।
कदा वा दृश्यते तृप्तिरुदीर्णस्य हविर्भुजः ॥ १६५ ॥
अयमर्थान्तराक्षेपः प्रक्रान्तो यन्निवार्यते ।

संशयाक्षेपमुदाहरति—किमयमिति । अयं वियति दृश्यमानः शरदम्भोदः शरत्कालीनः मेघः किम् । अथवा हंसकदम्बकम् शरत्समये मानसादागच्छतां हंसानां समूहः किम् । नूपुरं तुलाकोटि तस्य संवादि शिञ्जितसदृशं रुतं ध्वनिः श्रूयते तत् तस्मात् अयं तोयदः न ॥ १६३ ॥

अभिधां विशदयति—इतीति । अस्पृष्टघनजातिना अस्पृष्टा घनजातिर्येन तेन मेघेषु अनुपलभ्यमानेन हंससुलभेन हंसेषु सुलभतयावगतेन धर्मेण नूपुरसंवादिरुतरूपेण यत् यस्मात् संशयः प्रकृते मेघसंशयः निवर्त्यते अतोयं संशयाक्षेपः संशयस्य आक्षेपः संशयाक्षेपः ॥ १६४ ॥

अर्थान्तराक्षेपमुपन्यस्यति—चित्रमिति । ते विक्रमः पराक्रमः आक्रान्तविश्वोपि आक्रान्तं व्याप्तं विश्वं येन तादृशोपि न तृप्यति तृप्तो न भवति इति आश्चर्यमेतत् । अर्थान्तरविन्यासेन परिहरति—कदा वेति । वा अथवा उदीर्णस्य उद्दीप्तस्य हविर्भुजः अग्नेः तृप्तिः कदा दृश्यते न कदापि । हविषा कृष्णवर्त्मा हि भूय एवाभिवर्धते इति भावः ॥ १६५ ॥

उदाहरणं विस्पष्टयति—अयमिति । इह उदाहरणे तत्सधर्मणः विक्रमसमानधर्मस्य अर्थान्तरस्य उदीर्णस्य हविर्भुजस्तृप्त्यभावरूपस्य दर्शनात्

---

ii. 163—तन्न for तन्न J.

ii. 164—निवार्यते for निवर्त्यते R, D;—तुल्येन न for सुलभेना° V (emended into सुलभेना° in the margin);—राजिना for जातिना V.

ii. 165—शाम्यति for तृप्यति P, J; पुष्यति V.

ii. 166—निवर्त्यते for निवार्यते D (changed to निषिध्यते in the margin).

विस्मयोर्थान्तरस्येह दर्शनात् तत्सधर्मणः ॥ १६६ ॥
न स्तूयसे नरेन्द्र त्वं ददासीति कदाचन ।
स्वमेव मत्वा गृह्णन्ति यतस्त्वद्धनमर्थिनः ॥ १६७ ॥
इत्येवमादिराक्षेपो हेत्वाक्षेप इति स्मृतः ।
अनयैव दिशान्येपि विकल्पाः शक्यमूहितुम् ॥ १६८ ॥
॥ इत्याक्षेपचक्रम् ॥
ज्ञेयः सोर्थान्तरन्यासो वस्तु प्रस्तुत्य किंचन ।

[3]णिजन्तमेतत् । प्रक्रान्तः प्रस्तुतः विस्मयः यन्निवार्यते यस्मादपह्नियते अतोयम् अर्थान्तरेण आक्षेपः अर्थान्तराक्षेपः ॥ १६६ ॥

हेत्वाक्षेपमाह—न स्तूयसे इति । हे नरेन्द्र त्वं ददासि इति कदाचन कदापि न स्तूयसे जनैरिति शेषः । यतः त्वद्धनं अर्थिनः याचकाः स्वमेव [3]मत्वा आत्मीयमिति ज्ञात्वा गृह्णन्ति । अनेन राज्ञो लोकोत्तरो दान-माहात्म्यातिशयो ध्वन्यते ॥ १६७ ॥

आक्षेपालंकारमुपसंहरति—इतीति । इत्येवमादिः एतत्प्रकारकः आक्षेपः हेत्वाक्षेपः प्रस्तुतस्य नरेन्द्रस्तवस्य स्वमेव मत्वा गृह्णन्ति इति [3]हेतुमुपन्यस्य आक्षेपात् निषेधात् हेत्वाक्षेपः हेतुना आक्षेपः हेत्वाक्षेपः । पूर्वं दर्शितः कारणाक्षेपस्तु कारणस्य आक्षेपः न तु कारणेन इति उभयोर्भेदः । अनयैव दिशा पद्धत्या अन्येपि विकल्पाः भेदाः ऊहितुं [6]कल्पितुं शक्यम् प्रज्ञावद्भिरिति शेषः ॥ १६८ ॥

अर्थान्तरन्यासं लक्षयति ।—ज्ञेय इति । किंचन किमपि वस्तु प्रकृतं प्रस्तुत्य उपन्यस्य तस्य प्रस्तुतस्य अनुपपद्यमानतया संभाव्यस्य साधनं [3]सोपपत्तिकत्वेनोपपादनं तत्र समर्थस्य अन्यस्य कस्यचिदप्रस्तुतस्येति सूचि-तम् न्यासः निवेशः । सोयमप्रस्तुतस्येति प्रायिकमेतत् वैपरीत्येनापि दर्श-

---

ii. 166—सधर्मिणः for सधर्मणः V.

ii. 167—श्रूयसे for स्तूयसे V;—श्रूयते D;—कथंचन for कदाचन N, V.

ii. 168—अन्योपि विकल्पः for अन्योपि विकल्पाः P, R,D;—विकल्पैः for विकल्पाः V;—शक्य(:) for शक्यम् P, R, D.

तत्साधनसमर्थस्य न्यासो योन्यस्य वस्तुनः ॥ १६९ ॥

५नात् । यथा—

प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि ॥

अत्र सायंकालवर्णनस्य प्रस्तुतत्वात् अवलम्बनाय दिनभर्तुरित्युत्तरवा-
९क्यार्थः प्रस्तुतः समर्थ्यः पूर्वार्धवाक्यार्थः तत्समर्थकः । भोजराजस्तु अमुं विपरीतार्थान्तरन्यासमाह ॥ तथा च प्रस्तुतस्य पूर्वत्र परत्र वा यत्र-
कुत्रापि स्थितस्य अप्रस्तुतेन समर्थनमर्थान्तरन्यासः इति फलितम् । अत्र
१२समर्थ्यसमर्थकयोः सामान्यविशेषभावः आदरणीयः इति प्रकाशकारादयः । कार्यकारणभावे तु तन्मते काव्यलिङ्गस्य विषयः । दण्डिना तु काव्यलिङ्गो न स्वीकृतः अतः स उभयत्रापि अर्थान्तरन्यासं
१५स्वीकरोति । स हि ज्ञापकः निष्पादकः समर्थश्चेति हेतुं त्रिधा विभजति तत्र ज्ञापको अनुमानालंकारस्य विषयः निष्पादकः काव्यलिङ्गालंकारस्य समर्थकश्चार्थान्तरन्यासस्य ॥ सामान्यविशेषभावोपि साधर्म्यवैधर्म्येण
१८द्विधा भवति । ततश्च सामान्यं विशेषेण विशेषः सामान्येन स च साधर्म्येण वैधर्म्येण च इति चतुर्विधोर्थान्तरन्यासः प्रकाशे उक्तः । उदाहरणानि तत एव ज्ञेयानि । यस्मिन् वाक्यार्थे न विशेषसामान्यभावः
२१न वा कार्यकारणभावः तत्र साधारणधर्मयोरभिन्नत्वे प्रतिवस्तूपमा भिन्नयोस्तयोर्बिम्बानुबिम्बत्वे दृष्टान्तः । इमौ द्वावपि आचार्यदण्डिना उपमायामेव अन्तर्भावितौ । एको हि दोषो गुणसंनिपाते निमज्ज-
२४तीन्दोः किरणेष्विवाङ्कः इत्यादौ तु अर्थान्तरन्यासद्वयस्य संसृष्टिः आचार्यदण्डिनो मतेन ज्ञेया । तेन यस्मिन् विशेषसामान्यविशेषाः स विकस्वरः । इति दीक्षितादिभिर्लक्षितः विकस्वरालंकारः न पृथक् गण-
२७नामर्हतीति बोद्धव्यम् । उद्योतकारास्तु अनुपपद्यमानतया संभाव्यमानस्यार्थस्योपादानार्थं यत् अर्थान्तरं न्यस्यते सोर्थान्तरन्यासः । दृष्टान्ते तु सामान्यं सामान्येन विशेषो विशेषेण समर्थ्यते इति ततो भेदः । साक्षात्
३०व्याप्त्यादेरनभिधानादनुमानतो भेदः । इत्याहुः ॥ १६९ ॥

---

ii. 169—N fol. 19 ends with प्रस्त्युत्य, after which follows a gap extending to nearly a hundred stanzas.

विश्वव्यापी विशेषस्थः श्लेषाविद्धो विरोधवान् ।
अयुक्तकारी युक्तात्मा युक्तायुक्तो विपर्ययः ॥ १७० ॥
इत्येवमादयो भेदाः प्रयोगेष्वस्य लक्षिताः ।
उदाहरणमालैषां रूपव्यक्त्यै निदर्श्यते ॥ १७१ ॥
भगवन्तौ जगन्नेत्रे सूर्याचन्द्रमसावपि ।

कथितसामान्यलक्षणस्य अर्थान्तरन्यासस्य समर्थकार्थभेदेन संभवतो भेदान् निर्दिशति—विश्वव्यापीति । विश्वव्यापी सर्वव्यापकः सर्वत्र संभवार्हः । विशेषस्थः वस्तुविशेषे एव विद्यमानः । श्लेषाविद्धः समानवस्तूनामेव संश्लेषदर्शनात् अत्र श्लेषशब्देन वस्तुसाम्यं ग्राह्यं तेन आविद्धः युक्तः अविरुद्धार्थसमर्थकेन समर्थित इत्यर्थः । विरोधवान् प्रकृतविरोधी । अयुक्तकारी प्रकृत्यैवानुचितकरणशाली । युक्तात्मा औचित्ययुक्तः । युक्तायुक्तः युक्तोपि अयुक्तकारी । विपर्ययः एतद्विरुद्धः अयुक्तोपि युक्तकारी ॥ १७० ॥

इत्येवमिति । अस्य अर्थान्तरन्यासस्य इत्येवमादयः एवं प्रकाराः भेदाः समर्थकार्थविशेषाः प्रयोगेषु कविप्रयोगेषु लक्षिताः दृष्टाः । एषां रूपव्यक्त्यै स्वरूपावगमाय उदाहरणमाला निदर्श्यते ॥ १७१ ॥

क्रमेणोदाहरन्नादौ विश्वव्यापिनमुदाहरति—भगवन्तौ इति । भगवन्तौ षडैश्वर्यसंपन्नौ । जगन्नेत्रे विश्वनयनभूतौ सर्वपदार्थप्रकाशकत्वात् । सूर्यश्च चन्द्रमाश्च सूर्याचन्द्रमसौ । अपि शब्देन अस्तानर्हत्वं सूच्यते । अथवा एतादृशौ अस्तं गच्छतः अन्येषां का कथा इति सूच्यते । गच्छत एव इत्यनेन अयं क्रमः प्रचलित एव न विश्रान्तः इति ध्वन्यते । अस्यार्थस्य असंभवमाशङ्क्य समर्थयति—नियतिरिति ।

---

ii. 170—श्लेषविद्धो for श्लेषाविद्धो D;—श्लेषागुणविरोधनात् (?) for श्लेषाविद्धो विरोधवान्;—युक्तार्थः for युक्तात्मा Pn.

ii.171—प्रयोगेष्वेव for प्रयोगेष्वस्य D;—विकल्पेषु for प्रयोगेषु Rn;—उदाहरणमेतेषां for उदाहरणमालैषां D (marginal emendation);—रूपव्यक्तौ for रूपव्यक्त्यै P, R, V;—निगद्यते for निदर्श्यते R.

पश्य गच्छत एवास्तं नियतिः केन लङ्घ्यते ॥ १७२ ॥
पयोमुचः परीतापं हरन्त्येते शरीरिणाम् ।
नन्वात्मलाभो महतां परदुःखोपशान्तये ॥ १७३ ॥
उत्पादयति लोकस्य प्रीतिं मलयमारुतः ।
ननु दाक्षिण्यसंपन्नः सर्वस्य भवति प्रियः ॥ १७४ ॥
जगदाह्लादयत्येष मलिनोपि निशाकरः ।

नियतिः दैवं केन लङ्घ्यते न केनापि इत्यर्थः । अत्र समर्थकस्य चतुर्थपादवाक्यार्थस्य ब्रह्मादिपिपीलिकापर्यन्तानां सर्वेषां नियत्यधीनत्वात् विश्वव्यापित्वं तेन सामान्यार्थेन पादत्रयगतविशेषार्थः समर्थितः अतो विश्वव्यापी नामायमर्थान्तरन्यासः ॥ १७२ ॥

विशेषस्थमर्थान्तरन्यासमुदाहरति—पयोमुच इति। पयोमुचः वारिदाः शरीरिणां प्राणिनां परीतापं निदाघार्कसंतापं हरन्ति एव । अमुमर्थं समर्थयते—महतामात्मलाभः जन्मग्रहणं परदुःखोपशान्तये परेषां दुःखस्य उपशान्तये शमनाय अस्तीति शेषः । ननु इति निश्चये। अत्र च सर्वमहद्वर्णनपरेणोत्तरवाक्यार्थेन महद्विशेषाणां पयोमुचां वर्णनपरस्य पूर्ववाक्यार्थस्य समर्थनं तेनार्थान्तरन्यासालंकारः । तत्र समर्थकवाक्ये महतामेवैतादृशी रीतिर्न प्राणिमात्रस्य इति विशेषस्थता बोध्या ॥ १७३ ॥

श्लेषाविद्धमुदाहरति— उत्पादयतीति । दाक्षिण्यसंपन्नः सारल्यादिगुणान्वितः दाक्षिण्येन दक्षिणदिक्संबन्धेन संपन्नश्च । सर्वस्य प्रियः भवति । अत्रापि समर्थ्यसमर्थकयोः सामान्यविशेषता । तत्र समर्थकस्य दाक्षिण्यसंपन्नः सर्वस्य प्रियः भवति इति वाक्यार्थे दाक्षिण्यसंपन्नस्य प्रियभवनं समुचितमेवेति श्लिष्टानुविद्धोर्थान्तरन्यासः ॥ १७४ ॥

विरोधवन्तमुदाहरति—जगदानन्दयतीति । एष मलिनोपि कलङ्कितोपि सदोषश्चेति ध्वनिः । निशाकरः जगदानन्दयति आह्लादयति । ननु मलिनस्य कथमेतदिति सामान्येन समर्थयति अनुगृह्णातीति । द्विजे-

ii. 173—हरन्त्येव for हरन्त्येते P, R.
ii. 174—दक्षिण for मलय R;—आवहति प्रियम् for भवति प्रियः V, Rn; वहति प्रियम् J.
ii. 175—आनन्दयति for आह्लादयति P, R.

अनुगृह्णाति हि परान् सदोषोपि द्विजेश्वरः ॥ १७५ ॥
मधुपानकलात् कण्ठान्निर्गतोप्यलिनां ध्वनिः ।
कुटुर्भवति कर्णस्य कामिनां पापमीदृशम् ॥ १७६ ॥
अयं मम दहत्यङ्गमम्भोजदलसंस्तरः ।

श्वरः ब्राह्मणश्रेष्ठः सदोषोपि मलिनाचरणोपि परान् अन्यान् अनुगृह्णाति अत्र सदोषः दोषा रात्रिः तया सहितः सदोषः द्विजेश्वरः चन्द्रः चन्द्रोपि द्विजराजत्वेन प्रसिद्धः । तेन च द्विजेश्वर इति समानार्थकेन निशाकर इति विशेषार्थस्य समर्थनात् समर्थ्यसमर्थकयोः सामान्यविशेषभावः । तत्र च समर्थकवाक्यार्थः सदोषत्वानुग्राहकत्वरूपविरुद्धधर्माभ्यामवस्कन्दितः अतः विरोधवदर्थान्तरन्यासोयम् ॥ १७५ ॥

अयुक्तकारिणमुदाहरति मधुपानेति । मधुपानं मकरन्दास्वादः तेन कलात् मधुरात् अलीनां भ्रमराणां कण्ठात् निर्गतोपि ध्वनिः गुञ्जारवः कामिनां विरहिकामुकानां कर्णस्य कटुर्भवति कर्णारुंतुन्दो भवति । एतत् सामान्येन समर्थयति पापमीदृशमिति । ईदृशं सुखदवस्तुनोपि दुःखदत्वम् । अत्र कामिनां पापस्वरूपत्वं विषयासक्तत्वेन ज्ञेयम् । अत्र पापस्य दुःखकारित्वरूपसामान्येनार्थेन मधुरस्यापि भ्रमरध्वनेः दुःखदत्वरूपविशेषार्थस्य समर्थनादर्थान्तरन्यासः । तत्र च सामान्यपापरूपसमर्थकस्य मधुरध्वनेः कटुत्वसंपादनादयुक्तकारिता ॥ १७६ ॥

युक्तात्मानमुदाहरति—अयमिति । अयम् अम्भोजदलसंस्तरः कमलदलैः कल्पिता शय्या मम अङ्गं दहति । शीतलानां कमलदलानां कथमेतदिति अनुपपत्तिं परिहरति हुताशनेति । यः हुताशनस्य अग्नेः प्रतिनिधिः प्रतिकृतिः । अनेन उज्ज्वलारक्तकमलानां अग्निप्रतिनिधित्वं सूच्यते । स दाहात्मा दाहस्वरूपः इति युज्यते । ननु इति निश्चये । अत्र हुताशनप्रतिनिधित्वरूपसामान्येन तत्प्रतिनिधिविशेषस्य अम्भोजदलसंस्तरस्य अङ्गदा-

---

ii. 176—कलोत्कण्ठानिर्गतः for कलात् कण्ठान्निर्गतः D;—प्रासं for पापं D.
ii. 177—अम्भोज इव for अम्भोजदल V.

हुताशनप्रतिनिधिर्दाहात्मा ननु युज्यते ॥ १७७ ॥
क्षिणोतु कामं शीतांशुः किं वसन्तो दुनोति माम् ।
मलिनाचरितं कर्म सुरभेर्नन्वसांप्रतम् ॥ १७८ ॥
कुमुदान्यपि दाहाय किमङ्ग कमलाकरः ।

हकसमर्थनात् सामान्येन विशेषस्य समर्थनम् । तत्र च समर्थके हुताशन-प्रतिनिधौ दाहकत्वस्य समुचितत्वात् युक्तात्मायमर्थान्तरन्यासः ॥ १७७ ॥

युक्तायुक्तमुदाहरति—क्षिणोत्विति । शीतांशुः शीतकिरणो मृगाङ्कः मां कामं पर्याप्तं क्षिणोतु हिनस्तु । परं वसन्तः माधवः मां किं दुनोति कथं पीडयति । नैतद्युक्तामिति सामान्येन दर्शयति । सुरभेः श्रेष्ठस्य वसन्तस्यापि मलिनाचरितं मलिनैः पापैराचरितं तथा मलिनेन कलङ्कितेन चन्द्रेणाचरितं कर्म परपीडकत्वम् असांप्रतम् अयुक्तम् । अत्र सामान्येन विशेषस्य समर्थनम् । तत्रोत्कृष्टस्य सुरभेरपकृष्टकर्माचरणे युक्तेन अयुक्ताचरणम् युक्तायुक्तता तन्नामार्थान्तरन्यासः ॥ १७८ ॥

विपर्ययं दर्शयति—कुमुदान्यपीति । विरहिण्या उक्तिरियम् । कुमुदान्यपि चन्द्रविकासीनि कमलान्यपि दाहाय जायन्ते । अपिशब्देन शीतांशुरागिणां तेषां दाहकत्वमत्याश्चर्यास्पदमिति ध्वनितम् । अयं कमलाकरः सूर्यविकासिकमलसमूहः दाहाय भवेत् इति किं वक्तव्यम् । जगद्दाहकसूर्यानुरक्तत्वेन तस्य विरहिजनदाहकत्वं नाश्चर्यास्पदम् । उक्तार्थमेवार्थान्तरेण द्रढयति नेति । इन्दुगृह्येषु इन्दुपक्षेषु उग्रेषु सत्सु सूर्यगृह्यः सूर्यपक्षः मृदुः न भवेत् । अत्र सामान्येन विशेषस्य समर्थनम् । तत्र समर्थकवाक्ये कुमुदे अयुक्तकारिता कमले युक्तकारिता इति अयुक्तयुक्तकारिता । तथा च अयुक्तं च युक्तं च अयुक्तयुक्तं च तस्य कारिता इति समासः । एतानि सर्वाण्यपि साधर्म्येणोदाहरणानि । वैधर्म्येण यथा—

वक्षोजकुम्भनिवहाद्धनिताजनानां
गीष्मर्तुना विनिहितं ग्रहराजपुत्री ।

---

ii. 178—नत्वसांप्रतम् for नन्वसांप्रतम् D.

ii. 179—तापाय for दाहाय V, J;—किमयं for किमङ्ग P.

न हीन्दुगृह्येषूग्रेषु सूर्यगृह्यो मृदुर्भवेत् ॥ १७९ ॥

॥ इत्यर्थान्तरन्यासचक्रम् ॥

शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयोः ।

तापं पितुः स्वमहरत् तरलोर्मिहस्तै-
रन्यं न याति हि विभूतिरपत्यभाजाम् ॥

अत्र सामान्येन अपत्यभाजां विभूतिरन्यं न याति इति निषेधमुखेन
१५ग्रहराजपुत्री तापं पितुरहरत् इति विधिमुखस्य वाक्यार्थस्य समर्थनात्
वैधर्म्येणायमर्थान्तरन्यासः ॥ १७९ ॥

व्यतिरेकं लक्षयति—शब्दोपात्त इति । द्वयोर्वस्तुनोः अर्थात् उपमा-
नोपमेयपयोः सादृश्ये शब्दोपात्ते साधारणधर्मवाचकेवादिप्रयोगेण
३बोधिते प्रतीते वा तुल्यसमादिशब्दप्रयोगे लक्षणया ज्ञाते अथवा
साधारणधर्मवाचकस्यानुपादाने व्यञ्जनयावगते सति तत्र सादृश्ये लक्ष-
णया सादृश्यसंबन्धिनोः प्रतियोग्यनुयोगिभूतयोरुपमानोपमेययोः यद्भेद-
६कथनं केनचिद्धर्म । विशेषेण उपयानादुपमेयस्योत्कर्षाय वैधर्म्यप्रतिपादनं
स व्यतिरेकः भवतीति शेषः । स च धर्मविशेषः क्वचिदुक्तः क्वचिदनुक्त-
श्चेति व्यतिरेकस्य चातुर्विध्यं मम्मटाचार्यैः वर्णितम् । तथैव च
९उपमानोपमेययोर्भेदकथनं च सादृश्यप्रतिषेधेनैव प्रायो भवति । स च
प्रतिषेधः क्वचित् भेदवाचिभिर्नञादिभिः क्वचिच्च विरुद्धधर्मो-
पादनमात्रेण संभवति क्वचिच्च तात्पर्यार्थपर्यालोचनया भवति । एतत्
१२सर्वमुदाहरणेषु दर्शयामः । केचित्तु उपमानादुपमेयस्य भेदकथने उप-
मेयस्योत्कर्षकथनवदपकर्षकथनेनापि व्यतिरेकं मन्यन्ते उदाहरन्ति च—

क्षीणः क्षीणोपि शशी भूयो भूयोभिवर्धते नित्यम् ।
विरम प्रसीद सुन्दरि यौवनमनिवर्ति यातं तु ॥

१६अत्र उपमेययौवनस्योपमानचन्द्रापेक्षया अपकर्षः । परं नैतदाचार्यदण्डिसं-
मतम् । उदाहरणेषु तादृशभेदोदाहरणस्यानुपलम्भात् । तथैव मम्मट-
१८जगन्नाथादयोपि उपमानादुपमेयस्य व्यतिरेकः आधिक्यं तेन भेद-
श्चेत् तर्हि इममेव अलंकारं स्वीकुर्वन्ति अपकर्षे तु न तथा ।

---

ii. 180—उच्यते for कथ्यते Rn.

तत्र यद्भेदकथनं व्यतिरेकः स कथ्यते ॥ १८० ॥
धैर्यलावण्यगाम्भीर्यप्रमुखैस्त्वमुदन्वतः ।
गुणैस्तुल्योसि भेदस्तु वपुषेदृशेन ते ॥ १८१ ॥
इत्येकव्यतिरेकोयं धर्मेणैकत्रवर्तिना ।
प्रतीतिविषयप्राप्तेर्भेदस्योभयवर्तिनः ॥ १८२ ॥
अभिन्नवेलौ गम्भीरावम्बुराशिर्भवानपि ।
असावञ्जनसंकाशस्त्वं तु चामीकरद्युतिः ॥ १८३ ॥

उक्तोदाहरणे व्यतिरेकविषये तु तेषामेवमाशयः । तथाहि अत्र २१उपमेये यौवने स्थैर्याधिक्यमपेक्षितम् । अतः अस्त्येवोपमानादुपमेयस्याधिक्यम् । व्यतिरेकेस्मिन् भेदकथनं विशेषेण अपेक्ष्यते तेन मुखमिव चन्द्रः इति प्रतीपे उपमानीकरणप्रयुक्तस्याधिक्यस्य गम्यत्वेपि विशे- २४षतस्तद्बोधकशब्दाभावान्नातिव्याप्तिः इति ॥ १८० ॥

व्यतिरेकसामान्यलक्षणमभिधाय तत्प्रभेदान् दर्शयति । तत्रादौ एकव्यतिरेकमाह—धैर्येति । धैर्यं धृतिः अचाञ्चल्यं च लावण्यं सौदर्यं लवण- ३मयत्वं च गाम्भीर्यम् गूढाशयत्वं गभीरत्वं च एते प्रमुखा येषु तैः गुणैः सरसत्वादिभिः उदन्वतः महोदधेः त्वं तुल्योसि भेदस्तु वैधर्म्यं तु ते ईदृशेन अतिसुन्दरकरचरणवदनवता वपुषा शरीरेणैवास्ति ॥ १८१ ॥

इत्येकेति । एकत्र उपमेये एव वर्तिना स्थितेन धर्मेण सुन्दरवपुष्मत्वरूपेण उभयवर्तिनः उपमानोपमेयवर्तिनः प्रतियोग्यनुयोगित्वेनेति भावः ३भेदस्य वैधर्म्यस्य प्रतीतिविषयप्राप्तेः प्रतीयमानत्वात् हेतोरयं एकव्यतिरेकः । एकमात्रगतधर्मस्य द्वयोर्वैधर्म्यबोधकत्वादिति भावः । अत्र विरुद्धधर्मोपादानेन भेदप्रतीतिः ॥ १८२ ॥

उभयव्यतिरेकमाह—अभिन्नेति । अम्बुराशिः भवांश्च उभावपि अभिन्नवेलौ अपरित्यक्तमर्यादौ गम्भीरौ च । किंतु असौ अम्बुराशिः अञ्जन- ३संकाशः कज्जलवन्मालिनाकारः नीलजलत्वादिति भावः त्वं तु चामीकरद्युतिः सुवर्णप्रभोसि ॥ १८३ ॥

---

ii. 181—माहात्म्य for गाम्भीर्यं Pn,V,D,J;—तुल्योपि fortुल्योसिR.
ii. 182—प्राप्तिः for °प्राप्तेः V.
ii. 183—अम्भोराशिः for अम्बुराशिः D;—च्छविः for द्युतिः V,D.

उभयव्यतिरेकोयमुभयोर्भेदकौ गुणौ ।
काष्ण्यं पिशङ्गता चेति यत् पृथग्दर्शिताविह ॥ १८४ ॥
त्वं समुद्रश्च दुर्वारौ महासत्त्वौ सतेजसौ ॥
इयता युवयोर्भेदः स जडात्मा पटुर्भवान् ॥ १८५ ॥
स एष श्लेषरूपत्वात् सश्लेष इति गृह्यताम् ।

उभयेति । अयं उभयव्यतिरेकः यत् यतः उभयोः उपमानोपमेयभूतयोः समुद्रनृपयोः भेदकौ भेदसाधनभूतौ गुणौ काष्ण्यंपिशङ्गतारूपौ पृथक् दर्शितौ स्तः । अत्रापि विरुद्धधर्मोपादानेन भेदप्रतीतिः ॥१८४॥

सश्लेषव्यतिरेकमुदाहरति—त्वमिति । त्वं समुद्रश्च दुर्वारौ त्वमनभिभवनीयः स च अवार्यजलवेगः । त्वं महासत्त्वः महासामर्थ्यवान् स च महाजन्तुविशिष्टः । त्वं सतेजसः द्युतिमान् स च वाडवाग्निविशिष्टः । अयं तु युवयोर्मध्ये भेदः सः समुद्रः जडात्मा मूर्खः डलयोरभेदात् जलस्वरूपः शीतलश्च । भवान् पटुः चतुरः तीक्ष्णश्च ॥ १८५ ॥

स इति । स एष उपरि दर्शितः व्यतिरेकः श्लेषरूपत्वात् जडात्मा पटुः इति श्लिष्टपदेन वैधर्म्यदर्शनात् श्लेषस्वरूपत्वात् सश्लेषः एतत्संज्ञकः इति गृह्यतां जानीहि । अभ्यस्यमानं छात्रं प्रति उक्तिरियम् । न चात्र साधारणधर्मवाचकदुर्वारादिपदानामपि श्लिष्टत्वात् तेनास्य सश्लेषता वाच्या । तैर्विशेषणैः सादृश्यबोधात् वैधर्म्यावबोधे तेषामसंबन्धात् । वैधर्म्यचमत्कृतिप्रधाने व्यतिरेके वैधर्म्यविशेषणे श्लिष्टे एव सश्लेषव्यतिरेकस्वीकारस्य युक्तत्वात् । अपरं च साधर्म्योपपादकविशेषणश्लेषस्वीकारे सर्वत्र व्यतिरेके

---

ii. 184 —चोभौ for चेति P,R;चेतौ V;—पृथक्त्वेन दर्शितौ for पृथग्दर्शिताविह Rn.

ii. 185—तुल्याभौ for दुर्वारौ V;—इयांश्च for इयता V;अयं तु P,R;—जलात्मा for जडात्मा V;—तथापि भवतः कक्षां जडात्मा नायमर्हति for इयता युवयोर्भेदः स जडात्मा पटुर्भवान् given by B as variant is nothing but a change proposed by P.

ii. 186—एव for एष D;—रूपस्य for रूपत्वात् D;—दृश्यते for दर्श्यते Rn.

साक्षेपश्च सहेतुश्च दर्श्यते तदपि द्वयम् ॥ १८६ ॥
स्थितिमानपि धीरोपि रत्नानामाकरोपि सन् ।
तव कक्षां न यात्येव मलिनो मकरालयः ॥ १८७ ॥
वहन्नपि महीं कृत्स्नां सशैलद्वीपसागराम् ।
भर्तृभावाद्भुजंगानां शेषस्त्वत्तो निकृष्यते ॥ १८८ ॥
शब्दोपादानसादृश्यव्यतिरेकोयमीदृशः ।

सश्लेषत्वापत्तिर्दुर्वारा भवेत् । अत्र प्रस्तुताप्रस्तुतयोर्विशेषणद्वयस्य श्लिष्टत्वम्
९क्वचिदेकतरनिष्ठश्लिष्टविशेषणेपि अयं भवति । एवं श्लिष्टं सप्रपञ्चमुपपाद्य
पुनर्भेदद्वयं दर्शयति साक्षेप इति । आक्षेपः विरुद्धधर्मोपन्यासेन सादृश्य-
प्रतिषेधः । सहेतुः हेतुश्चात्र हेत्वर्थबोधकपञ्चम्यन्तपदरूपः । तेन हेतु-
१२भूतविशेषणैः प्रतिषेधः साध्यते चेत् तत्र सहेतुव्यतिरेकः ॥ १८६ ॥

साक्षेपमुदाहरति—स्थितिमानिति । मकरालयः समुद्रः स्थितिमानपि अनुज्झितमर्यादोपि धीरोपि प्रशान्तोपि रत्नानां महार्घमणीनां सद्गुण-
३रत्नानां च आकर उत्पत्तिस्थानमपि सन् मलिन इति तव कक्षां साधर्म्यं न यात्येव । अत्रोपमानगतेन मालिन्यरूपधर्मेण नृपसादृश्याक्षेपः । तेन च नृपस्योत्कर्षः इति साक्षेपव्यतिरेकः । अत्राक्षेपो नञा वाच्यः ॥ १८७ ॥

सहेतुव्यतिरेकमुदाहरति—वहन्निति । सशैलद्वीपसागरां कृत्स्नां महीं वहन्नपि धारयन्नपि भुजङ्गानां सर्पाणां जाराणां च भर्तृभावात् स्वामि-
३त्वात् हेतोः । शेषः अनन्तः त्वत्तः निकृष्यते त्वत्तः त्वया निकृष्टीक्रियते । अत्र भुजङ्गपतित्वरूपधर्मस्य उपमेयापेक्षया उपमानान्तस्यापकर्षहेतुत्वात् अयं सहेतुव्यतिरेकः ॥ १८८ ॥

एवं शब्दोपात्तसादृश्यव्यतिरेकमुपपाद्य प्रतीयमानसादृश्यव्यतिरेकं प्रतिपिपादयिषुराह—शब्देति । अयं ईदृशः एतावत्पर्यन्तं विवेचितः
३शब्दोपादनसादृश्यव्यतिरेकोस्ति । शब्दस्य साधारणधर्मवाचकस्य उपादानं यस्मिन् एतादृशं यत् सादृश्यं तत्पूर्वकः व्यतिरेकः उपमेयगुणातिशयवर्णनं

ii. 187—कक्ष्यां for कक्षां R.
ii. 188—भर्तुः for भर्तृ V;—द्विजिह्वानां for भुजङ्गानां D— विशिष्यते for निकृष्यते V.

प्रतीयमानसादृश्योप्यस्ति सोनुविधीयते ॥ १८९ ॥
त्वन्मुखं कमलं चेति द्वयोरप्यनयोर्भिदा ।
कमलं जलसंरोहि त्वन्मुखं त्वदुपाश्रयम् ॥ १९० ॥
अभ्रूविलासमस्पृष्टमदरागं मृगेक्षणम् ।
इदं तु नयनद्वन्द्वं तव तद्गुणभूषितम् ॥ १९१ ॥
पूर्वस्मिन् भेदमात्रोक्तिरस्मिन्नाधिक्यदर्शनम् ।

तत्स्वरूपोस्ति । अत्र केचित् शब्दोपादानेन यत्सादृश्यं तत्पूर्वको व्यतिरेक इति समासं दर्शयन्ति । परं प्रतीयमानसादृश्येत्युत्तरपदसमासैक्यसंपादनाय प्रथमार्थ एव ज्यायान् ॥ प्रतीयमानं सादृश्यं यत्र तादृशः व्यतिरेकः अस्ति । स अभिधीयते मया निवेद्यते ॥ १८९ ॥

प्रतीयमानसादृश्यव्यतिरेकमुदाहरति—त्वन्मुखमिति । त्वन्मुखं कमलं च द्वयोरपि अनयोः भिदा एवं भेदः । तं भेदमेव दर्शयति—कमलमिति । कमलं जलसंरोहि जलजमित्यर्थः । त्वन्मुखं त्वदुपाश्रयं त्वमेव उपाश्रयः आधारः तस्य तत् । अत्र विभिन्नाश्रयत्वेन कविप्रसिद्धं कमलमुखसादृश्यं प्रतिषिध्यते । समानधर्मस्यात्राकथनात् प्रतीयमानसादृश्यत्वं बोध्यम् ॥ १९० ॥

विरुद्धधर्मेण प्रतीयमानसादृश्यव्यतिरेकं दर्शयति—अभ्रूविलासमिति । मृगेक्षणं हरिणनयनम् अभ्रूविलासं भ्रूकुटिनर्तनलीलाशून्यम् तथा अस्पृष्टमदरागं मदिरासेवनोद्भूतलोहित्यवर्जितम् । इदं तु तव नयनद्वन्द्वं तौ गुणौ भ्रूविलासमदरागरूपौ ताभ्यां भूषितम् । अत्रापि उपमेयगतगुणविशेषेण कविप्रसिद्धं मृगनयनसादृश्यं निषिध्यते ॥ १९१ ॥

उदाहरणद्वयप्रयोजनं दर्शयति—पूर्वस्मिन्निति । पूर्वस्मिन् त्वन्मुखमित्युदाहरणे भेदमात्रोक्तिः केवलं भेदस्य कथनं न तु उपमेयोत्कर्षस्योक्तिः । तत्र त्वदुपाश्रयमित्यनेनोत्कर्षो व्यङ्ग्यः । तथा च तत्र भेदः कारणभेदाद्विज्ञेयः । ननु जलसंरोहि इत्यनेन जडसंरोहि इति प्रतीते कमलस्य

---

ii. 189—अभिधीयते for अनुविधीयते P, R; अत्राभिधीयते D.
ii. 190—तु त्वदाश्रम् for त्वदुपाश्रयम् V.

सदृशव्यतिरेकश्च पुनरन्यः प्रदर्श्यते ॥ १९२ ॥
त्वन्मुखं पुण्डरीकं च फुल्ले सुरभिगन्धिनी ।
भ्रमरभ्रमरमम्भोजं लोलनेत्रं मुखं तु ते ॥ १९३ ॥
चन्द्रोयमम्बरोत्तंसो हंसोयं तोयभूषणम् ।

जडोपादनत्वम् अजडोपादनत्वं च मुखस्य अत उत्कर्षः शाब्द एव इति ६चेन्न तथाविधश्लेषे तात्पर्याभावात् । अस्मिन् अव्यवहितोदाहरणे आधिक्यदर्शनं तद्गुणभूषितम् इत्यनेन गुणाधिक्यस्य कथनं न तु साधारणविशेषणमहिम्ना केवलसादृश्यप्रतीतिः । भेदश्च विरुद्धधर्मवत्त्वेन प्रतीयते ९न तु शब्देनाभिहितोस्ति । पूर्वोदाहरणे कारणभेदाद्भेदः अस्मिन्नुदाहरणे विरुद्धधर्माध्यासेन इति बोध्यम् ॥ एतावता विरुद्धधर्मोपादानेन नञादिना वा सादृश्यप्रतिषेधेन परिस्फुटः भेदव्यतिरेको दर्शितः । इदानीं १२सदृशभेदकेन भेदव्यतिरेकं दर्शयति—सदृशेति । सदृशव्यतिरेकः सदृशेन भेदकेन व्यतिरेकः भेदः सदृशव्यतिरेकः इत्यर्थः ॥ १९२ ॥

शब्दोपात्तसादृश्यं सदृशव्यतिरेकमुदाहरति—त्वन्मुखमिति । त्वन्मुखं पुण्डरीकं कमलं च फुल्ले विकसिते एकत्र स्मितलक्ष्म्या अन्यत्र दलवि३कासेन तथा सुरभिः घ्राणतर्पकः गन्धः सुवासः ययोस्ते । फुल्लत्वसुरभिगन्धत्वयोः साधारण्यात् सादृश्यमत्र शब्दोपात्तम् । एवं सादृश्यं स्थिरीकृत्य सदृशभेदकेन व्यतिरेकं दर्शयति—भ्रमद्भ्रमरेति । अम्भोजम् भ्रमद्भ्रमरं ६भ्रमन्तः भ्रमरा यस्मिन् तत् । ते मुखं तु लोलनेत्रं लोले विलासचञ्चले नेत्रे यस्मिन् तत् । अत्र भ्रमरनेत्रे भेदके ते च भ्रमणचाञ्चल्यरूपधर्मेण समाने इति सदृशाभ्यां ताभ्यां भेदः सदृशव्यतिरेकः ॥ १९३ ॥

शब्दानुपात्तसादृश्यं सदृशव्यतिरेकमुदाहरणद्वयेन उदाहरति—चन्द्र इति । अयं चन्द्रः अम्बरोत्तंसः वियद्भूषणम् । हंसः तोयभूषणम् ३जलशोभासंपादकः । तथैव इदं नभः नक्षत्रमालि तारामालाविभूषितम् । इदं पयः उत्फुल्लकुमुदं विकसितारविन्दम् । अत्र चन्द्रहंसयोः सादृश्यं

---

ii. 194—हंसो यत् तोयभूषणः for हंसोयं तोयभूषणम् V;—चन्द्रोदयं वरोत्तंसो for चन्द्रोयमम्बरोत्तंसो D.

नभो नक्षत्रमालीदमुत्फुल्लकुमुदं पयः ॥ १९४ ॥
प्रतीयमानशौक्ल्यादिसाम्ययोर्विदम्भसोः ।
कृतः प्रतीतशुध्योश्च भेदोस्मिंश्चन्द्रहंसयोः ॥ १९५ ॥
पूर्वत्र शब्दवत् साम्यमुभयत्रापि भेदकम् ।

श्वेतत्वादि अनुभूततया स्फुटं प्रतीतं भवति वियदम्भसोश्च शौक्ल्यादि
६वर्णनानुरोधेन यथाकथंचित् प्रतीयते । एवमुभयत्र शब्दानुपात्तस्य सादृश्यस्य
अम्बरतोयाभ्यां नक्षत्रकुमुदाभ्यां च भेदो दर्शितः तौ च परस्परतुल्यौ
इति सदृशव्यतिरेकिता ॥ १९४ ॥

उक्तोदाहरणद्वयं विशदयति—प्रतीयमानेति । अस्मिन् पूर्वश्लोके
प्रतीयमानम् वाचकशब्दाभावात् वर्णनानुरोधेन यथाकथंचित् उन्नीयमानं
३शौक्ल्यादि आदिशब्देन नैर्मल्यस्य संग्रहः तेन साम्यं ययोः तादृशयोः
वियदम्भसोः आकाशपयसोः तथा प्रतीतशुद्धयोः सदानुभूततया-
वगतशुद्धयोः चन्द्रहंसयोः भेदः कृतः प्रथमोदाहरणे अम्बरतोयाभ्यां
६द्वितीयोदाहरणे नक्षत्रकुमुदाभ्याम् सादृश्यनिषेधः कृतः । इमे च भेदके
अम्बरतोये नीलत्वादिना नक्षत्रकुमुदे च मनोहराकारत्वेन परस्परसदृशे
इति सदृशव्यतिरेकः । पूर्वोदाहरणे वियदम्भसोः शौक्ल्यादिसादृश्यं
९दुरूहतया प्रतीयमानम् उत्तरोदाहरणे शुद्धिस्तु सर्वानुभवसिद्धा इति सा
प्रतीता इत्यनयोर्भेदः । अत्र केचिदुपमानोपमेयभूतयोः चन्द्रहंसयोः
प्रतीतशुद्धिरूपसमानधर्मयोः प्रतीयमानसौक्ष्म्यरूपसमानधर्माभ्यां वि-
१२यदम्भोभ्याम् आधारतया चन्द्रहंसयोर्भेदः कृतः इति एकमेवोदाहरणं
मन्यन्ते तन्मते सदृशयोर्व्यतिरेकः सदृशव्यतिरेकः इति समासः॥१९५॥

पूर्वोदाहृतशब्दोपात्तसादृश्यं सदृशव्यतिरेकोदाहरणं व्याचष्टे—
पूर्वत्रेति । पूर्वत्र त्वन्मुखमित्युदाहरणे शब्दवत् शब्दः समानधर्मवाचक
३शब्दः सोस्मिन्नास्ति इति शब्दवत् साम्यं फुल्लत्वादिकमस्ति

---

ii. 194—मालीढम् for मालीदम् D;—इदमुत्कुमुदं for उत्फुल्लकुमुदं Pn
ii. 195—सौक्ष्म्यादि for शौक्ल्यादि R, Ca, Ch;—P, and B after him, put चन्द्रहंसयोः in the first half and वियदम्भसोः in the second; all our mss. go against that reading;—प्रतीति for प्रतीत V, D;—कृत for कृतः V.

भृङ्गनेत्रादि तुल्यं तत् सदृशव्यतिरेकिता ॥ १९६ ॥

अरत्नालोकसंहार्यमहार्यं सूर्यरश्मिभिः ।
दृष्टिरोधकरं यूनां यौवनप्रभवं तमः ॥ १९७ ॥

सजातिव्यतिरेकोयं तमोजातेरिदं तमः ।

उभयत्रापि शब्दोपात्तप्रतीयमानसादृश्यद्वयोदाहरणेपि । वैधर्म्यप्रतिपादकं भृङ्गनेत्रादि आदिशब्देन अम्बरतोयनक्षत्रकुमुदानां संग्रहः । तुल्यम् भ्रमल्लोलेति भिन्नशब्दाभ्यां प्रतिपादितस्यापि वस्तुतोभिन्नस्य चाञ्चल्यस्य उभयत्र विद्यमानत्वात् तयोस्तुल्यता । तथा अम्बरतोययोः शौक्ल्यादिना नक्षत्रकुमुदयोः मनोहराकारत्वेन च सादृश्यं ज्ञेयम् । तत् तस्मात् भेदकयोः सादृश्यात् सदृशव्यतिरेकिता बोद्धव्या ॥१९६॥

सजातिव्यतिरेकमुदाहरति—अरत्नेति । रत्नालोकैः मणिकिरणैः संहार्यं न भवतीति अरत्नालोकसंहार्यम् । सूर्यरश्मिभिः भानुगभस्तिभिः अहार्यम् अनिवार्यम् । यूनां तरुणानां दृष्टिरोधकरं दर्शनसामर्थ्यनिरोधकम् । एतादृशं यौवनप्रभवं तारुण्यमदोत्पन्नं तमोस्ति । प्रसिद्धं तमस्तु रत्नज्योतिषा सूर्यप्रकाशेन च विनिवार्यमस्ति । तथा आबालस्थविराणां दृष्टिरोधकं भवति । अत्र दृष्टिशब्देन ज्ञानं तमःशब्देन मोहोपि सूच्यते । श्लेषवशादेव तमःशब्देन उपमानोपमेयभूततमोद्वयप्रतिपादनात् व्यतिरेकसामान्यलक्षणं संगतं भवति । अत्र दृष्टिरोधकत्वेन साम्यम् । तच्च धर्मस्य शब्दप्रतिपाद्यत्वात् शाब्दम् । रत्नसूर्यादिभिरविनाश्यत्वं च असाधारणधर्मतया उपमेयमात्रवृत्ति । तदेव भेदकम् । उपमेयस्योत्कर्षाधायकं चेति ज्ञेयम् ॥ १९७ ॥

उदाहरणं व्याख्याय अलंकारं संगमयति—सजातीयेति । दृष्टिरोधितया दृष्टेरावरणतया इदं यौवनप्रभवं तमः तमोजातेः तुल्यम् । तथा अन्यैः अरत्नालोकसंहार्यादिभिः असाधारणधर्मैः भिन्नम् यत् यस्मात् अदर्शि अतः अयं सजातिव्यतिरेकः । अन्यैरिति बहुवचनेन दीपशि-

---

ii. 196—तुल्यत्वात् for तुल्यं तत् D;—सादृश्य for सदृश V, D.
ii. 197—अवार्य for अहार्य P, Rn, V.
ii. 198—स्वजाति for सजाति V, D.

दृष्टिरोधितया तुल्यं भिन्नमन्यैरदर्शि यत् ॥ १९८ ॥
॥ इति व्यतिरेकचक्रम् ॥

प्रसिद्धहेतुव्यावृत्त्या यत्किंचित् कारणान्तरम् ।
यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावना ॥१९९॥

अपीतक्षीबकादम्बमसंमृष्टामलाम्बरम् ।

खादिभिरनपनेयत्वादयो साधारणधर्माः संग्राह्याः तेन असाधारणधर्म-
६ द्वयस्यैवोपन्यासे कथं बहुवचनमिति शङ्का परास्ता ॥ १९८ ॥

अथ क्रमप्राप्तां विभावनामाह—प्रसिद्धेति । यत्र वैचित्र्ये प्रसिद्धः लोक-
प्रसिद्धः यो हेतुः कारणं तस्य व्यावृत्त्या अभावप्रदर्शनेन यत्किंचित्
३ किमपि अतिगूढं कविकल्पितं वा कारणान्तरम् विभाव्यं फलोत्पत्त्यनुपपत्त्या
सूक्ष्मेक्षिकया अनुसंधानीयम् वा अथवा स्वाभाविकत्वं कृतेपि विमर्शे
कारणान्तराप्राप्तौ फलस्य वस्तुस्वभावेनैव संपद्यमानत्वं विभाव्यं चिन्तनीयं
६ सा विभावना । एवं च प्रसिद्धहेतुव्यतिरेकसामानाधिकरण्येन अप्रसिद्ध-
कारणस्वभावान्यतरप्रतीयमानफलोत्पत्तिर्विभावनेति लक्षणं संपन्नम् ।
विभाव्यते फलोत्पत्त्यनुपपत्त्या विचार्यते कारणान्तरं स्वाभाविकत्वं वा
९ यस्यां सा विभावना । प्रकाशकारादयस्तु—क्रियायाः प्रतिषेधेपि
फलव्यक्तिर्विभावना । इति कारणाभावे फलोत्पत्तिवर्णनं विभावनामाहुः ।
तत्र तु विभावनासंज्ञायाः अन्वर्थता न संभवति । कार-
१२ णाभावश्च क्वचित् नञादिना साक्षात् क्वचिच्च कारणविरोधिन उक्त्या
परंपरया प्रतिपाद्यते । विभावितं कारणान्तरं क्वचित् शाब्दं क्वचिदार्थं
च भवति । एवमेव स्वाभाविकत्वस्य शाब्दार्थप्रभेदौ उदाहरणेषु तत्र
१५ तत्रानुसर्तव्यौ । ननु कारणाभावे कार्योत्पत्तौ स्फुरितस्य विरोधस्य
प्रसिद्धातिरिक्तेन कारणेन परिहारात् विरोधाभास एवायमिति चेन्न सम-
बलयोः परस्परविरोधे तत्स्वीकारात् । इह हि कारणविरहेण कार्यमेव
१८ बाध्यत्वेन गम्यते न तु तेन कारणविरहः इति विशेषात् ॥ १९९ ॥

कारणान्तरविभावनामुदाहरति—अपीतेति । अपीताः मदिरापानम-
कुर्वन्तोपि क्षीबाः मत्ताः कादम्बाः हंसविशेषाः यस्मिन् यत् । असं-
३ मृष्टमपि अमार्जितमपि अमलं निर्मलम् अम्बरं यस्मिन् । अप्रसादितं

---

ii. 198—रोधतया for रोधितया D.

अप्रसादितशुद्धाम्बु जगदासीन्मनोहरम् ॥ २०० ॥
अनञ्जितासिता दृष्टिभ्रूरनावर्जिता नता ।
अरञ्जितोरुणश्चायमधरस्तव सुन्दरि ॥ २०१ ॥
यदपीतादिजन्यं स्यात् क्षीबत्वाद्यन्यहेतुकम् ।

कतकादिभिः अशोधितमपि शुद्धं निर्मलम् अम्बु यस्मिन् एतादृशं मनोहरं जगदासीत् इत्यन्वयः । अत्र क्षीबत्वामलत्वशुद्धत्वानां पानसं- ६ मार्जनप्रसादनादीनि प्रसिद्धानि कारणानि तेषामभावेपि तादृशफलोत्पत्तिः वर्ण्यमाना प्रस्खलद्रूपतया कारणान्तरं अपेक्षमाणा शरत्कालरूपं कारणान्तरं विभावयति । तस्य चात्र शङ्काप्रतिपाद्यत्वादार्थत्वं बोध्यम् । ९ प्रसिद्धकारणाभावस्तु शाङ्कः ॥ २०० ॥

स्वाभाविकविभावनां निर्दिशति—अनञ्जितेति । हे सुन्दरि तव दृष्टिः अञ्जनेन कज्जलेन अनञ्जिता अलिप्तापि असिता नीला । भ्रूः ३ अनावर्जिता अनाकृष्टापि नता वक्रीकृता । अयमधरश्च अरञ्जितोपि लाक्षया अनक्तोपि अरुणः रक्तच्छविः । अत्र असितनतारुणरूपाणि कार्याणि अञ्जनावर्जनरञ्जनस्वरूपैः प्रसिद्धैः कारणैर्विना दर्शितानि । ६ तानि च अनुपपद्यमानानि कारणान्तरमप्रतिपद्यमानानि स्वाभाविकत्वमेव विभावयन्ति । इति स्वाभाविकविभावनात्र ॥ २०१ ॥

उक्तोदाहरणद्वये विभावनालक्षणस्य संगतिं दर्शयति विरोधं च परिहरति—यदिति । प्रथमोदाहरणेन यत् वर्ण्यमानं मदिरापानाद्यजन्यम् ३ आदिना उत्तरश्लोकस्थानञ्जितादीनां संग्रहः । क्षीबत्वादि यत् । अत्र आदिशब्देन उत्तरश्लोकस्थासितादयो ग्राह्याः । अन्यहेतुजं कारणान्तरजन्यं तच्च कारणं शरदादिकम् । अहेतुकं च कारणं विना स्वतःसिद्धं स्यात् ६ भवेत् इह उदाहरणद्वये तस्य विवक्षा प्रतिपिपादयिषा अस्तीति एवं प्रका-

---

ii. 200—सूक्ष्माम्बु for शुद्धाम्बु Rn, V, J, Subh, D;—मनोरमम् for मनोहरम् D, Subh;—असंसृष्ट for असंमृष्ट Subh, as quoted by B.

ii. 201—अराञ्जितारुणः for अरञ्जितोरुणः V.

ii. 202—यदि पीतादिजन्म for यदपीतादिजन्यं J, V;—क्षीबत्वादन्य for क्षीबत्वाद्यन्य V;—हेतुजम् for हेतुकम् P, R, V.

अहेतुकं च तस्येह विवक्षेत्यविरुद्धता ॥ २०२ ॥
वक्त्रं निसर्गसुरभि वपुरव्याजसुन्दरम् ।
अकारणरिपुश्चन्द्रो निर्निमित्तासुहृत् स्मरः ॥ २०३ ॥
निसर्गादिपदैरत्र हेतुः साक्षान्निवर्तितः ।
उक्तं च सुरभित्वादि फलं तत् सा विभावना ॥ २०४ ॥

रेण अविरुद्धता विरोधाभावः । अस्मिन्नलंकारे सर्वत्रापि कार्यांशे अभेदाध्यवसानरूपातिशयोक्तिरनुप्राणतया स्थिता । तस्मात् कारणाभावे ९ कथं कार्योत्पत्तिः इति शङ्काया नोत्थितिः ॥ २०२ ॥

शाब्दं स्वाभाविकत्वमुदाहरति—वक्त्रमिति । वदनं निसर्गसुरभि स्वभावसुगन्धि न तु कर्पूरादिद्रव्यैरिति भावः । वपुः अव्याजेन अ- ३ कृत्रिमतया सुन्दरं मनोहरम् न तु भूषावस्त्रादिभिरिति भावः । अकारणरिपुः विरहिणां सहजशत्रुः चन्द्रः । तथा निर्निमित्तासुहृत् अकारणशत्रुः स्मरः मदनः ॥ २०३ ॥

उदाहरणं विशदयति—निसर्गेति । अत्र सुरभ्यादयो धर्माः स्वाभाविका इति ते शाब्दाः । अतः शब्दस्वाभाविकेयं विभावना । लक्षणोक्तं ३ प्रसिद्धहेतुव्यावृत्तित्वमुदाहरणे दर्शयति निसर्गादि इति । अत्र उदाहरणे निसर्गादिपदैः निसर्गाव्याजाकारणनिर्निमित्तशब्दैः हेतुः जात्यैकवचनम् हेतवः कर्पूरभूषणमात्सर्यादयः साक्षात् नञादिवाचकशब्दवत् स्वार्थेनैव ६ निवर्तितः अपसारिताः । सुरभित्वादि सुरभिसौन्दर्यरिप्वसुहृदिति फलं कार्यं उक्तं तैः निसर्गादिपदैः स्वाभाविकत्वेन कथितम् । तत् तस्मात् हेतुव्यावृत्तिपूर्वकस्वाभाविकत्वेन फलोत्पत्तेः प्रतीतेः विभावना ९ सुसंगतेति शेषः ॥ २०४ ॥

---

ii. 202—अहेतुजं for अहेतुकं V.
ii. 203—समो for स्मरः J.
ii. 204—हेतुरत्र for अत्र हेतुः V;—सुरभीत्यादि for सुरभित्वादि D;—तस्मात् for तत् सा Pn.

वस्तु किंचिदभिप्रेत्य तत्तुल्यस्यान्यवस्तुनः ।

अथ क्रमप्राप्तां समासोक्तिं निर्वक्ति—वस्तु किंचिदिति । किंचित् किमपि वस्तु प्रस्तुतं अप्रस्तुतं वा अभिप्रेत्य चमत्कारसौभाग्यादिदर्श-
३यिषया व्यञ्जनया प्रतिपादयितुमभिलष्य तत्तुल्यस्य वर्णनाभिप्रेतसदृशस्य वस्तुनः कस्यचिद् अप्रस्तुतस्य प्रस्तुतस्य वा उक्तिः कथनं समासोक्तिः । समासेन संक्षेपेण अर्थद्वयकथनात् उक्तिः समासोक्तिः । संक्षेपश्च एकस्य
६प्रयोगेणोभयार्थप्रतिपादनात् ज्ञेयः । तथाच प्रकृते प्रस्तुताप्रस्तुतयोरन्यतरस्य प्रयोगेण तदन्यस्य प्रतीतिः समासोक्तिः इति समासोक्तिलक्षणम् । एकस्य शब्देन प्रतिपादनेन्यस्य व्यञ्जनया बोधः चमत्कारविशेषमाद-
९धाति इति तदेवास्याः अलंकारबीजम् । यदुक्तं ध्वनिकृता—वाच्यार्थो न तथा स्वदते प्रतीयमानः स एव यथा । इति । भोजराजः उपमानाच्छा-
११ब्दादतिप्रसिद्धेरुपमेयस्य प्रतीतिः इत्याह ॥ तथा च (iv. 46)—

यत्रोपमानादेवैतत् उपमेयं प्रतीयते ।
अतिप्रसिद्धेस्तामाहुः समासोक्तिं मनीषिणः ॥ इति ।

दण्डिनापि समासोक्तेः सर्वाण्यपि उदाहरणानि अप्रस्तुतवर्णनेन
१५(उपमानवर्णनेन) प्रस्तुतार्थावबोधकान्येव दर्शितानि । तथापि उपमानवर्णनेनोपमेयार्थावगतौ यद्वैचित्र्यं प्रतीयते न ततो न्यूनं उपमेयवर्णनेनोपमानार्थावगतौ वैचित्र्यं भवति इति वस्तुशब्देनास्माभिः द्वयोः संग्रहः कृतः ।
१८केचित्तु प्रस्तुतादप्रस्तुतावगतौ समासोक्तिः अप्रस्तुतात् प्रस्तुतावगतौ च अप्रस्तुतप्रशंसा इति एकस्यैव वैचित्र्यस्य उपन्यासप्रकारभेदेन अलंकारद्वयमाहुः । परं तन्न रुचिरम् । वैचित्र्यविशेषाभावे ईदृशभेदकरणेलंका-
२१राणामानन्त्यापत्तेः । नापि दण्डिना एवंविधा अप्रस्तुतप्रशंसा स्वीकृता । स तु ताम्—अप्रस्तुतप्रशंसा स्यादप्रक्रान्तेषु या स्तुतिः । इति लक्षयति । न तत्राप्रस्तुतात् प्रस्तुतावगतेः कोपि संबन्धोस्ति । ततश्च एकतरस्य वर्णने
२४शब्दोपात्ते तदन्यप्रतीतिचमत्कारस्वरूपे प्रस्तुतेनाप्रस्तुतावगत्या अप्रस्तुतेन प्रस्तुतावगत्या वा दर्शिते तत्र सर्वत्र समासोक्तिरेव दण्डचाचार्यस्य अभिप्रेतास्तीति ज्ञेयम् । नैवं हि कल्पयितुं शक्यते यदुपमेयादुपमानप्रतीतौ न
२७चारुतातिशयः इति । यतः—

उक्तिः संक्षेपरूपत्वात्

व्याधूय यद्वसनमम्बुजलोचनायाः वक्षोजयोः कनककुम्भविलासभाजोः।
आलिङ्गसि प्रसभमङ्गमशेषमस्माद्धन्यस्त्वमेव मलयाचलगन्धवाह ॥

३०इत्याद्युदाहरणेषु चमत्कृतेः स्पष्टत्वात् । काव्यप्रकाशकारादयस्तु प्रस्तुते वाच्ये अप्रस्तुतव्यवहारसमारोपः समासोक्तिः इति मन्यन्ते। अप्रस्तुतात् प्रस्तुतावगतौ च अप्रस्तुतप्रशंसाम्। श्लेषालंकारे उप-
३३माध्वनौ च विशेषस्यापि उभयार्थवाचकता । अस्यास्तु केवलविशेषणानामेव तथात्वमिति ततो भेदः इति च तेषां विवेकः। एतदर्वाचीनसंमतसमासोक्तिवैचित्र्यविषये अप्पय्यदीक्षितैः सुगमपद्धत्या कुवलयानन्दे
३६विवेचनं कृतमस्तितदुपयुक्तमिति बुद्ध्या तदक्षरैरेवात्र निवेश्यते। अत्र (समासोक्तौ) प्रस्तुताप्रस्तुतसाधारणविशेषणबलात्सारूप्यबलाद्वा अप्रस्तुतस्य वृत्तान्तस्य प्रत्यायनं तत्प्रस्तुते विशेष्ये तत्समारोपार्थम् ।
३९सर्वथैव प्रस्तुतानन्वयिनः कविसंरम्भगोचरत्वायोगात् । ततश्च समासोक्तौ अप्रस्तुतव्यवहारसमारोपश्चारुताहेतुः। न तु रूपक इव प्रस्तुते अप्रस्तुतरूपसमारोपोस्ति । मुखं चन्द्र इत्यत्र मुखे चन्द्रत्वारोपहेतुचन्द्रपदसमभि-
४२व्याहारवत् रक्तश्चुम्बति चन्द्रमाः इति समासोक्त्युदाहरणे चन्द्रादौ जारत्वाद्यारोपहेतोः तद्वाचकपदसमभिव्याहारस्य अभावात् ।

निरीक्ष्य विद्युन्नयनैः पयोदो मुखं निशायामभिसारिकायाः।
धारानिपातैः सह किं नु वान्तश्चन्द्रोयमित्यार्ततरं ररासे ॥

४६इत्येकदेशविवर्तिरूपकोदाहरण इव प्रस्तुते अप्रस्तुतरूपसमारोपगमकस्याप्यभावात् । तत्र हि विद्युन्नयनैरित्यत्र निरीक्षणानुगुण्यात् उत्तरपद-
४८प्रधानमयूरव्यंसकादिसमासव्यवस्थितात् उत्तरपदार्थभूतनयनान्वयानुरोधात् पयोदे अनुक्तमपि द्रष्टृपुरुषरूपणं गम्यमुपगम्यते। न चेह तथा निरीक्षणवत् त्वय्यागते किमपि वेपत एष सिन्धुः इति श्लोके सेतुकृत्वादिवच्च
५१अप्रस्तुतसाधारणवृत्तान्तः उपात्तोस्ति । नापि श्लिष्टसाधारणादिविशेषणसमर्पितयोः प्रस्तुताप्रस्तुतवृत्तान्तयोः अप्रस्तुतवृत्तान्तस्य विद्युन्नयनवत्प्राधान्यमस्ति । येन तदनुरोधात् त्वं सेतुमन्थनकृदित्यत्रेव प्रस्तुतेनुक्तमपि
५४अप्रस्तुतसमारोपमभ्युपगच्छेम । तस्माद्विशेषणसमर्पिताप्रस्तुतव्यवहारसमा-

---

ii. 205—संक्षिप्त for संक्षेप R, V, J.

सा समासोक्तिरिष्यते ॥२०५॥

रोपमात्रमिह चारुताहेतुः । यद्यपि प्रस्तुताप्रस्तुतवृत्तान्तयोरिह श्लिष्ट-
साधारणविशेषणसमर्पितयोर्भिन्नपदोपात्तविशेषणयोरिव विशेष्येणैव साक्षा-
५७दन्वयात् अस्ति समप्राधान्यम् तथापि अप्रस्तुतवृत्तान्तान्वयानुरोधान्न
प्रस्तुते अप्रस्तुतसमारोपोङ्गीकार्यः । तथा हि यथा (अयमैन्दीमुखं
पश्येत्यत्र) प्रस्तुतविशेष्ये अप्रस्तुतवृत्तान्तस्यान्वययोग्यता तथैव अप्रस्तुतेपि
६०जारादौ नास्ति प्रस्तुतवृत्तान्तस्यान्वययोग्यता । एवं च समप्रधानयोः
प्रस्तुताप्रस्तुतवृत्तान्तयोः अन्यतरस्यावश्यमारोपेभ्युपगन्तव्ये श्रुत एव प्रस्तुते-
६२प्रस्तुतस्यारोपश्चारुताहेतुरिति युक्तम् । नन्वेवं सति—

विशेषणानां साम्येन यत्र प्रस्तुतवर्तिनाम् ।
अप्रस्तुतस्य गम्यत्वं सा समासोक्तिरिष्यते ॥

इत्यादीनि प्राचीनानां समासोक्तिलक्षणानि न संगच्छेरन् । प्रस्तुते
६६ श्लिष्टसाधारणादिविशेषणसमर्पितानुरागपूर्वकवदनचुम्बनाद्यप्रस्तुतवृत्तान्त-
समारोपमात्रस्य चारुताहेतुत्वाभ्युपगमेन विशेषणसाम्यकृतकामुकाद्यप्रस्तुत-
धर्मिव्यञ्जनानपेक्षणादिति चेदुच्यते । स्वरूपतोप्रस्तुतवृत्तान्तस्यारोपो न
६९चारुताहेतुः किंतु अप्रस्तुतकामुकत्वादिसंबधित्वेन अवगम्यमानस्य तस्या-
रोपः । तथाभूतस्यैव रसानुगुणत्वात् । न च तावदवगमने विशेषणपदानां
सामर्थ्यमस्ति अतः श्लेषादिमहिम्ना विशेषणपदैः स्वरूपतः समर्पितेन वद-
७२नचुम्बनादिना तत्संबन्धिनि कामुकादावभिव्यक्ते पुनस्तदीयत्वानुसंधानं
तत्र भवति । यथा स्वरूपतो दृष्टेन राजाश्वादिना तत्संबन्धिनि राजादौ
स्मारिते पुनरश्वादौ तदीयत्वानुसंधानमिति विशेषणसाम्येन वाच्योपस्का-
७५रकस्य अप्रस्तुतव्यञ्जनस्यास्त्यपेक्षा । अत एव श्लिष्टविशेषणायामिव
साधारणविशेषणायामपि अप्रस्तुतव्यवहारसमारोपः इत्येव प्राचीनानां
प्रवादः । (व्यावल्गत्कुचभारमित्यादौ) कन्दुके व्यावल्गत्कुचभारत्वादिवि-
७८शिष्टवनितासेव्यत्वस्य कामुकसंबन्धित्वेनैव समारोपणीयत्वात् । स्वरूपतः
कन्दुकेपि तस्य सत्त्वेनासमारोपणीयत्वात् । किं च सारूप्यनिबन्धनत्वे-
नोक्तायां समासोक्तौ अप्रस्तुतवृत्तान्तस्याशब्दार्थस्याप्रस्तुतवृत्तान्तरूपेणैव
८१गम्यतया तेन रूपेण तत्र समारोपसिद्धेः अन्यत्रापि तथैव युक्तमिति
युक्तमेव प्राचीनानां लक्षणमिति विभावनीयम् ॥ २०५ ॥

पिबन् मधु यथाकामं भ्रमरः फुल्लपङ्कजे ।
अप्यसंनद्धसौरभ्यं पश्य चुम्बति कुड्मलम् ॥२०६॥
इति प्रौढाङ्गनाबद्धरतिलीलस्य रागिणः ।
कस्यांचिदिह बालायामिच्छावृत्तिर्विभाव्यते ॥२०७॥
विशेष्यमात्रभिन्नापि तुल्याकारविशेषणा ।

वाच्यात् व्यङ्ग्यप्रतीतौ कार्यलिङ्गविशेषणानामन्यतमस्य साम्यं हेतुरिति प्रथमं कार्यसाम्यघटितां समासोक्तिमुदाहरति—पिबन्निति । भ्रमरः फुल्लपङ्कजे मधु पुष्परसं यथाकामं पर्याप्तं पिबन् असंनद्धसौरभ्यं अपरिपक्वमधुसौगन्धं कुड्मलं कलिकां चुम्बति पश्य ॥ २०६ ॥

इतीति । इति पूर्वोक्तवर्णितप्रकारेण इह श्लोके प्रौढा यौवनसंपन्ना या अङ्गना तस्यां बद्धा दृढा रतिः अनुरागो येन तादृशस्य रागिणः विलासेनुरागिणः कस्यांचित् बालायाम् इच्छावृत्तिः सुरताभिलाषप्रवृत्तिः विभाव्यते व्यापारसाम्येन ध्वन्यते । अत्र अप्रस्तुतभ्रमरव्यापारः फुल्लपङ्कजरसास्वादानन्तरं पङ्कजकोरकानुधावनं प्रौढाङ्गनाज्ञातास्वादस्य कामुकस्य अनुत्पन्नसंभोगाभिलाषायाः बालाया अनुसरणं ध्वनयति इति समासोक्तिः॥ २०७ ॥

विशेषणसाम्यघटितमेदां दर्शयति—विशेष्येति । विशेष्यमात्रं विशेष्यपदमात्रं भिन्नं श्लेषाभावात् केवलमेकार्थबोधकं यत्र सा तुल्यः समानः आकारः स्वरूपं येषां तानि तुल्याकाराणि श्लेषादिना प्रस्तुताप्रस्तुतार्थसंपादकानि विशेषणानि यस्यां सा एतादृशी असौ समासोक्तिरस्ति । अत्र श्लेषवशेन विशेषणधर्माणां साम्यं भिन्नाभिन्नविशेषणा। भिन्नम् एकमात्रानुसंबन्धिनि अभिन्नम् उभयानुसंबन्धिनि एवं विशेषणानि यस्यां सा अपरा समासोक्तिरस्ति । अत्रापि विशेष्यमात्रभिन्नेत्यनुषज्यते । तच्च विशेष्यं प्रस्तुतमप्रस्तुतं वा भवेदिति पूर्वं प्रपञ्चितमत्रानुसंधेयम् । विशेष्यपदस्य

अस्त्यसावपराप्यस्ति भिन्नाभिन्नविशेषणा ॥२०८॥

श्लिष्टत्वे द्वयोः प्रस्तुतत्वे श्लेषालंकारः । द्वयोरेकतरस्य प्रस्तुतत्वे शब्दशक्तिमूलः उपमाध्वनिः इति ज्ञेयम् । भिन्नविशेषणानां व्यङ्ग्यधर्मेण सह बिम्बप्रतिबिम्बतया साम्यम् । श्लेषश्चात्र शब्दगतोऽर्थगत इति द्विविधो गृह्यते ।

तत्र परैरङ्गीकृतं विशेषणसाधारण्यगर्भभेदान्तरं संगृहीतं भवति । तत्र अर्थश्लेषावष्टब्धस्य विशेषणस्यैव साधारण्यात् । यथा—

विलखति कुचावुच्चैर्गाढं करोति कचग्रहं
लिखति ललिते वक्त्रे पत्रावलीमसमञ्जसाम् ।
क्षितिपखदिरः श्रोणीबिम्बाद्विकर्षति चांशुकं
मरुभुवि हठान्नश्यन्तीनां तवारिमृगीदृशाम् ॥ इति ।

अत्र कुचविलेखनकचग्रहणादिविशेषणानामर्थश्लेषेण उभयार्थसाधारण्यात् साधर्म्यम् । तेन च हठनायकप्रतीतिरस्तीति समासोक्तिः । तुल्याकारविशेषणत्वं औपम्यगर्भत्वे सारूप्ये च संभवति अतस्तत्रापि समासोक्तिः । तत्रौपम्यगर्भत्वे यथा—

दन्तप्रभापुष्पचिता पाणिपल्लवशोभिनी ।
केशपाशालिवृन्देन सुवेशा हरिणेक्षणा ॥ इति ।

अत्र प्रस्तुतार्थविशेषणे दन्तप्रभा पुष्पाणीव इत्यादय उपमितसमासाः । अप्रस्तुतार्थे दन्तप्रभासदृशैः पुष्पैः इत्यादयः समासाः । तेन च लतावृत्तान्तस्य परिस्फूर्तेः समासोक्तिः । सारूप्ये यथा—

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्यासं यातो घनविरलभावः क्षितिरुहाम् ।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवासः शैलानां तदिममिति बुद्धिं द्रढयति ॥ इति ।

अत्र वनसारूप्यात् कुटुम्बिषु धनसंतानादिसमृद्धचसमृद्धिविपर्यासं प्राप्तस्य ग्रामनगरादेर्वृत्तान्तस्य प्रतीतेः समासोक्तिः ॥ २०८ ॥

---

ii. 208—अप्यसावपरा for अस्त्यसावपरा V, D (with a marginal emendation to अस्त्यसावपरा).

रूढमूलः फलभरैः पुष्णन्ननिशमर्थिनः ।
सान्द्रच्छायो महावृक्षः सोयमासादितो मया ॥२०९॥
अनल्पविटपाभोगः फलपुष्पसमृद्धिमान् ।
सोच्छ्रायः स्थैर्यवान् दैवादेष लब्धो मया द्रुमः॥२१०॥
उभयत्र पुमान् कश्चिद् वृक्षत्वेनोपवर्णितः ।

तुल्याकारविशेषणां समासोक्तिं दर्शयति—रूढमूल इति । रूढं प्रवृद्धं मूलं शिफा मूलधनं च यस्य सः । अनिशं अर्थिनः याचकान् फलभरैः विविधफलैः तथा फलैः लाभैः वाञ्छितार्थलाभैः पुष्णन् । सान्द्रा बहुला छाया अनातपः तथा वदनकान्तिर्यस्य सः । सोयं प्रसिद्धः महावृक्षः मया आसादितः प्राप्तः । महावृक्ष इति विशेष्यपदं एकार्थमेव उभयार्थानुसंबन्धि । अत्र सर्वाण्यपि विशेषणानि तुल्याकाराणि तेन चाप्रस्तुतस्य पुंसः प्रतीतिः इति समासोक्तिः ॥ २०९ ॥

भिन्नाभिन्नविशेषणाभ्यामुदाहरति—अनल्पेति । अनल्पः बहुलः विटपानां शाखानाम् आभोगः विस्तारो यस्य । फलानां पुष्पाणां च समृद्धिः वैपुल्यं अस्यास्तीति फलपुष्पसमृद्धिमान् । उच्छ्रायः उन्नतत्वं विभूतिमत्त्वं च तेन सहितः सोच्छ्रायः । सुच्छाय इति पाठे सुष्ठु शोभना छाया आतपाभावः प्रभा च यस्य सः इत्यर्थः । स्थैर्यं दृढमूलत्वम् अन्यत्र निश्चयादचलनं तदस्यास्तीति स्थैर्यवान् । दैवात् भाग्यात् एष द्रुमः मया लब्धः । अत्र स्थैर्यमूलादिधर्मौ श्लेषभित्तिकयाभेदेनाध्यवसितौ इति समानौ । विटपफलादयश्च केवलं वृक्षमात्रानुगामिनोपि प्रतीयमानपुरुषगत-तत्सजातीयबहुपुत्रत्वधनधान्यसमृद्धित्वादिभिः बिम्बप्रतिबिम्बभावेन एकार्थतामापन्नाः साधर्म्यं भजन्ते । तथा च सर्वैरपि विशेषणैः अप्रस्तुतः पुरुषः प्रतीयते इति समासोक्तिः ॥ २१० ॥

उभयत्र लक्षणं संगमयति—उभयत्रेति । उभयत्र पद्ययोः काश्चित् पुमान् वृक्षत्वेन वृक्षगतसाधारणविशेषणैः उत्थापितया व्यञ्जनया बोधितत्वात् वृक्षोपमानतया वर्णितः । तत्र पूर्वश्लोके सर्वे धर्मा रूढमूलादयः विशेषण-

---

ii. 210—सुच्छायः for सोच्छ्रायः P, R, Ca, Cb; सच्छायः D (marginally corrected into सोच्छ्रायः).

सर्वे साधारणा धर्माः पूर्वत्रान्यत्र तु द्वयम् ॥२११॥
निवृत्तव्यालसंसर्गो निसर्गमधुराशयः ।
अयमम्भोनिधिः कष्टं कालेन परिशुष्यति ॥ २१२॥
इत्यपूर्वसमासोक्तिः पूर्वधर्मनिवर्तनात् ।

भूताः साधारणाः श्लिष्टत्वेन एकरूपेणैव उभयान्वयिनः । अन्यत्र उत्तरश्लोके तु द्वयं विशेषणद्वयमेव सोच्छ्रायत्वस्थैर्यरूपं साधारणम् पूर्ववत् श्लिष्टत्वादभिन्नम् । विटपादीनां साधारण्यं पुरुषगततत्सजातीयधर्मैर्बिम्बप्रतिबिम्बभावेन इति ज्ञेयम् । अन्यथा सादृश्याभावात् व्यञ्जनया अप्रस्तुतार्थानवगमने अपुष्टत्वदोषापत्तिः स्यात् । तथा समासोक्तिरपि पुसंगता न भवेत् ॥ २११ ॥

अपूर्वसमासोक्तिमुदाहरति—निवृत्त इति । निवृत्तः अपगतैः व्यालानां एकत्र सर्पाणां अन्यत्र खलानां च संसर्गः यस्मात्सः । निसर्गेण स्वभावतः एव मधुराणां सुमिष्टानां जलानां आशयः आधारः अन्यत्र स्वभावतः एव मधुरः मनोहरः आशयः चित्तवृत्तिः यस्य सः । एतादृशः अयं अपूर्वः अम्भोनिधिः कालेन समयेन यमेन च परिशुष्यति शोषं यास्यति विनाशं च गमिष्यति । कष्टं अतीव दुःखास्पदमेतत् । पूर्वोदाहृताभिन्नविशेषणसमासाक्तौ रूढमूलादीनि विशेषणानि वास्तवानि । इह तु वास्तवगुणानिरोधपूर्वककल्पितानीति उभयोर्भेदः ॥ २१२ ॥

उदाहरणं विशदयति—इतीति । इति एतादृशी अपूर्वसमासोक्तिः । कथमिति चेत् पूर्वधर्मनिवर्तनात् पूर्वौ जगति समुद्रधर्मत्वेन प्रसिद्धौ धर्मौ व्यालसंसर्गलवणजलरूपौ तयोः निवर्तनात् तद्विपरीतनिवृत्तव्यालसंसर्गत्वनिसर्गमधुराशयत्वरूपधर्मस्य वाच्ये अम्भोनिधौ निवेशनादिति भावः । तेन च प्रस्तुतपुरुषस्य प्रतीतिः इति समासोक्तिः । समासोक्तिहेतुं दर्शयति समुद्रेणेति । समुद्रेण समानस्य निवृत्तव्यालत्वादिगुणैरिति भावः । पुंसः व्यापत्तिः नाशः तस्य सूचनात् इयमपूर्वसमासोक्तिः । अपूर्वाः पूर्वधर्मनिवर्तकाः कल्पिताः धर्माः यस्यां सा अपूर्वसमासोक्तिः । एवं ग्रन्थकर्त्रा कार्यसाम्येन विशेषणसाम्येन समासोक्तिर्दर्शिता ।

ii. 212—परिशुष्यते for परिशुष्यति P; परिशोष्यते V, J.

समुद्रेण समानस्य पुंसः व्यापत्तिसूचनात् ॥२१३॥
इति समासोक्तिचक्रम् ॥

विवक्षा या विशेषस्य लोकसीमातिवर्तिनी ।

लिङ्गसाम्योदाहरणं तु न प्रदर्शितम् । तत्तु निशामुखं चुम्बति चन्द्र एषः इति । अत्र स्त्रीलिङ्गपुंलिङ्गाभ्यां मुखचुम्बनरूपार्थसचिवाभ्यां नायिकात्वं
१२नायकत्वं च व्यज्यत एव । अन्यथा निशामुखं चुम्बति चन्द्रिकैषा । अथवा अहर्मुखं चुम्बति भानुबिम्बम् । इत्यत्रापि नायकप्रतीत्यापत्तिः स्यात् । केवलं चुम्बतिपदोपादानेन न तत्संभवति । पुत्रादीनामपि चुम्बनसंभवात् ।
१५तस्मादत्र केवललिङ्गेनैव समासोक्तिः ॥ २१३ ॥

अथ अतिशयोक्तिं लक्षयति—विवक्षेति । विशेषस्य प्रस्तुतवस्तुगतस्य लोकसीमा लोकमर्यादा तां अतिवर्तते अलौकिकवर्णनेन अतिशेते सा
३अत्यद्भुतवर्णनानुगा इत्यर्थः । या विवक्षा विवक्षया वर्णनम् हेतुहेतुमतोरभेदबुद्ध्या प्रयोगः असौ अतिशयोक्तिः । विवक्षायाः लोकसीमातिवर्तित्वं च परंपरया विशेष्यस्यैव तद्वर्णनेनैव चमत्कारस्योदयात् । एवं च
६प्रस्तुतस्य विशेषस्य अत्युत्कर्षस्य वर्णनं अतिशयोक्तिः । ननु एवं सति काव्यात्मभूतदशगुणान्तर्वर्तिकान्तिगुणस्य अस्यां असंभवः स्यात् । यतः स लौकिकार्थानतिक्रमत्वेन वर्णने एव भवति । तदुक्तं पूर्वं—कान्तं
९सर्वजगत्कान्तं लौकिकार्थानतिक्रमात् । इति । सत्यम् । तस्य वार्ताभिधानेष्वेव नियमेन सद्भावे नियमनात् अन्यत्र अतिशयोक्तौ तदभावेपि न दोषः। अपरं च इयमतिशयोक्तिः विशेषः धर्मविशेषः तस्यैव आधिक्येन वर्णने
१२भवति न तु धर्मिणः । कान्तिगुणस्तु लौकिकार्थानतिक्रमेण वर्णनं धर्मिण एवापेक्ष्यते इति उभयोर्विषयभेदः । अनयैव दिशा वक्ष्यमाणोदात्तालंकारस्यापि विषयभेदो बोद्धव्यः। अत्र प्रस्तुतोत्कर्षवर्णनं अप्रस्तुतेन
१५अभेदाध्यवसानादिना ज्ञेयम् । असौ अतिशयोक्तिः अलंकारेषु उत्तमा । यतः अलंकारः वैचित्र्याधीनः तच्च वैचित्र्यं प्रायः अतिशयवर्णनाधीनम् ।

---

ii. 213—व्यावृत्ति for व्यापत्ति J, V, D;—सूचनैः for सूचनात् V.

ii. 214—सीमातिवर्तिनः for सीमातिवर्तिनी Pn and B after P; but all our Mss. and Ca and Cb read वर्तिनी.

असावतिशयोक्तिः स्यादलंकारोत्तमा यथा ॥ २१४ ॥
मल्लिकामालभारिण्यः सर्वाङ्गीणार्द्रचन्दनाः ।
क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः ॥२१५॥

अतः सर्वालंकारजीवितेश्वरी इयम् इति भावः । वामनः संभाव्यधर्मतदुत्कर्षकल्पनातिशयोक्तिरित्याह । उभौ यदि व्योम्नि इत्युदाहरति च । विस्तरस्तु तत एवाधिगन्तव्यः । प्रकाशकारस्तु—

निगीर्याध्यवसानं तु प्रकृतस्य परेण यत् ।
प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् ॥
कार्यकारणयोश्चैव पौर्वापर्यविपर्ययः ।
विज्ञेयातिशयोक्तिः सा

इति चतुर्विधां भिन्नस्वरूपामेव अतिशयोक्तिं वर्णयति । अर्वाञ्चस्तु सर्वे तमेवानुसरन्ति ॥ २१४ ॥

उदाहरणमाह—मल्लिकेति । मल्लिकानां माधवीपुष्पाणां माला ताः बिभ्रति तच्छीलाः मल्लिकामालभारिण्यः । इष्टकेषिकामालानां चिततूलभारिषु इति मालाशब्दस्य ह्रस्वः । सर्वाङ्गं व्याप्नोतीति सर्वाङ्गीणम् तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति इति खः । सर्वाङ्गीणं आर्द्रं चन्दनं यासां ताः । क्षौमवत्यः सितदुकूलधारिण्यः । अभिसारिकाः कान्ताभिसरणशीलाः । तदुक्तं दशरूपके—कामार्ताभिसरेत्कान्तं सारयेद्वाभिसारिका इति । ज्योत्स्नायां न लक्ष्यन्ते स्फुटं न ज्ञायन्ते । अत्र प्रस्तुता ज्योत्स्ना तस्याः श्वेतत्वं मल्लिकादिश्वेताभिन्नतया वर्ण्यमानं समधिकं प्रतीयते । अथवा तादृशज्योत्स्नावत्यां रजन्यां तादृशनायिकायाः अलक्ष्यत्वासंभवेपि तत्कथनात् प्रस्तुतज्योत्स्नाया उत्कर्षः प्रतीयते इति अतिशयोक्तिः । अत्र प्रकाशकारादयः मीलिताभिधमलंकारं मन्यन्ते—

समेन लक्ष्मणा वस्तु वस्तुना यन्निगुह्यते ।
निजेनागन्तुना वापि तन्मीलितमिति स्मृतम् ॥

इति हि तल्लक्षणम् ॥ २१५ ॥

---

ii. 215—भारवाहिण्यः for मालभारिण्यः B, quoting सुभाषितरत्नभाण्डागार;—सर्वाङ्गीणार्द्र ibid; क्षौममत्यो for क्षौमवत्यो V; क्षौमवत्यो correction (!) of B, following Subh.

चन्द्रातपस्य बाहुल्यमुक्तमुत्कर्षवत्तया ।
संशयातिशयादीनां व्यक्त्यै किंचिन्निदर्श्यते ॥२१६॥
स्तनयोर्जघनस्यापि मध्ये मध्यं प्रिये तव ।
अस्ति नास्तीति संदेहो न मेद्यापि निवर्तते ॥२१७॥
निर्णेतुं शक्यमस्तीति मध्यं तव नितम्बिनि ।
अन्यथानुपपत्त्यैव पयोधरभरस्थितेः ॥२१८॥

उदाहरणे लक्षणं योजयति—चन्द्रातपस्येति । पूर्वोदाहरणे चन्द्रातपस्य ज्योत्स्नायाः श्वेतिम्नः बाहुल्यं वैपुल्यं उत्कर्षवत्तया मल्लिकादीनां श्वेतिम्नोभिन्नतया उक्तम् । तेन सा अतिशयोक्तिरिति शेषः । भेदान्तरं दर्शयति संशयेति । संशयेन अतिशयः संशयातिशयः संशयेन प्रस्तुतोत्कर्षवर्णनमित्यर्थः । आदिना निर्णयादीनां संग्रहः । व्यक्त्यै स्पष्टीकरणाय किंचित्संक्षेपेण निदर्श्यते उदाह्रियते ॥ २१६ ॥

उदाहरति—स्तनयोरिति । हे प्रिये तव स्तनयोः तुङ्गोन्नतकुचयोः जघनस्य रथाङ्गसदृशविपुलस्य मध्ये अन्तराले मध्यं अवलग्नं अस्ति नास्तीति मे संदेहः अद्यापि न निवर्तते । तस्यातिसूक्ष्मत्वादिति भावः । अत्र एतादृशसंशयस्य असंभवेपि तत्कल्पनात् मध्यकृशत्ववर्णनस्य अतिशयो भवति इति संशयातिशयोक्तिः ॥ २१७ ॥

निर्णयातिशयोक्तिमुदाहरति—निर्णेतुमिति । हे नितम्बिनि प्रशस्तनितम्बशालिनि पयोधरभरस्य कुचविस्तारस्य स्थितिः अवस्थानं तस्याः अन्यथानुपपत्त्यैव विनाश्रयं अवस्थानासंभवादेव तव मध्यम् अवलग्नम् अस्तीति निर्णेतुं शक्यम् । अत्र विस्तृतपयोधराणां निरवलम्बनस्थित्यनुपपत्त्या मध्यकल्पनाया असंभवितत्वेन तत्कल्पना संबन्धे असंबन्धकल्पना । तया च मध्यस्य कृशत्वं सविशेषं वर्णितं भवति इति अतिशयोक्तिरियम् ॥ २१८ ॥

---

ii. 216—व्यक्तौ for व्यक्त्यै J, P.

ii. 218—मध्यमस्तीति शक्यं for शक्यमस्तीति मध्यं D;—अन्यथा नोपपत्त्येत for अन्यथानुपपत्त्यैव and स्थितिः for स्थितेः P, R, V, D (marginal emendation.)

अहो विशालं भूपाल भुवनत्रितयोदरम् ।
माति मातुमशक्योपि यशोराशिर्यदत्र ते ॥२१९॥

अलंकारान्तराणामप्येकमाहुः परायणम् ।

आश्रयाधिक्ये अतिशयोक्तिं दर्शयति—अहो इति । हे भूपाल भुवनत्रितयोदरं भुवनत्रितयाभोगः विशालं विस्तृतः । अहो इति आश्चर्ये । कुतः एवं विस्तृतमिति चेत्तद्दर्शयति मातीति । यद्यस्मात् अत्र भुवनत्रितयोदरे मातुं निवेशयितुमशक्योपि ते यशोराशिः माति साकल्येन प्रविष्टो भवति । अत्र आश्रयीभूतस्य त्रिभुवनोदरस्य विशालताप्रतिपादनेन तत्स्थस्य यशोराशेरपि आधिक्यद्योतनादाधिक्यातिशयोक्तिरियम् । नव्यास्तु—

महतो यन्महीयांसावाश्रिताश्रययोः क्रमात् ।
आश्रयाश्रयिणौ स्यातां तनुत्वेप्यधिकं तु तत् ॥

इत्यत्र अधिकालंकारं मन्यन्ते । विषयस्य निगरणपूर्वकं विषयिणोध्यवसानाच्चमत्कृतिविशेषेपि इमां अर्वाचीनाः स्वीकुर्वन्ति यथा—

वापी कापि स्फुरति गगने तत्परं सूक्ष्मपद्मा
सोपानालीमधिगतवती काञ्चनीमैन्द्रनीली ।
अग्रे शैलौ सुकृतिसुगमौ चन्दनच्छन्नदेशौ
तत्रत्यानां सुलभममृतं संनिधानात् सुधांशोः ॥ इति ।

अत्र वाप्यादिशब्दैर्नाभिप्रभृतयोः निगीर्णाः । विशेषप्रपञ्चस्तु प्रकाशे कुवलयानन्दे च द्रष्टव्यः । विस्तरभयादस्माभिर्विरम्यते ॥ २१९ ॥

अतिशयोक्तिं प्रशंसन्नुपसंहरति—अलंकारान्तराणामिति । वागीशः वाचस्पतिः तेन महितां पूजितां परमश्रेष्ठामिति भावः । अतिशयाह्वयां अतिशयोक्तिं इमां अलंकारान्तराणां न केवलं लोकसीमावर्तिनो विशेषस्य वर्णने एवेयम् मता अपि तु विविधालंकाराणामपि एकं परायणम् परमाश्रयम् आहुः । । तदुक्तं भामहेन—

इत्येवमादिरुदिता गुणातिशययोगतः ।
सर्वेवातिशयोक्तिस्तु तर्कयेत् तां यथागमम् ॥

---

ii. 220—अप्याहुरेकं for अप्येकमाहुः V; अप्येतदाहुः D.

वागीशमहितामुक्तिमिमामतिशयाह्वयाम् ॥२२०॥
इत्यतिशयोक्तिचक्रम् ॥

अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य वा ।

सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते ।

यत्नोस्यां कविना कार्यः कोलंकारोनया विना ॥ इति ।

[10]अलंकारो नाम शब्दार्थयोर्वैचित्र्यं तच्च अतिशयोक्त्यधीनं अतः सर्वालंकारेषु सामान्यतः अतिशयोक्तिर्वर्तत एव । परं तत्तद्वैचित्र्यवैशिष्ट्येन [12]तत्तदलंकारव्यपदेशः । यत्र व्यपदेशो नास्ति तत्र सामान्यवैचित्र्यस्य सद्भावादतिशयोक्त्यलंकृतिरस्त्येव । एवं च अतिशयोक्तिः सर्वालंकारबीज-[14]भूता इति सिद्धान्तः । तदुक्तम्—

कस्याप्यतिशयस्योक्तिरित्यन्वर्थविचारणात् ।

प्रायेणामी अलंकारा भिन्ना नातिशयोक्तितः ॥ इति ।

अलंकारान्तराणामपि इत्यत्र अपिशब्देन अतिशयोक्त्युदाहरणेषु [18]अलंकारान्तराणां समुच्चयः सूचितः। तथा हि मल्लिका इत्यादौ सामान्यं स्तनयोर्जघनस्यापि इत्यादौ संदेहः निर्णेतुं शक्यामित्यादौ निश्चयः अहो विशालमित्यादौ अधिकम् एते अलंकाराः अन्यैरुक्ता ज्ञातव्या इति [21]प्रेमचन्द्रशर्माणः । परमत्र आचार्यदण्डिना असंगृहीतानां सामान्य-निश्चयाधिक्याद्यलंकाराणां संग्राहकः अपिशब्दः कथं स्यादिति न जानीमः । अतोयमपिशब्दः सामान्यतः अलंकारान्तरसूचकः इति [24]भाति ॥ २२० ॥

अथ उत्प्रेक्षां लक्षयति—अन्यथैवेति । चेतनस्य अथवा इतरस्य अचेतनस्य प्रस्तुतस्य अन्यथैव अन्येनैव प्रकारेण उत्प्रेक्ष्यमाणप्रकारादन्यप्रका-[3]रेण स्वाभाविकत्वेन स्थिता वृत्तिः विद्यमाना गुणक्रियास्वरूपा वृत्तिः यत्र वैचित्र्ये अन्यथा अन्यस्वरूपेण वास्तवरूपमपहाय अप्रस्तुतस्वरू-[6]पेण उत्प्रेक्ष्यते संभाव्यते तां उत्प्रेक्षां विदुः । उत्कटा प्रकृष्टा प्रस्तुतस्य [8]ईक्षा उत्प्रेक्षा इति योगार्थः । उक्तं हि प्रकाशे (x. 137)—संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् इति । उत्कटैककोटिः संशयः संभावनम् । अप्रस्तुतकोटेरुत्कटत्वं च प्रस्तुतकोटिनिगरणेन । निगरणं हि

अन्यथोत्प्रेक्ष्यते यत्र तामुत्प्रेक्षां विदुर्यथा ॥२२१॥
मध्यंदिनार्कसंतप्तः सरसीं गाहते गजः ।

९कचित् प्रस्तुतस्यानुपादानेन क्वचिच्च तस्य तिरस्करणेन । तदुक्तम्—

विषयस्यानुपादानेप्युपादानेपि सूरयः ।
अधःकरणमात्रेण निगीर्णत्वं प्रचक्षते ॥ इति ।

१२अत्र आहार्यसंभावनमपेक्ष्यते तेन—

रामं स्निग्धघनश्यामं विलोक्य वनमण्डले ।
प्रायो धाराधरोयं स्यादिति नृत्यन्ति केकिनः ॥

१५इत्यादौ नोत्प्रेक्षा । रूपके निश्चयेनावधारणात् संभावना नास्ति अतो न तत्रोत्प्रेक्षा । संदेहे समकोटिकः संशयः वर्तते । अत्र तु अप्रस्तुतकोटिकः इति ततो भेदः । अत्र अलंकारसामान्यं वैचित्र्यम-
१८पेक्ष्यते एव । तेन नूनं अनेन स्थाणुना भाव्यम् इत्यत्र नायमलंकारः । यत्र उत्प्रेक्षाकारणं न विन्यस्यते तत्र सत्यामपि संभावनायामुत्प्रेक्षां न मन्यन्ते । यथा—लोकोत्तरप्रभावं त्वां मन्ये नारायणं परम् । इति । अत्र लोकोत्तरप्रभा-
२१वस्य नारायणत्वव्याप्यतायाः असंभवः । अनेन प्रायो नारायणेन भवितव्यम् इति केवलंसभावनायां नायमलंकारो भवति । इयं च उत्प्रेक्षा मन्ये शङ्के इत्यादिबोधकपदानां सद्भावे वाच्या अन्यथा व्यङ्ग्या इति
२४बोध्यम् । इयं च अर्वाचीनैः बहुप्रकारत्वेन वर्णिता परं गौरवभयादस्माभिस्ततो विरम्यते ॥ २२१ ॥

सामान्यलक्षणे चेतनस्येतरस्य वा इत्युक्तम् । तत्र चेतनगतां उत्प्रेक्षामुदाहरति—मध्यंदिनेति । दिनस्य मध्यं मध्यंदिनं तत्संबन्धी योर्कः तेन
३तप्तः मध्याह्नसूर्यकिरणसंत्रस्त इति यावत् । गजः सरसीं गाहते अवतरति । सः मार्तण्डगृह्याणि सूर्यपक्षाश्रितानि । पदास्वैरिबाह्यापक्षेषु च इति ग्रहेः क्यप् । पद्मानि उद्धर्तुं उन्मूलयितुं उद्यत संनद्ध इति मन्ये शङ्के । अत्र
६सचेतनस्य गजस्य स्नानपानाद्यर्थं सरोवतरणं सूर्यवैरनिर्यातनार्थमिति कविना संभाव्यते । अतः उत्प्रेक्षा । अत्र केचित् प्रत्यनीकालंकार-

---

ii. 221—उत्प्रेक्षते for उत्प्रेक्ष्यते V;—यत्तु for यत्र Pn.

मन्ये मार्तण्डगृह्याणि पद्मान्युद्धर्तुमुद्यतः ॥२२२॥
स्नातुं पातुं बिसान्यत्तुं करिणो जलगाहनम् ।
तद्वैरनिष्क्रयायेति कविनोत्प्रेक्ष्य वर्ण्यते ॥२२३॥
कर्णस्य भूषणमिदं मदायतिविरोधिनः ।

[4]मुद्भाव्य संकरं ब्रुवते । प्रत्यनीकालंकारलक्षणं तु—

प्रत्यनीकमशक्तेन प्रतीकारे रिपोर्यदि ।
तदीयस्य तिरस्कारस्तस्यैवोत्कर्षसाधकः ॥ इति ।

परं नैतत् समञ्जसम् । आचार्यदण्डिना तस्यास्वीकारात् । अपरं च [12]अत्र कविना तत्पक्षोद्धरणस्य संभावनामात्रेण कल्पितत्वेन प्रतीकारस्य तात्त्विकवर्णनं कवेः नाभिप्रेतम् । यत्र तु तत्पक्षापकारः वास्तवः [14]कवेराभिप्रेतः तत्रैव सोलंकारः इति विचार्यम् ॥ २२२ ॥

उदाहरणे उत्प्रेक्षां योजयति—स्नातुमिति । स्नातुं पातुं बिसानि अत्तुम् सर्वत्र तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् इति तुमुन् । स्नानाय पानाय [2]बिसभक्षणाय करिणः जलगाहनं जलावगाहः तस्य सूर्यस्य यद्वैरं तस्य निष्क्रियाय निर्यातनाय कविना उत्प्रेक्ष्य संभाव्य वर्ण्यते । अयमत्राशयः । अस्मिन् पद्मे गजस्य स्नानपानाद्यर्थमवतरणं कविना सूर्यपक्षीयपद्मोद्धरणाय [6]संभावितम् । तत्कारणं मध्यंदिनार्कसंतापः सोपि उपन्यस्तः । उत्प्रेक्षावाचको मन्ये इति शब्दः प्रयुक्तः । उत्प्रेक्षाविषयश्च सरोवगाहनं तदपि वर्णितम् । इति संपूर्णा उत्प्रेक्षासामग्री वर्तते ॥ २२३ ॥

अचेतनगतामुत्प्रेक्षामुदाहरति—कर्णस्येति । इदं कर्णोत्पलं मम नेत्रस्य आयतिः विस्तारः तस्य विरोधिनः प्रतिरोधकस्य कर्णस्य भूषणं इति [2]हेतोः कर्णोत्पलं तव दृष्ट्वा त्वन्नयनेन विलङ्घ्यते स्वतेजसा अतिशय्यते ।

---

ii. 222—मार्ताण्ड for मार्तण्ड R;—उत्सुकः for उद्यतः Rn, J, V;—इच्छति for उद्यतः D.

ii. 223—बिशानि for बिसानि D;—छिशन्योत्त्वं (?) for बिसान्यत्तुं V;—हरिणो for करिणो V.

ii. 224—ममायति for मदायति P, R;—निरोधिनः for विरोधिनः Rn;—सदा याति विरोधिना for मदायतिविरोधिनः D (with a marginal emendation of सदा into मदा).

इति कर्णोत्पलं प्रायस्तव दृष्ट्या विलङ्घ्यते ॥२२४॥
अपाङ्गभागपातिन्या दृष्टेरंशुभिरुत्पलम् ।
स्पृश्यते वा न वेत्येवं कविनोत्प्रेक्ष्य वर्ण्यते ॥२२५॥
लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।

अत्र प्रायःपदम् उत्प्रेक्षावाचकम् । आकर्णायतायाः दृष्टेः सौन्दर्यप्रभाभिः कमलव्यापनं स्वविरोधिकर्णभूषणस्य उत्सारणे कल्पितमिति उत्प्रेक्षा। विरोधकारिणं स्वायतिविरोधकारिणमिति ज्ञेयम् ॥ २२४ ॥

उदाहरणं व्याख्याति—अपाङ्गेति । अपाङ्गभागपातिन्याः नेत्रप्रान्तगामिन्या दृष्टेः चक्षुषः अंशुभिः नीलकिरणैः उत्पलं कर्णनीलोत्पलं स्पृश्यते वा न वा स्पृष्टं भवेन्न वा कर्णस्य विदूरत्वात् दृष्टेश्च नेत्रप्रान्तगामित्वादिति दृष्टिकिरणसंपर्कः असंभवी अपि कविना केवलं स्वकल्पनया तद्विषयत्वेन स्थिरीकृत्य चमत्कारप्रतिपिपादयिषया उत्प्रेक्षितः । पूर्वश्लोके चेतनस्य क्रिया उत्प्रेक्षाविषयीकृता अत्र तु अचेतनस्य गुणः उत्प्रेक्षाविषयीकृतः । प्रस्तुतस्वरूपस्य विषयत्वं यथा—

बालेन्दुवक्राण्यविकासभावाद्भुः पलाशान्यतिलोहितानि ।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम् ॥

अत्र पलाशकुसुमानां वक्रलोहितत्वेन संबन्धेन निमित्तेन सद्यःकृतनखक्षततादात्म्यसंभावना उक्तविषया स्वरूपोत्प्रेक्षा । इवादीनामप्रयोगे गम्योत्प्रेक्षा यथा—त्वत्कीर्तिर्भ्रमणश्रान्ता विवेश स्वर्गनिम्नगामिति। विस्तरस्तु दर्पणादौ द्रष्टव्यः ॥ २२५॥

मन्ये शङ्के ध्रुवं प्रायः इत्यादयः शब्दा उत्प्रेक्षावाचकाः इवशब्दः उपमावाचकः अतः तत्प्रयोगे सर्वत्र उपमैव। तथैव उपमेये एव उपमानस्य उत्कटकोटिकसंशये उत्प्रेक्षा इत्युभयमपि पक्षं दुदूषयिषुराह—लिम्पतीति। वर्षाकालीनकृष्णपक्षीयनिशामुखवर्णनमेतत् । तमः अङ्गानि लिम्पतीव । नभः अञ्जनं कज्जलं वर्षतीव । इतीदमपि एतत् प्राचीनपद्यार्धं भूयिष्ठं वैपुल्येन उत्प्रेक्षाया लक्षणेन अन्वितं युक्तम् । अत्र अचे-

ii. 225—दृश्यते for स्पृश्यते D;—न वेत्येष for न वेत्येव D;—कथ्यते for वर्ण्यते D; काव्यता (?) J.

इतीदमपि भूयिष्ठ-

तनस्य तमसः व्यापनरूपो धर्मः लेपनेन संभावितः । तथा तस्यैव तमसः अधःप्रसरणरूपो धर्मः नभःकर्तृकाञ्जनवर्षणरूपेण संभावितः । उभयत्रापि विषयस्य व्यापनाधःप्रसरणरूपस्य अनुपादानं समानम् । इयांस्तु भेदः । प्रथमोदाहरणे तमःकर्तृकाङ्गव्यापनं स्वतःसंभवि । द्वितीये नभःकर्तृकाञ्जनकर्मकाधःप्रसरणं कविकल्पितम् । इवशब्दः—दूरे वसन् देवदत्त इव भाति अयम् इत्यादौ संभावनायां प्रसिद्धः । तथा च इयमुत्प्रेक्षैव नोपमा । अत्र प्राचीना लिम्पतिपदेन गौरयमितिवत् साध्यवसानलक्षणया उपमेयभूतं व्यापनं उपस्थितं भवति । एवं वर्षतिपदेन उपमेयभूताधःप्रसरणमिति । तच्च व्यापनमधःप्रसरणं मलिनीकरणादिसादृश्यनिमित्तेन लेपनवर्षणरूपेण समावितम् इति उपात्तविषया क्रियास्वरूपोत्प्रेक्षा ॥ परे तु तमसः व्यापनरूपो विषयः लेपनत्वेन संभावितः अधःप्रसरणविषयश्च नभःकर्तृकवर्षणेन इति उभयत्रापि विषयस्य अनुपादानमेव । तथा चेयं अनुपादानविषया स्वरूपोत्प्रेक्षा ॥ उभयमतेपि उपमानेन उपमेयस्य संभावनं उत्प्रेक्षा इति सादृश्यमूलिकोत्प्रेक्षा इति निश्चयः । तथा च एते—

वदनकमलेन बाले स्मितसुषमालेशमावहसि यदा ।
जगदिह तदैव जाने दशार्धबाणेन विजितमिति ॥

इत्यत्र उत्प्रेक्षां न स्वीकुर्वन्ति । अत्र हि स्मितस्य संभावनोत्थापकत्वेपि जगद्विजयरूपविषयविषयिसाधारणत्वाभावः । आचार्यदाण्डिनस्तु औपम्यमूलिकेव उत्प्रेक्षा इति न कथयन्ति न वा तत् सूचयन्ति इति तेषां मतेन उपरिदर्शितोदाहरणे उत्प्रेक्षैव । एवमेव—

पिनष्टीव तरङ्गाग्रैः समुद्रः फेनचन्दनम् ।
तदादाय करैरिन्दुर्लिम्पतीव दिगङ्गनाः ॥

इत्यत्र स्वरूपोत्प्रेक्षैव । तथाहि अत्र तरङ्गाग्रैः फेनचन्दनस्य संचारणं

---

ii. 226—V gives here, between the two halves, the following extra stanza and a half—

असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता ॥
पिनष्टीव तरङ्गाग्रैरुदधिः फेनचन्दनम् ।
तदादाय करैरिन्दुर्लिम्पतीव दिगङ्गनाः ॥

मुत्प्रेक्षालक्षणान्वितम् ॥२२६॥

केषांचिदुपमाभ्रान्तिरिवश्रुत्येह जायते ।

१०पेषणेन उत्प्रेक्षितम् समुद्रोत्थितस्य चन्दनस्य समुद्रपूरे प्रसृतानां कराणां दिक्षु व्यापनं च समुद्रोपान्तफेनचन्दनकृतलेपनत्वेन उत्प्रेक्ष्यते । उभयत्र क्रमेण समुद्रोपान्तगतफेनचन्दनपुञ्जीभवनं दृशां धवलीकरणं च निमित्तम् ३३इति उत्प्रेक्षा । इत्यलं पल्लवितेन ॥ २२६ ॥

इतःपरं अस्मिन् श्लोके उपमावादिनः खण्डनं सप्रपञ्चं निरूपयति—केषांचिदिति । केषांचित् इवशब्दः संभावनायामपि वर्तते तथा नोपमानं ३तिङन्तेन इति तिङन्तस्य उपमानत्वनिषेधोस्ति इति अजानताम् । अत्र लिम्पतीतिश्लोके । इवश्रुत्या इवशब्दश्रवणेन । उपमाभ्रान्तिः यथा कमलमिव मुखम् इत्यादौ उपमा तद्वदत्रापि उपमा इति भ्रमः जायते । ६भ्रान्तिमुपपादयति नोपमानमिति । तिङन्तेन तिङन्तशब्दप्रतिपाद्येन न उपमानम् उपमानबोधो नास्ति तिङन्तप्रतिपाद्यस्य साध्यत्वात् सिद्धस्यैव उपमानत्वादिति भावः । तदुक्तं—

सिद्धमेव समानार्थमुपमानं विधीयते ।
तिङन्तार्थस्तु साध्यत्वादुपमानं न जायते ॥ इति ।

तिङन्तार्थस्य तु उपमेयत्वम् अस्त्येव क्वचित् यथा—ब्राह्मणवदधीते १२क्षत्रियः इत्यादौ । तिङन्तसमभिव्याहृतस्य इवशब्दस्य संभावनाबोधकत्वमेव । रोदतीव पठति नृत्यतीव गच्छति इत्यादौ नोपमा किंतु उत्प्रेक्षैव । आप्तभाषितम् आप्तः भगवान् पतञ्जलिः तस्य भाषितम् । तदुक्तं १५भगवता पतञ्जलिना धातोः कर्मणः इत्यादिसूत्रे (III. i. 7)—न तिङन्तेन उपमानमस्तीति । अत्र कैयटः—किंतु तत्र संभावनार्थकः इवशब्दः इति । अयं भावः यत्परा इवादिशब्दाः तदेव उपमानम् इति १८आलंकारिकसिद्धान्तादत्रोपमास्वीकारे लिम्पतिः वर्षतिश्च उपमाने स्यातां न तु तमो नभो वा । लिम्पतीत्यादेस्तिङन्तस्य तु उपमानत्वं भाष्यकारैर्निषिद्धम् । तच्च प्रमाणसिद्धमिव युक्तिसिद्धमपि । तथा हि—२१वाक्ये तिङन्तप्रतिपाद्यस्य साध्यत्वमिति सर्वसंमतम् । सिद्धस्यैव च उपमा-

ii. 227—श्रुत्येव for श्रुत्येह D;—जन्यते for जायते J.

नोपमानं तिङन्तेनेत्यतिक्रम्याप्तभाषितम् ॥२२७॥
उपमानोपमेयत्वं तुल्यधर्मव्यपेक्षया ।
लिम्पतेस्तमसश्चासौ धर्मः कोत्र समीक्ष्यते ॥२२८॥
यदि लेपनमेवेष्टं लिम्पतिर्नाम कोपरः ।

नत्वम् इत्यपि निर्विवादम् । अतः साध्यस्य उपमानत्वासंभवात् लिम्पतीत्यादीनि तिङन्तानि उपमानानि भवितुं नैवार्हन्ति । तथा च तत्परः २४इवशब्दः नोपमावाचकः किंतु संभावनावाचकः इति अत्रोत्प्रेक्षैव युक्ता इति प्रमाणयुक्तिपरिगृहीतेयमुत्प्रेक्षा इति ज्ञेयम् ॥ २२७ ॥

उपमानाङ्गीकारे युक्त्यन्तरमपि भवतीति दर्शयति—उपमानोपमेयत्वमिति । उपमानोपमेयत्वम् उपमानोपमेयभावः तुल्यधर्मव्यपेक्षया ३समानधर्मापेक्षया भवति । अयं भावः । उपमानोपमेयशब्दौ हि संबन्धिनौ तौ हि समानधर्मसंबन्धमपेक्ष्यैव सत्तां प्राप्नुतः । तथा हि सादृश्यप्रतियोगि उपमानम् अनुयोगि उपमेयम् । एवं च उपमानोपमेयत्वं तुल्य- ६धर्मसापेक्षम् । तुल्यधर्मस्य अप्रतीतौ तन्नैव संभवति । अत्र प्रस्तुतोदाहरणे लिम्पतेः लिम्पतीति तिङन्तार्थस्य तमसश्च धर्मः समानधर्मः कः समीक्ष्यते ज्ञायते न कोपीत्यर्थः उभयानुगतधर्मस्याप्रतीतेर्नात्रोपमालंकारः ॥२२८॥

अन्यकल्पितं लेपनरूपं समानधर्मं दूषयति—यदीति । यदि लेपनमेवेष्टं तमोलिम्पत्यर्थयोः साधारणधर्मतया लेपनमेव इष्टम् । तमसः आवर- ३कतया गौणलेपनत्वेपि धर्मयोः बिम्बप्रतिबिम्बभावेन ऐक्यात् साधारण्यं स्वीकृत्येति भावः । तर्हि लिम्पतिः लिम्पतिपदप्रतिपाद्यः उपमानरूपो धर्मी अर्थः कः न कोपीत्यर्थः । वैयाकरणा हि भावप्रधानमाख्यातं सत्त्व- ६प्रधानानि नामानि इति यास्कोक्त्या धात्वर्थक्रियायाः एव प्राधान्यं मन्यन्ते । तदुक्तम्—

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृतः ।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥ इति ।

१०अस्यार्थः देवदत्तो गच्छतीत्यादौ गमिधातोः फलम् उत्तरदेशसंयोग-

---

ii. 228—को नु for कोत्र J, V, R;—तुल्यधर्मौ (?) for तुल्यधर्म D;—विनक्षया for व्यपेक्षया V.

स एव धर्मो धर्मी चेत्यनुन्मत्तो न भाषते ॥२२९॥
कर्ता यद्युपमानं स्यान्नच्यग्भूतोसौ क्रियापदे ।

व्यापारः तदनुकूलगमनात्मकः । एतदुभयार्थबोधकः गमिधातुः । अत्र
१२स्मृतः इति वचनविपरिणामेन योज्यम् । आश्रये फलाश्रये कर्मणि
व्यापाराश्रये कर्तरि च तिङ्प्रत्ययः स्मृतः । कर्मणि प्रयोगे तिङ्प्र-
त्ययार्थः कर्म कर्तरि प्रयोगे च कर्ता । फले प्रधानं व्यापारः फलनिरू-
१५पितप्राधान्यवान् व्यापारः इति भावः । तिङर्थः कर्तृकर्मरूपः विशेषणं
व्यापारस्येति शेषः । तथा च अत्रार्थः तमःकर्तृकम् अङ्गकर्मकं लेपनं
व्यापारः । एवं चात्र लेपनव्यापारस्य प्राधान्यात् तस्यैव धर्मित्वम् ।
१८ननु यथा आत्मा आत्मानं जानाति इत्यादिस्थले एकस्यैव कर्तृत्वकर्मत्वे
तथा अत्रापि एकस्यैव धर्मत्वधार्मित्वे स्याताम् । तथा च उपमा संगच्छेत
इति चेन्न । अनुन्मत्तः विचारवान् एकपदप्रतिपाद्यः एक एव पदार्थः
२१धर्मः धर्मी च इति न भाषते । आत्मा आत्मानं जानातीत्यादौ भिन्न-
पदोपस्थित्या कर्तृत्वकर्मत्वे एकार्थस्य स्याताम् । अत्र तु एकेनैव लिम्पति
पदार्थेन धार्मिधर्मार्थकल्पनमनुचितमिति भावः । तथा च भाष्यम् —
२४उच्चारित एव शब्दः अर्थत्यप्रापकः नानुच्चारितः इति । अतः ईदृश-
स्थले एकस्मिन्नेवार्थे धर्मिधर्मकल्पना न विद्वदनुसृता । एवं चात्र साधा-
रणधर्मस्याप्रतीतेः नोपमा शङ्कितव्या । देवदत्त इव यज्ञदत्तः पचति
२७इत्यत्र तु उपमा भवत्येव । भिन्नपदोपात्तस्यार्थस्य एकव्यापाराश्रयत्वेपि
विशेषणत्वोपपत्तेरिति भावः ॥ २२९ ॥

अत्र औपम्यासिद्धये तिङर्थः कर्ता एवोपमानं तमः उपमेयं लेपनं
साधारणधर्मः एव अस्तु तथा च निर्बाधा उपमा इति चेत् तत्राह—कर्तेति ।
३कर्ता तिङन्तप्रतिपाद्यव्यापाराश्रयः यदि उपमानं तमसः उपमानं स्यात्
कल्पेत तदपि न सम्यक् । यत् असौ व्यापाराश्रयः कर्ता क्रियापदेन
लिम्पतिक्रियापदेन विशेष्यतया प्रतिपाद्ये व्यापारे न्य-
६ग्भूतः विशेषणतयान्वितः वर्तते । तिङर्थस्तु विशेषणम् इति
पूर्वोक्तसिद्धान्तात् । अयमत्राशयः । तमः अङ्गानि लिम्पति इत्यत्र
लिम्पतिना साध्यवसानलक्षणया व्यापनमपि ग्राह्यम् । तस्य च

ii. 229—चेत्युन्मत्तोपि for चेत्यनुन्मत्तो P, Rn, J.

स्वक्रियासाधनव्यग्रो नालमन्यव्यपेक्षितुम् ॥२३०॥
यो लिम्पत्यमुना तुल्यं तम इत्यपि शंसतः।

१कर्त्रा तमः । उपमानभूतश्च लिम्पतिकर्ता । तथा च लिम्पति-
कर्तृसदृशतमःकर्तृकं व्यापनम् । लेपनव्यापनयोश्च बिम्बप्रतिबिम्बभावेन
ऐक्यम् । अतः सुस्थेयमुपमा इति चेन्न । लेपनव्यापारे विशेषणतया अन्वि-
१२तस्य कर्तुः उपमानसंबन्धेन अन्यत्रान्वयायोगात् । एकविशेषणं नापरत्र
स्वार्थं प्रत्याययति इति न्यायात् । उक्तं च मञ्जूषायां नागेशभट्टैः—एकत्र
विशेषणत्वेन गृहीतशक्तिकस्य ज्ञातस्य वा अपरत्र विशेषत्वायोगः । अत
१५एव राज्ञः पुरुषोश्वश्च इतिवत् राजपुरुषोश्वश्च इति न इति । एतदेव
दर्शयति स्वक्रियासाधनव्यग्रः इति । स्वक्रिया स्वव्यापारः लेपनादिरूपः
तस्य साधनं सिद्धिः विशेष्यतया बोधः तत्र व्यग्रः व्यापृतः उपसर्ज-
१८नतामापन्न इत्यर्थः । अन्यत् व्यपेक्षितुं पदार्थान्तरं स्वप्रकारकान्वयबोधे
विशेष्यत्वेन आकाङ्क्षितुं पदार्थान्तरविशेष्यकबोधे पुनः प्रकारीभवितुमि-
त्यर्थः । नालं न समर्थः । अयं भावः । एकपदस्य विशेषणतया अन्यत्रा-
२१न्वितस्य ततोन्यत्र उपमानतया अन्वयः देवदत्त इव यज्ञदत्तो हसति
इत्यादिस्थले पदान्तरोपस्थाप्यकर्तरि पदसंसर्गमर्यादया भवति । परं यत्र
भिन्नशब्देन उपादानं नास्ति कर्तुः तादृशतिङ्बोधितकर्तृस्थले एवम-
२४न्वयो भवितुं नार्हति तस्मान्नात्रोपमेति भावः ॥ २३० ॥

नैयायिकैः अनुसृते प्रथमान्तविशेष्यकशाब्दबोधेपि नोपमेति कथयति—
यो लिम्पतीति । यो लिम्पति अमुना तेन लेपनकर्त्रा तुल्यं तमः लेपन-
३कर्तृसदृशं तमः इति शंसतः प्रथमान्तविशेष्यकशाब्दबोधेन एवमर्थं प्रद-
र्शयतः मतेपीति अध्याहार्यम् । एवं शाब्दबोधं मन्वानस्य मतेपि अङ्गा-
नीति पदं संबद्धं न भवति । उपमेयगतलेपने अनुगतं न भवति । अतः
६उपमेये संबन्धाभावात् अङ्गकर्मकलेपनं समानधर्मो भवितुं नार्हति ।
तस्मात् प्रथमान्तविशेष्यकशाब्दबोधेपि समः साधारणो गुणः धर्मः मृग्यः
अन्वेषणीयः । सः अङ्गलेपनरूपः उपमेये प्रतीतो न भवति । तं विना च

---

ii. 230—अपेक्षितुम् for व्यपेक्षितुम् P, R.

ii. 231—संगतः and संबन्धः for शंसतः and संबद्धं D;—शंसिनः for शंसतः Rn; शंसति D (marginally corrected into संगतः);—संबन्धः for संबद्धम् M, V.

अङ्गानीति न संबद्धं सोपि मृग्यः समो गुणः ॥२३१॥

९उपमा नोपपन्ना । अत्रायमाशयः । उपमास्वीकारे लिम्पतीव तमोङ्गा-
नीत्यस्य नैयायिकमते अङ्गवृत्तिफलजनकलेपनानुकूलकृतिमानिव तमः
इति वाक्यार्थबोधः स्यात् । तथा च लेपनकर्तृतमसोरुपमानोपमेयभावः ।
१२तत्र प्रथमान्तविशेष्यकशाब्दबोधे अङ्गानीति पदं व्यापारविशेषणद्वारा उप-
मानभूतकर्तरि संबद्धमपि उपमेयभूततमसि तस्य संबन्धो दुर्घटः । एक-
विशेषणं नापरत्र स्वार्थं प्रत्याययति इति पूर्वोक्तन्यायादिति भावः । तथा
१५च अङ्गानीति पदस्य समानधर्माङ्गभूतस्य उपमेये अनन्वयात् अङ्गलेपनं
समानधर्मो न भवितुमर्हति । अतः क्रियाविशेष्यकशाब्दबोधवदत्रापि
समानधर्मो मृग्यः । अपिशब्दः पूर्वोक्तसमानधर्माभावसमुच्चायकः । अथवा
१८मा भवतु उपमेयसमानधर्मे अङ्गानीतिपदस्य संबन्धः । तद्विनैव अङ्ग-
कर्मकलेपनकर्तेव तमोलेपनम् इति बोधेपि उपमायाः सुवचत्वात् इति
चेत् तदपि न समीचीनम् । यतः लेपनस्यापि स्वोत्पादकर्तरि विशेषणत्वेन
२१अन्वितत्वात् उपमेये तदन्वयस्य दुरुपपादत्वात् । तथा च यथा अङ्गा-
नीति उपमेयांशे असंबद्धं तथा लेपनमपि असंबद्धमेव । एवं च तत् समा-
नधर्मो भवितुं नार्हति । अतश्च अङ्गानीति संबद्धं न भवति । तदर्थं
२४तच्छून्यं केवलं लेपनमेव समानधर्मत्वेनाङ्गीकृतं चेत् तदपि उभयत्र संबद्धं
न भवति । अतः समानधर्मोपि मृग्यः । अत्र अपिशब्दः अङ्गासंबन्ध-
दोषसंग्राहकः । अत्र साधारणा हि गुणक्रियादयो धर्माः प्रथममुपमेय-
२७गतत्वेनैव अन्वयबोधविषयतामापद्यन्ते पर्यालोचनया तु उपमानगत-
त्वेन प्रतीयन्ते इति तेषां साधारण्यम् । प्रकृते तु उपमानगतत्वेन लेप-
नस्य अन्वयबोधः इति उपमानतावच्छेदकतया उपमानशरीरत्वमेव न तु
३०उपमानोपमेययोः साधारणधर्मत्वामिति विवेचनीयम् इति अनुपमात्वं दर्श-
यन्ति केचित् । यो लिम्पत्यमुना तुल्यं तम इत्यपि संगतः । अङ्गानीति
न संबन्धः सोपि मृग्यस्तमोगुणः । इति पाठेपि अङ्गानीति न संबन्धः
३३उपमेयेन सह संगतो न अतः समानधर्माभावात् सोपि समानधर्मोपि
तमोगुणः तमसानुसंबद्धो धर्मः मृग्यः अन्वेषणीयः इति अन्वयः । एत-
दुपपादनं तु पूर्ववदेव । अत्र अपिशब्दः लिम्पतेस्तमसश्चासौ धर्मः कोत्र
३६समीक्ष्यते । इति पूर्वोक्तदोषसंग्राहको ज्ञेयः ॥ २३१ ॥

ii. 231—मृग्यस्तमो for मृग्यः समो D,N, V.

यथेन्दुरिव ते वक्त्रमिति कान्तिः प्रतीयते ।
न तथा लिम्पतेर्लेपादन्यदत्र प्रतीयते ॥ २३२ ॥
तदुपश्लेषणार्थोयं लिम्पतिर्ध्वान्तकर्तृकः ।

साधारणधर्मस्य अप्रयोगेपि लुप्तोपमा भवति । तथा चात्र मा भवतु लेपनं साधारणो धर्मः साधारणधर्मोपादानं विनैव निष्पाद्यमानां लुप्तोपमामङ्गीकुर्मः इति चेत् तदपि नात्र संभवतीति कथयति—यथेन्दुरिवेति । यथा इन्दुरिव ते वक्त्रम् इति उपमायां कान्तिः साधारणधर्मतया प्रतीयते वाचकाप्रयोगेपि प्रसिद्धेन्दोरुपमानत्वादेव गम्यते तथा लिम्पतेः लिम्पतीति उपमानात् लेपात् अन्यत् उपमितिनिष्पादकं साधारणधर्मान्तरं न प्रतीयते । लेपनं तु क्रियाविशेष्यकशाब्दबोधे उपमानमेव प्रथमान्तविशेष्यकशाब्दबोधे उपमानोपसर्जनीभूतम् । अतः साधारणधर्मो भवितुं नार्हति इति प्रपञ्चितमेव । तथा च ईदृशस्थले साधारणधर्मः न शब्दोपात्तः न वा उपमानप्रसिद्ध्या गम्यः । एवं च साधारणधर्मप्रतीतेर्नात्र पूर्णोपमा लुप्तोपमा वा । लुप्तोपमायाः स एव विषयः यत्र उपमानोपमेयगतं सादृश्यं लोकप्रसिद्धतया स्फुटं प्रतीतिपदवीमारोहति यथा इन्दुरिव ते वक्त्रमित्यादौ । यत्र तु न प्रतीतिपदवीमारोहति न तत्र सा । अत्र लेपनकर्तृतमसोर्न कोपि समानधर्मः प्रतीतिपदवीमारोहति अतो नोपमा ॥ २३२ ॥

सिद्धान्तकथनेन विषयमुपसंहरति—तादिति । तत् तस्मादुपमाया अत्र अभावात् अङ्गकर्मा अङ्गकर्मकः ध्वान्तकर्तृकः उपश्लेषः लेपनं अर्थः यस्य सः एतादृशः लिम्पतिः लिपिधात्वर्थः पुंसा कविनिबद्धवक्त्रा एवं व्यापनरूपविषयनिगरणेन उत्प्रेक्ष्यते संभाव्यते इति ईक्ष्यतां सूक्ष्मया दृशा निरूप्यताम् । अत्र प्रेमचन्द्रशर्माणस्तु—लिम्पतिः लिम्पतिपदप्रतिपाद्या लेपन-

---

ii. 232—लिम्पतौ for लिम्पतेः P, R, Ca;—अत्रान्यत् for अन्यदत्र V;—D omits the second half.

ii. 233—श्लेषणार्थं for श्लेषणार्थोयं V;—धातु for ध्वान्त D.

अङ्गकर्मा च पुंसैवमुत्प्रेक्ष्यत इतीक्ष्यताम् ॥ २३३ ॥
मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः।

६क्रिया पुंसा कविनिबद्धेन वक्त्रा उत्प्रेक्ष्यते संभाव्यते इति इष्यतां अकामेनापि अङ्गीक्रियतामित्यन्वयः । ननु विषयाभावे विषयीभूतादाः तथाविधविशिष्टलेपनक्रियायाः कथमुत्प्रेक्षणीयत्वम् संशयविशेषणरू-
९पाया उत्प्रेक्षायाः कोटिद्वयविषयकत्वनियमात् । इति विषयं दर्शयन् विषयीभूतं लिम्पतिं विशिनष्टि उपश्लेषणार्थ इति । उपश्लेषणं तमःकर्तृ-
कव्यापनम् अर्थः स्वविषयकोत्प्रेक्षायाः विषयो यस्य सः । अयमर्थः प्रस्तु-
१२तोर्थस्तावद्विषयः । तत्र संभाव्यमानो अध्यवसीयमानो वा अप्रस्तुतोर्थो विषयी । प्रकृते तमःकर्तृकाङ्गव्यापनम् उत्प्रेक्षाविषयः । तादृशलेपनं विषयीति । ततश्चात्र प्रस्तुतं तमोव्यापनं तादृशलेपनत्वेनोत्प्रेक्ष्यते न तूप-
१५मानेन तेन उपमीयते इति प्रत्यपादयन् ॥ परमस्मिन् उपश्लेषणार्थविषये क्लिष्टकल्पना दृश्यते । अपरं च अनुपादानविषया स्वरूपोत्प्रेक्षा इयमिति सर्वैरङ्गीकृतम् । ततश्च विषयिणः उपादानेन अध्यवसानेन विषयस्य
१८स्वरूपे ज्ञायमाने उत्प्रेक्षायाः सिद्धौ तद्विषयदर्शनाय इयान् प्रयत्नः अनु-
पयुक्तः एव । एतावत्प्रबन्धेन आचार्यदण्डिनो मते अत्र समानधर्मस्य प्रतीतिर्नास्तीति नोपमा किंतु प्रस्तुते अप्रस्तुतारोपरूपा उत्प्रेक्षा इति दर्शि-
२१तम् । काव्यप्रकाशकारादयः संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् (P. 707) इति उत्प्रेक्षायाः लक्षणं विधाय समेन उपमानेन इति व्याख्यानं च कृत्वा साधर्म्यमूलामेव तां वर्णयन्ति तत् आचार्यदण्डिनः
२४सिद्धान्तस्य विरुद्धम् इति बोध्यम् ॥ २३३ ॥

इवशब्दः बाहुल्येन उपमावाचकः संभावनावाचकस्तु दूरे वसन् देवदत्त इव भाति इत्यादिषु क्वचिदेवासौ दृष्टः अतः तस्योत्प्रे-
३क्षावाचकत्वम् उत्प्रेक्षावाचकमध्ये परिगणनेन दर्शयति—मन्य इति । व्यज्यते बोध्यते । एषां प्रयोगे उत्प्रेक्षा वाच्या अन्यथा गम्या इति पूर्वं कथितमेव । अत्र आदिशब्देन तर्कयामि संभावयामि जाने उत्प्रेक्षे इत्या-
६दीनां संग्रहः । एतेषां कानिचदुदाहरणानि दर्शयामः—

---

ii. 233—उत्प्रेक्षितुं and उत्प्रेक्षितं for उत्प्रेक्ष्यते Pn;—इतीक्ष्यते for इतीक्ष्यताम् V; इतीष्यताम् P, R.

उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोपि तादृशः ॥ २३४ ॥

॥ इत्युत्प्रेक्षाचक्रम् ॥

हेतुश्च सूक्ष्मलेशौ च

यद्यनुष्णा भवेद्वह्निः यद्यशीतं भवेज्जलम् ।
मन्ये दृढव्रतो रामस्तदा स्यादप्यसत्यवाक् ॥
[9]सर्वातिशयसौन्दर्यं शङ्के सत्यवतो मुखम् ।
येन सा मृगशावाक्षी सावित्री तरलीकृता ॥
तव निर्वर्ण्य यद्वर्णं स्वर्णं वर्णाय तादृशे ।
[12]त्वत्कोशगेहान्निर्गत्य तीर्थेषु वसति ध्रुवम् ॥
त्वदाननेन सादृश्यं प्राप्तुकामो निशाकरः ।
कलङ्कपङ्काभावाय नूनं मज्जति सागरे ॥
[15]रात्रौ रवेर्दिवा चेन्दोरभावादिव स प्रभुः ।
भूमौ प्रतापयशसी सृष्टवान् सततोत्थिते ॥
कस्तूरिकामृगाणामण्डाद्व्रणगन्धमखिलमादाय ।
यदि पुनरहं विधिः स्यां खलजिह्वायां निवेशयिष्यामि ॥
[19]इति ॥ २३४ ॥

अथ क्रमप्राप्तं हेत्वाद्यलंकारं प्रशंसापूर्वकं लक्षयति—हेतुश्चेति । हेतु-सूक्ष्मलेशाभिधानाः त्रयोलंकाराः वाचाम् वागर्थस्य उत्तमभूषणम् प्रधानालं-[3]कारः । भामहेन(ii. 86)—

हेतुश्च सूक्ष्मो लेशोथ नालंकारतया मतः ।
समुदायाभिधानस्य वक्रोक्त्यनभिधानतः ॥

[6]इति अलंकारत्रयं चमत्कृतिशून्यत्वेन प्रतिषिद्धमस्ति । समुदायाभिधानस्य वाक्यार्थस्य वक्रोक्त्यनभिधानतः वक्रोक्तिः चमत्कृतिविशिष्टोक्तिः तस्य अनभिधानतः अनुल्लेखात् चमत्कृतिशून्यत्वादित्यर्थः । एते त्रयोलं-[9]कारा न भवन्ति इति तदाशयः । आचार्यदण्डिनो मते अत्र चमत्कृतिर्वर्तते अतः विशेषमभिधत्ते वाचामुत्तमभूषणमिति । लेशः उद्देशवाक्ये लवसंज्ञयाभिहितः । तत्र उद्देशवाक्यानुरोधेन प्रथमं हेतुप्रभेदान् दर्शयति। [12]लक्षणं तु प्रसिद्धार्थानुयायि इति पुनः नोक्तम्। तच्च आग्नेये (344 29)— साधयिषितार्थस्य हेतुर्भवति साधक इति निरूपितमास्ति । भोजराजेनापि

वाचामुत्तमभूषणम् ।

कारकज्ञापकौ हेतू तौ चानेकविधौ यथा ॥ २३५ ॥
अयमान्दोलितप्रौढचन्दनद्रुमपल्लवैः ।

(iii. 12)--क्रियाया कारणं हेतुः इति दर्शितः । सोयं हेतुर्द्विविधः कारक-
१५ज्ञापकश्च इति । करोति निष्पादयति भावामिति क्रियासम्पादको हेतुः
कारकः । ज्ञापयति बोधयति कारणान्तरनिष्पन्नं भावमिति च ज्ञापकः । अग्निः
धूमस्य कारको हेतुः धूमश्चाग्नेः ज्ञापकः । अथवा मृदा घटं करोतीति
१८कारकः । शास्त्रेण तत्त्वं जानातीति ज्ञापकः । उक्तं हि भोजराजेन (iii. 13)—

यः प्रवृत्तिं निवृत्तिं च प्रयुक्तिं चान्तरा विशन् ।
उदासीनोपि वा कुर्यात् कारकं तत् प्रचक्षते ॥
द्वितीया च तृतीया च चतुर्थी सप्तमी च यम् ।
क्रियानाविष्टमाचष्टे लक्षणं ज्ञापकश्च सः ॥ इति ।

तौ च कारकज्ञापकौ हेतू प्रवृत्तिनिवृत्त्यादिभेदेन तथा द्वितीयातृतीया-
२४यादिविभक्तिदर्शितभेदेन अनेकविधौ अनेकप्रकारौ इति तदर्थः । एषामु-
दाहरणानि सरस्वतीकण्ठाभरणे द्रष्टव्यानि । अस्मिन्नेव हेत्वलंकारे काव्य-
लिङ्गानुमानयोः तथा कार्यकारणमूलार्थान्तरन्यासस्य च संग्रहो भवति
२७इति ते न पृथक्तया दर्शिता आचार्येण दण्डिना । अप्पय्यदीक्षितैः—

हेतोर्हेतुमता सार्धं वर्णनं हेतुरुच्यते ।
हेतुहेतुमतोरैक्यं हेतुं केचित् प्रचक्षते ॥ इति ।

३०द्विप्रकारको हेत्वलंकारो निर्दिष्टः । तत्र प्रथमः अतिशयोक्त्यलंकारे
अन्तर्भवति द्वितीयश्च न चमत्कारावहः इति तदुभयमपि अलंकारतया
न मन्यन्ते अपरे ॥ २३५ ॥

तत्र कारकहेतुमुदाहरति—अयमिति । आन्दोलिताः सलीलं व्याधूताः
प्रौढानां चन्दनद्रुमाणां पल्लवाः येन सः । अनेन वायोः सौगन्ध्यशैत्या-
३दयो धर्माः दर्शिताः । एतादृशो यो मलयमारुतः सर्वस्य प्रीतिमुत्पा-

---

ii. 235—लक्षणम् for भूषणम् V, D (marginally corrected into भूषणम्).

ii. 236— आन्दोलताप्रौढ for आन्दोलितप्रौढ Pn.

उत्पादयति सर्वस्य प्रीतिं मलयमारुतः ॥ २३६ ॥
प्रीत्युत्पादनयोग्यस्य रूपस्यात्रोपबृंहणम् ॥
अलंकारतयोद्दिष्टं निवृत्तावपि तत् समम् ॥ २३७ ॥
चन्दनारण्यमाधूय स्पृष्ट्वा मलयनिर्झरान् ।
पथिकानामभावाय पवनोयमुपस्थितः ॥ २३८ ॥
अभावसाधनायालमेवंभूतो हि मारुतः ।

दयति। अत्र मलयमारुतः प्रीत्युत्पादने कारकहेतुः । स च आन्दोलितप्रौढचन्दनद्रुमपल्लवः इति विशेषणेन सविशेषं चमत्कारमावहति। अतः एतादृशचमत्कृतिविशिष्टहेतूपादाने हेत्वलंकारः युक्त एव। यत्र च कारकं न चमत्कारावहं निर्दिष्टं तत्र नायमलंकारः यथा गौश्चरतीति ॥ २३६॥

उदाहरणस्य अलंकारत्वं प्रतिपादयति—प्रीत्युत्पादनेति । अत्र अस्मिन् श्लोके प्रीत्युत्पादनयोग्यस्य आह्लादप्रतीतिसमर्थस्य रूपस्य वर्णनस्वरूपस्य उपबृंहणं वैचित्र्यजनकत्वेनोपन्यासः अलंकारतया उद्दिष्टं निर्दिष्टः । वैचित्र्यस्य प्रतीयमानत्वात् अत्रालंकारता इष्टेवेति भावः । अयं हेतुः उत्पादनक्रियायां दर्शितः। निवृत्तौ अपि क्रियानिवृत्तावपि हेतुनिर्देशे । तत् समम् क्रियाप्रवृत्तिवदत्रापि हेत्वलंकार इति भावः ॥ २३७ ॥

निवृत्तौ उदाहरति—चन्दनेति । चन्दनारण्यम् चन्दनवनम् आधूय मलयनिर्झरान् स्पृष्ट्वा वाक्यद्वयेन सौरभ्यशैत्यसंपत्तिरुपात्ता । अयं पवनः पथिकानां पान्थानां वियोगिनामित्यर्थः अभावाय विनाशाय उपस्थितः । कामोद्दीपकत्वात् तान् विशसितुं संप्राप्त इति भावः ॥ २३८ ॥

निवृत्तौ अलंकारत्वं संगमयति—अभावेति । एवंभूतः शैत्यसौरभ्यान्वितः मारुतः विरहज्वरेण विरहसंतापेन संभूतं जातं मनोज्ञे मनोहारिणि वस्तुनि आरोचकम् अरुचिर्यस्य तस्मिन् मनोज्ञवस्तुनि खिन्नस्येत्यर्थः । विरहज्वरसंभूतमदनाग्न्यातुरे जने इति पाठे तु विरहेण कान्तायां विरहेण ज्वरः संतापः तेन संभूतः यो मदनाग्निः मदनरूपः संतापातिशयविधायकोग्निः तेन आतुरे रुग्णे जने उपस्थितः सन् तेषाम् अभावसाधनाय सत्तां विरहसंपादनाय

ii. 236—लोकस्य for सर्वस्य Rn;—दक्षिण for मलय R, J .
ii. 237—उपलम्भनम् for उपबृंहणम् D;—वा for तत् D.

विरहज्वरसंभूतमनोज्ञारोचके जने ॥ २३९ ॥
निर्वर्त्ये च विकार्ये च हेतुत्वं तदपेक्षया ।

अलं समर्थः । एवं भावविरहरूपेण क्रियानिवृत्तावपि हेतुः साधको भवति । यथा भावसंपादनाय हेतुः साधकः तथा अभावायेति भावः । तथा च
९उभयत्रापि अलंकारत्वं बोध्यम् । केचित्तु क्रियानिवृत्तौ—

मुग्धे तवमुखामोदलोलुपो मधुरो भ्रमन् ।
कर्णिकाकमलं फुल्लमपि नाभिसरत्ययम् ॥

१२इति उदाजह्रुः तथा मूले तु प्रथमोदाहरणं क्रियासाधकस्य द्वितीयमभावसाधकस्य इति च भेदं दर्शयामासुः । परम् उपक्रमानुरोधेन क्रियायाः उत्पत्तिनिवृत्तिप्रदर्शनायैव एतदुदाहरणयुगलमिति भाति ॥ २३९ ॥

वाक्ये तावत् केचन हेतवः क्रियार्थसंपादकाः केचन कर्मार्थसंपादकाः । तत्र क्रियार्थसंपादकेषु कारकज्ञापकमिति भेदद्वयं परिकल्प्य कारकस्य
३उत्पत्तिनिवृत्तिप्रकारद्वयमभिधाय उदाहरणद्वयेन तद्दर्शितम् । इदानीं कर्मार्थसंपादकान् हेतून् प्रदर्शयितुमाह—निर्वर्त्ये चेति । निर्वर्त्ये विकार्ये च कर्मणि इति शेषः । तदपेक्षया निर्वर्त्यविकार्यकर्मापेक्षया हेतुत्वं
६भवति तत्संपादनाय हेतवः भवन्ति । प्राप्ये कर्मणि तु प्रायः बाहुल्येन क्रियापेक्षैव क्रियायाः एव अपेक्षा नान्यो हेतुस्तत्रापेक्षितो भवति । अतस्तत्र क्रियाया अपेक्षा एव हेतु-
९ता क्रियैव हेतुर्भवतीत्यर्थः । अयमाशयः । प्राचीना वैयाकरणाः कर्मणः त्रैविध्यं दर्शयन्ति निर्वर्त्यं विकार्यं प्राप्यं चेति । तत्र निर्वर्त्यं पूर्वमसतः करणरूपम् अथवा अलक्षितस्य प्रकाशानुरूपम् । यथा पटं करोति पुत्रं
१२प्रसूते इत्यादि । विकार्यं द्विविधं प्रकृतेरुच्छेदकं प्रकृतेर्गुणान्तराधायकं च । यथा काष्ठं भस्म करोति सुवर्णं कुण्डलं करोति इति । यत्र क्रियाकृतः परिणामो न दृश्यते न वानुमीयते तत् प्राप्यम् यथा सूर्यं पश्यति ग्रामं
१५गच्छति इति । अत्र सूर्यग्रामयोः क्रियाकृतविशेषो न दृश्यते । अर्वाचीनाः अनीप्सितमिति चतुर्थं भेदं कल्पयन्ति यथा पापं त्यजति इति ।
१७तदेतदुक्तं वैयाकरणैः यथा—

---

ii. 239—संताप for संभूत R;—मदनार्त्यातुरे for मनोज्ञारोचके D; मदनाग्न्यातुरे P.

प्राप्ये तु कर्मणि प्रायः क्रियापेक्षैव हेतुता ॥ २४० ॥
हेतुर्निर्वर्तनीयस्य दर्शितः शेषयोर्द्वयोः ।
दत्वोदाहरणद्वन्द्वं ज्ञापको वर्णयिष्यते ॥ २४१ ॥
उत्प्रवालान्यरण्यानि वाप्यः संफुल्लपङ्कजाः ।

यदसज्जायते पूर्वं जन्मना यत् प्रकाशते ।
तन्निवर्त्यं विकार्यं च कर्म द्वेधा व्यवस्थितम् ।
प्रकृत्युच्छेदसंभूतं किंचित् काष्ठादिभस्मवत् ॥
२१ किंचिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ॥
क्रियाकृता विशेषाणां सिद्धिर्यत्र न गम्यते ।
दर्शनादनुमानाद्वा तत् प्राप्यामिति कथ्यते ॥ इति ।

२४ तथा च निर्वर्त्यविकार्ययोः हेत्वोः पूर्वावस्थातो विशेषदर्शनात् तत्र अन्येहेतारपेक्षा भवति प्राप्ये तु पूर्वावस्थातः न कोपि विशेषो दृश्यते अतः केवलक्रियापेक्षैव कर्मत्वसंपादिका भवति । सूर्यं पश्यति ग्रामं २७ गच्छति इत्यादौ केवलक्रिययैव तेषां कर्मत्वसिद्धेः । कटं करोति इत्यादिषु तु भवति अन्यसाधनापेक्षा । अतः निर्वर्त्ये च विकार्ये च तदपेक्षया तत्संपादनाय अन्यार्थस्य हेतुत्वं भवति तयोर्जन्यत्वात् । प्राप्ये ३० तु क्रियैवापेक्ष्यते नान्यत् किमपि तस्य जन्यत्वाभावात् । अर्वाचीनैः स्वीकृते अनीप्सितेपि क्रियापेक्षैव ज्ञेया । स च हेतुर्निवृत्तिविषयः ॥ २४० ॥

हेतुरिति । निर्वर्तनीयस्य कर्मणः हेतुः दर्शितः अयमान्दोलितेत्युदाहरणे तत्र प्रीतिरूपकर्मणः निर्वर्तनीयत्वात् । शेषयोर्द्वयोः विकार्य- ३ प्राप्ययोः उदाहरणद्वन्द्वं दत्वा उदाहरणेन हेतुं विशदं कृत्य पश्चात् ज्ञापको हेतुर्वर्णयिष्यते वर्ण्यते ॥ २४१ ॥

विकार्यहेतुं दर्शयति—उत्प्रवालानीति । उद्गतानि प्रवालानि किसलयपल्लवादीनि येषु तानि अरण्यानि वनानि । संफुल्लानि ३ विकसितानि पङ्कजानि यासु ताः वाप्यः दीर्घिकाः । पूर्णः पूर्णमण्डलः चन्द्रः । एतत् सर्वं कामेन पान्थदृष्टेः वियोगिनः नयनस्य विषं कृतम् विषरूपेण परिणामितम् । दाहकत्वेन विषभावमापादितमित्यर्थः ।

ii. 241—ऋ(शे?)षयोरपि for शेषयोर्द्वयोः D.

चन्द्रः पूर्णश्च कामेन पान्थदृष्टेर्विषं कृतम् ॥ २४२ ॥
मानयोग्यां करोमीति प्रियस्थाने कृतां सखीम् ।
बाला भ्रूभङ्गजिह्माक्षी पश्यति स्फुरिताधरम् ॥ २४३ ॥
गतोस्तमर्कों भातीन्दुर्यान्ति वासाय पक्षिणः ।
इतीदमपि साध्वेव कालावस्थानिवेदने ॥ २४४ ॥

६अत्र अरण्यादिषु विषरूपविकारत्वमारोपितमेव तस्यैव चमत्कारित्वात् । अतः सुवर्णं कुण्डलं करोति इत्यादौ वास्तवविकारे नायमलंकारः ॥ २४२ ॥

प्राप्यहेतुमुदाहरति—मानयोग्यामिति । मानयोग्यां मानाभ्यासं मानसूचकाङ्गिकभावाभ्यासमिति भावः । करोमि इति अभिप्रेत्य प्रियस्य ३स्थाने विषये कृतां कल्पितां सखीम् । बाला अनभ्यस्तमानशिक्षा अप्रगल्भा भ्रुवोर्भङ्गेन जिह्मे वक्रे अक्षिणी यस्याः सा स्फुरितः अधरः अधरोष्ठः यस्याः सा एतादृशी भूत्वा पश्यति । अत्र पश्यति क्रियया सखी ६न निष्पाद्यते न वा विक्रियते । अतः एतत् प्राप्यं कर्म । तद्विषयकदर्शनक्रियापेक्षमैव बालाया हेतुत्वम् । तच्च तादृशसकोपनिरीक्षणनादिभिरुपरक्तं विशेषचमत्कारमावहति अतः हेत्वलंकारः ॥ २४३ ॥

एवं कारकहेतुं सप्रपञ्चं निरूप्येदानीं ज्ञापकहेतुमुदाहरति—गतोस्तमिति । अर्कः अस्तं गतः । इन्दुः भाति प्रकाशते । वासाय निवासस्थानाय ३पक्षिणः यान्ति । कालावस्थाया कालविशेषस्य सायंकालस्येत्यर्थः । निवेदने ज्ञापने साधु एव चमत्कारजनकतया अलंकारसंपादनाय पर्याप्तमेव । ज्ञाप्यं क्वचित् शब्दोपात्तं क्वचिच्च प्रतीयमानं भवति । अत्र ६प्रतीयमानम् । साध्वेव इति एवकारेण प्रतीयमाने ज्ञापकस्यानुपादानात् हेतोः कथं ज्ञापकता इति शङ्कां निवारयति इति ज्ञेयम् । संप्रति सन्ध्यासमयो वर्तते इति वाक्ये न वैचित्र्यम् । उक्तप्रकारेण कथने एव वैचित्र्य- ९मिति अलंकारता ॥ २४४ ॥

---

ii. 242—कालेन for कामेन R, Ca;—दृष्टिविषं for दृष्टेर्विषं D, V, M.
ii. 243—स्थितां for कृतां R, P;—स्थानकृतां for स्थाने कृतां J, D, Cs;—स्फुरिताधरा for स्फुरिताधरम् R, P.
ii. 244—याति for भाति Cs;—वायस for वासाय D, Cs;—निवेदनम् for निवेदने D, Cs.

अबाध्यैरिन्दुपादानामसाध्यैश्चन्दनाम्भसाम् ।
देहोष्मभिः सुबोधं ते सखि कामातुरं मनः ॥ २४५ ॥
इति लक्ष्याः प्रयोगेषु रम्या ज्ञापकहेतवः ।
अभावहेतवः केचिद्व्याक्रियन्ते मनोहराः ॥ २४६ ॥
अनभ्यासेन विद्यानामसंसर्गेण धीमताम् ।

ज्ञाप्यस्य शब्दोपादाने ज्ञापकहेतुमुदाहरति—अबाध्यैरिति । इन्दुपादानां चन्द्रकिरणानां अबाध्यैः अविनाश्यैः । चन्दनाम्भसां चन्दनोदकानां विलेपनानामित्यर्थः असाध्यैः अप्रतिकार्यैः देहोष्मभिः शरीरसंतापैः हे सखि ते कामातुरं मदनपीडितं मनः सुबोधं सुखेन बोधो विकारबोधो। यस्य ततू एतादृशमस्तीति शेषः । अत्र च ज्ञाप्यं मनसः कामातुरत्वम् तच्छब्दोपात्तम् । ज्ञापकाश्च अप्रतिकार्या देहोष्माणः ॥ २४५ ॥

भावहेतुमुपसंहरति—इतीति । इति एवंप्रकाराः प्रयोगेषु कवीनां निबन्धेषु रम्याः वैचित्र्येण मनोहराः ज्ञापकहेतवः लक्ष्याः अवबोद्धव्याः । केचित् मनोहराः अभावरूपा हेतवः व्याक्रियन्ते कथ्यन्ते । अभावश्च अनेन कविना चतुर्धा कल्पितः । प्रागभावः प्रध्वंसाभावः अत्यन्ताभावः अन्योन्याभावश्चेति ॥ २४६ ॥

अभावेषु प्रथमं प्रागभावमुदाहरति—अनभ्यासेनेति । विद्यानाम् आन्वीक्षिक्यादीनाम् अनभ्यासेन अपरिशीलनेन । धीमतां विपश्चिताम् असंसर्गेण परिचयाभावेन । अक्षाणाम् इन्द्रियाणाम् अनिग्रहेण असंयमनेन हेतुना नृणां व्यसनं दुष्प्रवृत्तिर्जायते । भगवता मनुना अष्टादशविधानि व्यसनान्युक्तानि यथा (vii. 47–48)—

मृगयाक्षो दिवा स्वापः परीवादः स्त्रियो मदः ।
तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ॥
पैशून्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् ।
वाग्दण्डजं च पारुष्यं क्रोधजोपि गणोष्टकः ॥ इति ।

---

ii. 245—अवध्यैः for अबाध्यैः J, P, D;—असाध्यैः and अबाध्यैः are transposed in M;—शुचो धत्ते for सुबोधं ते D.

ii. 246—रम्याः (?) for रम्याः Rn; सम्यक् Rn; ज्ञेयाः M;—व्याह्रियन्ते for व्याक्रियन्ते P, B, Rn;—मनोरमाः for मनोहराः D, M.

ii. 247—वेदानाम् for विद्यानाम् Cs, M.

अनिग्रहेणचाक्षाणां व्यसनं जायते नृणाम् ॥२४७॥
गतः कामकथोन्मादो गलितो यौवनज्वरः ।
क्षतो मोहश्च्युता तृष्णा कृतं पुण्याश्रमे मनः ॥२४८॥
वनान्यमूनि न गृहाण्येता नद्यो न योषितः ।
मृगा इमे न दायादास्तन्मे नन्दति मानसम् ॥२४९॥

१०अत्र यावत् विद्यादीनामभावः तावत् व्यसनं भवत्येव इति विद्यादीनां प्रागभावस्य व्यसनं प्रति हेतुता ॥ २४७ ॥

प्रध्वंसाभावहेतुमुदाहरति—गत इति । कामकथाभिः य उन्मादः विषयेषु सङ्गाभिनिवेशः स गतः । यौवनज्वरः तारुण्योष्मा गलितः क्षीण-
३प्रायः । मोहः ममत्वबुद्धिः क्षतः नष्टा । तृष्णा विषयवासना च्युता लुप्ता । अतः कारणात् पुण्याश्रमे पवित्राश्रमे चतुर्थाश्रमे इत्यर्थः । मनः कृतम् निश्चयः कृतः । अत्र उन्मादादीनां प्रध्वंसाभावः एव चतुर्थाश्रम-
६स्वीकाराय हेतुत्वेनोपात्तः । अतः प्रध्वंसाभावहेत्वलंकारः ॥ २४८ ॥

अन्योन्याभावहेतुमुदाहरति वनान्यमूनीति । अमूनि चित्तैकाग्र्य-संपादकानि वनानि आश्रमारण्यानि गृहाणि ममत्वादिभिः नानादुःखा-
३स्पदानि आवसथानि न । एताः विमलवारिधाराभिर्मनोहरा नद्यः योषितो मनश्चांचल्योत्पादकाः प्रमदाः न । इमे मधुरस्वभावाः मृगाः दायादाः मत्सराक्रान्ताः संबन्धिजनाः न । तत् एतत् त्रयमपि मे मानसं
६नन्दति संतोषयति । अत्र वनादीनामन्योन्याभावेन मनःसंतोषः संसाधितः । अतः अन्योन्याभावहेत्वलंकारः । अत्र सादृश्यातिशय-हेतुकाभेदप्रतीतिपूर्वकभेदप्रतीपादनस्यैव चमत्कारजनकत्वात् वनगृहादीनां
९सादृश्यमस्त्येव परं तु तदविवक्षणान्नात्र निर्णयोपमा इति प्रेम-चन्द्रशर्माणः ॥ २४९ ॥

---

ii. 247.—जायते व्यसनं for व्यसनं जायते P, B, R.

ii. 248—हतः for गतः Rn;—क्षितो for क्षतो M;—कलोन्मादो for कथोन्मादो D;—गतो for क्षतो P, B;—पुण्यागमे for पुण्याश्रमे M.

ii. 249—गृहाः for मृगाः P, सुभाषितरत्नभाण्डागार; ग्रहा B's suggested emendation. All our Mss. read मृगाः as we have it.

अत्यन्तमसदार्याणामनालोचितचेष्टितम् ।
अतस्तेषां विवर्धन्ते सततं सर्वसंपदः ॥ ५० ॥
उद्यानसहकाराणा-

अत्यन्ताभावहेतुमुदाहरति—अत्यन्तमिति । आर्याणां सत्पुरुषाणाम् अनालोचितचेष्टितम् अविमृश्यकारित्वम् अत्यन्तम् असत् सर्वथा अविद्यमानम् । कदापि अविमृश्य न ते व्यवहरन्तीत्यर्थः । अतः अविमृश्यताया अत्यन्ताभावात् तेषां सर्वसंपदः ऐहिकामुष्मिकाः सर्वसमृद्धयः सततं निरन्तरं विवर्धन्ते वृद्धिं प्राप्नुवन्ति । अत्र अनालोचितचेष्टितस्य अत्यन्ताभावः सपदां विवृद्धये हेतुत्वेनोपन्यस्तः इति अत्यन्ताभावहेत्वलंकारः ॥२५०॥

एतावता भावप्रतियोगिकानां प्रागभावादिचतुर्णामभावानामुदाहरणानि दर्शितानि इदानीं तु अभावप्रतियोगिकाभावस्य हेतुरूपतां दर्शयति-उद्यानेति । उद्याने स्थिता ये सहकाराः आम्राः तेषां मञ्जरी अनुद्भिन्ना विकासमप्राप्ता न अपि तु विकासपरिपूर्णा इत्यर्थः । अतः तन्मञ्जर्या उद्दीपकत्वात् पथिकनारीणां प्रोषितभर्तृकाणां सतिलः सलिलाञ्जलिः नीवापाञ्जलिः देयः । तासां मरणमुपस्थितामिति भावः । अत्र मञ्जरीणामनुद्भेदाभावः मरणस्य हेतुत्वेनोपन्यस्तः अतः अभावाभावहेत्वलंकारः । अन्येषामभावाभावानां सरस्वतीकण्ठाभरणे तट्टीकायां च उदाहरणानि दर्शितानि । तेषु प्रध्वंसाभावाभावो यथा (iii.15)—

पीनश्रोणि गभीरनाभि निभृतं मध्ये भृशोच्चस्तनं
पायाद्वः परिरब्धमब्धिदुहितुः कान्तेन कान्तं वपुः ।
स्वावासानुपघातनिर्वृतमनास्तत्कालमीलद्दृशे
यस्मै सोच्युतनाभिपद्मवसतिर्वेधाः शिवं ध्यायति ॥ इति ।

अत्र नारायणस्य नाभिपङ्कजरूपस्यावासस्य उपघाताभावः विधेर्मनोनिर्वाणकारणं भवति अतः प्रध्वंसाभावाभावहेतुरयम् । अन्योन्याभावा-

---

iii. 250—विवर्तन्ते for विवर्धन्ते Rn;—सदा सर्वत्र for सततं सर्व D, V, J.

मनुद्भिन्ना न मञ्जरी ।
देयः पथिकनारीणां सतिलः सालिलाञ्जलिः ॥२५१॥
प्रागभावादिरूपस्य हेतुत्वमिह वस्तुनः ।
भावाभावस्वरूपस्य कार्यस्योत्पादनं प्रति ॥ २५२ ॥

१६भावो यथा—

अवनिरुदकं तेजोवायुर्नभः शशिभास्करौ
पुरुष इति यत् केचिद्भिन्ना वदन्ति तनूस्तव ।
तदनघ वचोवैचित्रीभिर्निरावरणस्य ते
विदधति पयःपूरोन्मीलन्मृषा मिहिरोपमाम् ॥

२१अत्र भिन्न इत्यन्योन्याभावमुपन्यस्य निरावरणस्य मृषेत्येताभ्यां निषेधः अन्योन्याभावाभावः स च मिहिरोपमात्वसाधकः अतः हेत्वलं-
२३कारः । अत्यन्ताभावाभावो यथा—

न विद्यते यद्यपि पूर्ववासना
गुणानुबन्धि प्रतिभानमद्भुतम् ।
श्रुतेन यत्नेन च वागुपासिता
ध्रुवं करोत्येव कमप्यनुग्रहम् ॥ इति ।

अत्र न विद्यते इत्यत्यन्ताभावमुपन्यस्य कमपीति प्रतिभासत्ताभिधानेन प्रतिषेधः । स च श्रुतयत्नाभ्यां वागुपासितव्या इत्युक्तार्थस्य
३०हेतुः इति अत्यन्ताभावाभावहेत्वलंकारः । अत्यन्तमसदार्याणामनालोचितचेष्टितम् इत्येतदपि अत्यन्ताभावाभावोदाहरणं भवति ॥ २५१ ॥

अभावहेतुमुपसंहरति—प्रागभावादीति । इह प्रागभावादिरूपस्य प्रागभावप्रध्वंसाभावान्योन्याभावात्यन्ताभावस्वरूपस्य वस्तुनः विषयस्य हेतुत्वम्
३भावाभावस्वरूपस्य कार्यस्य तत्र भावरूपस्य अनभ्यासेन विद्यानाम् इत्यादिश्लोकत्रये अभावरूपकार्यस्य च उद्यानेति श्लोके । उत्पादनं प्रति निष्पत्तये दर्शितमिति शेषः । उक्तोदाहरणेषु कारकहेतुत्वं दर्शितम् ज्ञापकहे-
६तोरुदाहरणानि ऊह्यानि ॥ २५२ ॥

---

ii. 251—उद्भिन्ना नव for अनुद्भिन्ना न M.

दूरकार्यस्तत्सहजः कार्यानन्तरजस्तथा ।
अयुक्तयुक्तकार्यौ चेत्यसंख्याश्चित्रहेतवः ॥ २५३ ॥
तेमी प्रयोगमार्गेषु गौणवृत्तिव्यपाश्रयाः ।
अत्यन्तसुन्दरादृष्टास्तदुदाहृतयो यथा ॥ २५४ ॥
त्वदपाङ्गाह्वयं जैत्रमनङ्गास्त्रं यदङ्गने ।

कारकज्ञापकहेतू सप्रपञ्चं निरूप्य इदानीं चित्रहेतुप्रभेदान् दर्शयति—दूरकार्य इति । दूरं कार्यं यस्य स दूरकार्यः । तेन कार्येण सह जायते स तत्सहजः । कार्यात् अनन्तरं जातः कार्यानन्तरजः अयुक्तं स्वभावविरुद्धं युक्तं स्वभावानुरूपं कार्यं ययोस्तौ च । इति एवंप्रकाराः असंख्याः संख्यातीताः चित्रहेतवः भवन्तीति शेषः ॥ २५३ ॥

कार्यात् विदूरस्य सहजस्य तदनन्तरजस्य वा कारणस्य कथं कारणत्वमिति शङ्कां परिहरति—तेमीति । तेमी पूर्वोक्ताश्चित्रहेतवः गौणवृत्तिव्यपाश्रयाः सारोपगौणीलक्षणा व्यपाश्रयः अवलम्बनं येषां ते तादृशाः सन्तः कारणतां प्राप्नुवन्ति इत्यर्थः । ते च प्रयोगमार्गेषु प्रबन्धरीतिषु अत्यन्तसुन्दरा दृष्टाः अतः तदुदाहृतयो दर्शयाम इत्यर्थः । यथेति अग्रिमोदाहरणप्रस्तावाय । अत्र गौणवृत्तिव्यपाश्रयत्वं क्वचित् कार्यस्यापि यथा पश्चात् पर्वतस्य इतिवक्ष्यमाणोदाहरणे रागसागरः इत्यत्र । तत्र हेतोर्गौणवृत्तित्वं परंपरयेति बोध्यम् । क्वचित् कार्यकारणयोरुभयोरपि गौणवृत्तिव्यपाश्रयत्वं भवति यथा राज्ञां हस्तारविन्दानि इत्यत्र । एवं च गौणवृत्तिव्यपाश्रयात् इति पञ्चम्यन्तपाठः साधुः इति भाति । क्वचित् साध्यसाधनलक्षणायामपि हेतोश्चमत्कारिता यथा आविर्भवति नारीणाम् इत्युदाहरणे ॥ २५४ ॥

तत्र कार्यस्य हेतोर्दूरदेशस्थस्य उदाहरणं दर्शयति—त्वदिति । हे अङ्गने शोभनगात्रि त्वदपाङ्गाह्वयं त्वदपाङ्गसंज्ञकम् । अनेन अत्र सारोपा गौणी लक्षणा दर्शिता । जैत्रं जयशालि अनङ्गास्त्रं अन्यतः मद्भिन्नपुरुषान्तरे मुक्तं त्वयेति शेषः । तेन त्वदपाङ्गरूपमदनास्त्रेण सः अल-

ii. 253—कार्यावेति for कार्यौ चेति V;—अयुक्तो युक्तकारी for अयुक्तयुक्तकार्यौ D, Rn.
ii. 254—व्यपाश्रयात् for व्यपाश्रयाः Rn.

मुक्तं तदन्यतस्तेन सोस्म्यहं मनसि क्षतः ॥ २५५ ॥
आविर्भवति नारीणां वयः पर्यस्तशैशवम् ।
सहैव पुंसां विविधैरङ्गजोन्मादविभ्रमैः ॥ २५६ ॥
पश्चात् पर्यस्य किरणानुदीर्णं चन्द्रमण्डलम् ।

क्ष्यभूतः । अहमपि मनसि हृदये क्षतः विद्धः । अत्र अस्त्रस्य लक्ष्यवे-
६धरूपकार्य संनिहितम् अलक्ष्यवेधरूपं तु विदूरम् इति तादृशकार्यस्यात्र
विदूरता । इति देशविदूरताया उदाहरणम् । कालविदूरताया यथा—

अनश्नुवानेन युगोपमानादलब्धमौर्वीकिणलाञ्छनेन ।
अस्पृष्टखड्गोत्सरुणापि चासीद्रक्षावती तस्य भुजेन भूमिः ॥

१०इति । अत्र यौवनकार्यस्य बाल्ये एव करणाद्धेतोरदरकार्यता । इति सरस्वतीकण्ठाभरणे (iii.17) ॥ २५५ ॥

सहजहेतोरुदाहरणं दर्शयति—आविर्भवतीति । नारीणां पर्यस्तशैशवं निराकृतबाल्यं वयः यौवनमित्यर्थः पुंसां कामिनां विविधैः बहुप्रकारैः
३अङ्गजोन्मादविभ्रमैः अङ्गजः मनसिजः तेन कृतैः उन्मादविभ्रमैः मनो-
विकारविलासैः सह एव आविर्भवति । अत्र मनोविभ्रमस्य यौवनं कारणं कार्यभूतेन तेन सहैव जायते इति कार्यस्य आशुभावप्रतिपादनाय
६वर्णितम् । तथा चात्र कार्यप्राक्क्षणवर्तित्वं विशेषविवक्षया कारणस्य अपह्नुतम् । तथा च अत्र विभ्रमाणां पश्चादुत्पद्यमानत्वं प्रागुत्पद्यमानत्वेनाध्यवसितम् इति अध्यवसायव्यपाश्रयोत्र हेतुश्चमत्कारातिशयजनको
९न तु गौणीव्यपाश्रय इति बोध्यम् इति प्रेमचन्द्रशर्माणः ॥ २५६ ॥

कार्यानन्तरजहेतुमुदाहरति—पश्चादिति । किरणान् मरीचीः पर्यस्य उत्क्षिप्य चन्द्रमण्डलम् पश्चात् रागसागरोदीर्णानन्तरम् उदीर्णमुदितम् ।
३हरिणाक्षीणां रागसागरः कामाभिलाषसमुद्रः प्रागेव चन्द्रमण्डलोदयात् पूर्वमेव उदीर्णः उच्छलितः स्फीत इति यावत् । अत्र चन्द्रोदयस्य रागोद्दीपकत्वात् कारणत्वं तच्च कार्यभूतरागोदीर्णानन्तरम् संभूतमिति
६कार्यानन्तरजत्वम् हेतोर्बोध्यम् एवं पौर्वापर्यव्यत्यासेन वर्णनं वैचित्र्यशा-

ii. 255—सोध्यहं for सोस्म्यहं all except R.
ii. 256—पुंसां सहैव for सहैव पुंसां V;—विविधैः पुंसां for पुंसां विविधैः J, P, B, R;—अनङ्गोन्माद for अङ्गजोन्माद D.

प्रागेव हरिणाक्षीणामुदीर्णो रागसागरः ॥ २५७ ॥
राज्ञां हस्तारविन्दानि कुड्मलीकुरुते कुतः ।
देव त्वच्चरणद्वन्द्वरागबालातपः स्पृशन् ॥ २५८ ॥
पाणिपद्मानि भूपानां संकोचयितुमीशते ।
त्वत्पादनखचन्द्राणामर्चिषः कुन्दनिर्मलाः ॥ २५९ ॥
इति हेतुविकल्पानां दर्शिता गतिरीदृशी ।

॥ इति हेतुचक्रम् ॥

लीति हेतुवैचित्र्यं बोध्यम् । वस्तुतस्तु अत्र चन्द्रमण्डलोदयरूपकारणस्य क्षिप्रकार्यस्य पश्चाद्भाविता पूर्वभावित्वेनाध्यवसिता तेनात्राध्यवसायमूल एव चमत्कारातिशयः । इति प्रेमचन्द्रशर्माणः ॥२५७॥

अयुक्तकार्यं हेतुमुदाहरति—राज्ञामिति । देव त्वच्चरणयुगुलस्य रागः रक्तिमा स एव बालातपः मृदुसूर्यरश्मिः राज्ञां हस्ता एव अरविन्दानि तानि स्पृशन् कुतः कुड्मलीकुरुते मुकुलीकरोति । बालातपस्पर्शेन अरविन्दानां विकास एव भाव्यः न तु संकोचः । अतः अरविन्दसंकोचविधानम् बालातपस्य अयुक्तमिति अयुक्तकार्योयं हेतुः । स च राजविषयकरतेः पोषकतया चमत्कारविषयत्वान्मनोरम इति ध्येम् । अत्र हस्तारविन्दानां कुड्मलीकरणं प्रणामाञ्जलिरूपतया ज्ञेयम् ॥ २५८ ॥

युक्तकार्यमुदाहरति—पाणिपद्मानीति । त्वत्पादनखचन्द्राणां तव पदनखान्येव चन्द्राः तेषां कुन्दनिर्मलाः कुन्दकुसुमधवलाः अर्चिषः कान्तयः भूपानां पाणिपद्मानि हस्तकमलानि संकोचयितुम् प्रणामाञ्जलिविधायकत्वेन मुकुलीकर्तुम् ईशते समर्था भवन्ति । अत्र चन्द्रार्चिषां पद्मनिमीलनं युक्तमेव इति युक्तकार्योयं हेतुः । स च राजविषयकरतिपोषकतया सविशेषचमत्कारकारीति बोध्यम् ॥ २५९ ॥

हेतुमुपसंहरति—इतीति हेतोर्विकल्पानां प्रभेदानामीदृशी एवंप्रकारा गतिः पद्धतिः दर्शिता निरूपिता । अनेन प्रकारेण अन्येपि हेत्वलंकारभेदा

ii. 257—समृद्धो for उदीर्णो Pn.
ii. 258—राव for राग P and after him B; this seems to be P's guess as no Mss. support him.
ii. 259—कोमलाः for निर्मलाः M.
ii. 260—विकल्पस्य for विकल्पानां D, V, J.

इङ्गिताकारलक्ष्योर्थः सौक्ष्म्यात् सूक्ष्म इति स्मृतः॥२६०॥
कदा नौ संगमो भावीत्याकीर्णे वक्तुमक्षमम् ।
अवेत्य कान्तमबला लीलापद्मं न्यमीलयत् ॥ २६१ ॥
पद्मसंमीलनादत्र सूचितो निशि संगमः ।

३ज्ञेयाः इति भावः । ते च अहेत्वादयो सरस्वतीकण्ठाभरणतो ज्ञातव्याः । अत्रास्माभिर्विस्तरभिया न दर्शिताः । सूक्ष्मालंकारं निर्दिशति—इङ्गितेति । इङ्गितं स्वाभिप्रायसूचकः शरीरावयवव्यापारः । आकारः ६अन्तर्भावसूचको रूपादेरन्यथाभावः ताभ्यां लक्ष्यः अनुमेयः अर्थः प्रतिपाद्यविषयः । स च क्वचित् अभिलाषाद्यभ्यन्तरविषयः क्वचिच्च रहःक्रियमाणबहिर्विषयो वेति द्विधा । सौक्ष्म्यात् सूक्ष्ममति- ९वेद्यत्वात् साधारणपुरुषदुर्ज्ञेयत्वाच्च सूक्ष्मः सूक्ष्माभिधः स्मृतः । तथा च इङ्गिताकाराभ्यां सूक्ष्ममतिज्ञेयं अर्थस्य वर्णनं सूक्ष्मालंकारः इति लक्षणं ११संपन्नम् । प्रकाशकारादयस्तु (P. 866)—

कुतोपि लक्षितः सूक्ष्मोप्यर्थोन्यस्मै प्रकाश्यते ।
धर्मेण केनचिद्यत्र तत् सूक्ष्मं परिचक्षते ॥

इत्याहुः । तथा च कुतोपि आकारादिङ्गिताद्वा लक्षितस्य सूक्ष्मार्थस्य १५तीक्ष्णमतिसंवेद्यार्थस्य केनचिद्भङ्ग्यन्तरेण यत् सूचनं स सूक्ष्मः इति तदभिप्रायः ॥ २६० ॥

इङ्गितलक्ष्यार्थमुदाहरति—कदेति कदा कस्मिन् समये नौ आवयोः संगमः समागमः भावि भविष्यति इति आकीर्णे जनसंकुले स्थाने वक्तुं ३प्रष्टुमिति भावः अक्षमम् असमर्थम् । नायकेन वाचा अपृष्टमपि तदीयमुख-च्छायया तं प्रश्नमनुमीयेत्यर्थः । एतादृशं कान्तं नायकम् अवेक्ष्य सा नायिका लीलापद्मं क्रीडाधृतकमलं अमीलयत् संकोचयामास ॥ २६१ ॥

उदाहरणं विशदयति—पद्मेति । अत्र अस्मिन् पद्ये अङ्गजपीडितं मदन-परितप्तं प्रियम् आश्वासयितुं समाधातुम् इच्छन्त्या नायिकया पद्मसंमील- ३नात् निशि रात्रौ भावीति शेषः संगमः सूचितः लक्षितः । अत्र पद्मनि-

ii. 261—उत्तमम् for अक्षमम् D;—अवेक्ष्य for अवेत्य J, P, R D; अवैत्य V.
ii. 262—पद्मस्य मीलनात् for पद्मसंमोलनात् Rn.

आश्वासयितुमिच्छन्त्या प्रियमङ्गजपीडितम् ॥ २६२ ॥
त्वदर्पितदृशस्तस्या गीतगोष्ठ्यामवर्धत ।
उद्दामरागतरला छाया कापि मुखाम्बुजे ॥ २६३ ॥
इत्यनुद्भिन्नरूपत्वाद्रत्युत्सवमनोरथः ।
अनुल्लङ्घ्यैव सूक्ष्मत्वमभूदत्र व्यवस्थितः ॥ २६४ ॥
लेशो लेशेन निर्भिन्नवस्तुरूपनिगूहनम् ।

मीलनरूपेङ्गितेन निशि संगमः भावीति प्रियाय सूक्ष्मतया सूचितम् इति सूक्ष्मालंकारः । तच्च सूचनं सहृदयचमत्कारि अतः अस्यालंकारत्वं निर्बाधमेव ॥ २६२ ॥

आकारलक्ष्यार्थमुदाहरति—मदर्पितेति । गीतगोष्ठ्यां संगीतशालायां मदर्पितदृशः मयि बद्धदृष्ट्याः तस्याः नायिकायाः मुखाम्बुजे उद्दामरागतरला उद्दामः मर्यादातिक्रान्तः यः रागः अनुरागः तेन तरला तेजोभासुरा पूर्णानुरागसूचिकेत्यर्थः । कापि अनिर्वचनीया छाया कान्तिः अवर्धत । अत्र मुखच्छायावैलक्षण्यरूपाकारविशेषेण नायिकाया रत्युत्सवाभिलाषः सूक्ष्मतया दर्शितः इति सूक्ष्मालंकारः ॥ २६३ ॥

उदाहरणे लक्षणं संगमयति—इति इति । इति एवं केवलं छायायैव सूक्ष्मरूपेण दर्शितत्वात् अनुद्भिन्नरूपत्वात् स्फुटतया अप्रतीयमानत्वात् सूक्ष्मत्वम् अनुल्लङ्घ्यैव अपरित्यज्यैव रत्युत्सवमनोरथः व्यवस्थितः वर्णितः अभूत् । अतः सूक्ष्मप्रकारेण मनोरथाविष्कारवर्णनात् सूक्ष्मालंकार इति भावः । अत्र केचित् उद्दामरागतरला मुखच्छाया तावत् रत्युत्सवमनोरथस्यैवानुभाव इति न नियमः विषयान्तरमनोरथादिनापि तत्संभवादित्यनैकान्तिकत्वान्न स्फुटतरं तादृशमनोरथं लक्षयति । लक्षयिता तु स्वीयविलक्षणसहृदयतासधीचीनया तया कथंचिल्लक्षयतीति सूक्ष्मत्वमेव रत्युत्सवविषयस्येत्याहुः ॥ २६४ ॥

क्रमप्राप्तं लवापरपर्यायं लेशं निरूपयति—लेश इति । लेशेन स्वल्प-

---

ii. 263—मदर्पित for त्वदर्पित P and after him B; तदर्पित J,—अवर्तत for अवर्धत D; अवर्धयत् V.

ii. 264—अलाप्यवस्थितः for अत्र व्यवस्थितः N (fol. 28 after the long lacuna, Pn, D.

ii. 265—लवो for लेशो M;—निगूहनात् for निगूहनम् N, V.

उदाहरण एवास्य रूपमाविर्भविष्यति ॥ २६५ ॥

राजकन्यानुरक्तं मां रोमोद्भेदेन रक्षकाः ।

तया निर्भिन्नं प्रकटीभूतं यद्वस्तुनो गोप्यविषयस्य रूपं स्वरूपं तस्य निगू-
३हनम् संवरणं लेशः लेशनामालंकारः । केचित्तु लेशेन व्याजेन वस्तुरूपनिहनुतं लेशोलंकारः इति विवृण्वन्ति । तथा च कारणान्तरो-त्पन्नस्य प्रकटीभूतस्य वस्तुनः कारणान्तरोत्पन्नत्वकथनेन तदाच्छादनं
६लेशः इति भावः । स च वस्तुरूपनिर्भेदः क्वचित् रोमादिगात्रविकारैः क्वचिद्वक्तुरनवधानतया संभवति । इमं नव्याः व्याजोक्तिं वदन्ति । तथा च प्रकाशकारः—व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम् । इति । अप्पय्य-
९दीक्षितवर्णिता छेकापह्नुतिरपि अस्यैव प्रभेदः । तल्लक्षणोदाहरणं तु—

छेकापह्नुतिरन्यस्य शङ्कातस्तथ्यनिह्नवे ।
प्रजल्पन् मत्पदे लग्नः कांतः किं न हि नूपुरः ॥ इति ।

१२अन्यान्यपि उदाहरणानि—

समये पयोधराणामपतितया नैव शक्यते स्थातुम् ।
उत्कण्ठितासि बाले नहि नहि सखि पिच्छिलः पन्थाः ॥

१५यथा वा—

सीत्कारं शिक्षयति व्रणयत्यधरं तनोति रोमाञ्चम् ।
नागरिकः किं मिलितः नहि नहि सखि हैमनः पवनः ॥ इति ।

१८ननु नास्त्यत्रलेशनिर्भिन्ननिगूहने कश्चिच्चमत्कार इति नायं अलंकारः । तदेतन्मतं निराकर्तुमाह उदाहरणे इति । अस्य अलंकारस्य उदाहरणे एव रूपं चमत्कृतिस्वरूपं आविर्भविष्यति प्रकटीभविष्यति ॥ २६५ ॥

उदाहरणं दर्शयति—राजेति । रक्षकाः राजान्तःपुराधिकृताः रोमो-द्भेदेन रोमहर्षेण मां राजकन्यानुरक्तं नृपकन्यकाभिलाषुकम् अवगच्छेयुः
३जानीयुः संभावनायां लिङ् । आः ज्ञातम् । आः इति स्मरणे । निगूहनप्रकारः कल्पित इत्यर्थः । अहो इति विस्मये । वनं शीता-निलम् शीतः अनिलः वायुर्यत्र तत् । शीतानलसंपर्केण रोमोद्गम इति भावः ।
६अत्र शीतानलसंपर्केण रोमोद्गमस्य व्यवस्थापनात् अनुरागनिगूहनं संपा-

अवगच्छेयुराः ज्ञातमहो शीतानिलं वनम् ॥ २६६ ॥
आनन्दाश्रु प्रवृत्तं मे कथं दृष्ट्वैव कन्यकाम् ।
अक्षि मे पुष्परजसा वातोध्दूतेन दूषितम् ॥ २६७ ॥
इत्येवमादिस्थानेयमलंकारोतिशोभते ।

दितम् तच्च वैचित्र्यातिशालि इति युक्तमस्यालंकारत्वम् । निर्भिन्नवस्तुनि-गूहनम् अनिष्टसंभावनया लज्जया वा भवति । अत्र अनिष्टसंभावनया [5]लज्जया तु अग्रिमोदाहरणे इति ज्ञेयम् ॥ २६६ ॥

लज्जया निगूहनात्मकं लेशमुदाहरति—आनन्देति । कन्यकां विवाह-मण्डपे आगतां कन्यकां दृष्ट्वैव मे आनन्दाश्रु कथं प्रवृत्तम् । एवं कन्यका-[3]दर्शनेन आनन्दाश्रुप्रवृत्तिः चित्तचाञ्चल्यसूचिका । इति आशंक्य निगू-हति । मे अक्षि नयनं वातोद्धूतेन पवनोक्षिप्तेन पुष्परजसा कुसुमपरागेण दूषितम् इति । अत्र आनन्दाश्रुणः पुष्परजोदूषिताक्षिजत्वप्रतिपादनेन [6]निगूहनात् लेशालंकारः ॥ २६७ ॥

उदाहरण एवास्य रूपमाविर्भविष्यति इति प्रतिज्ञानुरोधेन उदाहरणं प्रदर्श्य तत्र वैचित्र्यं दर्शयन् उपसंहरति—इत्येवमिति । इत्येवमादिस्थाने [3]एवंविधस्थले अयंमलंकारः लेशः अतिशोभते चमत्कृतिविशेषमावहति । अतः परोक्तं लेशस्य अनलंकारत्वं न स्वीकर्तव्यं इति भावः । लेशस्य अपरं प्रकारं दर्शयति लेशमिति । एके पण्डिताः लेशतः कृतां स्तुतिं वा [6]निन्दां वा लेशं विदुः जानन्ति । तथा च स्तुतिमिषेण कृता निन्दा निन्दा-मिषेण कृता स्तुतिर्वा लेश इत्यर्थः । यथा लेशेन निर्भिन्नवस्तुनि गूहना-लेशालंकारः तथा लेशेन स्तुतिनिन्दाविधानेपि स एव अलंकारः [5]उचितः । चमत्कृतौ लेशस्य प्राधान्यात् । एवं च व्याजस्तुत्यलंकारा-

---

ii. 266—आ for आः all except N, Ca, Cb;—शीतातिलम्बनम् for शीतानिलं वनम् M; शीतातिलङ्घनम् D's marginal emendation.

ii. 267—अक्षिणी for अक्षि मे and दूषिते for दूषितम् D.

ii. 268—इत्येवमादौ for इत्येवमादि N, M, V;—अपि शोभते for अतिशोभते N.

लेशमेके विदुर्निन्दां

१०न्तराभ्युपगमनं न युक्तम् ।

दोषस्य यो गुणीभावो दोषीभावो गुणस्य वा ।
स लेशः स्यात् ततो नान्या व्याजस्तुतिरपीष्यते ॥

१३इति प्राञ्चः । अप्पयदीक्षितास्तु—

लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनम् ।
अखिलेषु विहङ्गेषु हन्त स्वच्छन्दचारिषु ।
शुक पञ्जरबन्धस्ते मधुराणां गिरां फलम् ॥

१७इति लक्षणोदाहरणं प्रदर्श्य अग्रे आहुः । दण्डी त्वत्रोदाजहार—

युवैष गुणवान् राजा योग्यस्ते पतिरूर्जितः ।
रणोत्सवे मनः सक्तं यस्यकामोत्सवादपि ॥
चपलो निर्दयश्चासौ जनः किं तेन मे सखि ।
आगः प्रमार्जनायैव चाटवो येन शिक्षिताः ॥ इति ।

२२अत्राद्यश्लोके राज्ञो वीर्योत्कर्षस्तुतिः । कन्याया निरन्तरसंभोगनिर्विवर्तिषया दोषत्वेन प्रतिभासतामित्यभिप्रेत्य विदग्धया सख्या राजप्रकोप-
२४परिजिहीर्षया स एव दोषो गुणत्वेन वर्णितः । उत्तरश्लोके सखीभिरुपदिष्टं मानं कर्तुमशक्तयापि तदग्रतो मानपरिग्रहानुगुण्यं प्रतिज्ञाय तदनिर्वाहमाशङ्कमानया सखीनामुपहासं परिजिहीर्षन्त्या नायिकया नायकस्य
२७चाटुकारितागुण एव दोषत्वेन वर्णितः । न चाद्यश्लोके स्तुतिः निन्दापर्यवसायिनी द्वितीयश्लोके निंदा स्तुतिपर्यवसायिनीति व्याजस्तुतिराशंकनीया । राजप्रकोपपरिहारार्थमिह निन्दास्तुत्योरन्याविदिततया लेशत
३०एवोद्घाटनेन ततो विशेषादिति । वस्तुतस्तु इह व्याजस्तुतिसद्भावेपि न दोषः । नहि एतावता लेशमात्रस्य व्याजस्तुत्यन्तर्भावः प्रसज्जते । तदसंकीर्णयोरपि लेशोदाहरणयोर्दर्शितत्वात् । नापि व्याजस्तुतिमात्रस्य
३३लेशे अन्तर्भावः प्रसज्जते । भिन्नविषयव्याजस्तुत्युदाहरणेषु—

कस्त्वं वानर रामचन्द्रभवने लेखार्थसंवाहको
यद्वक्त्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटून् मृषा ।

३६इत्यादिषु दोषगुणीकरणस्य गुणदोषीकरणस्य चाभावात् तत्र अन्यगुण—

ii. 268—लेशं केचिद् for लेशमेके N.

स्तुतिं वा लेशतः कृताम् ॥ २६८ ॥

युवैष गुणवान् राजा योग्यस्ते पतिरूर्जितः ।

३७दोषाभ्यां अन्यत्र गुणदोषयोः प्रतीतेः । विषयैक्येपि—

इन्दोर्लक्ष्म त्रिपुरजयिनः कण्ठमूलं मुरारिः
दिङ्नागानां मदजलमषीभाञ्जि गण्डस्थलानि ।
अद्याप्युर्वीवलयतिलक श्यामलिम्नानुलिप्तान्या-
भासन्ते वद धवलितं किं यशोभिस्त्वदीयैः ॥

४२इत्याद्युदाहरणेषु लेशास्पर्शनात् ! तत्र हीन्दुलक्ष्मादीनां धवलीकरणाभाव-दोष एव गुणत्वेन न पर्यवस्यति किंतु परिसंख्यारूपेण ततोन्यत् सर्वं धवलितमित्यन्यो गुणः प्रतीयते । क्वचिद् व्याजस्तुत्युदाहरणे गुणदोषी-

४५करणसत्वेपि स्तुतेर्विषयान्तरमपि दृश्यते । यथा—

सर्वदा सर्वदोसीति मिथ्या संस्तूयसे बुधैः ।
नारयो लेभिरे पृष्ठं न वक्षः परयोषितः ॥

४८अत्र हि वाच्यया निन्दया परिसंख्यारूपेण ततोन्यत् सर्वमर्थिनामभिमतं दीनारादि दीयते इति स्तुत्यन्तरमपि प्रतीयते । एवं च येषूदाहरणेषु—कस्ते शौर्यमदो योद्धुम् इत्यादिषु—गुणदोषादिषु गुणदोषीकरणादिक्रमेव

५१व्याजस्तुतिरूपतयावतिष्ठते तत्र लेशव्याजस्तुत्योः संकरोस्तु । इत्याहुः । जगन्नाथोपि—न चायमलंकारः व्याजस्तुत्या उभयरूपया गतार्थ इति शङ्क्यम् । मुखप्रतिपादितार्थवैपरीत्येन अत्र सर्वत्र पर्यवसानाभावात् इत्यादि

५४प्रबन्धेनामुमेव सिद्धान्तं दर्शयामास इत्यलं पल्लवितेन ॥ २६८ ॥

स्तुतिव्याजेन निन्दारूपं लेशमुदाहरति—युवैष इति । एषः राजा युवा गुणवान् ऊर्जितः तेजस्वी ते योग्यः समुचितः पतिः भवितुमर्हति ।

३यस्य मनः कामोत्सवादपि रणोत्सवे संग्रामविहारे सक्तम् । स्वयंवर-प्रसक्तां राजकन्यां प्रति तत्सख्या उक्तिरियम् । तेन मुखतः अतिवीरोयं व्रियतामिति रणोत्सवे मनः सक्तं यस्य कामोत्सवादपि इत्यनेन

६स्तुत्यवगतावपि पर्यवसाने सर्वथा रणव्यग्रोयं नानेन ते पर्याप्तरतिसुख-

---

ii. 269—युवैव for युवैष D, M, V;—राजा गुणवान् for गुणवान् राजा M.

रणोत्सवे मनः सक्तं यस्य कामोत्सवादपि ॥ २६९ ॥
वीर्योत्कर्षस्तुतिर्निन्दैवास्मिन् भावनिवृत्तये ।
कन्यायाः कल्पते भोगान् निर्विविक्षोर्निरन्तरान् ॥२७०॥
चपलो निर्दयश्चासौ जनः किं तेन मे सखि ।
आगःप्रमार्जनायैव चाटवो येन शिक्षिताः ॥ २७१ ॥
दोषाभासो गुणः कोपि दर्शितश्चाटुकारिता ।

लाभः स्यादिति संभोगाभिलाषुकायाः निवेदनान्निंदाया एव अवबोधो भवति । अतः स्तुतिमिषेण निन्दाविधानात् लेशालंकारः ॥ २६९ ॥

उदाहरणं विशदयति—वीर्येति । अस्मिन् पद्ये निरन्तरभोगान्-
निर्विविक्षोः सततभोगाभिलाषुकायाः कन्याया भावनिवृत्तये भावः मनो-
३रागः वरणाभिप्रायो वा तन्निवृत्तये राज्ञः वीर्योत्कर्षस्तुतिः निन्दैव कल्पते निन्दात्वेन परिणमति ॥ २७० ॥

निन्दाव्याजेन स्तुतिमाह—चपल इति । मानपरिपालनमेव मनस्विन्या गौरवहेतुः अतस्त्वया प्रेयसि स विधेय इति उपदेशयन्त्याः सख्याः पुरतः
३प्रतिज्ञातमपि मानस्वीकारं तदनुष्ठातुमसमर्थाया स्वोपहासपरिजिहीर्षन्त्या नायिकाया उक्तिरियम् । हे सखि असौ मन्नायकरूपः जनः चपलः चञ्चलस्वभावः । निर्दयश्च परपीडानभिज्ञतया दयाशून्यश्चास्ति । येन आगः-
६प्रमार्जनायैव अपराधनिराकरणायैव चाटवः प्रियालापाः शिक्षिताः । अतः तेन भवतीभिरुपदिष्टेन मानेन किम् । न किमपि प्रयोजनमित्यर्थः । सः चाटुप्रयोगचतुरः धृतमपि मानं शिथिलयतीत्यर्थः ॥ २७१ ॥

उदाहरणं विशदयति—दोषाभास इति । रागात् प्रियस्नेहात् सखीजनो-
द्दिष्टं सखीजनापेक्षितम् । सखीजनोपदिष्टमिति केचित् । मानं कर्तुं
२अनुष्ठातुम् अशक्तया नायिकया चाटुकारतारूपः कोपि गुणः

---

ii. 269—शक्तं for सक्तं N, V.
ii. 270—निरन्तरम् for निरन्तरान् P, B, Rn, D, M, J.
ii. 271—समार्जनायैव for प्रमार्जनायैव D, V, Cs.
ii. 272—कश्चित् for कोपि D, N;—दर्शिता for दर्शितः D;—गुणायैव for गुणः कोपि Rn.

मानं सखिजनोद्दिष्टं कर्तुं रागादशक्तया ॥ २७२ ॥

॥ इति लेशचक्रम् ॥

उद्दिष्टानां पदार्थानामनूद्देशो यथाक्रमम् ।
यथासंख्यमिति प्रोक्तं संख्यानं क्रम इत्यपि ॥ २७३ ॥
ध्रुवं ते चोरिता तन्वि स्मितेक्षणमुखद्युतिः ।

स्त्रीजनमनोहारी दोषाभासः दोष इव आभासते स दोषाभासः कृतः । दोषत्वेन निरूपित इत्यर्थः । अत्र निन्दाव्याजेन स्तुतिर्दर्शिता इति [6]लेशः ॥ २७२ ॥

हेतुः सूक्ष्मो लवः क्रमः इति क्रमप्राप्तं क्रममुदाहरति—उद्दिष्टानामिति । उद्दिष्टानाम् प्रथमं कथितानां पदार्थानां यथाक्रमम् उद्देश-[2]क्रमानुरूपमेव अनूद्देशः पश्चादुक्तानां तत्संबन्धिनां कथनं यथासख्यं तत्संज्ञकोलंकारः । पूर्वोक्तानां तदनुरोधेन पश्चादुक्तैः पदार्थैः सहान्वयः यथासंख्यालंकार इति भावः । उद्देशवाक्यगतस्य क्रमपदस्य सङ्गतिं [6]दर्शयति संख्यानं क्रम इत्यपीति । यथासंख्य एव संख्यानक्रमपर्यायः इत्यर्थः । तदुक्तं भामहेन (ii.88)—

यथासंख्यमथोत्प्रेक्षामलंकारद्वयं विदुः ।
संख्यानमिति मेधाविनोत्प्रेक्षाभिहिता क्वचित् ॥ इति

[10]अनेन मेधावी यथासंख्यं संख्यानमिति अभिधत्ते इति स्पष्टम् । भोजराजः यथासंख्यं क्रमशब्देन व्यवहरति ॥ २७३ ॥

यथासंख्यमुदाहरति—ध्रुवं ते इति । हे तन्वि स्नातुम् अम्भः प्रविष्टायाः जलगतायाः ते । स्मितेक्षणमुखद्युतिः कुमुदोत्पलपङ्कजैः [3]ध्रुवं निश्चयेन चोरिता अपहृता । अत्र कुमुदानां श्वेतत्वं उत्पलानां नीलत्वं पङ्कजानां च आरक्तत्वं ज्ञेयम् । तेन साम्यप्रतीतिः । तथा च कुमुदेन स्मितद्युतिः उत्पलेन ईक्षणद्युतिः पङ्कजेन मुखद्युतिश्च चोरिता इति [6]पूर्वक्रमानुरोधेन उत्तरत्र क्रमः इति यथासंख्यम् । अन्यदुदाहरणं यथा—

एकस्त्रिधा वससि चेतसि चित्रमत्र

---

ii. 273—अनुद्देशो for अनूद्देशो Ch, D, V; अनुदेशो R, M.

स्नातुमम्भःप्रविष्टायाः कुमुदोत्पलपङ्कजैः ॥ २७४ ॥

॥ इति क्रमः ॥

प्रेयः प्रियतराख्यानं

देव द्विषां च विदुषां च मृगीदृशां च ।
तापं च संमदरसं च रतिं च पुष्णन्
शौर्याप्मणा च विनयेन च लीलया च ॥ इति ॥ २७४ ॥

व्यङ्ग्यस्य संलक्ष्यक्रमासंलक्ष्यक्रमौ इति द्वौ भेदौ प्रागस्माभिर्निरूपितौ। तत्र संलक्ष्यक्रमाणां वस्त्वलङ्काररूपव्यङ्ग्यानां वाच्यार्थस्य शोभाजनकतया समासोक्तिरूपकादिनाम्नालङ्कारत्वमुक्तम् । असंलक्ष्यक्रमाणां रसादिवाक्यानामपि वाच्योपस्कारेण अलंकारत्वमुचितमिति तदुपजीवि प्रेयोरसवदूर्जास्वि इत्यलंकारत्रयं दर्शयति—प्रेय इति । त्रयाणामसंलक्ष्यक्रमत्वरूपैकधर्मत्वात् एकत्र निवेशः । तेषु प्रियतरं भावाभिव्यक्त्या बोद्धव्यस्य प्रीत्यतिशयकरं वक्तुर्वा प्रीत्याधिक्यसूचकमाख्यानं प्रेयः प्रेयोनामालंकारः । अतिशयेन प्रियत्वात् प्रेयः इत्यर्थः । भावाश्च देवतागुरुशिष्यद्विजपुत्रादावभिव्यज्यमाना रतिः तथा विभावानुभावाभ्यां व्यञ्जितः निर्वेदादित्रयस्त्रिंशद्भेदो भावः व्यभिचारिणो भावाश्च । उक्तं च प्रकाशे—रतिर्देवादिविषया व्यभिचारी तथाञ्जितः । भावः प्रोक्तः इति । देवादिविषयेत्यप्राप्तरसावस्थोपलक्षणम् । तदुक्तं—

रत्यादिश्चेन्निरङ्गः स्याद्देवादिविषयोथवा ।
अन्याङ्गभावभाग्वा स्यान्न तदा स्थायिशब्दभाक् ॥ इति ।

आचार्यदण्डिनस्तु देवादिविषयकरतिभावव्यञ्जकमाख्यानं प्रेयोलंकारस्य विषयतयाभिप्रेतमिति उदाहरणानुरोधादवगम्यते । एवं च कथनचातुरीवशेन व्यज्यमाना देवादिविषयिका रतिर्यत्र वाच्योपस्कारिका तत्र प्रेयोलंकारः इति लक्षणं निष्पन्नम् । तथा रसपेशलं रसेन रत्यादिस्थायिभावरूपेण पेशलं सहृदयानन्दजननमाख्यानं रसवदलंकारः । तथा रूढः अभिव्यक्तः गर्वः अहंकारो यत्र तादृशमाख्यानम् ऊर्जास्वि । आख्यानचातुर्येण प्रधानतयाभिव्यज्यमानो गर्वाख्यो व्यभिचारिभावः ऊर्जस्विनामालंकार इत्यर्थः । गर्वलक्षणं हि—

गर्वोभिजनलावण्यधनैश्वर्यादिभिर्मदः ।

रसवद्

सविलासाङ्गवीक्षाविनयावज्ञादिकृत्त सः । इति ॥

२५युक्तोत्कर्षं चेति । युक्तः अलंकारव्यपदेशोपयुक्ता उत्कर्षः वाच्यशोभा यस्मात् तत् ॥ तत् त्रयं तेषां प्रेयःप्रभृतीनां त्रयम् अलंकारव्यपदेशार्हं २७भवतीत्यर्थः । सादृश्यादयो वाच्यार्थशोभाजनकत्वाद्यथा उपमालङ्कारादयो भवन्ति भावादयोपि तेनैव कारणेन अलंकारव्यवहार्या भवितुं युक्ता इत्यर्थः । अत्र प्रसङ्गतः रसभावानां किंचित् स्वरूपं दर्शयामः । तत्र विभावा- ३०नुभावव्यभिचारिभिर्व्यञ्जितो रतिहासशोकादिश्चित्तवृत्तिविशेषो रसः । तदुक्तम्—

विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः ।
आनीयमानः स्वाद्यत्वं स्थायीभावो रसः स्मृतः ॥ इति ।

३४भरतोपि विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः । इत्याह । तत्र विभावाः वासनारूपतया अतिसूक्ष्मरूपेण अवस्थितान् रत्या- ३६दीन् स्थायिभावापरपर्यायान् विभावयन्ति आस्वादयोग्यतां नयन्ति ते ललनानायकचन्द्रिकावसन्तादयो ज्ञेयाः । तत्र ललनानायकौ आलम्बन-विभावौ चन्द्रिकावसन्तादयश्चोद्दीपनविभावाः इति विवेकः । अनुभावाश्च ३९रत्यादीन् स्थायिनो येनुभावयन्ति अनुभवविषयीकुर्वन्ति ते अनुभावाः कटाक्षभुजाक्षेपरोमाञ्चप्रभृतयः । अथवा अनु रसोद्बोधानन्तरमुद्भवन्ति रसकार्यरूपा ते अनुभावा कटाक्षरोमाञ्चादयः । व्यभिचारिणस्तु विशेषेण ४२अभितः सर्वाङ्गव्यापितया रत्यादीन् स्थायिनः काये चारयन्ति संचार-यन्ति मुहुर्मुहुरभिव्यञ्जयन्ति ते निर्वेदग्लानिशङ्कादयः त्रयस्त्रिंशत् ज्ञेयाः । तत्र संयोगात् नाम विभावैरुत्पाद्योत्पादकरूपसंबन्धात् अनुभावैर्गम्य- ४५गमकभावरूपसंबन्धात् व्यभिचारिभिश्च पोष्यपोषकभावरूपसंबन्धाच्च रस-निष्पत्तिर्नाम विभावैरुत्पत्तिः अनुभावैरभिव्यक्तिः व्यभिचारिभिः पुष्टिश्च स्थायिनो भवन्ति इति भट्टलोल्लटः । विभावादिभिः संयोगात् गम्यगमकभाव- ४८रूपात् अनुमाप्यानुमापकभावरूपात् संबन्धात् रसस्य निष्पत्तिरिति श्रीशङ्कुकः । विभावादिभिः संयोगात् भोज्यभोजकरूपसंबधात् रसस्य निष्पत्तिर्भुक्तिरिति भट्टनायकः । अभिनवगुप्तपादास्तु स्थायिनां विभा- ५१वादिभिः समं संयोगात् व्यङ्ग्यव्यञ्जकभावरूपात् संबन्धात् विभावादीनां वा

रसपेशलम् ।

परस्परसंयोगात् मीलनात् रसस्य निष्पत्तिरभिव्यक्तिः इति सूत्रार्थं विवृण्वन्ति । अयमेव चालंकारिकसंमतोर्थः । विस्तरस्तु काव्यप्रकाशे
५४तट्टीकादौ च द्रष्टव्यः । रसविशेषाश्च—

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्साद्भुतसंज्ञाश्चेत्यष्टौ नाट्ये रसाः स्मृताः ॥

५७इति भरतेनोपदिष्टाः । एषां स्थायिभावाश्च तेनैव कथिताः । यथा—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥ इति ।

६०स्थायित्व लक्षणं तु—

विरुद्धा अविरुद्धा वा यं तिरोधातुमक्षमाः ।
आनन्दाङ्कुरकन्दोसौ भावः स्थायिपदास्पदम् ॥ इति ।

६३एवमेव पण्डितजगन्नाथोपि (P. 31)—

सजातीयविजातीयैरतिरस्कृतमूर्तिमान् ।
यावद्रसं वर्तमानः स्थायिभाव उदाहृतः ॥

६६इति लक्षणमाह । तत्र स्त्रीपुंसयोरन्योन्यालम्बनः प्रेमाख्यश्चित्तवृत्तिविशेषो रतिस्थायिभावः । वागङ्गादिविकारदर्शनजन्मा चेतोविकासो हासः । पुत्रादिवियोगमरणादिजन्मा वैक्लव्याख्यश्चित्तवृत्तिविशेषः शोकः । गुरुबन्धु-
६९वधादिपरमापराधजन्मा प्रज्वलनाख्यः क्रोधः । परपराक्रमदानादिस्मृतिजन्मा औन्नत्याख्यः उत्साहः । व्याघ्रदर्शनादिजन्मा परमानर्थविषयको वैक्लव्याख्यः चेतोविशेषः भयम् । कदर्यवस्तुविलोकनजन्मा विचिकित्सा-
७२ख्यश्चित्तवृत्तिविशेषो जुगुप्सा । अलौकिकवस्तुदर्शनादिजन्मा आश्चर्याख्यो विस्मयः । अनुभावास्तु—

अनुभावो विकारस्तु भावसंसूचनात्मकः ।
स्तम्भप्रलयरोमाञ्चाः स्वेदो वैवर्ण्यवेपथू ॥
अश्रु वैस्वर्यमित्यष्टौ सात्विकाः परिकीर्तिताः ।

७७इत्युक्तलक्षणाः । एषामुदाहरणानि विस्तरभयान्न प्रदर्श्यन्ते रसगङ्गाधरादौ

तेजस्वि

७८तानि अनुसर्तव्यानि तत्र । शृङ्गारस्य द्वौ प्रभेदौ संभोगविप्रलम्भौ चेति। रतेः संयोगकालावच्छिन्नत्वे प्रथमः । वियोगकालावच्छिन्नत्वे द्वितीयः। संयोगवियोगौ च दम्पत्योः आवां संयुक्तवियुक्तौ इत्याकारिकौ
८१अन्तःकरणवृत्तिविशेषौ ग्राह्यौ । तेन एकतल्पशयनेपि ईर्ष्यादिसद्भावे विप्रलम्भवर्णनमुचितम् इति ज्ञेयम् । व्यभिचारिणो भावास्तु—

निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः ।
८४आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥
व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्रा विस्मृतिरेव च ॥
८७त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
स्वप्नो विबोधोमर्षश्चाप्यवहित्थमथोग्रता ॥
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ।
९०त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः ॥

इति भरतेनोक्ताः । एषामपि लक्षणोदाहरणानि प्रकाशादौ द्रष्टव्यानि प्रकाशकाराः—निर्वेदस्थायिभावोस्ति शान्तोपि नवमो रसः । इति
९३शान्तं रसं स्वीकुर्वन्ति । केचित् अस्य शमस्थायिभावत्वं स्वीकुर्वन्ति । निर्वेदो नाम नित्यानित्यवस्तुविचारजन्मा विषयविरागः । रसभावविवेचनविस्तारस्तु नाट्यशास्त्रे षष्ठसप्तमाध्याये ध्वन्यालोकादौ च द्रष्टव्यः ।
९६अत्रेदमवधार्यम् । उपर्युक्तभावेषु देवादिविषयकरतिभावस्य प्रेयोनामालंकारत्वम् गर्वाख्यभावस्य च ऊर्जस्विनामालंकारत्वम् अवशिष्टभावानां तथा रसाभासभावाभासभावशान्तिभावोदयभावशबलतानां च
९९रसवदलंकारत्वं बोध्यम् । रसपेशलम् इत्यत्र रसपदस्य रस्यमानपरत्वात् भावानामपि रसपदेनैव संग्रहो ज्ञेयः । तथा चोक्तम्—

रसभावौ तदाभासौ भावस्य प्रशमोदयौ ।
१०२सन्धिः शबलता चेति सर्वेपि रसनाद्रसाः ॥ इति ।

आचार्यदण्डिनो मते एते अङ्गित्वेनाङ्गत्वेन वाभिव्यज्यमाना अलंकारतां

रूढाहंकारं

प्राप्नुवन्ति । उभयोरपि काव्यशोभाजनकत्वाविशेषात् । ननु अ-
१०५ङ्गिनो रसादेरलंकार्यत्वात् कथमलंकारत्वम् रसस्य प्राधान्येलंकार्यत्वम्
तदन्यत्र चालंकारत्वमुक्तं ध्वन्यालोकलोचनकारैः यथा—

प्रधानेन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः ।
काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः ॥ इति ।

१०६परं दण्डिनो मर्ते शब्दार्थात्मकस्य काव्यस्यैवालंकार्यत्वेन तदुपस्कारकस्य
व्यङ्ग्यमात्रस्य काव्यशोभाकरत्वेन अलंकारव्यपदेशे बाधाभावात् । काव्य-
१११शोभाकरान् धर्मानलंकारान् प्रचक्षते । इति अलंकारसामान्यलक्षणस्या-
त्रापि निर्बाधप्रवृत्तेः । यदुक्तं विश्वनाथेन ध्वन्यालोकानुसारिणा (x. 95)—

रसभावौ तदाभासौ भावस्य प्रशमस्तथा ।
गुणीभूतत्वमायान्ति यदालंकृतयस्तदा ॥
रसवत् प्रेय ऊर्जस्वि समाहितमिति क्रमात् ।
भावस्य चोदये सन्धौ मिश्रत्वे च तदाख्यकाः ॥ इति ।

११७तत्र रसवत्प्रेयऊर्जस्विनां लक्षणं मूलकृतोक्तम् । प्रशाम्यदवस्था भाव-
प्रशमः सः यत्र परस्याङ्गं तत्र समाहितालंकारः । भावस्य उद्गमावस्था-
भावोदयः तस्य पराङ्गत्वे भावोदयालंकारः । द्वयोर्विरुद्धयोर्भावयोः पर-
१२०स्परस्पर्धा भावसन्धिः तस्य पराङ्गत्वे भावसन्धिरलंकारः । बहूनां भावा-
नां पूर्वपूर्वोपमर्देनोत्पत्तिर्भावमिश्रत्वम् तस्य पराङ्गत्वे भावमिश्रालंकारः ।
रसस्य अङ्गित्वे अलंकार्यत्वमङ्गत्वेलंकारत्वमिति प्राचां मतं दुषयन्त आहुः
१२३प्रेमचन्द्रशर्माणः । अत्र ते नव्याः प्रष्टव्याः किं प्रधानतया प्रतीयमा-
नस्य व्यङ्ग्यमात्रस्यैवालङ्कार्यत्वम् उत तथाभूतस्य रसादेरेवेति । तत्र न
तावत् प्रथमः समासोक्त्यप्रस्तुतप्रशंसापर्यायोक्तादौ प्रधानतयैवाभिव्यज्य-
१२६मानानां वस्त्वलंकाराणां तैरप्यलंकारत्वाभ्युपगमात् । न च तत्र वाच्या-
र्थस्यैव प्रधानत्वं प्रतीयमानानां वस्त्वलंकाराणां त्वप्रधानत्वम् । अप्रधा-
नानां त्वलङ्कारत्वमुचितमेवेति वाच्यम् । तत्र तत्र व्यङ्ग्यानामेवप्राधा-
१२९न्यस्यानुभवसिद्धतयानपलपनीयत्वात् । नापि द्वितीयः सामान्येन का-
व्यात्मकतयाभ्युपगतानां वस्त्वलंकाररसादिव्यङ्ग्यानां मध्ये वस्त्वलंका-
राणामलंकारत्वम् रसादीनामेवालंकार्यत्वम् इति निर्वक्तुमयोग्यत्वात् ।

युक्तोत्कर्षं च तत् त्रयम् ॥ २७५ ॥

अद्य या मम गोविन्द जाता त्वयि गृहागते ।
कालेनैषा भवेत् प्रीतिस्तवैवागमनात् पुनः ॥ २७६ ॥
इत्याह युक्तं विदुरो नान्यतस्तादृशी धृतिः ।

१३२न च रसादिव्यङ्ग्यस्यैव प्रधानस्य काव्यात्मकत्वादलंकार्यत्वं न वस्त्वलंकारयोः इति विश्वनाथोक्तमादरणीयम् ।

यत्रोन्मदानां प्रमदाजनानामभ्रंलिहः शोणमणीमयूखः ।
सन्ध्याभ्रमं प्राप्तवतामकाण्डेप्यनङ्गनेपथ्यविधिं व्यधत्त ॥

१३६इत्यादौ तेनापि अङ्गभूतेन शृङ्गारेणैव काव्यव्यवहाराभ्युपगमात् । संलक्ष्यक्रमव्यङ्ग्यरूपध्वनिभेदस्य सर्वैः आलंकारिकैरभ्युपगतत्वेन रसा-
१३८देरेव काव्यात्मत्वप्रतिपादनस्य बहुशो दूषितत्वाच्च । तस्मात् व्यङ्ग्यतयावशिष्टानां वस्त्वलंकाराणां रसादीनां काव्यशोभाजनकतयालंकारत्वं युक्तचनुभवप्रतिपन्नमिति प्राचां सरणिरेवसाधीयसी इति आहुः । अत्र
१४१रसस्य अलंकार्यत्वम् पूर्वं च रसवद्वाचि इत्यादिना गुणत्वमुक्तम् तत् कथमेकस्यैवगुणत्वमलंकारत्वं चेति शङ्कायाः समाधानमग्रे मूले एव स्फुटीभविष्यति ॥ २७५ ॥

प्रेय उदाहरति—अद्येति । गृहागतं भगवन्तं प्रति विदुरोक्तिरियम् । हे गोविन्द त्वयि गृहागते सति मदीयभवनं संप्राप्ते सति अद्य मम या
३प्रीतिर्जाता कालेन कालान्तरेण तवैवागमनात् पुनरपि त्वदागमनेनैव एषा प्रीतिः अद्यतनीसदृशी प्रीतिर्भवेत् भविष्यति । त्वयि गते त्वदितरसत्पुरुषागमनेन एवंविधा प्रीति नैर्वभविष्यति इत्यर्थः । अत्र विदुरस्य
६भगवद्विषयकरतिभावः वाक्यभङ्ग्याभिव्यज्यमानः भगवतः प्रीत्यतिशयजनने वाच्यस्य शोभां पुष्णाति ॥ २७६ ॥

उदाहरणं संगमयति—इत्याहेति । इति पूर्वोक्तप्रकारं विदुरः युक्तं तद्भक्तेरनुरूपमाह । यतस्तस्य अन्यतः भगवदितरस्मात् तादृशी धृतिः संतोषो
३नास्ति अथवा अन्यतः विदुरेतरे पुंसि तादृशी धृतिः धैर्यम् नास्ति ।

---

ii. 276—याता for जाता N;—नैषा काले for कालेनैषा Pn.
ii. 277—विदुरो युक्तं for युक्तं विदुरो D, V;—वाक्य for युक्तं Pn, B.

भक्तिमात्रसमाराध्यः सुप्रीतश्च ततो हरिः ॥ २७७ ॥
सोमः सूर्यो मरुद्भूमिर्व्योम होतानलो जलम् ।
इति रूपाण्यतिक्रम्य त्वां द्रष्टुं देव के वयम् ॥ २७८ ॥
इति साक्षात्कृते देवे राज्ञो यद्रातवर्मणः ।

भक्तिमात्रेण केवलभक्त्या न तु तच्छून्यैरुपचारैः इत्यर्थः । समाराध्यः हरिः ततः तस्माद्विदुरवचनात् सुप्रीतः संतुष्टः अभूत् । अत्र बोद्धव्यस्य भगवतः प्रीतिकरमेतदाख्यानमिति प्रेयोलंकारः । उद्योगपर्वस्थितस्य—

या प्रीतिः पुण्डरीकाक्ष तवागमनकारणात् ।
सा किमाख्यायते तुभ्यमन्तरात्मासि देहिनाम् ॥

इत्यस्य श्लोकस्य प्रतिरूपकोयं श्लोकः इति प्रेमचन्द्रशर्मादयः ॥२७७॥

बोद्धुः प्रीतौ पूर्वमुदाहृतम् इदानीं वक्तुः प्रीतावुदाहरति—सोम इति । हे देव सोमः चन्द्रः सूर्यः मरुत् वायुः भूमिः व्योम आकाश होता यजमानः अनलः अग्निः जलम् च इति रूपाणि एवंविधानि स्थूलानि अष्टौ रूपाणि अतिक्रम्य विलङ्घ्य त्वां सच्चिदानन्दैकमयम्—अणोरणीयान् महतो महीयान् इत्यादिश्रुतिशतवर्णितं भगवन्तं द्रष्टुं साक्षात्कर्तुं के वयम् पामराः वयं त्वत्स्वरूपावलोकने आकलने वा न समर्थाः इत्यर्थः । एवं स्थिते यत्तव दर्शनं तत्र तवानुग्रह एव हेतुरिति भावः । अत्र केचित्—इति रूपाणि सोमादिस्थूलरूपा अष्टौ मूर्तीरतिक्रम्य सूक्ष्मस्वरूपेण वर्तमानं सच्चिदानन्दं त्वां द्रष्टुम् इति अतिक्रमणक्रियां भगवत एव वर्णयन्ति ॥ २७८ ॥

उदाहरणं विशदयति—इतीति । देवे महेश्वरे साक्षात्कृते तपोभिः प्रत्यक्षीकृते रातवर्मणः तत्संज्ञकस्य राज्ञः नृपतेः यत् प्रीतिप्रकाशनं महेश्वरविषयकरतिभावसूचनं तच्च तदपि प्रेयः इति अवगम्यताम् ज्ञायताम् अत्र केवलभक्तस्यैव प्रीत्यभिव्यक्तिर्बोद्धव्या । सोमादिभिन्नस्य प्राकृतरूपगुणशून्यस्य निष्कलस्य परब्रह्मणः जन्यप्रीतेरभावात् न आराध्यगता

---

ii. 278—सोमसूर्यो for सोमः सूर्यो M;—मरुद्भूमी for मरुद्भूमिः D.
ii. 279—राजवर्मणः for रातवर्मणः P, B, S, Rn, J, M;—राजधर्मणः D, V.

प्रीतिप्रकाशनं तच्च प्रेय इत्यवगम्यताम् ॥ २७९ ॥

मृतेति प्रेत्य संगन्तुं यया मे मरणं मतम् ।

प्रीतिरत्रास्तीति भावः । रतिर्देवादिविषया इति भावलक्षणे आदिशब्देन मुनिनृपादीनां संग्रहः । तत्र देवविषयकरतेरुदाहरणं ग्रन्थकृता दर्शितम् मुनिनृपादीनां यथा—

हरत्यघं सप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः ।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेपि योग्यताम् ॥

इयं हि श्रीकृष्णमुद्दिश्य भगवतो नारदस्योक्तिः

अत्युच्चाः परितः स्फुरन्ति गिरयः स्फारास्तथाम्भोदय-
स्तानेतानपि बिभ्रती किमपि न क्लान्तासि तुभ्यं नमः ।
आश्चर्येण मुहुर्मुहुः स्तुतिमिमां प्रस्तौमि यावद्भुव-
स्तावद्बिभ्रदिमां स्मृतस्तव भुजो वाचस्ततो मुद्रिताः ॥ इति ।

अत्र पूर्वार्धे भूविषयः उत्तरार्धे राजविषयः तत्र चाङ्गाङ्गिभावः ॥ २७९ ॥

रसवदलङ्कारं दिदर्शयिषुः रसेषु प्राथम्यात् सर्वजनाभिनन्दनीयत्वाच्च प्रथमं शृङ्गारमुदाहरति—मृतेति । वासवदत्तायाः दाहप्रवादेन परं दुःखितस्य पुनस्तां प्राप्य हर्षस्य परां कोटिमुपगतस्य वत्सराजस्योक्तिरियम् । मृता अग्निदाहात् पञ्चत्वं गता इति हेतोः यया वासवदत्तया सह प्रेत्य परलोके संगन्तुम् संयोगं प्राप्तुं मे मया मरणं मतम् प्रार्थितम् सा एव अवन्ती अवन्तिदेशोद्भवा वासवदत्ता कथम् अत्रैव जन्मनि मया लब्धा । अत्र संभोगशृङ्गारः । तदुक्तं प्रदीपे—

अनुकूलौ निषेवेते यत्रान्योन्यं विलासिनौ ।
दर्शनस्पर्शनादीनि स संभोगो मुदान्वितः ॥

अयं च विप्रलम्भानन्तरं वर्णितः पुष्टिमाप्नोति इत्यत्र विप्रलम्भानन्तरं वर्णितः । तदुक्तं—

न विना विप्रलम्भेन संभोगः पुष्टिमश्नुते ।

---

ii. 279—यच्च for तच्च M;—अनुगम्यताम् for अवगम्यताम् N, V, Cs.
ii. 280—संगत्यै for संगन्तुं D;—मृतेभिप्रेत्य संगं तु for मृतेति प्रेत्य संगन्तुं Pn, B.

सैवावन्ती मया लब्धा कथमत्रैव जन्मनि ॥ २८० ॥
प्राक् प्रीतिर्दर्शिता सेयं रतिः शृङ्गारतां गता ।

कषायिते हि वस्त्रादौ भूयान् रागो विवर्द्धते ॥ इति ।

१४विप्रलम्भलक्षणम् प्रदीपे—

भावो यदा रतिर्नाम प्रकर्षमधिगच्छति ।
नाधिगच्छति चाभीष्टं विप्रलम्भस्तदोच्यते ॥ इति ॥

अयं च विप्रलम्भः पूर्वरागदानप्रवासकरणात्मकतया च त्रिविधः । अत्र
१८करुणात्मकः । तदुक्तम्—

यूनोरेकतरस्मिन् गतवति लोकान्तरे पुनर्लभ्ये ।
विमनायते यदेकस्तदा भवेत् करुणविप्रलम्भाख्यः ॥ इति ॥ २८० ॥

नायिकाविषयकप्रीतिरत्रापि प्रतीयमानत्वात् कुतो नायं प्रेयोलंकारः इत्याह—प्रागिति । प्राक् पूर्वोदाहृतप्रेयोलंकारोदाहरणद्वये प्रीतिः दर्शिता
३संप्रयोगशून्या रतिः प्रीतिः सा प्रेयोलंकारविषयीभूता इति तदलंकारे सा दर्शिता । तत्र हि भगवद्विषयका रतिः विभावादिभिरपरिपुष्टा अतः प्रीतिः तदुक्तम्—

मनोनुकूलेष्वर्थेषु सुखसंवेदनं वचः ।
असंप्रयोगविषया सैव प्रीतिर्निगद्यते ॥ इति ।

संप्रयोगो नाम विभावादिभिः परिपोषः स तु पूर्वोदाहरणे नास्ति
९इति तत्र प्रीतिः । अत्र तु तादृशः परिपोषो वर्तते इति रतिः । तदाह—सेयं रतिरिति । सा तादृशी देवादिविषयकपूर्वदर्शितरतिसजातीया रतिः—रतिर्मनोनुकूलेर्थे मनसः प्रवणायितम् । इत्याद्युक्तलक्षणा ।
१२प्रकृते कान्ताविषयकानुरागे इत्यर्थः । रूपबाहुल्ययोगेन रूपस्य स्वरूपस्य बाहुल्यं विभावानुभावव्यभिचारिभावादिभिः परिपोषः तस्य योगेन संबन्धेन शृङ्गारतां गता अलौकिकानन्दसंपादकत्वेन शृङ्गाररसत्वं प्राप्ता ॥
१५अतः इदं वचः रसवत् रसवदलंकारः इत्यर्थः । अत्र वासदत्ता विभावः । तदुक्तमधुरवचनसुहास्यादयो अनुभावा उन्नेयाः । हर्षविस्मयादयश्च व्य-

ii. 280—सैषावन्ती for सैवावन्ती P, R, B; सैषा पत्नी D; N has the marginal note on अवन्ती=वासवदत्ता.

रूपबाहुल्ययोगेन तादिदं रसवद्वचः ॥ २८१ ॥

निगृह्य केशेष्वाकृष्टा कृष्णा येनाग्रतो मम ।
सोयं दुःशासनः पापो लब्धः किं जीवति क्षणम् ॥२८२॥

भिचारिणः । एभिः परिपोषं नीतो रत्याख्यः स्थायिभावः शृङ्गाररसता-
१८मापद्यते । शृङ्गारपदार्थस्तु—

शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः ।
पुरुषप्रमदाभूमिः शृङ्गार इति गीयते ॥ इति ॥

२१रसोद्बोधे विभावदयस्त्रयः समुदिता हेतुत्वं भजन्ते । यत्र तु कस्यचित् न्यूनता तत्र तस्याक्षेपात् समुदितत्वं बोद्धव्यम् । तदुक्तम्—

सद्भावश्चेद्विभावादेर्द्वयोरेकस्य वा भवेत् ।
झटित्यन्यतमाक्षेपे तदा दोषो न विद्यते ॥ इति ।

२५तथा च—

वियदलिमलिनाम्बुगर्भमेघा मधुकरकोकिलकूजितैर्दिशां श्रीः ।
धरणिरभिनवाङ्कुराङ्कटङ्का प्रणतिपरे दयिते प्रसीद मुग्धे ॥

२८इत्यत्र केवलं मुग्धादयितमेघादिरूपाणामालम्बनोद्दीपनविभावानामेव वर्णनं न तु अनुभावव्यभिचारिभावानाम् तथापि आक्षेपेण तत्कल्पनया
३०समुदितत्वम् बोध्यम् यत्र तु आक्षेपे क्लेशः तत्र तु दोष एव तदुक्तं प्रकाशे—

परिहरति रतिं मतिं लुनीते स्खलति भृशं परिवर्तते च भूयः ।
इति बत विषमा दशास्य देहं परिभवति प्रसभं किमत्र कुर्मः ॥

३३अत्र रतिपरिहासादीदिनामनुभावानां करुणादावपि संभवात् कामिनीरूपो विभावो यत्नतः प्रतिपाद्यः इति ॥ २८१ ॥

रौद्रमुदाहरति—निगृह्येति । येन दुःशासनेन मम अग्रतः मामगणयित्वे-
त्यर्थः कृष्णा द्रौपदी केशेषु निगृह्य गृहीत्वा आकृष्टा सोयं पापः दुःशासनः
३लब्धः मयेति शेषः । किं क्षणम् अत्यल्पकालमपि जीवति नैव जीवि-
ष्यतीत्यर्थः ॥ २८२ ॥

---

ii. 281—योग्येन for योगेन V.
ii. 282—दृष्टः for लब्धः R, M.

इत्यारुह्य परां कोटिं क्रोधो रौद्रात्मतां गतः ।
भीमस्य पश्यतः शत्रुमित्येतद्रसवद्वचः ॥ २८३ ॥
अजित्वा सार्णवामूर्वीमनिष्ट्वा विविधैर्मखैः ।
अदत्वा चार्थमर्थिभ्यो भवेयं पार्थिवः कथम् ॥ २८४ ॥

रौद्ररसत्वं विशदयति—इतीति । इति उक्तप्रकारेण परां कोटिमारुह्य विभावादिभिः परिपुष्टिं प्राप्य क्रोधः स्थायिभावः स च—प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः क्रोधसंज्ञितः इत्युक्तलक्षणः । तैक्ष्ण्यस्य अपचिकीर्षायाः प्रबोधः उत्कटत्वम् क्रोधः । तैक्ष्ण्यजनकचित्तवृत्तिविशेष इति यावत् । रौद्रात्मतां रौद्ररसत्वं गतः प्राप्तः । अत्र दुःशासनः आलम्बनविभावः । कृष्णाकेशकर्षणादिस्मरणमुद्दीपनविभावः । पाप इत्यधिक्षेपवचनमनुभावः । प्रतीयमानाश्च गर्वादयो व्यभिचारिणः । एतैः पुष्टिं प्रापितः क्रोधस्थायिभावः रौद्ररसत्वमापन्नः । तद्वर्णनपरमेतद्वचः रसवदलंकारालंकृतम् ॥२८३॥

वीरमुदाहरति—अजित्वेति । सार्णवाम् अर्णवेनेमिम् उर्वीम् मेदिनीम् अजित्वा शत्रुपराजयेन आत्मसादकृत्वा । विविधैः अश्वमेधप्रभृतिभिः मखैः यज्ञैः अनिष्ट्वा यजनमविधाय । अर्थिभ्यः याचकेभ्यः अर्थं द्रविणम् अदत्वा अवितीर्य अहं पार्थिवः पृथिव्या ईश्वरः कथं भवेयम् एतत्त्रितयशून्यस्य पार्थिवत्वं विडम्बनैवेति भावः । अत्र कान्तवाक्यत्रयेण क्रमेण युद्धधर्मदानविषयक उत्साहः प्रकटितः । तेन च अस्य नृपस्य युद्धवीरत्वं धर्मवीरत्वं दानवीरत्वं च वर्णितं भवति । दयावीरोदाहरणं यथा साहित्यदर्पणे । (P. 181)—

शिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामि तवापि तावत् किं भक्षणात् त्वं विरतो गरुत्मन् ॥ इति ।

अत्र गरुडस्य तृप्तिमपश्यतः जीमूतवाहनस्योक्तिरियं दयाया उत्साहातिशयं दर्शयति इति दयावीरः । एवं च युद्धवीरा रामार्जुनप्रभृतयः धर्मवीरा युधिष्ठिरप्रभृतयः दानवीराः परशुरामबलिप्रभृतयः दयावीराश्च बुद्धजीमूतवाहनप्रभृतयः इति बोद्धव्यम् ॥ २८४ ॥

---

ii. 283—कोटीं for कोटिं P, and B after him.

इत्युत्साहः प्रकृष्टात्मा तिष्ठन् वीररसात्मना ।
रसवत्त्वं गिरामासां समर्थयितुमीश्वरः ॥ २८५ ॥
यस्याः कुसुमशय्यापि कोमलाङ्ग्या रुजाकरी ।
साधिशेषे कथं देवि हुताशनवतीं चिताम् ॥ २८६ ॥
इति कारुण्यमुद्रिक्तमलंकारतया स्मृतम् ।

वीररसं विशदयति—इतीति । इति पूर्ववर्णितप्रकारकः उत्साहः—कार्यारम्भेषु संरम्भः इत्यादिना उक्तलक्षणः प्रकृष्टात्मा विभवादिभिः परिपुष्टस्वरूपः तिष्ठन् वीररसात्मना वर्तमानः आसां गिरां रसवत्त्वं रसवदलंकारत्वं समर्थयितुं संपादयितुम् ईश्वरः समर्थः अस्ति इति शेषः । अत्र युद्धे विजेतव्याः शत्रवः धर्मे धर्मः दाने याचकाः आलम्बनविभावाः । सहायान्वेषणादयः प्रतीयमाना अनुभावाः । हर्षधृतिस्मृत्यादयो व्यभिचारिणः । एतैरभिव्यक्तः उत्साहरूपस्थायिभावः वीररसतां लभते ॥ २८५ ॥

करुणमुदाहरति—यस्या इति । यस्याः कोमलाङ्ग्याः कुसुमशय्यापि रुजाकरी पीडाकरी भवतीति शेषः सा तन्वी सुकुमारगात्री हुताशनवतीं ज्वलनप्रदीप्तां चितां कथम् अधिशेते अध्यारोहति अतिकष्टास्पदमेतदिति भावः ॥ २८६ ॥

करुणत्वं प्रकटयति—इतीति । इति एवं वर्णितं कारुण्यं करुणरसस्थायिभावः शोकः—इष्टनाशादिभिश्चेतोवैक्लव्यं शोक उच्यते । इत्युक्तलक्षणः । उद्रिक्तं विभावादिभिः परिपुष्टं सत् अलंकारतया रसवदलंकारत्वेन स्मृतम् पूर्वमहर्षिभिरिति शेषः । अत्र विगतजीविता तन्वी आलम्बनविभावः कुसुमशय्यादय उद्दीपनविभावाः करुणवचनमनुभावः कथमित्यनेन प्रतीयमानाश्चिन्तादयो व्यभिचारिणः । एतैः पुष्टिं नीतः शोका-

---

ii. 285—रसवत्तां for रसवत्त्वं D;—गिरां तासां for गिरामासां V.
ii. 286—साधिशेते for साधिशेषे all except M;—देवी for देवि Cs, J, Pn, D;—तन्वी for देवि P, B, R; बाला V;—ज्वलन्तीमधुना for हुताशनवतीं D, V; ज्वलन्तिमवने (?) J.
ii. 287—तयेष्यते for तया स्मृतम् D.

तथापरेपि बीभत्सहास्याद्भुतभयानकाः ॥ २८७ ॥
पायं पायं तवारीणां शोणितं पाणिसंपुटैः ।
कौणपाः सह नृत्यन्ति कबन्धैरन्त्रभूषणैः ॥ २८८ ॥
इदमम्लानमानाया लग्नं स्तनतटे तव ।

रूयः स्थायिभावः करुणरसत्वं भजते । अथ अपरेपि पूर्वदर्शितशृङ्गार-वीररौद्रकरुणरसवत् अन्येपि बीभत्सहास्याद्भुतभयानका रसाः सन्ति तेषा-मपि स्वरूपं दर्शयाम इत्यर्थः प्रस्ताववाक्यमेतत् ॥ २८७ ॥

बीभत्समुदाहरति—पायं पायमिति । अन्त्राणि पुरीततः भूषणानि येषां ते कौणपाः राक्षसाः कबन्धैः सह मृतानां शिरोविहीनक्रियायुतशरीरैः । सह तवारीणां शोणितं पाणिसंपुटैः हस्तपुटकैः पायं पायं पीत्वा पीत्वा नृत्यन्ति सप्रमोदं क्रीडन्ति । अत्र जुगुप्सारूपस्थायिभावः । दोषेक्षणा-दिभिर्गर्हा जुगुप्सेति निगद्यते । इति तल्लक्षणम् । तस्याः कौणपा आल-म्बनविभावः । प्रतीयमाननिष्ठीवनच्छर्दनादयोनुभावाः । मोहापस्मारा-दयो व्यभिचारिणः । तैश्च परिपुष्टा सा बीभत्सरसत्वं भजते । बीभत्स-श्चात्र राजविषयकरतौ गुणीभूतः । तादृशरतिश्च वर्णनीयप्रीतिकरत्वात् प्रेयोलंकारः इति प्रेयोरसवतोः संकरः ॥ २८८ ॥

हास्यमुदाहरति—इदमिति । सखीनां पुरतो मानकथां कुर्वती रहसि च नायकेन सह कृतक्रीडां नायिकां प्रति तत्सख्या उपाहासोक्ति-रियम् । अम्लानः म्लानिमप्राप्तः अस्मद्वचनैर्न न्यूनीभूत इत्यर्थः तादृशः मानो यस्याः सा तस्याः । तव स्तनतटे स्तनप्रान्ते लग्नम् आसक्तं नवं न तु प्राचीनम् नखपदं नखव्रणचिह्नम् । हे सखि उत्तरीयेण छादयतां आच्छादयताम् । मानिन्यास्ते नायकसंभोगसूचकं नखव्रणं झटिति आ-च्छादयताम् । अन्यथास्मत्पुरतो दर्शिता मानकथा कथं यथार्था स्यात् इति परिहासोक्तिः । अत्र—वागादिविकृताच्चेतोविकासो हास इष्यते ।

ii. 287 अथापरे for तथापरे R; तथा परे P, and B after him;—बीभत्सा misprint for बीभत्स in B.

ii. 288—कर for पाणि V;—भूषिताः for भूषणाः D.

ii. 289—अम्लानमालायाः for अम्लानमानायाः M, V, Pn, Cs;—मालाभं for मालायाः D.

छाद्यतामुत्तरीयेण नवं नखपदं सखि ॥ २८९ ॥
अंशुकानि प्रवालानि पुष्पं हारादिभूषणम् ।
शाखाश्च मन्दिराण्येषां चित्रं नन्दनशाखिनाम् ॥ २९० ॥
इदं मघोनः कुलिशं धारासंनिहितानलम् ।

इत्युक्तलक्षणः हासः स्थायिभावः । तादृशी कपटमानवती नायिका आलम्बनविभावः । नखक्षतमुद्दीपनविभावः । तादृशसोल्लुण्ठवचनान्यनुभावः । प्रतीयमाना अवहित्थादयो व्यभिचारिणः । एतैः परिपुष्टो हासस्थायिभावो हास्यरसतां भजते । अम्लानमानाया इत्यत्र अम्लानमालाया इति पाठो दृश्यते स तु न सरसः ॥ २८९ ॥

अद्भुतमुदाहरति—अंशुकानीति । एषां नन्दनशाखिनां कल्पवृक्षाणाम् प्रवालानि कोमलपत्राणि अंशुकानि वसनानि । पुष्पं हारादिभूषणम् । शाखाश्च मन्दिराणि गृहाणि । चित्रम् एतत् विस्मयास्पदम् । अत्र—विस्मयश्चित्तविस्तारो वस्तुमाहात्म्यदर्शनात् । इत्युक्तलक्षणस्य विस्मयस्थायिभावस्य दिव्यनन्दनशाखिनः आलम्बनविभावः। तेषामंशुकादिमत्त्वगुणमहिमा उद्दीपनविभावः । प्रतीयमानाः स्तम्भस्वेदादयोनुभावाः। तथैव वितर्कादियश्च व्यभिचारिणः । एभिः परिपुष्टो विस्मयोद्भुतरसत्वं भजते॥२९०॥

भयानकं दर्शयति—इदमिति । मघोनः महेन्द्रस्य इदं धारासंनिहितानलं धारासु निशितमुखेषु संनिहितः अनलः यस्य तत् । एतादृशं कुलिशं वज्रमस्तीति शेषः । यस्य स्मरणं दैत्यस्त्रीगर्भपाताय असुराङ्गनागर्भसंसनाय कल्पते प्रभवति तत्स्मरणे दैत्याङ्गनानां गर्भाः भयेन च्यवन्तीत्यर्थः । अत्र—रौद्रशक्त्या तु जनितं वैक्लव्यं मनसो भयम् इत्युक्तलक्षणस्य भयस्थायिभावस्य मघोना आलम्बनविभावः । कुलिशमुद्दीपनविभावः । गर्भपातादयोनुभावाः । प्रतीयमाना आवेगसंमोहादयश्च व्यभिचारिणः । एतैः परिपुष्टो भयस्थायिभावः भयानकरसत्वं भजते । अष्टौ नाट्ये रसाः स्मृताः इत्युक्तवचनरोधेन एते अष्टौ रसाः प्रदर्शिताः । शान्ताख्यो नवमो रसः श्रव्यकाव्ये दृश्यते तल्लक्षणं प्रकाशे—निर्वेदस्थायिभावोस्ति शान्तोपि

स्मरणं यस्य दैत्यस्त्री—

नवमो रसः । इति । अन्यत्रापि—

न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा ।
रसः स शान्तः कथितो मुनीद्रैःसर्वेषु भावेषु शमप्रधानः ॥ इति ।

१४तदुदाहरणं—

अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्ठे वा बलवति रिपौ वा सुहृदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्ति
दिवसाः कदा पुण्ये रण्ये शिव शिव शिवेति प्रलपतः ॥ इति ।

१९अत्र हि मिथ्यात्वेन परिभाव्यमानं निखिलं जगदालम्बनम् । तपो-
वनाद्युद्दीपनम् । अद्रिहारादयोः समदर्शनमनुभावः । मतिधृतिहर्षाः
२१व्यभिचारिभावाः । एतैः निर्वेदस्थायिभावः शमस्थायिभावो वा परिपोष
गतः शान्तरसत्वेन पर्यवस्यति । केचित् पुनः भक्तिरसमन्यं स्वीकुर्वन्ति ।
जगन्नाथपण्डितराजस्तु(P.45)—कथमेते एव रसाः । भगवदालम्बनस्य रोमा-
२४ञ्चाश्रुपातादिभिरनुभावितस्य हर्षादिभिः परिपोषितस्य भागवतादिपुराण-
श्रवणसमये भगवद्भक्तैरनुभूयमानस्य भक्तिरसस्य दुरपह्नवत्वात् । भगवद-
नुरागरूपा भक्तिश्चात्र स्थायिभावः । न चासौ शान्तरसे अन्तर्भावमर्हति ।
२७अनुरागस्य वैराग्यविरुद्धत्वात् । उच्यते । भक्तेर्देवादिविषयरतित्वेन
भावान्तर्गततया रसत्वानुपपत्तेः ।

रतिर्देवादिविषया व्यभिचारी तथाञ्जितः ।
भावः प्रोक्तस्तदाभासा अनौचित्यप्रवर्तिताः ॥

३१इति हि प्राचां सिद्धान्तात् । न च तर्हि कामिनीविषयाया अपि रतेर्भा-
वत्वमस्तु रतित्वाविशेषात् । अस्तु वा भगवद्भक्तेरेव स्थायित्वम् कामि-
३३न्यादिरतीनां च भावत्वं विनिगमकाभावादिति वाच्यम् । भरतादि-
मुनिवचनानामेवात्र रसभावत्वादिव्यवस्थास्थापकत्वेन स्वातन्त्र्य-
योगात् । इति ॥ एवं केवलभरतवचनप्रामाण्येन भक्तिरसं भावत्वेन सोम-
३६न्यत । परं शाण्डिल्यवर्त्मानुगा भक्तिरसं स्वीकुर्वन्त्येव । तदुक्तं भगव-

गर्भपाताय कल्पते ॥ २९१ ॥

वाच्यस्याग्रामतायोनिर्माधुर्ये दर्शितो रसः ।
इह त्वष्टरसायत्ता रसवत्ता स्मृता गिराम् ॥ २९२ ॥

[37]भक्तिचन्द्रिकामृतरसोल्लासे—

परत्रानासङ्गं जनयति रतिर्या नियमतः
परस्मिन्नेवास्मिन् समरसतया पश्यत इमम् ।
परप्रेमाढ्येयं भवति परमानन्दमधुरा
परा भक्तिः प्रोक्ता रस इति रसास्वादनचणैः ॥ इति ।

[42]तथा रसाभासभावाभासादयोपि रसनाद्रसाः तेषां सद्भावे रसवेदनालंकारः। तत्र अनौचित्येन प्रवृत्तौ रसभावौ रसाभासभावाभासौ । भावोदयादीनां स्वरूपं पूर्वमेव कथितम्। तेषामुदाहरणान्यपि कुवलयानन्दादिषु [45]द्रष्टव्यानि ॥ २९१ ॥

प्रथमपरिच्छेदे गुणनिर्वचनप्रसङ्गे मधुरं रसवद्वाचि इत्यनेन रसवत्त्वस्य माधुर्यगुणत्वमुक्तम् इहालंकारत्वम् तत्र क उभयोर्भेद इति दर्शयति—[3]वाच्यस्येति। माधुर्ये मधुरगुणे वाच्यस्य अग्राम्यता ग्राम्यतादोषाभावसमानाधिकरणालंकारत्वमित्यर्थः । सैव योनिर्व्याप्तिका यस्य सः दर्शितः—

कामं सर्वोप्यलंकारः रसमर्थे निषिञ्चति ।
तथाप्यग्राम्यतैवैनं भारं वहति भूयसा ॥

[7]इति कथितः। इह रसवदलंकारे तु गिरां वाचाम् अष्टरसायत्ता शृङ्गारादयष्टरसाधीना रसवत्ता रसवदलंकारवत्ता स्मृता । अयं भावः— ग्राम्यत्वाभावसमानाधिकरणरसवदलंकारादिमत्त्वस्य माधुर्यगुणत्वं पूर्वमुक्तम् इह तु केवलरसानामेवालंकारत्वमुक्तम् अतो न माधुर्यरसवत्तोरभेदः इति ज्ञेयम् । अत्र अष्टेत्यनेन आचार्यदण्डिनः शान्तो रसो नाभिप्रेत इति [12]सूच्यते ॥ २९२ ॥

---

ii. 292—वाक्यस्य for वाच्यस्य P, B, R;—योनेः for योनिः R;—माधुर्ये for माधुर्यें R;—गिरां स्मृता for स्मृता गिराम् V.

अपकर्ताहमस्मीति हृदि ते मा स्म भूद्भयम् ।
विमुखेषु न मे खड्गः प्रहर्तुं जातु वाञ्छति ॥ २९३ ॥

ऊर्जस्विनं दर्शयति—अपकर्ताहमिति । समराङ्गणात् धावमानं प्रति कस्यचित् उक्तिरियम् । अहं ते अपकर्ता अस्मि अपकारम् आचरिष्यामि इति भयं ते हृदि मा स्म भूत् मा भवतु । मे खड्गः विमुखेषु जातु कदाचिदपि प्रहर्तुं न वाञ्छति । तदुक्तं मनुना (vii. 93)—

नायुधव्यसनप्राप्तं नार्तं नातिपरिक्षतम् ।
न भीतं न परावृत्तं सतां धर्ममनुस्मरन् ॥ इति ।

अत्र—

गर्वो मदप्रभावश्रीविद्यासत्कुलजन्मभिः ।
अवज्ञा सविलासाङ्गदर्शनाविनयादिकृत् ॥

इत्युक्तलक्षणो गर्वरूपो व्यभिचारिभाव स्थायिभावमुत्साहमाच्छाद्य उद्रिक्ततया प्रकाशते इति ऊर्जस्विनामालंकारः । अयं च—व्यभिचारी तथान्वितः इति प्रकाशकृदुक्तेर्भाव एव । ऊर्जः बलं तत्प्रकाशनादूर्जस्वि इति नाम्नात्र व्यवह्रियते । अत्राहुः प्रेमचन्द्रशर्माणः—यत्र त्वयमेव बलरूपव्यभिचारिभावः स्थायिनि उत्साहे निलीयते तत्र वीरो रसः । स च पूर्वोक्तरसवन्नाम्ना व्यपदिश्यते यथा—

क्षुद्राः संत्रासमेते विजहत हरयः क्षुण्णशक्रेभकुम्भा
युष्मद्देहेषु लज्जा दधति परममी सायका निष्पतन्तः ।
सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः
किंचिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ॥

अत्र पादत्रयेणोद्रिक्ततया व्यज्यमानोपि गर्वश्चतुर्थपादव्यङ्ग्यस्य रामजयोत्साहाख्यस्थायिभावस्य कुक्षौ विलीयते । अत एवेदं प्रकाशकारेण वीररसोदाहरणत्वेनोपन्यस्तम् । तस्मादयं रसवदलंकार एव । नव्यास्तु रसाभासो भावाभासो वा रसान्तरादेरङ्गत्वमापन्नः सन् ऊर्जस्व्यलंकारो भवतीत्याचक्षते तन्न रुचिरम् । तथात्वे ऊर्जस्विसंज्ञाया अन्वर्थतानुपपत्तेः अलंकारसंज्ञानां तथात्वस्यैव नियमात् । इति ॥ २९३ ॥

---

ii. 293—विमुखे तु for विमुखेषु M;—न ते for न मे V;—शक्तिः for खड्गः D.

इति मुक्तः परो युद्धे निरुद्धो दर्पशालिना ।
पुंसा केनापि तज्ज्ञेयमूर्जस्वीत्येवमादिकम् ॥ २९४ ॥

॥ इत्यूर्जस्वि ॥

अर्थमिष्टमनाख्याय साक्षात् तस्यैव सिद्धये ।

उदाहरणं विशदयति—इतीति । दर्पशालिना अहंकारवता केनापि पुंसा वीरेण एवमुक्त्वा युद्धे निरुद्धः पराजितः परः शत्रुः मुक्तः गन्तुमनुज्ञातः । तत् तस्मात् अयं ऊर्जस्व्यलंकारो ज्ञेयः । एवमादिकम् यथा अत्र वीररसव्यभिचारी गर्वः ऊर्जास्वित्वेनोक्तः तथा अन्यरसव्यभिचारी गर्वः ऊर्जस्वी भवति इत्यर्थः ॥ २९४ ॥

पर्यायोक्तं लक्षयति—अर्थमिति । इष्टम् प्रतिपादनाभिलषितम् अर्थं साक्षात् वाचकशब्देन अनाख्याय अप्रतिपाद्य तस्यैव इष्टार्थस्यैव सिद्धये सचमत्कारप्रतिपत्तये यत् प्रकारान्तराख्यानम् प्रकारान्तरेण चातुर्यद्योतकभङ्गिविशेषेण आख्यानं व्यञ्जनया द्योतनं तत् पर्यायोक्तम् पर्यायेण तदर्थकशब्दान्तरेण विवक्षितार्थस्योक्तत्वात् पर्यायोक्तम् कथ्यते इति शेषः । पर्यायता च शब्दानामेकार्थप्रतिपादकता । सा च एकयैव वृत्त्येति न नियमः । वृत्त्यन्तरेणापि तदर्थप्रतिपादकत्वे पर्यायतानपायात् । तथा च विवक्षितमर्थं साक्षात् तद्वाचकपदेन अकथयित्वा वैचित्र्यविशेषाय प्रकारान्तरेण तत्कथनं पर्यायोक्तम् । वाच्यार्थस्य व्यञ्जनया प्रतिपादनं पर्यायोक्तमित्यर्थः । अत्र व्यञ्जनया वाच्यार्थस्यैवाभिधानम् ध्वनौ तु न वाच्य एवार्थो विषयः इति ततो भेदः । अपरं च अत्र व्यङ्ग्यार्थः अतिस्फुटतया न तथा अतिशेते यथा उक्तिवैचित्र्यमिति नास्य ध्वनित्वं नापि गुणीभूतव्यङ्ग्यत्वं किंतु चित्रकाव्यमेवैतत् । प्रेमचन्द्रशर्माणस्तु—विवक्षितार्थश्च कचित् वाच्यार्थनियतसबंन्धित्वात् वक्त्रादिवैशिष्ट्यप्रतीतिमन्तरेणापि झटिति प्रयुक्तशब्देन व्यज्यते कचिच्च वाच्य एव प्रकारान्तरेण व्यज्यते इत्यस्य द्वौ भेदौ । एवमस्य व्यङ्ग्यमूलकेभ्योलंकारेभ्य भेदो बोद्धव्यः तेषु निरुक्तरूप-

---

ii. 294—इत्थं for इति M;—एवमुक्त्वा for इति मुक्तः P, B, R; इदमुक्तः D;—ओजस्वि for ऊर्जस्वि D, which adds इति रसवदूर्जस्व्यलंकारौ at the end.

यत् प्रकारान्तराख्यानं पर्यायोक्तं तदिष्यते ॥ २९५ ॥
दशत्यसौ परभृतः सहकारस्य मञ्जरीम् ।
तमहं वारयिष्यामि

१७त्वाभावात् । न च—

गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः ।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥

इत्यादौ वाच्यव्यङ्ग्ययोर्गमनागमनयोर्नियतसंबन्धित्वात् कथमाक्षेपादस्य २१भेद इति वाच्यम् । वाच्यनियतसंबन्धिनोपि गमनाभावरूपव्यङ्ग्यस्य वक्तृवैशिष्ट्यपर्यालोचनया त्वयि गतेहं मरिष्यामीति द्वितीयार्धव्यङ्ग्य-पर्यालोचनया च प्रतीयमानत्वेन झटिति व्यज्यमानत्वाभावात् । तत्र २४प्रथमस्योदाहरणं दशत्यसौ परभृतः इत्यादि ग्रन्थकृता दर्शयिष्यते । द्वितीयस्य यथा—

यं प्रेक्ष्य चिररूढापि निवासप्रीतिरुज्झिता ।
मदेनैरावणमुखे मानेन हृदये हरेः ॥ इति ।

२८अत्र शक्रैरावणौ मदमानमुक्तौ इति व्यङ्ग्यम् तदेव च प्रकारान्तरेण वाच्यमिति । केचित्तु पर्यायोक्तेस्मिन् द्वयोरेव वाच्यव्यङ्ग्ययोः प्रस्तुतत्वम् समासोक्तौ ३०वाच्यस्यैव प्रस्तुतत्वम् अप्रस्तुतप्रशंसायां व्यङ्ग्यस्यैव प्रस्तुतत्वमित्येषां मिथो भेद इत्याहुः । तत्तु प्रसिद्धोदाहरणविरुद्धमित्युपेक्षितम् । इत्याहुः ॥ २९५ ॥

पर्यायोक्तमुदाहरति—दशतीति । असौ परभृतः कोकिलः सहकारस्य आम्रस्य मञ्जरीं दशति आस्वादनेन विनाशयति । अहं तं वारयिष्यामि ३निवारयामि । युवाभ्यां स्वैरं स्वच्छन्दं सविश्रम्भमिति भावः आस्यतां स्थीयताम् । अत्र अन्यजनसांनिध्यं सुरतोत्सवप्रतिबन्धकमिति नायिका-नायकयोः संनिधानात् सख्या अपसरणमिष्टम् तत् अहं गमिष्यामि इत्युक्तौ ६वक्त्र्या अवैदग्ध्यं दर्शयेत् अतः परभृतवारणमिषेण तत् कृतमिति चमत्कारातिशयः । अतः पर्यायोक्तम् । केचित्तु अत्र परभृतशब्देन नायकः मञ्जरीशब्देन नायिका तत्संभोगप्रतिबन्धिका च अहम् इति शब्देन सूच्यते ९अतः पर्यायोक्तमिति वर्णयन्ति परं तन्न रुचिरम् तथात्वे वाच्यार्थस्य अप्रस्तु-

ii. 296—मञ्जरीः for मञ्जरीम् M, V;—तदहं for तमहं V.

युवाभ्यां स्वैरमास्यताम् ॥ २९६ ॥
संगमय्य सखीं यूना संकेते तद्रतोत्सवम् ।
निर्वर्तयितुमिच्छन्त्या कयाप्यपसृतं ततः ॥ २९७ ॥

॥ इति पर्यायोक्तम् ॥

किंचिदारभमाणस्य कार्यं दैववशात् पुनः ।

तत्वेन लक्षणासंगत्यापत्तेः । युवाभ्यां स्वैरमास्यताम् इत्यस्य सरसत्वानन्कूलत्वाच्चेति ज्ञेयम ॥ २९६ ॥

प्राकरणिकार्थबोधं विना लक्षणसमन्वयोत्र दुर्घट इति तं दर्शयति—संगमय्येति । यूना नायकेन सह सखीं नायिकाभूतां संकेतं संकेतस्थाने संगमय्य संयोज्य तद्रतोत्सवं तदुभययोः रतोत्सवं सुखविलासं निर्वर्तयितुं स्वगमनेन सविश्रमं संपादयितुम् इच्छन्त्या कयापि चतुरया सख्या ततः तस्मात् स्थानादपसृतम् ॥ २९७ ॥

समाहितं लक्षयति—किंचिदिति । किंचित् कार्यम् आरभमाणस्य समुचितकारणेन सपादयितुमुद्यतस्य दैववशात् अकस्मादेव तस्य कार्यस्य यत् साधनं संपादकसाधनान्तरं तस्य समापत्तिः संप्राप्तिः तत् समाहितमाहुः । दैववशेन कारणान्तरोदयेनारब्धकार्यस्य सौकर्येण समाधानं समाहितमित्यर्थः । अर्वाचीनास्तु अमुं समाधिमाहुः भावशान्तिं तु समाहितमित्याहुः । अत्र साधनपदं साधनान्तरपरं तत एव वैचित्र्योद्भवात् । तदाह प्रकाशकारः—समाधिः सुकरं कार्यं कारणान्तरयोगतः इति । दैववशादिति न नियमपरम् बुद्धिपूर्वककारणान्तरावलम्बनेन कार्यसंपत्तावपि अस्य सद्भावात् । तदुक्तं भोजराजेन (iii. 34)—

कार्यारम्भे सहायाप्तिर्दैवात् दैवाकृते ह या ।
आकस्मिकी बुद्धिपूर्वोभयी वा तत् समाहितम् ॥ इति ।

उदाहृतं च—

कल्पान्ते शमितत्रिविक्रममहाकङ्कालदण्डस्फुरच्छेषायूतनृसिंहवक्रनखरप्रोतादिकोलामिषः ।

---

ii. 298—दैवबलात् for दैववशात् J, N, D, Cs, Rn.

तत्साधनसमापत्तिर्या तदाहुः समाहितम् ॥ २९८ ॥
मानमस्या निराकर्तुं पादयोर्मे नमस्यतः ।
उपकाराय दिष्ट्यैतदुदीर्णं घनगर्जितम् ॥ २९९ ॥

॥ इति समाहितम् ॥

विश्वैकार्णवताविशेषमुदितौ तौ मत्स्यकूर्मावुभौ
कर्षन् धीवरतां गतः स्यतु जगन्मोहं महाभैरवः ॥ इति ।

अत्र प्रलयसमये महेश्वरेण समापयितुमुपक्रान्तानां त्रिविक्रमादीनां १८योयं तद्धवा बडिशादिना मत्स्यकूर्मयोराकर्षणप्रकारः स भगवता भैरवेण बुद्धिपूर्वकमुपकल्प्यमानो दैवात् तथाभूतैरेव तैः संपद्यते इति बुद्धिपूर्वेयं दैवकृता सहायाप्तिः इति । विस्तरस्तु जिज्ञासुभिः तत्रैव २१द्रष्टव्यः ॥ २९८ ॥

समाहितमुदाहरति—मानमस्या इति । अस्या मानिन्याः मानं निराकर्तुम् अपसारयितुम् पादयोः नमस्यतः प्रणंस्यतः मे मम उपकाराय ३दिष्ट्या सुदैवेन एतत् घनगर्जितम् उदीर्णम् उद्भूतम् । अत्र माननिराकरणाय प्रणामतत्परस्य दैवादुदीर्णघनगर्जितेन तस्य अतीवोद्दीपकत्वात् माननिराकरणसंप्राप्तिः इति समाहितालंकारो विज्ञेयः । मानिन्याः ६माननिराकरणसाधनेषु प्रणामः एकतमोस्ति तदुक्तम्—

सामं भेदं च दानं च नत्युपेक्षे रसान्तरम् ।
तद्भङ्गाय पतिः कुर्यात् षड्डपायानिति क्रमात् ॥ इति ।

९परं नतिर्नैव निश्चयेन कार्यसंपादिका तया मानभङ्गाभावे उपेक्षादेः कर्तव्यत्वेनोपदिष्टत्वात् । घनगर्जितं तु एकान्तेन फलोपधायकं तस्यातीवोद्दीपकत्वात् । तथा चात्र संशयितोपायेन माननिरासाय प्रवृत्तस्य नायकस्य १२निश्चितोपायसंपत्त्या कार्यस्य सौकर्येण लाभः इति ज्ञेयम् ॥ २९९ ॥

---

ii. 298—यत्तदाहुः for या तदाहुः D, V.

ii. 299—पतिष्यतः for नमस्यतः J, P, B, R, D (emendation); दिष्ट्यैदम् for दिष्ट्यैतत् D, M.

आशयस्य विभूतेर्वा यन्महत्त्वमनुत्तमम् ।
उदात्तं नाम तत् प्राहुरलंकारं मनीषिणः ॥ ३०० ॥
गुरोः शासनमत्येतुं न शशाक स राघवः ।
यो रावणशिरश्छेदकार्यभारेप्यविक्लवः ॥ ३०१ ॥

उदात्तं लक्षयति—आशयस्येति । आशयस्य अभिप्रायस्य मनोव्यापारविशेषस्येति यावत् । विभूतेः संपत्तेर्वा अनुत्तमम् अलौकिकमित्यर्थः यन्महत्त्वम् आधिक्यं वर्ण्यते तद्वर्णनं मनीषिणः उदात्तम् अलंकारम् आहुः इत्यन्वयः । तथाच प्रस्तुतस्य अलौकिकं महाशयत्वं विभूतिमत्त्वं वा यत् वर्ण्यते स उदात्तो नामालंकारः इति भावः । परे तु प्रस्तुतस्याङ्गत्वेन वर्ण्यमानं महतां चरितमपि उदात्तं मन्यन्ते तदुक्तम् प्रकाशकृता—महतां चोपलक्षणम् इति । उदाहरणं च—

तदिदमरण्यं यस्मिन् दशरथवचनानुपालनव्यसनी ।
निवसन् बाहुसहायश्चाररक्षःक्षयं रामः ॥ इति ।

अत्र प्रस्तुतस्य दण्डकारण्यस्य तदुत्कर्षाय महतो रामस्य अङ्गत्वेन वर्णनं कृतमित्युदात्तालंकारः । यथा वा—

नाभिप्रभिन्नाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा ।
अमून् युगान्तोचितयोगनिद्रः संहृत्य लोकान् पुरुषोधिशेते ॥ इति ।

अत्र प्रस्तुतस्य समुद्रस्याङ्गत्वेन लोकसंहर्तुर्भगवतः शयनं वर्णितमिति उदात्तालंकारः । एतच्च प्रस्तुतस्य माहात्म्यातिशयसंसूचकत्वात् लोकातिगामिविभूतिवर्णनरूपमेवेति दण्डिना न अत्र पृथक्तया लक्षितम् इति ध्येयम् ॥ ३०० ॥

महाशयत्ववर्णनरूपमुदात्तमुदाहरति—गुरोरिति । यः राघवः रावणस्य त्रिभुवनैकवीरस्य राक्षसाधिपस्य शिरसामुच्छेदरूपं यत् कार्यं तस्य भारः कार्यगुरुता तस्मिन् अपि अविक्लवः अव्याकुलः स गुरोः पितुः शासनं राजत्यागपूर्वकवनगमनरूपामाज्ञाम् अत्येतुम् अतिक्रमितुं न शशाक । अत्र रावणवधरूपमहाकार्यकरणसमर्थोपि राघवः यत् राज्यभ्रंशकरं गुरुनिदेशमत्येतुं न शशाक तेन अस्य लोकसीमातिवर्ति महाशयत्वं प्रतीयते इति लंकारः ॥ ३०१ ॥

0—अनुत्तरम् for अनुत्तमम् N;—तं for तत् P, B, R, J.

रत्नभित्तिषु संक्रान्तैः प्रतिबिम्बशतैर्वृतः ।
ज्ञातो लङ्केश्वरः कृच्छ्रादाञ्जनेयेन तत्त्वतः ॥ ३०२ ॥
पूर्वत्राशयमाहात्म्यमत्राभ्युदयगौरवम् ।
सुव्यञ्जितमिति व्यक्तमुदात्तद्वयमप्यदः ॥ ३०३ ॥
अपह्नुतिरपह्नुत्य किंचिदन्यार्थदर्शनम् ।

विभूतिमहत्त्वरूपमुदात्तमुदाहरति—रत्नेति । अञ्जनेयेन अञ्जनासूनुना हनुमता रत्नभित्तिषु रत्नखचितभित्तिषु संक्रान्तैः प्रतिफलितैः प्रतिबिम्बशतैः स्वीयप्रतिबिम्बानां शतैः वृतः लङ्केश्वरः लङ्काधिपो रावणः कृच्छ्रात् कष्टेन ज्ञातः । प्रतिबिम्बशतवृतत्वं कृच्छ्रतया ज्ञानस्य हेतुः । अत्र प्रतिबिम्बग्राहिरत्नखचितभित्तिवर्णनेन राक्षसराजस्यालौकिकविभूतिमत्त्वं प्रतीयते इत्युदात्तोलंकारः ॥ ३०२ ॥

उदात्तमुपसंहरति—पूर्वत्रेति । पूर्वत्र गुरोः शासनम् इत्युदाहरणे आशयस्य राममनोवृत्तेः माहात्म्यम् अलौकिकमहत्त्वम् । अत्र रत्नभित्तिषु इत्युदाहरणे अभ्युदयस्य संपदभ्युदयस्य गौरवं महत्त्वं सुव्यञ्जितं स्पष्टं प्रकटीकृतम् इति हेतोः अदः एतत् उदात्तद्वयं प्रोक्तमस्माभिरिति शेषः । अयं भावः विषयद्वैविध्येन वैचित्र्यस्य द्वैविध्यात् द्विप्रकारः स दर्शितः इति ॥ ३०३ ॥

अपह्नुतिं संलक्ष्योदाहरति—अपह्नुतिरिति । किंचित् किमपि प्रकृतस्य गुणक्रियादिरूपं धर्मम् अपह्नुत्य अपलप्य असत्यतया निरूप्येत्यर्थः अन्यार्थस्य धर्मान्तररूपारोप्यमाणार्थस्य दर्शनं सत्यत्वेन कथनम् अपह्नुतिः तन्नामालंकारः ।

नैतन्मुखमिदं पद्मं न नेत्रे भ्रमराविमौ ।
एतानि केसराण्येव नैता दन्तार्चिषस्तव ॥

इति तत्त्वापह्नवरूपकविषयपरिहारार्थं किंचिदित्यस्य गुणक्रियादिरूपोर्थः स्वीक्रियते । तथा च प्रकृतं धर्मिणं निषिध्य धर्म्यन्तरारोपः तत्वापह्नवरूपकम् गुणक्रियादिरूपं धर्ममपलप्य धर्मान्तरारोपे अपह्नुतिरित्यनयोः

---

ii. 302—रत्नभित्तिषु for भित्तिषु Rn;—संक्रान्त for संक्रान्तैः Rn.
ii. 303—प्रोक्तम् for व्यक्तम् P, B, Rn;—द्वितयं पुनः for द्वयमप्यदः Rn.

न पञ्चेषुः स्मरस्तस्य सहस्रं पत्रिणामिति ॥ ३०४ ॥
चन्दनं चन्द्रिका मन्दो गन्धवाहश्च दक्षिणः ।

भेदः । अन्ये तु तत्त्वापह्नवरूपकं नैव मन्यन्ते तेषां मते किंचिदपह्नुत्य
कस्यचित् प्रदर्शनम् अपह्नुतिरलंकारः । अपह्नुत्य इत्यनेन रूपकातिशयो-
१२क्त्योः व्युदासः तत्र कस्यचिन्निषेधाभावात् । किंचिदपह्नुत्य इत्येतावन्मा-
त्रोक्तौ आक्षेपालंकारेतिव्याप्तिः तन्निरासाय अन्यत् साध्यत इति । संदेहे
संशयः अत्र तु निश्चयः इति ततो भेदः । उत्प्रेक्षायां संभावना अत्र तु
१५आहार्यारोपः इत्युभयोर्भेदः । इयं च द्विविधा शाब्दी आर्थी चेति । यत्र
नञादिशब्दैः प्रकृतनिषेधस्तत्र शाब्दी । कपटार्थकपरिणामार्थकशब्दो-
पादाने मयट्प्रत्ययान्तोपादाने चार्थी । आर्थ्याः अन्येपि विविधाः
१८प्रकाराः सन्ति ते उदाहरणतः स्फुटीभविष्यन्ति । तत्र कपटार्थकशब्दो-
पादाने यथा—उपवनसहकारोद्भासिभृङ्गच्छलेन प्रतिविशिखमनेनोट्टङ्कितं
कालकूटम् इति । एवं—धूमं दधत् प्रकटलाञ्छनकैतवेन इति । मयटा
२१यथा—तारामयास्तत्र च फेनभङ्गा इति । एवमेव—

अमुष्मिल्लावण्यामृतसरसि नूनं मृगदृशः
स्मरः शर्वप्लुष्टः पृथुजघनभागे निपतितः ।
यदङ्गाङ्गाराणां प्रशमपिशुना नाभिकुहरे
शिखा धूमस्येयं परिणमति रोमावलिवपुः ॥ इति ।

अत्र वपुःशब्देन रोमावलिनिषेधः । आचार्यदण्डिनो मते एतान्युदाहर-
२७णानि तत्त्वापह्नवरूपकस्य ज्ञेयानि । धर्मिणि धर्म्यन्तरारोपात् । उदाहरणं
दर्शयति—न पञ्चेति । स्मरः पञ्चेषुः पञ्चसंख्यापरिमितबाणो न । पञ्चेषुभिः
सकलविश्वस्येदृशपीडाजननासंभवात् । अतस्तस्य पत्रिणां बाणानां सहस्रं
३०सहस्रसंख्यात्वमस्तीति शेषः । अत्र स्मरस्य पञ्चेषुत्वधर्मं प्रतिषिध्य सहस्रे-
षुरूपधर्मान्तरारोपात् अपह्नुतिः ॥ ३०४ ॥

विषयापह्नुतिमुदाहरति—चन्दनमिति । चन्दनं कृष्णागरुः चन्द्रिका
ज्योत्स्ना तथा मन्दः दक्षिणः गन्धवाहश्च मलयानिल इत्यर्थः । सेयं माये

---

ii. 305—चन्दो for मन्दो V, M; चेन्दोः N;—वाही च for वाहश्च N, M.

सेयमग्निमयी सृष्टिः शीता किल परान् प्रति ॥ ३०५ ॥
शैशिर्यमभ्युपेत्यैव परेष्वात्मनि कामिना ।
औष्ण्यप्रदर्शनात् तस्य सैषा विषयनिह्नुतिः ॥ ३०६ ॥
अमृतस्यन्दिकिरणश्चन्द्रमा नामतो मतः ।

विरहिणि अग्निमयी सृष्टिः । अग्निवन्मां संतापयतीत्यर्थः । अतोग्निवन्मया प्रतीयते । परान् प्रति मदन्यान् प्रति शीता शीतला किलेति स्वासंमति-द्योतनार्थम् ॥ ३०५ ॥

उदाहरणं विशदयति—शैशिर्यमिति । अत्र कामिना परेषु स्वभिन्नेषु चन्दनादीनां शैशिर्य्यं शीशिरतां शैत्यमिति यावत् अभ्युपेत्यैव अङ्गीकृत्यैव तस्य शैत्यस्य आत्मनि औष्ण्यप्रकाशनात् संतापकतया दाहारोपणात् सेयं विषयापह्नुतिः । अयं भावः अत्र चन्दनादीनां निषेध्यारोप्यधर्मयोः शैत्यतापकत्वरूपयोः व्यवस्थितविषयत्वप्रतिपादनादियं विषयापह्नुतिः । अत्र उष्णत्ववर्णनेन शैत्यनिषेधो व्यङ्ग्य इति बोध्यम् ॥ ३०६ ॥

स्वरूपापह्नुतिं दर्शयति—अमृतेति । चन्द्रमाः अमृतस्यन्दिनः किरणाः यस्य तादृशः सः नामतः केवलं सञ्ज्ञात्वेन न तु अर्थवत्त्वेन मतः । अयं भावः । चन्द्रमा इत्यस्य योगार्थः चन्दयति अमृतस्यन्दिकिरणैराह्लादयति इति चन्द्रः स्फायितञ्चि इति चदिधातो रक्प्रत्ययः । चन्द्रः सन् मस्यति परिणमते इति चन्द्रमाः । अथवा चन्द्रम् अमृतं तदिव मीयते असौ इति चन्द्रमाः । एवं च चन्द्रमस्शब्दस्य यौगिकार्थो आह्लादकरूपः स तु प्रसिद्धचन्द्रमसि नास्ति विरहिणो मम संतापकत्वात् । अतः विषौ चन्द्रमस्शब्दः केवलरूढिबलात् मण्डपकुशलादिवत् बोद्धव्यः न तु

---

ii. 305 वृष्टिः for सृष्टिः V, M;—मयि शीता for शीता किल P,B,R,J.

ii. 306—अभ्युपेत्यैवं for अभ्युपेत्यैव V;—प्रकाशनात् for प्रदर्शनात् P, B, R;—सैषा मता for तस्य सैषा M;—सेयं for सैषा P, B;—प्रदर्शनं तच्च D's emendation in margin.

ii. 307—नाम नामतः for नामतो मतः R; नाम नो मतः Pn;—मम for मतः V.

अन्य एवायमर्थात्मा विषनिष्यन्दिदीधितिः ॥ ३०७ ॥
इति चन्द्रत्वमेवेन्दोर्निवर्त्यार्थान्तरात्मता ।
उक्ता स्मरार्तेनेत्येषा स्वरूपापह्नुतिर्मता ॥ ३०८ ॥
उपमापह्नुतिः पूर्वमुपमास्वेव दर्शिता ।

[1]कुम्भकारादिवत् यौगिकः । एवं चन्द्रमसः अमृतस्यन्दिकिरणैराह्लादकत्वं निषिध्य आरोप्यार्थं दर्शयति अन्य इति । अयं चन्द्रमाः अन्यः अर्थात्मा पदार्थस्वरूपः आह्लादकभिन्नधर्मविशिष्टः इत्यर्थः । किं धर्मविशिष्टः [2]इत्याह विषेति । विषनिष्यान्दिन्यः दीधितयः किरणाः यस्य तादृशः । एवं चात्र धर्मनिषेधपूर्वकधर्मान्तरारोपादपह्नुतिः ॥ ३०७ ॥

उदाहरणं विशदयति—इतीति । केनचित् स्मरार्तेन मदनपीडितेन इति एवंप्रकारेण इन्दौ चन्द्रत्वम् आह्लादकस्वरूपत्वं निवर्त्य निषिध्य [3]अर्थान्तरात्मता विषनिष्यान्दिदीधितिस्वरूपवत्ता । उक्ता आरोपिता अतः एषा स्वरूपापह्नुतिर्बोद्धव्या । स्वं रूप्यते अनेन इति स्वरूपं नैसर्गिकगुण-क्रियादिधर्मः तन्निषेधपूर्विकेयमिति स्वरूपापह्नुतिः ॥ ३०८ ॥

अपह्नुतिमुपसंहरति—उपमेति । उपमायाः सादृश्यस्य अपह्नुतिः उपमापह्नुतिः सा पूर्वमुपमासु उपमालंकारभेदेषु दर्शिता प्रतिषेधोपमा-[3]रूपया दर्शिता इत्यर्थः । तदुदाहरणं हि—

न जातु शक्तिरिन्दोस्ते मुखेन प्रतिगर्जितुम् ।
कलङ्किनो जडस्येति प्रतिषधोपमैव सा ॥ इति ।

[4]अत्र हि चन्द्रप्रतियोगिकं सादृश्यं प्रतिषिध्य सादृश्यमूलगुणातिशय-स्थापनमार्थम् अतः इयमुपमापह्नुतिः । अत्र औपम्यमूलभूतगुणातिशय-संस्थापिकेयमपह्नुतिः औपम्यचारुताया विकासयित्री इति तदङ्गभूता । [5]औपम्यचारुता तु प्रधाना इति उपमाभेदे तस्याः परिगणनामिति ज्ञेयम् ।

---

ii. 307—निष्यन्द for निष्यान्दि D, Cs, V.

ii. 308—एवेन्दौ for एवेन्दोः R, P, B;—निर्वर्त्य for निवर्त्य D, V, N, J, निह्नुत्य R, M;—अर्थान्तरात्मना for अर्थान्तरात्मता Pn, Rn, Cs, D;—उक्तं for उक्ता Pn, Rn, Cs, D.

इत्यपह्नुतिभेदानां लक्ष्यो लक्ष्येषु विस्तरः ॥ ३०९ ॥

॥ इत्यपह्नुतिः ॥

श्लिष्टमिष्टमनेकार्थमेकरूपान्वितं वचः ।

तत्त्वापह्नवरूपकं तु अपह्नुतेर्भिन्नविषयमिति पूर्वं दर्शितमेव । अन्ये केचन उपमापह्नुतिः इत्यत्र उपमाशब्देन उपमारूपकयोः अनतिभेदात् रूपकं गृह्णन्ति । तथा च उपमारूपकं नाम तत्त्वापह्नवरूपकम् उपमासु रूपकभेदेषु दर्शितमिति अर्थं दर्शयन्ति । तद्रहस्यं तु अपह्नुतौ आर्थः आरोपः न युक्तः शाब्दारोपे एव चमत्कृतेर्भानात् इति स्यात् । परमस्मिन् पक्षेपि उपमाशब्दस्य रूपकार्थः न सरसः । इति उभयत्रापि किंचिद्वैकल्यं दृश्यते इति सुधीभिर्विचारणीयम् ॥ इति अनया दिशा अपह्नुतिभेदानां विस्तरो लक्ष्येषु उदाहरणविशेषेषु लक्ष्यः स्वयमूहनीयः । उपमापह्नुतितत्त्वापह्नुतिवत् अलंकारान्तरोत्पत्तिहेतवः अपन्हुतिभेदा अवगन्तव्याः । तत्र उत्प्रेक्षापह्नुतिर्यथा—

अश्रुच्छलेन सुदृशो हुतपावकधूमकलुषाक्ष्याः ।
अप्राप्य मानमङ्गैः विगलति लावण्यपूर इति ॥

एवमन्येपि प्रकाराः बोध्याः इति प्रेमचन्द्रशर्माणः ॥ ३०९ ॥

इदानीं क्रमप्राप्तं श्लेषं लक्षयति—श्लिष्टमिति । अनेकार्थम् अभिधावृत्त्या अनेकार्थप्रतिपादकम् एकरूपान्वितम् एकेन आर्थभेदेपि अभिन्नप्रयत्नोच्चार्येण रूपेण अन्वितं युक्तं समानवर्णरूपमित्यर्थः । वचः वाक्यं श्लिष्टं श्लेषालंकारयुक्तम् । इष्टं कविभिरिति शेषः । वक्रोक्तिरूपेषु प्रायः सर्वेष्वपि अलंकारेषु श्लेषः चारुतासंपादकतया कविभिरभिलषित इत्यर्थः । तदग्रे कथयिष्यति (ii. 363)—

श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम् ।
भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम् ॥ इति ।

श्लेषश्च एकतावभासहेतुः संबन्धविशेषः । स चात्र शब्दयोरेकप्रयत्नोच्चार्यरूपः अर्थयोस्तु अर्थनियामकानां प्रकरणादीनामभावात् एकप्रयत्नोच्चार्यशब्देन एककालबोध्यत्वरूपः । अन्ये तु शब्दयोर्जतुकाष्ठन्यायेन अर्थयोस्तु एकवृन्तगतफलद्वयन्यायेन श्लेष इत्याहुः । ननु अर्थभेदेन शब्दभेदः इति नियमात् कथमेकस्यैव शब्दस्य अनेकार्थत्वमिति चेत्

तदभिन्नपदं भिन्नपद-

तथाविधाकारैरपरैः शब्दैः सह श्लिष्टतयेति निश्चिनुमः। अयं च श्लेषः
१५शब्दपरिवृत्तिसहत्वासहत्वेन अर्थशब्दभेदेन द्विधेति अर्वाचीना मन्यन्ते।
प्राचीनास्तु उभयत्रापि शब्दस्य अर्थद्वयप्रतीतिमाधायैव वैचित्र्यजनक-
तया प्रधानतः अर्थसापेक्षतया अर्थशून्यकेवलशब्दवैचित्र्ये अलंकारत्वा-
१८भावादयमर्थालंकार एव इति जानन्ति। एतच्च अनेकार्थत्वम् अभिधा-
वृत्त्या युगपदनेकार्थप्रतिपादकत्वम् तच्च शक्तिसंकोचकानां संयोगादीना-
मभावे एव संभवति। यत्र तु संयोगादिभिरभिधायाः निश्चयः तत्र युग-
२१पदर्थद्वयप्रतीतेरभावान्न श्लेषः तत्राप्रकृतस्यार्थस्य ध्वनिरेव। संयोगादय-
श्चोक्ता हरिणा—

संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥ इति।

२७एते संयोगादयः नानार्थेषु शब्देषु शब्दार्थस्यानवच्छेदे संदेहे तदप-
करणद्वारा विशेषार्थनिर्णायका इति संक्षिप्तार्थः। तत्र संयोगादीना-
मुदाहरणानि सवत्सा धेनुरानीयताम् इत्यादीनि परमलघुमञ्जूषातो ज्ञेयानि
३०विस्तरभयान्नात्र लिख्यन्ते। अर्थस्यानेकत्वं च क्वचिद्वस्तुतः क्वचिदेक-
रूपत्वेपि अनेकसंबन्धित्वात्। तत्र आद्ये शब्दश्लेषः द्वितीयेर्थश्लेषः इति
३२नव्याः। अर्थश्लेषो यथा—

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्।
अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च॥ इति।

अत्रोन्नतिरधोगतिश्चैकैव परं तु सा संबन्धिभेदात् भिन्नत्वेन प्रतीयते।
३६अत्रापि संबन्धिभेदेनोन्नत्यधोगत्योरनेकत्वात् तद्वाचकपदयोरप्यनेकत्वमिति
स्वमते लक्षणसमन्वयः। इति प्रेमचन्द्रशर्माणः॥ श्लेषस्य द्वैविध्यमाह—
तदिति। शक्यतावच्छेदकस्य विभिन्नत्वेपि एकप्रत्ययप्रकृतिसमासघटितत्वेन
३९अभिन्नानि पदानि यस्मिन् तत् अभिन्नपदम् तथा भिन्नानां प्रकृति-
प्रत्ययादिभिर्भिन्नानां पदानां सुप्तिङन्तानां प्रायो बाहुल्यं यत्र तत्।

प्रायमिति द्विधा ॥ ३१० ॥

असावुदयमारूढः कान्तिमान् रक्तमण्डलः ।
राजा हरति लोकस्य हृदयं मृदुभिः करैः ॥ ३११ ॥
दोषाकरेण संबध्नन्नक्षत्रपथवर्तिना ।

तथा च अभिन्नपदवाक्ये अभङ्गश्लेषः प्रायः भिन्नपदवाक्ये च समङ्गश्लेषः ।
४२समङ्गश्लेषः एव समधिकचमत्कारकारी इति कविभिः विशेषं प्रयुज्यते अतः प्रायःपदोपादानम् इति केचित् । प्रकाशकारादयः श्लेषविशेषं शब्द-श्लेषं वर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानां भेदादष्टधा मन्यन्ते ।
४५तत्र वर्णश्लेषो यथा—विधौ शिरःस्थे कुटिले कुतः श्रीः इति । अत्र विधु-धिशब्दयोरुकारेकारयोः श्लेषः । एवमादीनि प्रत्ययादिश्लेषोदाहरणानि प्रकाशादिभ्यो ज्ञातव्यानि ॥ ३१० ॥

तत्राभिन्नपदश्लेषमुदाहरति—असाविति । उदयं प्रतापोन्नतिम् उदया-चलं च आरूढः कान्तिमान् कमनीयाकृतिः तेजस्वी च रक्तमण्डलः
३अनुरक्तप्रकृतिमण्डलः रक्तबिम्बश्च राजा नृपः चन्द्रश्च मृदुभिः अनुद्वेगकरैः शीतलैश्च करैः राजग्राह्यभागैः किरणैश्च लोकस्य हृदयं हरति चित्तमा-कर्षति । अत्र प्रकरणादिनियामकाभावात् द्वावपि नृपचन्द्रौ वाच्यौ ।
६उदयादिपदानि च प्रकृतिप्रत्ययभेदशून्यत्वादभिन्नानि इति अभङ्ग-श्लेषोयम् ॥ ३११ ॥

भिन्नपदश्लेषमुदाहरति—दोषाकरेणेति । प्रदोषः रजनीमुखम् अथवा प्रकृष्टाः दोषा यस्मिन् स प्रदोषः मदनः प्रकृष्टक्रोधलोभमोहादिदोषवान्
३पुरुषश्च प्राकरणिकः । दोषाकरेण दोषायाः निशायाः करः निशाकर इत्यर्थः पक्षे दोषाणामाकरः तेन । तथा नक्षत्रपथवर्तिना नक्षत्रमार्गे आकाशे वर्तते इति तथोक्तेन क्षत्रपथे क्षत्रोचितशौर्याद्याचारे न वर्तते तेन ।
६राज्ञा चन्द्रमसा केनचिन्नृपविशेषेण च संबध्नन् संबन्धं प्राप्नुवन् सन् अप्रियं प्रियाविरहितं द्वेष्यं च माम् इत्थम् एवं किं न बाधते अपि तु बाधत एव । अत्र दोषाकरादिपदानां प्रकृतिप्रत्ययभेदेन भिन्नार्थप्रतिपादकत्वात्
९समङ्गश्लेषोयम् राज्ञेत्यत्र तु अभङ्गः । अत्र समङ्गश्लिष्टपदानां बाहुल्यात्

ii. 312—संबद्धः for संबध्नन् D, M, V.

राज्ञा प्रदोषो मामित्थमप्रियं किं न बाधते ॥ ३१२ ॥

उपमारूपकाक्षेपव्यतिरेकादिगोचराः ।

प्रागेव दर्शिताः श्लेषा दृश्यन्ते केचनापरे ॥ ३१३ ॥

सभङ्गश्लेषः । अत एव लक्षणे प्रायःपदोपादानं सार्थकमिति ज्ञेयम् । अर्वाचीनास्तु सभङ्गाभङ्गरूपं तृतीयभेदं परिकल्प्य तस्येदमुदाहरणं मन्वते । तन्मते सभङ्गश्लेषोदाहरणं तु—

पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव ।
विलसत्करेणुगहनं संप्रति सममावयोः सदनम् ॥ इति ।

अत्र श्लिष्टानि सर्वाण्यपि पदानि सभङ्गानि इति सभङ्गश्लेषोयम् ॥ ३१२ ॥

प्रधानभूतं श्लेषं सप्रकारं प्रदर्श्य अलंकारान्तरस्याङ्गत्वेन तस्य चारुतासंपादकत्वं दिदर्शयिषुराह—उपमेति । उपमारूपकाक्षेपव्यतिरेकालंकारेषु गोचराः विषयीभूताः श्लेषाः प्रागेव तत्तदलंकारोदाहरणेषु दर्शिताः । इदानीं केचन अपरे अन्यालंकाराङ्गभूता दृश्यन्ते तत्र—

शिशिरांशुप्रतिद्वन्द्वि श्रीमत् सुरभिगन्धि च ।
अम्भोजमिव ते वक्त्रमिति श्लेषोपमा स्मृता ॥

इति श्लेषोपमादौ अर्थश्लेषः । बालेवोद्यानमालेयं सालकाननशोभिनी ।
इति समानोपमायां शब्दश्लेषः । एवम्—

राजहंसोपभोगार्हं भ्रमरप्रार्थ्यसौरभम् ।
सखि वक्त्राम्बुजमिदं तवेति श्लिष्टरूपकम् ॥

इति श्लिष्टरूपके शब्दश्लेषः तथा—

अमृतात्मनि पद्मानां श्रेष्टरि स्निग्धतारके ।
मुखेन्दौ तव सत्यस्मिन्नपरेण किमिन्दुना ॥

इत्याक्षेपे द्विविधः श्लेषः । साधारणधर्मप्रयोगवति व्यतिरेकेपि एवमेव श्लेषो द्रष्टव्यः । आदिना अर्थान्तरन्यासससमासोक्त्यादीनां परिग्रहः ॥ ३१३ ॥

ii. 312—किं नु for किं न M.
ii. 313—श्लिष्टाः for श्लेषाः V.

अस्त्यभिन्नक्रियः कश्चिदविरुद्धक्रियोपरः ।
विरुद्धकर्मा चास्त्यन्यः श्लेषो नियमवानपि ॥ ३१४ ॥
नियमाक्षेपरूपोक्तिरविरोधी विरोध्यपि ।
तेषां निदर्शनेष्वेव रूपव्यक्तिर्भविष्यति ॥ ३१५ ॥
वक्राः स्वभावमधुराः शंसन्त्यो रागमुल्बणम् ।
दृशो दूत्यश्च कर्षन्ति कान्ताभिः प्रेषिताः प्रियान् ॥३१६॥

कथयितव्यान् भेदानुद्दिशति—अस्तीति । सुगमम् ॥ ३१४ ॥

नियमेति । तेषां निर्दिष्टानामेषामित्यर्थः निदर्शनेषु उदाहरणेषु रूपं स्वरूपम् आविर्भविष्यति प्रकटीभविष्यति ॥ ३१५ ॥

अभिन्नक्रियश्लेषमुदाहरति—वक्रा इति । कान्ताभिः प्रियाभिः प्रेषिताः क्षिप्ताः नायकानयनार्थं प्रेषिताश्च वक्राः तिर्यक्प्रसारिण्यः वक्रोक्तिनिपुणाश्च स्वभावेन मधुराः स्वाभाविकमनोहराः मधुरस्वभावाश्च उल्बणम् अत्यन्तं प्ररूढं रागं लौहित्यम् अनुरागं च शंसन्त्यः सूचयन्त्यः कथयन्त्यश्च दृशः नयनानि दूत्यश्च प्रियान् कर्षन्ति आवर्जयन्ति । अत्र वक्रादिविशेषणानां श्लिष्टत्वं दृग्दूतीनां च कर्षणरूपैककियायामन्वयः । श्लेषस्य एककियत्वं च स्वाश्रयीभूतविशेषणानां विशेष्ययोः दृग्दूत्योरेककर्षणक्रियावत्त्वात् परंपरया बोध्यम् । अत्र—

विवक्षितगुणोत्कृष्टैर्यत् समीकृत्य कस्यचित् ।
कीर्तनं स्तुतिनिन्दार्थं सा मता तुल्ययोगिता ॥

इति वक्ष्यमाणस्वरूपायाः तुल्ययोगितायाः निर्वाहकत्वादयं श्लेषः तुल्ययोगिताङ्गभूतः । अपरे तु एककियया वाक्यद्वयदीपनात् क्रियादीपकस्याङ्गभूतोयमित्याहुः ॥ ३१६ ॥

---

ii. 314—अविभिन्न for अविरुद्ध D (later corrected to अविरुद्ध; similarly विभिन्न for विरुद्ध in the next quarter);—वाच्यन्यः for चास्त्यन्यः M;—क्रियः परः for क्रियोपरः D;—विरुद्धधर्मा for विरुद्धकर्मा Rn.

ii. 315—एषां for तेषां D;—रूपमाविः for रूपव्यक्तिः P, B, R, D, J.

ii. 316—स्निग्धाः for वक्राः M, R;—स्वभावमधुराः स्निग्धाः for वक्राः स्वभावमधुराः N, V;—प्रेरिताः for प्रेषिताः V.

मधुरा रागवर्धिन्यः कोमलाः कोकिलागिरः ।
आकर्ण्यन्ते मदकलाः श्लिष्यन्ते चासितेक्षणाः ॥ ३१७॥
रागमादर्शयन्नेष वारुणीयोगवर्धितम् ।
तिरोभवति घर्मांशुरङ्गजस्तु विजृम्भते ॥ ३१८ ॥

अविरुद्धक्रियाश्लेषमुदाहरति—मधुरेति । कोकिलागिरः आकर्ण्यन्ते असितेक्षणाश्च श्लिष्यन्ते । उभे अपि श्लिष्टविशेषणैर्वर्णयति । मधुराः स्वरमाधुर्यशालिन्यः माधुर्याख्यनायिकालंकारयुक्ताश्च । माधुर्यं च—सर्वावस्थाविशेषेषु माधुर्यं रमणीयता । इत्युक्तप्रकारकम् । रागवर्धिन्यः उद्दीपकत्वेन प्रणयाविष्कारेण च अनुरागं वर्धयन्त्यः कोमलाः कर्णमधुराः मृदुगात्र्यश्च मदकला वसन्तप्रारम्भे मदोन्मत्ताः सौभाग्याद्यवलेपविकारवत्यश्च । उक्तं च मदलक्षणं यथा—मदो विकारः सौभाग्ययौवनाद्यवलेपजः । इति । अत्राकर्णनाश्लेषणक्रिययोरेककालीनत्वसंभवेनाविरोधः । श्लेषस्य अविरुद्धक्रियासंबन्धश्च स्वाश्रयविशेषणविशेष्ययोः कोकिलालापासितेक्षणयोः कर्मत्वेन संबन्धात् तत्संबन्धेन परंपरया बोध्यः । अत्रापि श्लेषस्य तुल्ययोगिताङ्गत्वं ज्ञेयम् ॥ ३१७ ॥

विरुद्धक्रियं श्लेषमुदाहरति—रागेति । एषः पुरो दृश्यमानः घर्मांशुः सूर्यः तिरोभवति अस्ताचलं गच्छति । अङ्गजस्तु मदनस्तु विजृम्भते उद्योतते । उभौ अपि श्लिष्टविशेषणेन वर्णयति रागमिति । वारुणी पश्चिमदिक् तस्याः योगेन संबन्धेन वर्धितं स्फीतं रागं लौहित्यम् आदर्शयन् पक्षे वारुणी मदिरा तस्याः योगः सेवनं तेन वर्धितम् रागम् अनुरागम् आदर्शयन् । अत्र तिरोभवनविजृम्भणक्रिये परस्परविरुद्धे । श्लेषस्य तत्र संबन्धः पूर्ववत् परंपरया ज्ञेयः । अत्र तुल्ययोगितालंकारः प्रधानतया वर्तते ॥ ३१८ ॥

---

ii. 317—मदरागविवर्धिन्यः for मधुरा रागवर्धिन्यः M.

ii. 318—आकर्शयन् for आदर्शयन् M;—वर्धितः for वर्धितम् M;—पराभवति for तिरोभवति N, M, D (marginally corrected into तिरोभवति) V;—अनङ्गः for अङ्गजः D;—च for तु N, M, Pn;—परापतति for तिरोभवति Rn.

निस्त्रिंशत्वमसावेव धनुष्येवास्य वक्रता ।
शरेष्वेव नरेन्द्रस्य मार्गणत्वं च वर्तते ॥ ३१९ ॥
पद्मानामेव दण्डेषु कण्टकस्त्वयि रक्षति ।
अथवा दृश्यते रागिमिथुनालिङ्गनेष्वपि ॥ ३२० ॥

सनियमश्लेषमाह—निस्त्रिंशत्वमिति । अस्य नरेन्द्रस्य असौ खड्गे एव नतु मनसि निःस्त्रिंशत्वम् निर्गतः त्रिंशतः अङ्गुलिभ्यः इति निस्त्रिंशः त्रिंशदङ्गुल्यधिकपरिमाणत्वम् निर्दयत्वम् च । धनुष्येव वक्रता आकर्षनेन असरलता प्रतिकूलता च । मार्गणत्वं शरत्वं याचकत्वं च शरेषु एव न तु प्रजासु । वर्तते इति सर्वत्रान्वेतव्यम् । अत्र प्रतिवाक्यं एवकारेण द्वितीयार्थानां व्यवच्छिन्नत्वात् अयं नियमवानर्थश्लेषः । अत्र—अनेन च परिसंख्यायाः परिपोषः । ग्रन्थकृता अस्वीकृतापि परिसंख्या स्फुटवैचित्र्यादङ्गीकार्येति टीकाकाराः । वयं तु नियमश्लेषेनैव तस्याः सर्वस्य विषयस्याक्रमणात् किं परिसंख्येति नामान्तराश्रयणे प्रयोजनमस्तीति न जानीमः । दश्यन्ते केचनापरे इति अङ्गाङ्गिरूपस्य उभयस्यापि श्लेषस्य दर्शनं प्रतिज्ञातमवबोद्धव्यम् । तथा चात्र आचार्यमतेन अङ्गी एष श्लेषः न परिसंख्याङ्गभूत इति विचारणीयम् ॥३१९॥

नियमाक्षेपरूपोक्तिश्लेषमुदाहरति—पद्मानामेवेति । त्वयि रक्षति सति पद्मानामेव दण्डेषु कण्टकः न तु प्रजासु । कण्टकः तीक्ष्णाग्रावयवविशेषः क्षुद्रशत्रुश्च । नियमश्लेषमाक्षिपति—अथवेति । रागिमिथुनस्य अनुरक्तकामिनोः आलिङ्गनेषु अपि कण्टकः रोमाञ्चः दृश्यते । अत्र पद्मनामेव इति सनियमश्लेषस्य अथवेत्यादिना आक्षेपः अतः नियमाक्षेपरूपोक्तिश्लेषः । स च एकत्र निहितस्य कण्टकस्य वाक्यद्वयोद्दीपनात् प्रधानस्य दीपकस्याङ्गमिति ध्येयम् ॥ ३२० ॥

---

ii. 319—बाणेष्वेव for शरेष्वेव D;—प्रवर्तते for च वर्तते D, V.

ii. 320—कण्टकांश्चैव for कण्टकस्त्वयि V.

महीभृद्भूरिकटकस्तेजस्वी नियतोदयः ।
दक्षः प्रजापतिश्चासीत् स्वामी शक्तिधरश्च सः ॥ ३२१ ॥
अच्युतोप्यवृषोच्छेदी राजाप्यविदितक्षयः ।

अविरोधिश्लेषमुदाहरति—महीभृदिति । स नृपः महीभृत् महीं बिभर्तीति महीभृत् पृथ्वीधारकः पर्वतश्च भूरिकटकः बहुस्कन्धावारः विशालनितम्बश्च अस्ति । तथा स तेजस्वी प्रतापवान् सूर्यश्च नियतोदयः सततोन्नतिशाली नियतोद्गमश्च तथा दक्षः निपुणः प्रजापतिविशेषश्च प्रजापतिः प्रजापालकः सृष्टिकर्ता च । तथा स्वामी प्रभुः कार्तिकेयश्च शक्तिधरः प्रभावोत्साहमन्त्रशक्तिसंपन्नः आयुधविशेषवांश्च अस्ति । अत्र महीभृत् भूरिकटकः तेजस्वी नियतोदयः दक्षः प्रजापतिः स्वामी शक्तिधरः इति श्लिष्टपदयुगलानामविरोधित्वादविरोधिश्लेषः । स एव चात्र प्रधानः ॥ ३२१ ॥

विरोधिश्लेषमुदाहरति—अच्युतेति । अच्युतः सन्मार्गात् भ्रष्टः विष्णुश्च अपि अवृषोच्छेदी वृषः धर्मः तन्नामासुरश्च तं न उच्छिनत्तीति तथोक्तः । राजापि राजा नरपतिः चन्द्रश्च अपि अविदितः अज्ञातः क्षयः संपत्क्षीणता राजयक्ष्मा च येन तादृशः । देवः राजा सुरश्चापि अविबुधः विबुधः विगतपण्डितः देवश्च न भवतीति तथोक्तः । शंकरः कल्याणकरः हरश्चापि अभुजङ्गवान् भुजङ्गः पिङ्गः सर्पश्च तद्वान् तद्विशिष्टः न भवतीति अभुजङ्गवान् । जज्ञे इति सर्वत्र वाक्येषु योजनीयम् । अत्राच्युतादिपदानां द्वितीयार्थे विष्ण्वादौ वृषोच्छेद्यादिद्वितीयपदार्थस्याभावो विरुद्धः इति विरोधिश्लेषोयम् । अयं च विरोधाभासस्याङ्गम् । सरस्वतीकण्ठाभरणे तु भिन्नाभिन्नकारकरूपेणास्या भदौ प्रदर्शितौ । तत्र भिन्नकारको यथा—

गतिर्वेणी च नागेन वपुरूरू च रम्भया ।
ओष्ठौ पाणी प्रवालैश्च तस्यास्तुल्यत्वमाययुः ॥ इति ।

---

ii. 321'—वृषच्छेदी for वृषोच्छेदी J, P, B, R.

देवोप्यविबुधो जज्ञे शंकरोप्यभुजंगवान् ॥ ३२२ ॥

॥ इति श्लेषचक्रम् ॥

गुणजातिक्रियादीनां यत्र वैकल्यदर्शनम् ।

तस्या नायिकायाः गतिः गमनं वेणी केशरचना च नागेन हस्तिना सर्पेण च समा अत्र प्रथमार्थे नागशब्देन धर्मधर्मिणोरभेदोपचारान्नाग-गतिर्गृह्यते । तस्या वपुः शरीरम् ऊरुद्वयं च रम्भया अप्सरोविशेषया कमलया च तस्या ओष्ठौ पाणी च प्रवालैः विद्रुमैः नवपल्लवैश्च । तुल्य-त्वमाययुः । अत्र वर्णनीययोस्तुल्यत्वं श्लेषप्रभावाल्लभ्यते । सोयमनेक-कर्तृत्वाद्भिन्नकारकः । अभिन्नकारकः श्लेषो यथा—

कृष्णार्जुनानुरक्तापि दृष्टिः कर्णावलम्बिनी ।
याति विश्वसनीयत्वं कस्य ते कलभाषिणि ॥ इति ।

हे कलभाषिणि मधुरवचने तव दृष्टिः कस्य विश्वसनीयत्वं विश्वासार्हतां याति न कस्यापि इत्यर्थः । तदेवोपपादयति कृष्णेति । कृष्णा श्यामा अर्जुना श्वेता अनुरक्ता प्रान्तलोहिता च कर्णावलम्बिनी कर्णपर्यन्तगा-मिनी । पक्षे कृष्णे श्रीहरौ अर्जुने मध्यमपाण्डवे च अनुरक्ता अनुराग-वती कर्णपक्षपातिनी च । अतः विरुद्धपक्षद्वयाश्रितत्वात् कथं सा विश्वस-नीया स्यात् । स चायमेककर्तृकत्वादभिन्नकारकः श्लेषो भवति । एवं प्रभेदविशेषा अन्येभ्य आकरग्रन्थेभ्यो बोद्धव्याः । विस्तारभियोपर-म्यतेस्माभिः ॥ ३२२ ॥

क्रमप्राप्तां विशेषोक्तिं लक्षयति—गुणजातीति । विशेषः वर्णनीय-त्वेन प्रस्तुतस्य वीर्याद्यतिशयः तस्य दर्शनायावगमाय गुणजातिक्रियादीनां आदिशब्देन द्रव्याणां च यत्तु वैकल्यदर्शनं कार्यसिद्धौ निष्फलत्वप्रति-

---

ii. 322—यज्ञे for जज्ञे N, V, D.

ii. 323—यत्तु for यत्र P, R, J; यत्तद् Cs, D;—वैफल्य for वैकल्य Rn.

विशेषदर्शनायैव सा विशेषोक्तिरिष्यते ॥ ३२३ ॥

पादनं सा विशेषोक्तिः इष्यते । विशेषाय गुणादिवैकल्योक्तित्वाद्विशेषोक्तिरिति अवयवार्थः । गुणानामिति न स्वरूपनिर्धारणाय अपि तु भेदावगमायेति ज्ञेयम् । पदार्थमात्रवैकल्ये अस्याः स्वरूपत्वात् । अतिशयोक्तौ प्रस्तुतस्य वीर्याद्यतिशयदर्शनसद्भावेपि गुणादीनां वैकल्यं न प्रतिपाद्यते इति ततोस्या भेदः । एवकारेण विशेषदर्शनाभावे नायमलंकारः इति सूच्यते । सरस्वतीकण्ठाभरणेपि एतदेव लक्षणं स्वीकृतम् । इदमेव लक्षणं च(iv.3.23)—एकगुणहानकल्पनायां साम्यदार्ढ्यं विशेषोक्तिः इति वामनेन स्थिरीकृतम् । विशेषदर्शनायैवेत्यनेन विभावनातः भेदो दर्शितः । तत्र हि प्रधानतया कारणान्तरस्वाभाव्यत्वं वा विभावनीयम् न प्रस्तुतस्यातिशयो वाच्यः । इह तु गुणादिप्रतिषेधेन प्रस्तुतस्यातिशयोपेक्षितः । नव्यास्तु—विशेषोक्तिरखण्डेषु कारणेषु फलावचः इति विशेषोक्तिमाहुः । अत्राहुः प्रेमचन्द्रशर्माणः—नव्यास्तु सत्यपि कारणे कार्याभावः विशेषोक्तिरित्याहुः । तत्रालंकारसंज्ञानामन्वर्थतयैव प्राचीनैः प्रयुक्तत्वेन हेतुसमानाधिकरणकार्याभाववर्णने विशेषातीतेरभावाद्विशेषोक्तिसंज्ञाभ्युपगमे हेतुः प्रष्टव्यः । न च विशेषो वैचित्र्यं तच्च सत्यपि कारणे कार्याभावोपनिबन्धे विद्यते एवेति विशेषोक्तिसंज्ञाया अन्वर्थतैवेति वाच्यम् । अलंकारमात्रस्यैव वैचित्र्यात्मकत्वेनोपमादावपि विशेषोक्तिसंज्ञायाः प्रसङ्गात् । अथ सति हेतौ कार्याभावप्रतिपादनजन्यं स्फुटं प्रतीयमानमपि वैचित्र्यं त्वयापि कथं संज्ञान्तरेणालंकारतया न संगृहीतमिति चेन्मैवम् । तत्रास्माकमतिशयोक्तेरभ्युपगमात् । कार्यकारणपौर्वापर्यविपर्ययवदत्राप्यतिशयोक्त्यभ्युपगमस्यौचित्यात् । तस्मात् गुणादिवैकल्यवर्णने वर्णनीयस्य विशेषकथनमेव विशेषोक्तिरिति युक्ततरमिति ॥३२३॥

---

ii.332—स विशेषः स्मृतो यथा for सा विशेषोक्तिरिष्यते M (cp. ii. 329 and ii.66).

न कठोरं न वा तीक्ष्णमायुधं पुष्पधन्वनः ।
तथापि जितमेवासीदमुना भुवनत्रयम् ॥ ३२४ ॥
न देवकन्यका नापि गन्धर्वकुलसंभवा ।
तथाप्येषा तपोभङ्गं विधातुं वेधसोप्यलम् ॥ ३२५ ॥
न बद्धा भ्रुकुटिर्नापि स्फुरितो दशनच्छदः ।

तत्र गुणवैकल्यविशेषोक्तिं दर्शयति—न कठोरमिति। पुष्पधन्वनः
२ मदनस्य आयुधम् अस्त्रं न कठोरं न वा तीक्ष्णं निशितम्।

अरविन्दमशोकं च चूतं च नवमल्लिका ।
नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः ॥

इति पुष्पमयत्वादिति भावः। तथापि अमुना कामेन भुवनत्रयं जित-
६ मेवासीत्। अत्र मदनस्य वीर्यातिशयप्रदर्शनाय तदस्त्रस्य काठिण्यादिगुण-
वैकल्योक्तिः इति विशेषोक्तिः। नात्र कारणान्तरविभावनायां स्वाभावि-
कत्वविभावनायां वा तात्पर्यमतो न विभावनाप्रसक्तिः। एवं च विनोपकरणं
९ क्रियानिष्पादकतया कर्तुरुत्कर्षप्रतिपादनं उपकरणगतकठोरतीक्ष्ण-
गुणवैकल्येन प्रदर्शितमिति गुणवैकल्यविशेषोक्तिरियम् ॥ ३२४ ॥

जातिवैकल्ये विशेषोक्तिं दर्शयति—न देवेति। एषा देवकन्यका न।
गन्धर्वकुलसंभवा गन्धर्ववंशजापि न। तथापि वेधसः ब्रह्मणोपि तपोभङ्गं
३ विधातुम् अलं समर्था। अत्र देवत्वगन्धर्वत्वजातिनैरपेक्ष्येण ब्रह्मणोपि
तपोभङ्गसामर्थ्यवर्णनेन नायिकाया रूपातिशयः प्रतीयते। देव्यो गन्ध-
र्व्यश्च तपोभङ्गविधानसमर्थाः इति पुराणप्रसिद्धिः। अत्र वर्णनीयाया
६ जातिवैकल्येन विशेषो दर्शितः इति जातिवैकल्यविशेषोक्तिः ॥३२५॥

क्रियावैकल्यविशेषोक्तिं दर्शयति—न बद्धेति। भ्रुकुटिः भ्रूभङ्गः न
बद्धा। दशनच्छदः अधरः न स्फुरितः। दृष्टिरपि रक्ता ताम्रा नाभ-
३ वत्। तथापि हे वीर त्वया द्विषताम् अरीणां कुलं जितम्। बलमिति
पाठे शत्रुसैन्यं जितमित्यर्थः। अत्र बन्धनादयः क्रियाः। तद्वैकल्येन
शत्रुजयो वर्णितः। तेन लीलया शत्रुजयो विहितः इति विशेषः
६ स्फुटीभूतः। अतः क्रियावैकल्यविशेषोक्तिरियम्। अत्र केचित्—बन्धनं

ii. 326—भ्रुकुटी for भ्रुकुटिः N.

न च रक्ताभवद्दृष्टिर्जितं च द्विषतां कुलम् ॥ ३२६ ॥
न रथा न च मातङ्गा न हया न च पत्तयः ।
स्त्रीणामपाङ्गदृष्टयैव जीयते जगतां त्रयम् ॥ ३२७ ॥
एकचक्रो रथो यन्ता विकलो विषमा हयाः ।

स्फुरणं च क्रिया रक्तत्वं तु गुणः । अतः क्रियागुणवैकल्ययोरत्र संकरः ।
८ शुद्धक्रियावैकल्योदाहरणं तु—

नोपभागो न वा दानं बन्धूनां भरणं न वा ।
तथापि गुरुतां धत्ते नृणां संरक्षितं धनम् ॥ इति ।

११ अत्रोपभोगादिक्रियामात्रवैकल्यमिति वदन्ति ॥ ३२६ ॥

द्रव्यवैकल्यविशेषोक्तिं दर्शयति—न रथा इति । न रथाः न च मातङ्गाः हस्तिनः न हयाः अश्वाः न च पत्तयः पदातयः एवम्—हस्त्य-
३ श्वरथपादातं सेनाङ्गं स्याच्चतुर्विधम् इति चतुरङ्गबलवियुक्तयापि स्त्रीणां अपाङ्गदृष्टयैव तिर्यक्कटाक्षेणैव जगतां त्रयं जीयते । अत्र रथादिजय-
६ साधनद्रव्याणामभावेपि जगत्त्रयविजयः केवलया दृशा विहितः तेन च दृशां मोहनसामर्थ्यविशेषः प्रतीयते इति द्रव्यवैकल्यविशेषोक्तिः ॥ ३२७ ॥

हेतुविशेषोक्तिं दर्शयति—एकचक्र इति । रथः एकचक्रः यन्ता सारथिः विकलः चरणविकलः अश्वाः विषमाः सप्तसंख्याकाः इत्यर्थः ।
३ सप्ताश्वा नव दन्तिनः इति सप्ताश्वानां राजतन्त्रे निषेधः इति रत्नदर्पण-व्याख्यायां रत्नेश्वरः । तथापि तेजस्वी रविः नभस्तलं विस्तीर्णमाकाशम् आक्रामति । अत्र रथादिद्रव्याणामङ्गवैकल्येन द्रव्यवैकल्यम् तत्प्रतिपाद-
६ नेन विकलसाधनोपि रविर्जगत्त्रयमाक्रमतीति विशेषसामर्थ्यदर्शनात् विशेषोक्तिः । तत्र च तेजस्वीति हेतुबोधकपदविन्यासेन न तेजस्विनः अङ्गीकृतार्थसाधने उपकरणपरतन्त्रा भवन्तीति विशेषस्य परिपोषो
९ भवति इति हेतुविशेषोक्तिरियम् । भोजराजस्तु न रथा न च मातङ्गा इति द्रव्यवैकल्यविशेषोक्तिः एकचक्रो रथो यन्तेति वैकल्यवद्द्रव्यविशे-

ii. 326—ध्वस्तं for जितं M, Rn;—बलम् for कुलम् P, B, Rn, D, J.
ii. 327—विजितं for जीयते V.
ii. 328—यन्ताप्यनूरुः for यन्ता विकलो M.

आक्रामत्येव तेजस्वी तथाप्यर्कों नभस्तलम् ॥ ३२८ ॥
सेषा हेतुविशेषोक्तिस्तेजस्वीति विशेषणात् ।
अयमेव क्रमोन्येषां भेदानामपि कल्पते ॥ ३२९ ॥

॥ इति विशेषोक्तिचक्रम् ॥

विवक्षितगुणोत्कृष्टैर्यत् समीकृत्य कस्यचित् ।

षोक्तिरिति भेदद्वयं कल्पयति । तथैव वैकल्यदर्शनेनापि क्वचिदप्युप-
१२ पद्यते इति जातिगुणक्रियादीनामवैकल्येपि क्वचिदियं भवतीति मत्वा उदाहरति—

अयं तया रथक्षोभादंसेनांसो निपीडितः ।
एकः कृती शरीरेस्मिन् शेषमङ्गं भुवो भरः ॥

१६ अत्र तया स्पृष्टोंसः पुण्यवान् तयाचास्पृष्टं शेषमङ्गं मे निरर्थकम् इति योयमवैकल्यदर्शनेपि विशेषस्तेनैषा हेतुमत्यपि हेतुमता विशेष्यमा-
१८ णा यथोक्ता विशेषोक्तिर्भवतीत्याह ॥ ३२८ ॥

उदाहरणं निरूपयति—सेषेति । तेजस्वीति विशेषणात् हेतुगर्भविशेषणादिति भावः । एषा विशेषोक्तिः हेतुविशेषोक्तिः । अन्येषामपि
३ भेदानां विशेषोक्तिप्रकाराणाम् अयमेव क्रमः अयमेव मार्गः । तथा च यथात्र हेत्वलंकारसंबद्धा विशेषोक्तिस्तथालंकारान्तरसंबद्धापि ऊहनीया । तथा च—भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः । द्यूतं हि
६ नाम पुरुषस्यासिंहासनं राज्यम् । इयं ह्यकमला लक्ष्मीः । इत्यादयो रूपकसंबद्धा विशेषोक्तयो ज्ञेयाः ॥ ३२९ ॥

क्रमप्राप्तां तुल्ययोगितां लक्षयति—विवक्षितेति । विवक्षिताः प्रस्तुतगतत्वेन वक्तुमिष्टाः ये गुणाः तैरुत्कृष्टाः अधिकाः ये तैः सह स्तुति-
३ निन्दार्थं स्तुत्यर्थं निन्दार्थं कस्यचित् प्रस्तुतस्य स्तुत्यस्य वा तैर्गुणैः समीकृत्य यत् कीर्तनं कथनं सा तुल्ययोगिता मता इति अन्वयः । अत्र

---

ii. 328—आक्रामत्येष for आक्रामत्येव D;—जगत्त्रयम् for नभस्तलम् N, J, Rn, Pn, Cs, M, V.
ii. 329—कल्पने for कल्पते P, B, R, J.
ii. 330—गुणोत्कर्षैः for गुणोत्कृष्टैः Pn, D, M.

कीर्तनं स्तुतिनिन्दार्थं सा मता तुल्ययोगिता ॥ ३३० ॥

बहुवचनमविवक्षितम् । द्वाभ्यामेकेन वा समीकरणेपि अस्याः सद्भावात्।
६ तथा विवक्षितगुणोत्कृष्टैरप्रस्तुतैरेवेति न नियमः।

कटाक्षा मधुरालापा विलासास्ते च ते शुभे।
जगज्जये प्रवृत्तस्य कन्दर्पस्य महद्बलम् ॥

९ इत्यत्र कटाक्षालापविलासादीनां प्रस्तुतत्वे तस्याः सद्भावात् । प्रस्तुतयोरेव अप्रस्तुतयोरेव वा एकधर्माभिसंबन्धे तुल्ययोगिता प्रस्तुताप्रस्तुतयोरेकधर्माभिसंबन्धे दीपकमिति अर्वाचीनमतं न दण्डिनोभिमतम् ।
१२ धर्माभिसंबन्धरूपवैचित्र्यस्य सर्वत्र तुल्यत्वात् । एवं तर्हि दीपकं निर्विषयं स्यादिति चेन्न । अस्मन्मते वाक्यान्तरीयपदस्यानुषङ्गादिना स्वार्थद्वारा
१४ वाक्यान्तरार्थोद्दीपकत्वस्यैव दीपकालंकारत्वात् । तदुक्तम् (ii.97)—

जातिक्रियागुणद्रव्यवाचिनैकत्रवर्तिना ।
सर्वं वाक्योपकारश्चेत् तदाहुर्दीपकं यथा ॥ इति ।

अनेनैव लक्षणेन दीपकसंज्ञाया अन्वर्थता भवति । वामनोपि (iv. 326)
१८ विशिष्टेन साम्यार्थमेककालक्रियायोगस्तुल्ययोगिता इति सूत्रेणेदमेव लक्षणमङ्गीकरोति। भोजराजोपि तथैव । उपमायां वाच्यार्थस्य व्यङ्ग्यार्थस्य वा साम्यप्रतीतिः शाब्दी । इह तु सर्वेषां समकक्षतया शाब्द-
२१ बोधविषयत्वात् पर्यवसाने सादृश्यप्रतीतिरित्यनयोर्भेदः ।

दिवो जागर्ति रक्षायै पुलोमारिर्भुवो भवान् ।
असुरास्तेन हन्यन्ते सावलेपास्त्वया नृपाः ॥

२४ इत्यादितुल्ययोगोपमायामपि (ii. 49) व्यञ्जनयोपस्थितस्यापि सादृश्यस्य वृत्तिवेद्यत्वेन शाब्दबोधाभ्युपगमात्। व्यञ्जनाया वृत्तित्वं च सर्वालंकारिकसंमतम् । तुल्ययोगितायां तु साम्यं न वृत्तिवेद्यं किंतु पर्यवसानगम्यम् ।
२७ तेन नोभयोः संमर्दः । एवं च विवक्षितगुणशालित्वेन अप्रस्तुतैः सह प्रस्तुतस्य स्तुतिनिन्दार्थं तादृशगुणान्वयित्वकीर्तनेन या प्रशंसा निन्दा वा सा तुल्ययोगिता । केचित्तु तुल्ययोगितायां स्तुतिनिन्दयोः प्राधान्यम्
३० सादृश्यं तु उपसर्जनीभूतम् तुल्ययोगोपमायां तु सादृश्यं प्रधानम् इति ततोस्या भेद इति मन्यन्ते ॥ ३३० ॥

यमः कुबेरो वरुणः सहस्राक्षो भवानपि ।
बिभ्रत्यनन्यविषयां लोकपाल इति श्रुतिम् ॥ ३३१ ॥
संगतानि मृगाक्षीणां तडिद्विलसितानि च ।

तत्र स्तुतितुल्ययोगितामुदाहरति—यम इति । यमः कुबेरः वरुणः सहस्राक्षः इन्द्रः तथा भवान् । अनन्यविषयाम् अनन्यगामिनीं लोकपाल ३इत्याकारां श्रुतिं ख्यातिं बिभ्रति धारयन्ति । अत्र लोकपालत्वरूपो गुणः प्रस्तुतनृपे विवक्षितः । तेन च गुणेनोत्कृष्टैर्यमादिभिः समानताख्यापनेन राज्ञः स्तुतिः । अतः स्तुतिरूपा तुल्ययोगिता ॥ ३३१ ॥

निन्दातुल्ययोगितामुदाहरति—संगतानीति । मृगाक्षीणां संगतानि समागमाः तथा तडिद्विलसितानि विद्युदुन्मेषितानि च स्वयम् स्वस्यानुरा- ३गेण ताभिः घनारब्धान्यपि घनं निबिडं निरन्तरभावः तेन आरब्धानि अनुष्ठितान्यपि । पक्षे घनैः मेघैः स्वयम् आरब्धानि अपि क्षणद्वयं क्षणादूर्ध्वमपरमपि क्षणं न तिष्ठन्ति कुतो दीर्घकालावस्थानमिति भावः । अत्र ६प्रसिद्धचपलस्वभावया विद्युता सह स्त्रीणां संगमस्य चपलता समकक्षीकृत्योच्यते । तेन च निन्दावगमः स्पष्टो भवति । अतः निन्दातुल्ययोगिता । सा चात्र घनारब्धानि इति श्लेषानुप्राणितया समधिकचमत्कारं ९भजते । सरस्वतीकण्ठाभरणे (iv. 55)—

अन्ये सुखनिमित्ते च दुःखहेतौ च वस्तुनि ।
स्तुतिनिन्दार्थमेवाहुस्तुल्यत्वे तुल्ययोगिताम् ॥

१२इति मतान्तरेण तुल्ययोगिता लक्षितास्ति तत्र स्तुत्यर्थायाः उदाहरणं यथा—

आहूतस्याभिषेकाय विसृष्टस्य वनाय च ।
न मया लक्षितस्तस्य स्वल्पोप्याकारविभ्रमः ॥

१६अत्र रामस्य राज्याभिषेकवनगमनयोः पितुरादेशेन तुल्यरूपतया स्तुतिः प्रतीयते इति स्तुतिरूपा तुल्ययोगिता । निन्दार्था यथा—

यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा ।
यश्चैनं गन्धमाल्याभ्यां सर्वस्य कटुरेव सः ॥

---

ii. 332—मृगाक्षीणि for मृगाक्षीणां N.

क्षणद्वयं न तिष्ठन्ति घनारब्धान्यपि स्वयम् ॥ ३३२ ॥

॥ इति तुल्ययोगिता ॥

विरुद्धानां पदार्थानां यत्र संसर्गदर्शनम् ।
विशेषदर्शनायैव स विरोधः स्मृतो यथा ॥ ३३३ ॥

अत्र यः परशुना छिनत्ति योमुं मधुसर्पिषा सिञ्चति यो वा गन्धमा-
२१ल्याभ्यामर्चति तं प्रति तुल्यमेव निम्बस्य कटुत्वम् इति समासोक्त्या
तदुपमेयस्य निन्दा प्रतीयते इति निन्दार्था तुल्ययोगितेयम् । विस्तरस्तु
तत एव द्रष्टव्यः ॥ ३३२ ॥

अथ विरोधं लक्षयति—विरुद्धानामिति । विशेषस्य प्रस्तुतगतोत्कर्षस्य
दर्शनाय प्रतिपादनायैव विरुद्धानां परस्परैः सहानवस्थानवतां परस्पर-
३सामानाधिकरण्यशून्यानामित्यर्थः पदार्थानां यत्र वैचित्र्ये संसर्गदर्शनं
सहावस्थानं सामानाधिकरण्यप्रतिपादनमित्यर्थः सः विरोधमूलत्वाद्विरो-
धालंकारः स्मृतः । यथेति उदाहरणोपन्यासाय । तत्र प्ररूढविरोधो दोषाय
६अप्ररूढश्चालंकाराय । प्ररोहश्च बाधबुद्ध्यानभिभूतत्वम् । बाधबुद्ध्या-
भिभूतत्वं च अप्ररोहः । तथा च विरुद्धानां नाम वस्तुतः विरोधाभा-
वेपि मुखतः विरुद्धत्वेन प्रतिभासमानाम् इत्यर्थः तदुक्तं प्रकाशकृता—
९विरोधः सोविरोधेपि विरुद्धत्वेन यद्वचः । इति । पदार्थानां जातिगुण-
क्रियाद्रव्याणाम् । तेषु जात्या जातिगुणक्रियाद्रव्यभिः चतुर्भिर्विरोध
गुणस्य गुणक्रियाद्रव्यभिः त्रिभिः क्रियायाः क्रियाद्रव्याभ्याम् द्रव्यस्य
१२द्रव्येणेति प्रकाशोक्तदशप्रकारो विरोधो ज्ञेयः । अयं शब्दश्लेषनिबन्ध-
श्चेद्विरोधाभास उच्यते इति प्रेमचन्द्रशर्माणः । वामनस्तु विरुद्धाभास-
१४त्वं विरोधः इति सूत्रयित्वा (iv. 3. 12)—

पीतं पानमिदं त्वयाद्य दयिते मत्तं ममेदं मनः
पत्राली तव कुङ्कुमेन रचिता रक्ता वयं मानिनि ।
त्वं तुङ्गस्तनभारमन्थरगतिर्गात्रेषु मे वेपथु-
स्त्वन्मध्ये तनुता ममाधृतिरहो प्रेम्णो विचित्रा गतिः ॥

१९इत्युदाजहार । एष च अपिशब्दप्रयोगे वाच्योन्यथा व्यङ्ग्यः ॥ ३३३ ॥

ii. 332—घनारम्भाण्यपि for घनारब्धान्यपि V.

ii. 333—विरोधदर्शनायैव for विशेषदर्शनायैव Ca, Cb, R, M; विरोधसाधनायैव Rn, Cs.

कूजितं राजहंसानां वर्धते मदमञ्जुलम् ।
क्षीयते च मयूराणां रुतमुत्कान्तसौष्ठवम् ॥ ३३४ ॥
प्रावृषेण्यैर्जलधरैरम्बरं दुर्दिनायते ।
रागेण पुनराक्रान्तं जायते जगतां मनः ॥ ३३५ ॥
तनुमध्यं पृथुश्रोणि रक्तौष्ठमसितेक्षणम् ।

तत्रादौ क्रियाविरोधमुदाहरति—कूजितमिति । राजहंसानां मदमञ्जुलं मदेन मनोरमं कूजितं वर्धते । मयूराणाम् उत्क्रान्तम् अपगतं सौष्ठवं मनोहारित्वं यस्मात् तत् तादृशं कूजितं क्षीयते ह्रासमेति । अत्रैकस्मिन् शब्दरूपे कर्तरि विरुद्धयोर्वृद्धिक्षयरूपक्रिययोः संबन्धप्रतिपादनेन विरोधः । संबन्धिभेदेन शब्दयोर्भिन्नत्वेन तत्प्रशमः । तेन च एवंविधवृद्धिक्षयकारितया शरत्कालस्य माहात्म्यं स्फुटं प्रतीयते इति अलंकारतास्य ॥ ३३४ ॥

वस्तुगतगुणविरोधं दर्शयति—प्रावृषेण्यैरिति । प्रावृषेण्यैः प्रावृषिभवैः जलधरैः अम्बरं दुर्दिनायते श्यामलं भवतीत्यर्थः । जगतां जगतिस्थितानां जनानां मनः रागेण अनुरागेण लौहित्येन च आक्रान्तं व्याप्तं जायते । अत्रानुरागस्य लौहित्येनाध्यवसानात् श्यामत्वलौहित्यगुणयोरेकजलधरसंभवरूपसंसर्गकीर्तनं विरोधः । तस्य अनुरागरूपार्थान्तरेण परिहारः । तेन च वर्षासमयस्य विशेषः प्रतीयते इति वस्तुगतगुणविरोधोयं ज्ञेयः ॥ ३३५ ॥

अवयवगतगुणविरोधं दर्शयति—तनुमध्यमिति । स्त्रीणां कामिनीनां तनुमध्यम् कृशावलग्नं पृथुश्रोणि विशालनिम्बं रक्तौष्ठम् असितेक्षणम् कृष्णनयनं नतनाभि निम्ननाभि उन्नतस्तनं तुङ्गकुचं वपुः कं पुरुषं न हन्ति न पीडयति सर्वमेव पीडयतीत्यर्थः । अत्र तनुत्वविशालत्वयोः रक्तत्वासितत्वयोः नतत्वोन्नतत्वयोः गुणयोर्विरोधः । आश्रयीभूतावयवभेदेन च

---

ii. 334—रुतं संक्रान्त for रुतमुत्क्रान्त Cs.

ii. 335—दर्शनायते for दुर्दिनायते M; नतायते (?) Cs;—उत्सिक्तं for आक्रान्तं Pn.

ii. 336—रक्तोष्ठम् for रक्तौष्ठम् R, D, M.

नतनाभि वपुः स्त्रीणां कं न हन्त्युन्नतस्तनम् ॥ ३३६ ॥
मृणालबाहु रम्भोरु पद्मोत्पलमुखेक्षणम् ।
अपि ते रूपमस्माकं तन्वि तापाय कल्पते ॥ ३३७ ॥
उद्यानमारुतोद्धूताश्चूतचम्पकरेणवः ।
उदश्रयन्ति पान्थानामस्पृशन्तोपि लोचने ॥ ३३८ ॥
कृष्णार्जुनानुरक्तापि दृष्टिः कर्णावलम्बिनी ।

६ परिहारः । तेन वर्णनीयायाः नायिकायाः विशेषः प्रतीयते । अतः अव-
यवगतगुणविरोधोयम् । केचित्तु बहूनां गुणयुग्मानां विरोधोपन्यासे
वैचित्र्यातिशयः इति ज्ञापनीयतादृशगुणविरोधप्रदर्शनायैतदुहारणमिति
९ मन्यन्ते ॥ ३३६ ॥

विषमविरोधमुदाहरति—मृणालेति । हे तन्वि ते रूपम् मृणालमिव शीतले बाहू यस्य तत् रम्भा कदली तत्सदृशौ ऊरू यस्य तत् पद्म-
३ मिव उत्पले इव मुखम् ईक्षणे च क्रमेण यस्य तत् एतादृशशीतलवस्तुतुल्य-
मपि अस्माकं तापाय संतापाय कल्पते । विरहिण उक्तिरियम् । अत्र
कारणगुणाः कार्यगुणमारभन्ते इति न्यायवित्समयानुरोधेन शीतलरू-
६ पात् कारणात् शीतलं कार्यं भवितुमर्हति न तु संतापः इति विषमवि-
रोधः । समवायिकारणे स नियमः न तु निमित्तकारणे इति परिहारः ।
अनेन च नायिकायाः सौन्दर्यातिशयो वर्णितो भवति इति विषमविरो-
९ धालंकारः ॥ ३३७ ॥

असंगतिविरोधमुदाहरति—उद्यानेति । उद्यानमारुतेनोद्धूताः चूतानाम् आम्राणां चम्पकानां च रेणवः परागाः पान्थानां पथिकानां लोचने
३ अस्पृशन्तोपि उदश्रयन्ति उद्गतबाष्पे कुर्वन्ति । अत्र स्पर्शनाभावेपि
बाष्पोद्गमः इति परस्परमसंगतेरयमसंगतिर्नाम विरोधः । तत्प्रशमनं च
परागाणामुद्दीपकतयेति ज्ञेयम् । अनेन च नायकस्योत्कण्ठातिशयः
६ सूच्यते ॥ ३३८ ॥

श्लेषमूलं विरोधमुदाहरति—कृष्णार्जुनेति । हे कलभाषिणि मधुरव-

---

ii. 339—कर्णानुलम्बिनी for कर्णावलम्बिनी N.

याति विश्वसनीयत्वं कस्य ते कलभाषिणी ॥ ३३९ ॥
इत्यनेकप्रकारोयमलंकारः प्रतीयते ।

॥ इति विरोधचक्रम् ॥

चने ते दृष्टिः कृष्णार्जुनयोरनुरक्तापि कर्णावलम्बिनी राधेयानुसारिणी । कृष्णा असिता अर्जुना श्वेता अनुरक्ता प्रान्तप्रदेशे आरक्तापि कर्णावलम्बिनी कर्णप्रान्ताश्रयिणी । कस्य विश्वसनीयत्वं याति विरुद्धपक्षद्वयाश्रयणादिति भावः । इति द्वितीयार्थः । अत्र कृष्णार्जुनानुरक्तायाः कर्णावलम्बनं विरुद्धमिति क्रियाविरोधः । द्वितीयार्थेन तत्परिहारः । अयं च विरोधः श्लेषमूलकः इति श्लेषविरोधः तेन दृष्टेः सौन्दर्यं प्रतीयते ॥३३९॥

विरोधमुपसंहरति—इत्यनेकेति । एवमयमलंकारः अनेकविधः प्रतीतिविषयो भवति । तथा च भोजराजेन ग्रथितविरोधः उदाहृतोस्ति यथा (iii. p. 290)—

दिग्वासा यदि तत् किमस्य धनुषा शस्त्रस्य किं भस्मना
भस्मस्याथ किमङ्गना यदि च सा कामं परिद्वेष्टि किम् ।
इत्यन्योन्यविरुद्धचेष्टितमिदं पशान्निजस्वामिनो
भृङ्गी सान्द्रशिरावनद्धपरुषं धत्तेस्थिशेषं वपुः ॥ इति ।

अत्र दिग्वाससादीनामुत्तरोत्तरग्रथनादन्योन्यासंगतादयं ग्रथितनामा विरोधभेदः । अधिकविरोधो यथा—

एको दाशरथिः कामं यातुधानाः सहस्रशः ।
ते तु यावन्त एवाजौ तावद्धा ददृशे स तैः ॥ इति ।

अत्रैकस्य दाशरथेरनेकसंख्यैर्यातुधानैर्यत् समरकर्म तत्र तस्य तावद्धादृश्यमानत्वेनैकसंख्याविरुद्धमाधिक्यं गम्यते इत्ययमधिकाख्यो विरोधः इति । विस्तरस्तु भोजप्रणीते सरस्वतीकण्ठाभरणे द्रष्टव्यः ॥ उत्तरार्धेन

---

ii. 339—कस्य...याति for याति...कस्य M;—याति दुःशासनीयत्वं कथं ते कलभाषिणि is an extra line given by D, probably the work of some one improving upon the original.

ii. 340—अलंकारोतिशोभते for अलंकारः प्रतीयते Pn.

अप्रस्तुतप्रशंसा स्यादप्रक्रान्तेषु या स्तुतिः ॥ ३४० ॥
सुखं जीवन्ति हरिणा वनेष्वपरसेविनः ।
अयत्नसुलभैर्जलदर्भाङ्कुरादिभिः ॥ ३४१ ॥

१५ अप्रस्तुतप्रशंसां लक्षयति—अप्रस्तुतेति । अप्रक्रान्तेषु षष्ठ्यर्थे सप्तमी अप्रस्तुतानामित्यर्थः या स्तुतिः प्रस्तुतस्य निन्दार्थमिति शेषः । सा अप्रस्तुतप्रशंसा । अप्रक्रान्तेषु इति बहुवचनमविवक्षितम् । तेन द्वयोरेकस्य १८ वा अप्रस्तुतस्य स्तुतावपि एषा भवति । अप्रक्रान्तेप्सितस्तुतिरिति पाठे अप्रस्तुतस्य ईप्सिता प्रस्तुतनिन्दार्थमभीष्टा स्तुतिरिति स एवार्थः । नव्यास्तु अप्रस्तुतात् वाच्यात् प्रस्तुतप्रतीतौ अप्रस्तुतप्रशंसा प्रस्तुतात् २१ वाच्यात् अप्रस्तुतप्रतीतौ समासोक्तिः इति विषयविभागेनालंकारद्वयमाहुः । अयमाचार्यदण्डी तु अप्रस्तुताद्वाच्यात् प्रस्तुतस्य प्रतीतौ समासोक्तिः अप्रस्तुतप्रशंसया प्रस्तुतस्य निन्दा अप्रस्तुतप्रशंसा इति विष- २४ यविभागेनालंकारद्वयं स्वीकरोति । आचार्यमते अप्रस्तुतप्रशंसेति संज्ञाया अन्वर्थता भवति ॥ अन्ये तु समासोक्तौ वाच्यव्यङ्ग्ययोरुपमानोपमेयभावः अप्रस्तुतप्रशंसायां तु व्यङ्ग्यार्थस्य निन्दा इति भेदं दर्शयन्ति । २७ तदपरे न सहन्ते यतः सुखं जीवन्ति हरिणा इत्युदाहरणे वयमधन्या इति वैधर्म्येण औपम्यमस्तीति सोयं समासोक्तिविषयः स्यात् । सेयमप्रस्तुतैवात्र मृगवृत्तिः प्रशस्यते इति ग्रन्थकर्त्रा कृतेनोदाहरणविवरणेन ३० संज्ञाया अन्वर्थताङ्गीकारे ग्रन्थकर्तुः स्वारस्यं दृश्यते । तथा च अप्रस्तुतप्रशंसायामप्रस्तुतप्रशंसैवापेक्षिता भवति न तु उक्तिमात्रे सा भवितुमर्हति इति निष्कर्षः ॥ ३४० ॥

अप्रस्तुतप्रशंसामुदाहरति—सुखमिति । अपरसेविनः परसेवाविमुखाः हरिणाः अयत्नसुलभैः सुखसाध्यैः तृणदर्भाङ्कुरादिभिः अन्नैः भोज्यैः ३ वनेषु सुखं जीवन्ति । सेवानिर्विण्णस्योक्तिरियम् ॥ ३४१ ॥

---

ii. 340—अप्रक्रान्तेषु तु for अप्रक्रान्तेषु M;—अप्रक्रान्तेप्सितस्तुति for अप्रक्रान्तेषु या स्तुतिः Pn,D(marginal emendation);—अप्रक्रान्तेप्सिता for अप्रक्रान्तेषु या reading noticed in Cs.
ii. 341—अन्नैः for अर्थैः J(?), P, B, R;—तृण for जल P, B, R.

सेयमप्रस्तुतैवात्र मृगवृत्तिः प्रशस्यते ।
राजानुवर्तनक्लेशनिर्विण्णेन मनस्विना ॥ ३४२ ॥

॥ इत्यप्रस्तुतप्रशंसा ॥

यदि निन्दन्निव स्तौति व्याजस्तुतिरसौ स्मृता ।

उदाहरणं संगमयति—सेयमिति । अत्र एतदुदाहरणे राजानुवर्तनक्लेशनिर्विण्णेन सेवायाः श्ववृत्तित्वादिति भावः। तदुक्तं मनुना—सेवा श्ववृत्तिराख्याता तस्मात् तां परिवर्जयेत्। इति । मनस्विना सेयम् अप्रस्तुतैव मृगवृत्तिः प्रशस्यस्ते। एवकारेण प्रस्तुताप्रस्तुतयोः प्रशंसायां नायमलंकारः इति गम्यते । तथाहि—

याते मध्यचिरान्निदाघमिहिरज्वालाशतैः शुष्कतां
गन्ता कं प्रति पान्थसंततिरसौ संतापमालाकुला ।
इत्थं यस्य निरन्तराधिपटलैर्मित्यं वपुः क्षीयते
धन्यं जीवनमस्य मार्गसरसो धिग् वारिधीनां जनुः ॥

अत्राप्रस्तुतस्य मार्गसरसः प्रस्तुतस्य दातुश्च प्रशंसा इति नेयमप्रस्तुतप्रशंसा किंतु समासोक्तिरेव ॥ ३४२ ॥

व्याजस्तुतिं लक्षयति—यदीति । यदीति यदर्थेऽव्ययम् । निन्दन्निव यत् स्तौति असौ व्याजस्तुतिः स्मृता । व्याजेन निन्दाछलेन व्यञ्जनया प्रतीयमाना स्तुतिः व्याजस्तुतिः इति अवयवार्थः । अत्र इवशब्देन निन्दायाः वास्तवत्वं निराकृतम् । अत्र दोषाभासाः दोषा इव आभास्यमाना न तु स्वरूपतो दोषाः एतादृशा गुणाः एव सांनिधिं सांनिध्यं समुपवेशमित्यर्थः लभन्ते प्राप्नुवन्ति । निन्दन्निव स्तौतीति स्तुवन्निव निन्दति इत्यस्याप्युपलक्षकम् । तथा च निन्दाव्याजेन स्तुतिः स्तुतिव्याजेन निन्दा च व्याजस्तुतिरिति पर्यवसितम् । उभयत्र वैचित्र्यस्य समानत्वात् । द्वितीयप्रभेदे व्याजरूपा स्तुतिः इति समासः ।

---

ii. 342—राजानुवर्तिना for राजानुवर्तन N;—राजानुवृत्तिसंक्लेश्य for राजानुवर्तनक्लेश V.

ii. 343—मता for स्मृता J, V, D (marginal emendation).

दोषाभासा गुणा एव लभन्ते यत्र संनिधिम् ॥३४३॥
तापसेनापि रामेण जितेयं भूतधारिणी ।
त्वया राज्ञापि सैवेयं जिता मा भून्मदस्तव ॥ ३४४ ॥
पुंसः पुराणादाच्छिद्य श्रीस्त्वया परिभुज्यते ।

उक्तं च प्रकाशकारेण—व्याजस्तुतिर्मुखे निन्दा स्तुतिर्वा रूढिरन्यथा । इति । निन्दया स्तुतेरुदाहरणानि अग्रे मूले एव दर्शितानि स्तुत्या निन्दायास्तु प्रकाशे—

हे हेलाजितबोधिसत्त्व वचसां किं विस्तरैस्तोयधे
नास्ति त्वत्सदृशः परः परहिताधाने गृहीतव्रतः ।
तृष्यत्पान्थपरोपकारघटनावैमुख्यलब्धायशो-
भारप्रोद्वहने करोषि कृपया साहाय्यकं यन्मरोः ॥

इति । अत्र समुद्रस्य स्तुत्या निन्दाप्रतिपादनं चमत्कारं दर्शयति इति व्याजस्तुतिः ॥ ३४३ ॥

व्याजस्तुतिमुदाहरति—तापसेनेति । तापसेन तपस्विना चतुरङ्गसैन्य-शून्येनेति ध्वनिः । रामेण परशुरामेण इयं भूतधारिणी पृथ्वी जिता । त्वया राज्ञापि चतुरङ्गसाधनसंपन्नेनापि सैवेयं तावती एव न तु अधिका जिता अतः पृथ्वीजये तव मदः गर्वः मा भूत् मा भवतु । अत्र साधन-शून्येन रामेण जितायाः भूमेः साधनसंपन्नेन विहितो जयो न प्रस्तु-तस्य राज्ञः स्तुतये इति आपाततो निन्दा प्रतीयते । तया च निन्दया भगवदवतारभूतेन महादेवाल्लब्धपरशुना भार्गवेण या पृथ्वी जिता सा तावती एव त्वया मानवेन जिता इति महती स्तुतिः गम्यते इति व्याजस्तुतिः ॥ ३४४ ॥

अलंकारान्तरसंबद्धेयं चमत्कारातिशयाय भवतीति अर्थश्लेषमूलां तामुदाहरति—पुंस इति । हे राजन् त्वया पुराणात् आद्यात् जरठाच्चेति ध्वनिः पुंसः श्रीः लक्ष्मीः संपच्च आच्छिद्य आकृष्य परिभुज्यते । इक्ष्वाकु-वंशस्य यत्र रामादयो परदारान् मातृवदपश्यन् तादृशवंशस्य तादृशवंशो-

---

ii. 343—गुणायैव for गुणा एव V;—यत्र for यत्र J, P, B, R, V; नात्र D;—केपि for एव D.

ii. 344—भूति for भूत D;—सैवेयमलो for सैवेयं जिता V.

राजन्निक्ष्वाकुवंशस्य किमिदं तव युज्यते ॥ ३४५ ॥
भुजङ्गभोगसंसक्ता कलत्रं तव मेदिनी ।
अहंकारः परां कोटिमारोहति कुतस्तव ॥ ३४६ ॥
इति श्लेषानुविद्धानामन्येषां चोपलक्ष्यताम् ।
व्याजस्तुतिप्रकाराणामपर्यन्तः प्रविस्तरः ॥ ३४७ ॥

॥ इति व्याजस्तुतिः ॥

त्पन्नस्येत्यर्थः। तव इदं श्रियोपहरणं किं युज्यते। आदिपुरुषादाकृष्टायाः
६ लक्ष्म्याः परिभोग इक्ष्वाकुवंश्यस्य ते न समुचितः इति मुखतः प्रतीतया निन्दया प्रभूतास्ते संपदः इति स्तुतिः प्रतीयते इति व्याजस्तुतिः। अत्र पुराणपदे श्रीपदे च श्लेषः स चार्थः पर्यायसहत्वात्। अतः अर्थश्लेष-
९ मूलेयं व्याजस्तुतिः ॥३४५॥

शब्दश्लेषमूलामुदाहरति—भुजंगेति। तव कलत्रं भार्या परिपाल्याश्च मेदिनी भुजंगाः विटाः सर्पाश्च तेषां भोगाः उपभोगाः फटाश्च तत्र संसक्ता
३ अनुरक्ता पक्षे तैः सक्ता आवृता। एवं स्थिते तव अहंकारः परां कोटिं कुतः आरोहति। अत्र निन्दया त्वं सार्वभौमोसीति प्रतीयते इति व्याजस्तुतिः सा च भुजंगादिशब्दानामनेकार्थत्वात् शब्दश्लेषमूला ॥३४६॥

व्याजोक्तिमुपसंहरति—इतीति। इति एवंप्रकारेण श्लेषानुविद्धानां श्लेषसंबद्धानां तथा अन्येषाम् अन्यालंकारसंबद्धानां व्याजस्तुतिप्रकाराणां
३ व्याजस्तुतेः प्रकाराणां प्रभेदानां विस्तरः अपर्यन्तः सीमाशून्यः अतः सः स्वबुद्धयैवोपलक्ष्यताम् अवगम्यताम् न सर्वः कथयितुं पार्यते इति भावः ॥ ३४७ ॥

---

ii. 345—वंश्यस्य for वंशस्य an emendation of *P* adopted by B; all Mss. with the possible exception of J read वंशस्य.

ii. 346—संक्रान्ता for संसक्ता Subh; Cs apparently reads संयुक्ता, though it is probably a scribal error as elsewhere he reads as we do.

ii. 347—लक्षणम् for लक्ष्यताम् D;—अपर्यन्तस्तु विस्तरः for अपर्यन्तः प्रविस्तरः P, B, D, M.

अर्थान्तरप्रवृत्तेन किंचित् तत्सदृशं फलम् ।
सदसद्वा निदर्श्येत यदि तत् स्यान्निदर्शनम् ॥ ३४८ ॥
उदयन्नेव सविता पद्मेष्वर्पयति श्रियम् ।
विभावयितुमृद्धीनां फलं सुहृदनुग्रहम् ॥ ३४९ ॥
याति चन्द्रांशुभिः स्पृष्टा ध्वान्तराजी पराभवम् ।

निदर्शनं लक्षयति—अर्थान्तरेति। निदर्शनीयादन्यस्मिन् कार्यान्तरे प्रवृत्तेन केनचित् किंचित् किमपि तस्य अर्थान्तरस्य सदृशं सत् उत्तमम् असत् अपकृष्टं वा फलं निदर्श्येत प्रदर्श्येत यदि इति यदर्थे। तत् निदर्शनम् तन्नामकालंकारः। निदर्शना इति संज्ञायाः स्त्रीत्वं बहुभिरङ्गीकृतमस्ति। नव्यानां मतेन इयं संभवद्वस्तुसंबन्धनिबन्धना निदर्शना। असंभवन्नपि वस्तुसंबन्धो यत्र सादृश्यं दर्शयति तत्रापि असंभवन्वस्तुनिदर्शना। तथाचोक्तं प्रकाशे—अभवन्वस्तुसंबन्ध उपमापरिकल्पकः इति। परे तु अयं द्वितीयः प्रकारः उपमायामेवान्तर्भवतीति न ग्रन्थकर्त्रा दर्शित इत्याहुः ॥ ३४८ ॥

सत्फलनिदर्शनं दर्शयति—उदयन्निति। एष सविता उदयन् उद्गच्छन् उन्नतिं प्राप्नुवंश्च ऋद्धीनां संपत्तीनां फलं सुहृदनुग्रहं बन्धूपकरणम् इति विभावयितुं ज्ञापयितुं पद्मेषु श्रियम् अर्पयति। अत्र पद्मेषु श्रीप्रदानोन्मुखेन उदयशालिना सवित्रा सुहृदनुग्रहरूपमुदयफलं निदर्श्यते तच्च उत्कृष्टत्वात् सद्रूपमिति सत्फलनिदर्शनमिदम् ॥ ३४९ ॥

असत्फलं निदर्शनमुदाहरति—यातीति। चन्द्रांशुभिः स्पृष्टा ध्वान्तराजी तमःपङ्क्तिः राजविरुद्धानां नृपतिप्रतिकूलानां चन्द्रविरुद्धानां च

---

ii. 348—निर्दिश्येत for निदर्श्येत D, Cs;—यत् तु for यदि Pn, B;—सा स्यान्निदर्शना for तत् स्यान्निदर्शनम् Pn, B;—स्यात् तन्निदर्शनम् N, M.

ii. 349—एष for एव P, B, R;—विभावयति वृद्धीनां for विभावयितुमृद्धीनां V;—विभावयन् समृद्धीनां Rn, Subh;—सुहृदनुग्रहः for सुहृदनुग्रहम् N, V, J.

ii. 350—पराजयम् for पराभवम् Cs.

सद्यो राजविरुद्धानां सूचयन्ती दुरन्तताम् ॥ ३५० ॥

॥ इति निदर्शनम् ॥

सहोक्तिः सहभावस्य कथनं गुणकर्मणाम् ।

दुरन्ततां दुःखावसानं सूचयन्ती पराभवं विनाशं याति। अत्र चन्द्रमरीचिभिः परिभूयमाना तमस्ततिः राजद्रोहिणि दुरन्ततारूपमपकृष्टं फलं निदर्शयति इति असत्फलनिदर्शनमिदम् । अभवन्वस्तुसंबन्धनिबन्धनायाः निदर्शनायाः उदाहरणानि प्रकाशादौ द्रष्टव्यानि ॥ ३५० ॥

सहोक्तिं लक्षयति—सहोक्तिरिति। गुणकर्मणाम् कर्मशब्दोत्र क्रियावाची बहुवचनेन द्रव्यादीनां संग्रहः । तथा च गुणक्रियादीनां सहभावेन साहित्येन कथनं सहोक्तिः । संबन्धिभेदेन भिन्नयोरपि गुणयोः क्रिययोर्वा सहार्थस्य सामर्थ्येन एकेन वाचकेन यत् एककालीनतया प्रतिपादनं सा सहोक्तिरिति भावः । तदुक्तं प्रकाशकृता—सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम् । इति। अत्राप्यलंकारसामान्यलक्षणप्राप्तं हृद्यत्वमपेक्ष्यते एव । तच्च हृद्यत्वमत्र अतिशयोक्तिमूलकत्वेनाभिप्रेतम् । तेन पुत्रेण सहागतः पिता इत्यत्र नालंकारः । अत्र धर्मिणां गुणक्रियादिभिः युगपदन्वयः तुल्ययोगितायां तु धर्मिभिः सह इति ततो भेदः । इदमत्रावधेयम् । यत्र सहयुक्तेप्रधाने इति सूत्रेण सहार्थयोगे अप्रधाने तृतीया तत्रैवायमलंकारः । गुणप्रधानभावावच्छिन्नयोः शब्दार्थमर्यादया एकधर्मसंबन्धस्य तत्रैवावस्थितेः । अतः—शशिना च निशा निशया च शशी शशिना निशया च विभाति नभः । इत्यादौ नायमलंकारः । अत्र हेतौ इति सूत्रेण हेत्वर्थे तृतीया । तथा च हेतुभूतेन शशिना निशा शोभते इति वाक्यार्थः ॥ एवं पूर्वार्धेन सहोक्तिं लक्षयित्वा उत्तरार्धेन परिवृत्यलंकारं लक्षयति । अर्थानां वस्तूनां यः विनिमयः प्रतिदानं सा परिवृत्तिः स्मृता । इयं हि परिवृत्तिः समेन समस्य अधिकेन न्यूनस्य न्यूनेन चाधिकस्य इति त्रिप्रकारा भवति । अत्र विनिमयः कविप्रतिभाकल्पित एवापेक्ष्यते तत्रैव चमत्कारात् ।

---

ii. 351—सहभावेन for सहभावस्य J, P, B, D (marginally changed into सहभावस्य), M.

अर्थानां यो विनिमयः परिवृत्तिस्तु सा यथा ॥ ३५१ ॥
सह दीर्घा मम श्वासैरिमाः संप्रति रात्रयः ।
पाण्डुराश्च ममैवाङ्गैः सह ताश्चन्द्रभूषणाः ॥ ३५२ ॥

तेन क्रीणन्ति यत्र मुक्ताभिर्बदराण्यपि बालिकाः । इत्यत्र नेयम् ॥ विनि-
२१ मयश्च केनचिद्दत्तेन स्वकीयेन वस्तुना परकीयस्य वस्तुनः आदानम् । तेन किमित्यपास्याभरणानि यौवने धृतं त्वया वार्धकशोभि वल्कलम् । इत्यत्र नायमलंकारः । भोजराजस्तु नैतदनुमन्यते । स च व्यत्ययेपि परि-
२४ वृत्तिं स्वीकरोति । तदाह (iii. 29)—

व्यत्ययो वस्तुनोर्यस्तु यो वा विनिमयो मिथः ।
परिवृत्तिरिहोक्ता सा काव्यालंकारलक्षणे ॥ इति ।

२७ व्यत्ययो नाम एकस्थानस्थितस्य वस्तुनः स्थानान्तरप्राप्तिः । यथा—

कुमुदवनमपश्रि श्रीमदम्भोजखण्डं
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः ।
उदयमहिमरश्मिर्याति चास्तं हिमांशु-
र्हतविधिललितानां हा विचित्रो विपाकः ॥

३२ इति सरस्वतीकण्ठाभरणादौ द्रष्टव्यम् ॥ ३५१ ॥

प्रथमोद्दिष्टां सहोक्तिमुदाहरति—सहेति । संप्रति विरहावस्थायामिमाः रात्रयः मम श्वासैः सह दीर्घाः । ताश्चन्द्रभूषणाः सज्योत्स्नाका इत्यर्थः
३ रात्रयः ममैवाङ्गैः सह पाण्डुराः । विरहिण्या उक्तिरियम् । अत्र दीर्घत्वं पाण्डुरत्वं च गुणौ तौ तु संबन्धिभेदात् भिन्नावपि सहार्थबलादेकेनैव पदेन कथितौ । तत्र च प्रथमान्तपदस्य साक्षादन्वयः तृतीयान्तपदस्य सहश-
६ ब्दार्थान्वयबलादिति ज्ञेयम् । अत्र रात्रिश्वासाङ्गानां गुणसंबन्धे सहभावात् गुणसहोक्तिरियम् । सहभावसाधारण्येपि यत्र कार्यकारणभावस्य वैचित्र्यं तत्र कार्यसहजचित्रहेतुरलंकारः । यत्र तु कार्यकारणभावं विना
९ सहभावः तत्र सहोक्तिरित्युभयोः विषयभेदः । अत्र रात्रिश्वासादीनां न कार्यकारणभावः द्वयोरपि विरहजन्यत्वादिति दिक् ॥ ३५२ ॥

---

ii. 351—स्मृता for यथा P, B, R.
ii. 352—पाण्डराश्च for पाण्डुराश्च V, Cs;—सहिताः for सह ताः D;—प्राणैः, for श्वासैः Rn.

वर्धते सह पान्थानां मूर्छया चूतमञ्जरी ।
पतन्ति च समं तेषामसुभिर्मलयानिलाः ॥ ३५३ ॥
कोकिलालापसुभगाः सुगन्धिवनवायवः ।
यान्ति सार्धं जनानन्दैर्वृद्धिं सुरभिवासराः ॥ ३५४ ॥

क्रियासहोक्तिं दर्शयति—वर्धते इति । पान्थानां प्रवासिनां विरहिणां मूर्छया सह चूतमञ्जरी वर्धते तेषामसुभिः प्राणैः समं मलयानिलाः
३ दक्षिणवाताः पतन्ति । असुभिरित्यत्र अश्रुभिरिति पाठो दृश्यते सोपि युक्त एव । अत्र वर्धनपतनक्रिये सहभावेन मूर्छाचूतमञ्जरीभ्यां मलयानिलासुभ्यां च संबद्धे चमत्कृतिविशेषमावहत इति सहोक्तिरलंकारः ।
६ अन्वयप्रकारस्तु पूर्ववदेव । अत्र च यदि मूर्छावृद्धिचूतमञ्जरीवृद्ध्योः असुपतनमलयानिलपतनयोश्च वसन्तजन्यत्वमभिप्रेतं तदा परस्परकार्यकारणभावसंबन्धाभावान्न चित्रहेतुना सांकर्यम् । यदि च चूतमञ्जरी-
९ वृद्ध्या मूर्छावृद्धिः मलयानिलपतनेन च असुपतनमिति अभिप्रेतं तदा चित्रहेतुना सहास्य सांकर्यम् इति प्रेमचन्द्रशर्माणः । अपरे तु तादृशकार्यकारणभानस्य नैवात्र विवक्षा इति शुद्धोदाहरणमेवेत्याहुः । भोजराजस्तु इयं
१२ विविक्तक्रियासमावेशा वैसादृश्यवती सहोक्तिरित्याह ॥ ३५३ ॥

कोकिलेति । सुरभिवासराः वसन्तदिवसाः जनानन्दैः सह जनप्रमोदैः सह वृद्धिं यान्ति । तान् दिवसान् वर्णयति कोकिलेति । कोकिलानाम्
१ आलापः मधुरः येषु ते । सुगन्धयः शोभनगन्धवन्तो वनवायवः दक्षिणानिला यत्र ते । सहशब्दप्रयोगे एवायमलंकारः इति भ्रमनिरासाय सार्धपदोपादानेनेदमुदाहरणमिति प्रेमचन्द्रादयः । वृद्धिरूपस्य गुणस्य
६ व्याप्तिरूपस्य कर्मणश्च तुल्यतया वचनात् एषा गुणक्रियासहोक्तिरिति तरुणवाचस्पत्यादयः । भोजराजस्तु विविक्तकर्तृक्रियासमावेशवैसादृश्यवती इयं सहोक्तिरित्याह ॥ ३५४ ॥

---

ii. 353—वहन्ति for पतन्ति R, Cs, Cb;—अश्रुभिः for असुभिः V, M, Pn.

ii. 354—वृद्धिं for सार्धं and समं for वृद्धिं D;—लौकिकालाप for कोकिलालाप V.

इत्युदाहृतयो दत्ताः सहोक्तेरत्र काश्चन ।
॥ इति सहोक्तिः ॥
क्रियते परिवृत्तेश्च किंचिद्रूपनिरूपणम् ॥ ३५५ ॥
शस्त्रप्रहारं ददता भुजेन तव भूभुजाम् ।
चिरार्जितं हृतं तेषां यशः कुमुदपाण्डुरम् ॥ ३५६ ॥
॥ इति परिवृत्तिः ॥
आशीर्नामाभिलषिते वस्तुन्याशंसनं यथा ।

सहोक्तिमुपसंहरन् परिवृत्त्युदाहरणं प्रस्तौति—इतीति। इति उक्तप्रकाराः सहोक्तेः काश्चन उदाहृतयः दत्ताः अन्याः स्वयमूहनीयाः । अस्या विस्तरः कण्ठाभरणादिषु द्रष्टव्यः ॥ इदानीं परिवृत्तेश्च उदाहरणेन किंचित् स्वरूपदर्शनं क्रियते ॥ ३५५ ॥

शस्त्रप्रहारमिति। भूभुजां नृपाणां शस्त्रप्रहारं ददता तव भुजेन तेषां चिरार्जितं बहुकालसंवर्धितं कुमुदपाण्डुरं यशः हृतम्। अत्र न्यूनेनाधिकस्य ग्रहणरूपो विनिमयो ज्ञेयः। एवमेव—

दत्वा कटाक्षमेणाक्षी जग्राह हृदयं मम ।
मया तु हृदयं दत्वा गृहीतो मदनज्वरः ॥

इत्यत्र पूर्वार्धे समेन समस्य उत्तरार्धे अधिकेन न्यूनस्य विनिमयः। व्यत्ययविनिमयवती यथा—

लोचनाधरकृता हृतरागा वासिताननविशेषितगन्धा ।
वारुणी परगुणात् स्वगुणानां व्यत्ययं विनिमयं च वितेने ॥

अत्र वारुण्या यदधराद्रागोपहृत्य चक्षुषोर्निक्षिप्तः तेनेयं व्यत्ययवती । यच्च मुखामोदवासितया स्वामोदेन मुखामोदो विशेषितस्तेन विनिमयवती। इति उभयवती परिवृत्तिः। अस्याः विस्तरस्तु सरस्वतीकण्ठाभरणे द्रष्टव्यः ॥ ३५६ ॥

आशिषं लक्षयति—आशीर्नामेति। अभिलषिते इष्टे वस्तुनि आशं-

---

ii. 355—उदाहृतयः प्रोक्ताः for उदाहृतयो दत्ताः D;—निदर्शनम् for निरूपणम् P, B.
ii. 356—प्रहारान् for प्रहारं N, J.

पातु वः परमं ज्योतिरवाङ्मनसगोचरम् ॥ ३५७ ॥
॥ इत्याशीः ॥
अनन्वयससंदेहावुपमास्वेव दर्शितौ ।

सनम् अभिलाषप्रकाशनम् अथवा अभिलषिते प्रिये वस्तुनि सुहृदादिजने
३ आशंसनं शुभप्रार्थनम् आशीर्नामालंकारः। वैचित्र्याभावान्नायमलंकारः
इति बहवो मन्यन्ते। भामहस्तु एतादृशाशंसने वैचित्र्यमङ्गीकृत्य इमा-
५ मलंकारेषु गणयति । तथा चोक्तम् तेन (iii. 54ff.)—

आशीरपि च केषांचिदलंकारतया मता ।
सौहृदस्याविरोधोक्तौ प्रयोगोस्याश्च तद्यथा ॥
अस्मिन्नहीहि सुहृदि प्रणयाभ्यसूया-
९ माश्लिष्य गाढममुमानतमादरेण ।
विन्ध्यं महानिव घनः समयेभिवर्ष-
न्नानन्दजैनयनंवारिभिरुक्षतु त्वाम् ॥
१२ मदान्धमातङ्गविभिन्नसाला हतप्रवीरा द्रुतभीतपौराः ।
त्वत्तेजसा दग्धसमस्ततेजा द्विषां पुरः पश्यतु राजलोकः ॥ इति।

दर्पणकारादयस्तु नाट्ये एव अस्याश्चमत्कारित्वात् नाट्यालंकारे एनां
१५ गणयन्ति । यदुक्तम् (vi. 195 ff.)—आशीराक्रन्दकपटाक्षमागर्वोद्य-
माश्रयाः इत्यारभ्य—इति नाट्यालंकृतयो नाट्यभूषणहेतवः ॥ इत्यन्तम्
१७ तल्लक्षणं तु—आशीरिष्टजनाशंसा इति। उदाहरणम्—

ययातेरिव शर्मिष्ठा पत्युर्बहुमता भव ।
पुत्रं त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥ इति ।

परे तु प्रेयोलंकारविशेषमिमामाहुः ॥ ययेति उदाहरणार्थम् । अवाङ्मन-
२१ सगोचरम् वाङ्मनोविषयातीतम्। तदुक्तं—यतो वाचो निवर्तन्ते अप्राप्य
मनसा सह इति। परमं ज्योतिः परेशः इत्यर्थः वः युष्मान् पातु रक्षतु।
अवाङ्मनसेत्यत्र अचतुरेति सूत्रेणाच् समासांतः ॥ ३५७ ॥

एतावता उद्देशानुरोधेन सर्वानलंकारान् सोदाहरणं व्याख्याय अन्या-
भिमतानां केषांचिदलंकाराणां स्वोक्तेषु अन्तर्भावं दर्शयन् स्वपरिगणनस्य

---

ii. 357—नः for वः R.
ii. 358—अनन्वयश्च संदेह उपमात्वेन for अनन्वयससंदेहावुपमास्वेव V.

उपमारूपकं चापि

३ न्यूनतां परिहरति—अनन्वयेति। तल्लक्षणमाह भामहः—

यत्र तेनैव तस्य स्यादुपमानोपमेयता ।
असादृश्यविवक्षातस्तमित्याहुरनन्वयम् ॥ इति ।

६ उदाहरति च—

ताम्बूलरागवलयं स्फुरद्दशनदीधिति ।
इन्दीवराभनयनं तवेव वदनं तव ॥ इति ।

९ ससंदेहं लक्षयति (iii. 42)—

उपमानेन तत्त्वं च भेदं च वदतः पुनः ।
ससंदेहं वचस्तुत्यै ससंदेहं विदुर्यथा ॥ इति ।

१२ उदाहरति च—

किमयं शशी न स दिवा विराजते
कुसुमायुधो न धनुरस्य कौसुमम् ।
इति विस्मयाद्विमृशतो मति-
स्त्वयि वीक्षिते न लभतेर्थनिश्चयम् ॥ इति ।

१७ उपमारूपकं लक्षयति (iii. 34 f.)—

उपमानेन तद्भावमुपमेयस्य साधयत् ।
यां वदन्त्युपमामेतदुपमारूपकं यथा ॥

२० उदाहरति—

समग्रगगनायाममानदण्डो रथाङ्गिणः ।
पादो जयति सिद्धस्त्रीमुखेन्दुनवदर्पणः ॥ इति ।

२३ तत्र एतेषु अलंकारेषु मध्ये अनन्वयस्य—

चन्द्राविन्दयोः कान्तिमतिक्रम्य मुखं तव ।
आत्मनैवाभवत् तुल्यमित्यसाधारणोपमा ॥

२६ इत्यसाधारणोपमायामन्तर्भावः । ससंदेहस्य च—

किं पद्ममन्तर्भान्तालि किं ते लोलेक्षणं मुखम् ।
मम दोलायते चित्तमितीयं संशयोपमा ॥

२९ इति संशयोपमायामन्तर्भावः । उपमारूपकस्य—

रूपकेष्वेव दर्शितम् ॥ ३५८ ॥

उत्प्रेक्षाभेद एवासावुत्प्रेक्षावयवोपि च ।
नानालंकारसंसृष्टिः संसृष्टिस्तु निगद्यते ॥ ३५९ ॥

इष्टं साधर्म्यवैधर्म्यदर्शनाद्गौणमुख्ययोः ।
उपमाव्यतिरेकाख्यं रूपकद्वितयं यथा ॥

इति रूपकप्रभेदे एव अन्तर्भावः । तस्मादेतेषामनुक्त्या न न्यूनतास्माक-
३३ मिति भावः ॥ ३५८ ॥

उत्प्रेक्षेति । उत्प्रेक्षावयवो नामालंकारः । तदाह भामहः (iii. 70)—

श्लिष्टस्यार्थेन संयुक्तः किंचिदुत्प्रेक्षयान्वितः ।
रूपकार्थेन च पुनरुत्प्रेक्षावयवो यथा ॥
तुल्योदयावसानत्वाद्गतेस्तं प्रति भास्वति ।
वासाय वासरः क्लान्तो विशतीव तमो गृहम् ॥ इति ।

६ असौ उत्प्रेक्षाभेदः एव श्लेषरूपकादिसंकीर्णा उत्प्रेक्षैव इति भावः । श्लेषोपमारूपकादिभिः प्राणितायाः उत्प्रेक्षाया प्रेमचन्द्रशर्मभिः प्रदत्तानि उदाहरणानि तत एव द्रष्टव्यानि । एवमेव दृष्टान्तस्योपमायाम् उल्लेख-
९ परिणामयोः रूपके कारणमालायाश्च हेतौ यथायथमन्तर्भावो ज्ञेयः ॥ संसृष्टिं लक्षयति—नानेति । सजातीयविजातीयविविधानामलंकाराणां संसृष्टिः एकत्र संसर्गः संसृष्टिः तदाख्यमलंकारान्तरं निगद्यते संग-
१२ मेन वैचित्र्यविशेषात् पृथक्त्वेन कथ्यते । यथा लौकिकहाराद्यलंकाराणां मिथः संसर्गेण पृथक् चारुतातिशयजनकतया गुच्छगुच्छार्धगोस्तनादि-संज्ञया पृथगलंकारत्वव्यपदेशः तथा संकीर्णानां काव्यालंकाराणामपि
१५ पृथक् चारुताप्रत्यायकतया पृथगलंकारत्वेन संसृष्टिरिति संज्ञया व्यपदेशः इति प्रेमचन्द्रशर्माणः ॥ ३५९ ॥

---

ii. 358—कीर्तितम् for दर्शितम् J.

ii. 359—उपमावयवो for उत्प्रेक्षावयवो D (marginal emendation);—संसृष्टेः for संसृष्टिः R;—संकीर्ण तु for संसृष्टिस्तु J, P, B, D, M;—निगच्छते for निगद्यते M.

अङ्गाङ्गिभावावस्थानं सर्वेषां समकक्षता ।
इत्यलंकारसंसृष्टेर्लक्षणीया द्वयी गतिः ॥ ३६० ॥
आक्षिपन्त्यरविन्दानि तव मुग्धे मुखश्रियम् ।
कोशदण्डसमग्राणां किमेषामस्ति दुष्करम् ॥ ३६१ ॥
[लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।

संसृष्टेः भेदान् दर्शयति—अङ्गाङ्गिभावमिति। अङ्गाङ्गिभावेन गौण-प्रधानभावेन अवस्थानम् अवस्थितिः। तथा सर्वेषां समकक्षता तुल्यबलता अङ्गाङ्गिभावं विना समप्राधान्येन अवस्थानम् इत्यपरा। इति एवंप्रकारा अलंकारसंसृष्टेः द्वयी गतिः भेदद्वयं लक्षणीयं ज्ञेयम्। अत्र परे एकानुप्रवेशे संदिग्धत्वे अङ्गाङ्गित्वे च संसृष्टेः संकरसंज्ञा समकक्षायां तु संसृष्टिसंज्ञा इति आहुः ॥ ३६० ॥

अङ्गाङ्गिभावसंसृष्टिमुदाहरति—आक्षिपन्तीति। हे मुग्धे तव मुखश्रियं वदनलक्ष्मीम् अरविन्दानि आक्षिपन्ति तिरस्कुर्वन्ति। आक्षिपधातुरत्रौ-पम्यद्योतकः। तदुक्तं पूर्वम्—आक्रोशत्यवजानाति कदर्थयति निन्दति। उपमायामिमे प्रोक्ताः इति। तथा चात्रोपमालंकारः स च प्रधानः। कोषः धनराशिः कुङ्मलश्च दण्डः सामादिषु चतुर्थोपायः नालश्च ताभ्यां समग्राणां पूर्णानाम् एषां दुष्करं किम् अस्ति। अत्र श्लेषानुप्राणितहेत्व-लंकारः उपमाया अङ्गमिति केचित्। श्लेषानुप्राणितार्थान्तरन्यासः तदङ्गमिति अपरे तदा चतुर्थचरणे न किंचिदिह दुष्करम् इति पाठः समीचिनः। अन्यथा एषां कमलानाम् इत्यर्थे कमलानां तत्कर्तृकमुखाक्षे-पस्य समर्थनं दुर्घटं स्यात् एकस्यैव समर्थ्यसमर्थकत्वायोगात्। तथा-चात्र श्लेषानुविद्धोर्थान्तरन्यासः उपमाया अङ्गम् उपमा च प्रधाना इति अङ्गाङ्गिभावसंसृष्टिः ॥ ३६१ ॥

समकक्षतासंसृष्टिमुदाहरति—लिम्पतीति। कृष्णपक्षप्रदोषवर्णनमेतत्।

---

ii. 360—समकक्ष्यता for समकक्षता N, R; समलक्ष्यता M; समकां-क्षता D; समवाक्यता V;—भावसंस्थानं for भावावस्थानं R;—द्वयां गतिं for द्वयी गतिः M.

ii. 361—आक्षिपन्तेरविन्दानि for आक्षिपन्त्यरविन्दानि V; आक्षिप्य-न्त्यरविन्दानि N;—मुग्धे तव for तव मुग्धे J, P, B, R, V; प्रिये तव M;—अपि for अस्ति V.

असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता ॥ ३६२ ॥]
श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम् ।
भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम् ॥३६३॥
॥ इति संसृष्टिः ॥
भाविकत्वमिति प्राहुः प्रबन्धविषयं गुणम् ।

तमः अङ्गानि लिम्पतीव। नभः अञ्जनं वर्षतीव। असत्पुरुषसेवेव नीच-
३ जनसेवेव दृष्टिः निष्फलतां वस्तुनिरीक्षणासामर्थ्यं वैफल्यं प्राप्ता। अत्र पूर्वार्धे उत्प्रेक्षाद्वयम् उत्तरार्धे उपमा। तासां परस्परानिरपेक्षतयाव-
स्थानात् समकक्षसंसृष्टचलंकारः। अयं विभिन्नाश्रयगतः। एकाश्रयगतो
६ यथा—कुरवका रवकारणतां ययुः इति। अत्र रवकारवका इति वकार-
वकार इति च यमकयोः एवम् संसारध्वान्तविध्वंसहंसः कंसनिषूदनः इत्यत्र रूपकानुप्रासयोश्च एकत्र समकक्षतयावस्थानम्। मुखचन्द्रः शोभते इत्यत्र
९ साधकबाधकाभावादुपमारूपकयोः एकाश्रयगता संदेहसंसृष्टिः ॥३६२॥

श्लेषस्य बह्वलंकारव्याप्तिं कथयति—श्लेष इति। श्लेषः प्रायः सर्वासु वक्रोक्तिषु भणितिभङ्गीरूपालंकारेषु श्रियं शोभां पुष्णाति। वक्रोक्तिषु
३ इत्युक्त्या तत्समानकक्षां स्वभावोक्तिं स्मृत्वा काव्यवाङ्मयस्य द्वैविध्यं निर्दिशति—भिन्नमिति। स्वभावोक्तिः वस्तुस्वरूपवर्णनं वक्रोक्तिश्च सा-
लंकारवचनम् इति वाङ्मयं काव्यं द्विधा भिन्नम् ॥ ३६३ ॥

अथ सर्वालंकारसंग्राहकं भाविकं लक्षयति—तद्भाविकमिति। प्रबन्धाः महाकाव्यनाटकाख्यायिकादयः तद्विषयं तद्गतं गुणं चमत्काराधायकधर्म-

---

ii. 362—Extra verse given by P as an illustration of समकक्षसंसृष्टि and B follows him. But there is no Ms. authority for it. The stanza is given in Cb, which probably was P's source for its introduction in the Text. We preserve the stanza so as not to disturb the numbering of the Editio Princeps. For निष्फलतां there is the variant विफलतां.

ii. 364—भाविकं तमिति for भाविकत्वमिति R, Cs, Cb; तं भाविकमिति Ch, V; तद्भाविकमिति P, B.

भावः कवेरभिप्रायः काव्येष्वासिद्धि यः स्थितः॥३६४॥
परस्परोपकारित्वं सर्वेषां वस्तुपर्वणाम् ।
विशेषणानां व्यर्थानामक्रिया स्थानवर्णना ॥ ३६५ ॥

१ विशेषं तत् प्रसिद्धं भाविकम् तन्नामालंकारः इति प्राहुः । संज्ञार्थं विशदयति भावः इति। कवेरभिप्रायः भावः। स च भावः काव्येषु आसिद्धि समाप्तिपर्यन्तं यः स्थितः तेन चास्यालंकारस्य न केवलं ६ पदवाक्यगतत्वम् अपि तु प्रबन्धगतत्वमपीति बोध्यम् । प्रकाशकाराः—प्रत्यक्षा इव यद्भावाः क्रियन्ते भूतभाविनः। तद्भाविकम्। इति लक्षयामासुः । तन्न संज्ञार्थानुगामीति ज्ञेयम् ॥ ३६४ ॥

कवेरभिप्रायविषयीभूतान् कांश्चित् प्रबन्धधर्मान् कथयति—परस्परोपकारित्वमिति । सर्वेषां वस्तुपर्वणाम् आधिकारिकेतिवृत्तानि वस्तूनि प्राकर-
३ णिकेति वृत्तानि पर्वाणि । तदाह धनंजयः—वस्तु द्विधा । तत्राधिकारिकं मुख्यमङ्गं प्रासङ्गिकं विदुः । इति । यथा रामायणे रामसीतावृत्तान्तः आधिकारिकम् । सुग्रीवबिभीषणादिवृत्तान्तः प्रासङ्गिकम् । सर्वेषां तेषां परस्परोपकारित्वं कवेरभिप्रेतनगरसरित्समुद्रादिवर्णनम् अस्तोदयषड्ऋतुवर्णनं च परंपरया साक्षाद्वा प्रधानमुपकरोति इति ज्ञेयम् । तथा व्यर्थानां प्रकृतार्थापरिपोषकाणां विशेषणानाम् अक्रिया अविधानम्
९ अप्रयोग इत्यर्थः । अयं परिकरालंकारः इति प्रकाशकारादयः । अपरे तु अपुष्टत्वदोषाभावोयम् नायमलंकारः इत्याहुः । तथा स्थानानां प्रकृतोपयुक्तानां विषयाणां वर्णना । इयमपि कवेरभिप्रायविषयः । एतेषां
१२ सर्वेषां तद्भाविकं विदुः इति अग्रिमश्लोकस्थपदेन अन्वयः ॥ ३६५ ॥

---

ii. 364—संस्थितः for यः स्थितः P, B, V; अवस्थितः D;—काव्येष्वस्य व्यवस्थितिः for काव्येष्वासिद्धि यः स्थितः R, M;—शास्त्रेषु for काव्येषु N.

ii. 365—वस्तुवर्णनम् for वस्तुपर्वणाम् D;—व्यक्तानां for व्यर्थानां N;—स्थानवर्णनम् for स्थानवर्णना N, D, M;—धर्मणाम् for पर्वणाम् and सा क्रिया for अक्रिया probably scribal error in Cs.

व्यक्तिरुक्तिक्रमबलाद्गम्भीरस्यापि वस्तुनः ।
भावायत्तमिदं सर्वमिति तद्भाविकं विदुः ॥ ३६६ ॥
॥ इति भाविकम् ॥

यच्च संध्यङ्गवृत्त्यङ्गलक्षणाद्यागमान्तरे ।
व्यावर्णितमिदं चेष्टमलंकारतयैव नः ॥ ३६७ ॥
पन्थाः स एष विवृतः परिमाणवृत्त्या
संक्षिप्य विस्तरमनन्तमलंक्रियाणाम् ।

व्यक्तिरिति । उक्तिक्रमबलात् वचनोपन्यासानुक्रमसामर्थ्यात् गम्भीरस्यापि गूढस्यापि वस्तुनः अर्थस्य व्यक्तिः अभिव्यक्तिः । इदं सर्वं भावा-
३ यत्तं कवेरभिप्रायविषयम् इति भावायत्तत्वात् तद्भाविकं विदुः ॥३६६॥

यच्चेति । सन्धयः—मुखप्रतिमुखे गर्भः सावमर्शोथ संहृतिः । इति पञ्च । तेषामङ्गानि—उपक्षेपः परिकरः परिन्यासो विलोभनम् । इत्यादीनि
३ चतुःषष्टिसंख्याकानि । वृत्तयः—

शृङ्गारे कैशिकी वीरे सात्वत्यारभटी पुनः ।
रसे रौद्रे च बीभत्से वृत्तिः सर्वत्र भारती ॥

६ इति नियतस्थानाश्चतस्रः । तासामङ्गानि—नर्मतत्स्फूर्जतत्स्फोटतद्भैश्चतुरङ्गिका । इत्यादीनि षोडश । लक्षणानि भूषणाक्षरसंघातादीनि षट्त्रिंशत् । आदिना नाट्यालंकारदीनां ग्रहणम् । एतत् सर्वमागमान्तरे
९ भरतमुनिप्रणीतनाट्यशास्त्रे व्यावर्णितम् विस्तारेण कथितम् । तदिदं सर्वं नः अलंकारतयैवेष्टम् । तत्र केषांचित् स्वभावाख्यानादौ अन्तर्भावः केषांचित् भाविके इति यथायथं विषयानुरोधेन ज्ञातव्यम् ॥ ३६७ ॥

अलंकाराणां विस्तारं निवेदयन्नुपसंहरति—पन्थाः स एष इति । अलंक्रियाणां एतावत्पर्यन्तं विवृतानां स्वभावाख्यानाद्यलंकाराणाम् अनन्तं मर्या-
३ दाशून्यं विस्तरं प्रभेदविस्तारं संहृत्य कात्स्न्र्येन वक्तुमशक्यतया संक्षेपेण प्रकटभेदं संगृह्य परिमाणवृत्त्या परिमितत्वेन स एष पन्थाः विवृतः

---

ii. 396—गभीरस्य for गम्भीरस्य M;—इतीदं भाविकं for इति तद्भाविकं M.

ii. 368—एव for एष B, N;—संहृत्य for संक्षिप्य P, J, B.

वाचामतीत्य विषयं परिवर्तमाना-
नभ्यास एव विवरीतुमलं विशेषान् ॥ ३६८ ॥

॥ इत्याचार्यदण्डिनः कृतौ काव्यादर्शेऽर्थालंकारविभागो नाम द्वितीयः परिच्छेदः ॥

अलंकारमार्गो दर्शित इत्यर्थः । अनेन मार्गेण सतताभ्यासे कृते सो
६ भ्यास एव अन्यान् प्रभेदान् दर्शयिष्यतीति कथयति—वाचामिति :
वाचां विषयम् अतीत्य परिवर्तमानान् वागगोचरत्वेन कथयितुमशक्यान
इत्यर्थः । एतादृशान् विशेषान् अलंकारप्रभेदान् विवरीतुं विशदीकर्तु
९ अभ्यास एव काव्याभ्यास एव अलं समर्थः । पुनः पुनरालोचनेन ते
ज्ञातव्या इत्यर्थः । इति शम् ॥ ३६८ ॥

॥ इति काव्यादर्शव्याख्यायां प्रभाख्यायां द्वितीयः परिच्छेदः ॥